विश्वविद्याग्रन्थमाला-१४

# श्रीमन्महाभारतम्

**श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-**

**प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्**

# वनपर्व-४

**सम्पादकः**

सि. आर् प्रदीपसिंहाचार्यः चतुर्वेदः

उपसम्पादकाः

देवीप्रसादाचार्यः, विठोबाचार्यः, श्रीनिधिआचार्यः

प्रकाशनम्

वेदवेदान्ताध्यनशोधसंसस्थानम्

नवदेहली, वसन्तकुञ्ज

विश्वविद्याग्रन्थमाला-१४

# **श्रीमन्महाभारतम्** **श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्**

सम्पादकः -
सि. आर् प्रदीपसिंहाचार्यः चतुर्वेदः

प्रकाशनम्

वेदवेदान्ताध्यनशोधसंसस्थानम्

नवदेहली, वसन्तकुञ्ज

पत्राणि - 388 peges

प्रथममुद्रणम् 2021

मुद्रितप्रतयः 250

मूल्यम्-   300

जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्-

श्रीपेजावरअधोक्षजमठः-उडुपि

# श्रीविश्वप्रसन्नतीर्थश्रीपादानाम्

# अनुग्रहसन्देशः

श्रीपेजावरमठाधीशैः यतिकुलचक्रवर्तीत्यादिबिरुदाङ्कितैः अस्मद्गुरुचरणैः श्रीविश्वेशतीर्थश्रीपादैः उत्तरभारतक्षेत्रे माध्वतत्वप्रसारणाय राजधान्यां नवदेहलीप्रदेशे श्रीरामविठ्ठलशिक्षणसेवासमितिमुखेन संस्थापितं वेदवेदान्ताध्ययनशोधसंस्थानम् । महान्तमिमं भारमुदूह्य वेद-वेदान्त-इतिहास-पुराण-काव्यादीनां भाषान्तर-संशोधन-ग्रन्थप्रकाशन-प्रसारणादिनानाकर्मणा श्रीमन्मध्ववेदव्याससेवां कुर्वदिदं संशोधनमन्दिरं माध्वततेर्महान्तम् उपकारं विदधत् अस्मदादरपात्रं वर्तते । संशोधनादिकर्मणि नियुक्ता अस्मच्छिष्या विपश्चितः यावच्छक्ति ग्रन्थादि संशोध्य अनूद्य च व्यास-मध्वसेवां व्यदधुः । तमिमं ग्रन्थवरं संशोधयित्रे विदुषे, प्रकाशयित्रे वेदवेदान्ताध्ययनशोधसंस्थान-कार्यकारिसमित्यै, निदेशकाय च अस्मदुपास्यचरणौ श्रीरामविठ्ठलौ श्रेयो दत्तामिति सम्प्रार्थयामहे ।

इति नारायणस्मृतयः

# निदेशकवचांसि

मानवानां परमपुरुषार्थसाधनायाध्यात्मतत्वज्ञानमावश्यकम् । तच्चोत्तरभारते बहुन्यूनमिति तत्रापि माध्वतत्वज्ञानप्रसारणाय नवदेहलीप्रान्ते श्रीपेजावरमठाधीशैः श्रीविश्वेशतीर्थश्रीमच्चरणैः स्थापितमिदं वेद-वेदान्ताध्ययनशोधसंस्थानम् । परमपूज्यानां परमहंसप्रवराणां यतिकुल-चक्रवर्तिनां श्रीविश्वेशतीर्थश्रीमच्चरणानां तथा तच्छिष्याणां श्रीविश्वप्रसन्न तीर्थश्रीपादानां परमानुग्रहेण मार्गदर्शनेन च वरीवर्धमानमिदं श्रीचरणानां प्रेरणया विश्वविद्याग्रन्थमालानाम्ना विश्वतोमुखतया वेद-वेदान्त-इतिहास-काव्य-व्याकरणादिग्रन्थानां भाषान्तर-प्रकाशन-प्रसरणादि-महत्कर्मणि सहर्षं सोत्साहं समुद्यतम् । अध्येतृसुजनवृन्दश्चानेन ग्रन्थप्रकटनेन समुत्कट-प्रयोजनजातमभिसम्पद्यतामित्यभिकामये ।

विश्वविद्याग्रन्थमालायाः चतुर्दशकुसुमत्वेन ग्रन्थमिमं सारस्वतलोकं प्रति समर्प्यते । शास्त्रज्ञाः सहृदयाः अस्य ग्रन्थस्य स्वागतं व्याहरन्तीति मन्ये । महति कार्येस्मिन् भागभाग्भ्यः सर्वेभ्यः, ग्रन्थस्य सम्पादन-संशोधनकर्मणि सहकृतवद्भ्यः विद्वद्भ्यः, मुद्रकेभ्यश्च अधमर्णोहम् ।

निदेशकः

# किञ्चिन्निवेदनम्

'देशे देशे तथा ग्रन्थान् दृष्ट्वा कतिपयान्' इत्यादि श्रीमदाचार्यैः तात्पर्यनिर्णये अभिहितम् । तेन महाभारते नानाविधाः पाठभेदाः सन्तीति अवगम्यते । पूना महानगरगतभण्डार्कर् प्राच्यविद्यासंशोधनालयेन षट्त्रिंशद्वर्षपर्यन्तं महाभारतमूलपाठमधिकृत्य अधीत्य मुद्रितं च तत् क्रिटिकल्एडिषन्मुखेन । तदेव इदानीम् अत्यन्तप्राचीनपाठान्तरसंवलितः महाभारतपाठः इति अनेकेषां विदुषाम् अभिप्रायः । परन्तु, ततोऽपि अधिकप्राचीनतमपाठः उडुपीनगरस्थनानामठीय-ताळपत्रग्रन्थेषु इदानीं समुपलब्ध इति महान् सन्तोषः ।

पञ्चदशाधिकाः महाभारतताळपत्राः इदानीम् अस्मद्धस्तपथं गताः । तत्पर्यालोचनया मूलपाठनिर्धारणे वयं प्रभवाः स्मः । ताळपत्रगतपाठाः वाविळ्ळप्रेस्द्वारा मुद्रितमहाभारतपाठस्य अत्यन्तसंवादि । यत्र विसंवादस्तत्रापि तात्पर्यनिर्णयानुरोधि पाठ एवात्राहृतः । तदेवं अस्मिन् शुद्धपाठसमीक्षासमये अस्माभिः मूलश्लोकतया पलिमारुमठीयताळपत्रगतपाठः आहृतः । श्लोकसङ्ख्याविषये प्रायः वावीळ्ळक्रम आहृतः । क्वचित् मूलश्लोकाः वावीळ्ळपाठे अदृश्यमाना अपि ताळपत्रे, टि.आर् पाठे, बोरि पाठेपि विद्यमानाः अर्थ-तात्पर्यानुरोधात् अस्मिन् संस्करणे आहृताः ।

एतत्संस्करणाध्ययने अस्माभिराहृतः अध्येतृभिरवश्यं वेदितव्यः विना यद्भदेनेनात्राहृतक्रमानधिगमस्तदत्रैवं निरूप्यते ।

*. क्रिटिकल् एडिषन् मध्ये तालपत्रेषु वाविळ्ळे वा अविद्यमानाः श्लोकाः 'अधिकः/ अथवा ins' इति निर्दिष्टः । तद्यथा -

एतदिच्छाम्यहं श्रोतुं वदतो द्विजसत्तम ।
आनुपूर्व्येण ये चान्ये राजानो वंशधारिणः ।।

(२) व्यासतो for वदतो (क); विस्तरेण द्विजोत्तम (ग); द्विजोत्तमः; तपोधन;

after line 1 ins (६९६) वर्णसङ्करजो धर्मः कथं तं नास्पृशत्तदा ।
जरासञ्चारणं चापि अन्यदेहेषु नः श्रुतम् ।। (अधिकः घपाठे)

* बोरि क्रिटिकल् पुस्तके appendix निर्दिष्टाः केचनश्लोकाः appendix इत्येव

श्लोकाधस्तनभागे निर्दिष्टाः ।

✲. क्वचितु soubstitute इति पाठान्तर एव निर्दिष्टाः ।

✲. श्लोकसङ्ख्याविषये अयं क्रमः अदृतः । प्रारम्भगतसङ्ख्या आपर्वम् अनुवर्तते । अध्यायान्ते आहत-अध्याय-श्लोकसङ्ख्या निर्दिष्टा यथा 'अस्मिन्नध्याये श्लोकाः सन्ति' इत्येवम् ।

✲. भागवतमहाभारतयोः ताळपत्रेषु अयमपि एकः पाठभेदः दरीदृश्यते । भागवतपाठेषु शुक उवाच; परीक्षिदुवाच; राजोवाच इत्यादि पठ्यते क्वचित् । क्वचित् श्रीशुकः इत्येव । महाभारते तु सर्वत्र उवाच इति नैव पठ्यते । कुम्भकोणमुद्रितपुस्तके एवं बोरि पुस्तकेपि उवाचशब्दः पठ्यते । अयं नास्माभिरादृतः । केवलं जनमेजयः; भीमसेनः इत्याद्येव ।

✲ बोरिपुस्तके मध्ये मध्ये अध्यायाः यत्र परिसमाप्यन्ते तत्र वाविळ्ळपुस्तके अध्यायः नैव समाप्यते । एवं टि. आर् कृष्णाचार्यपाठेपि । अत्र प्राचीनतौळवपाठ एव आदृतः । यत्र द्वयोरध्यायोः एकीभावः तत्र बोरिपुस्तकपत्रसङ्ख्या क्वचिद्दत्ता; क्वचिन्नैव ।

✲. line interpretation; आनुपूर्वीव्यत्यासः' यत्र दृश्यते तदपि सूचितः । तत्र निर्देशक्रमः एकरूपतया नैव निर्दिष्टः ।

✲. पर्वारम्भे महाभारततात्पर्यनिर्णयगताः  तत्पर्वकथासङ्ग्रहश्लोकाः उपनिबद्धाः ।

✲. महाभारतकथाविषयानुक्रमणिकापि श्लोकानुसारेण प्रत्यध्यायं विस्तरतो निवेशिता

१✲.यद्यपि  महाभारतलक्षालङ्कारः एम्. एस्. पि द्वारा मुद्रितः । अत्र विद्यमानाध्याय-श्लोकसङ्ख्यादि न वावीळ्ळ-टि.आर् पाठानुसारी इति केवलं विषयमात्रमत्र निवेशितम् । अध्यायसङ्ख्यादि तौळवपाठानुसार्येवेति चावगन्तव्यम् ।।

✲.लक्षालङ्कारे व्याख्याताः श्लोकाः क्वचित् वावीळ्ळपुस्तके नोपलभ्यन्ते । टि.आर् कृष्णाचार्यपाठे उपलभ्यन्त इति तेपि मूलश्लोकतया क्वचिद् ग्राह्या भवन्तीत्यस्माकमाशयः । महन्तः प्रष्टव्याः

✲. मूलश्लोकाः बृहदक्षरै राराज्यन्ते । अधिकश्लोकाः अल्पाक्षरैः मूलश्लोकमध्य एव अर्थानुगुणाः विषयविशेषगर्भिताः मूलश्लोकानां पूर्वं पश्चाद्वा, पूर्वार्ध-उत्तरार्धमध्ये वा अनङ्कितसङ्ख्याः निवेशिताः ।  एतेषां महाभारतान्तर्गतत्वं वा अनन्तर्गतत्वं वा न निश्चेतुं

प्रभवामः ।।

✻. अपिच पर्वानुपर्वसङ्ख्यासङ्ग्रहात्मक-आदिपर्वगत-तृतीयाध्याये प्रतिपर्वं श्लोकसङ्ख्या निर्दिष्टा । सा च प्रायः विसंवादिन्येव एतावत्पर्यन्तं मुद्रितपुस्तकेषु । अस्मिन् संस्करणे तौळवमूलमातृकानुसारेण उपलब्धाः पूर्वमुद्रितश्लोकेभ्यः अधिकश्लोकाः संनिवेशिता इति सप्रमोदमावेदयामः । अतः महाभारतश्लोकसङ्ख्या पूरणी भवतीति विश्वसिमः । आसमाप्ति किमपिच निश्चयेन नोक्तुं प्रभवामश्च ।।

✻.तत्र पाठान्तरदानसमये पूना(बोरि)पाठान्तराणि अपि निर्दिष्टानि । तद्यथा-

एवं पाठान्तरदानसमये आदृताः अपरेपि विशेषाः एवं निर्दिष्टाः –

सर्वमूलग्रन्थटीका-टिप्पणीषु महाभारतपाठः

✻ श्रीमन्मध्वाचार्यैः तत्र तत्र महाभारतवचनानि 'भारते, मोक्षधर्मपर्वणि' इत्यादिरूपेण नामनिर्देशमात्रेण सूचितानि । तानि केचन उपलभ्यन्ते, नोपलब्धानि बहूनि इत्यनेकेषां प्रवादः । अस्माभिः अस्मिन् संस्करणे श्रीमदाचार्योदाहृतवचननां आकरमपि पर्व-अध्याय-श्लोकसङ्ख्या-निर्देशपूर्वकमाकरः प्रादर्शि । यथा -गीताभाष्ये 'अनन्तग अनन्त' इत्येवोदाहृतम् । अस्माभिः अस्य शान्तिपर्वान्तर्गतत्वं संशोध्य '(सर्वमूलो-)गीताभाष्योदाहृत-महाभारतवचनानि 'इति सङ्गृह्य पर्वारम्भे स्थलनिर्देशपूर्वकं १२-१३१-५ इत्येवं निर्दिश्यते ।।

✻ सर्वमूलेषु- महाभारतवचनतया अनुदाहृतान्यपि प्रमणवचनानि 'इतिच' इत्येवं रूपेण निबद्धानि । यथा गीताभाष्ये 'पृथिवी धर्ममूर्धनि' इति च ' इति। एतादृशानि वाक्यान्यपि अस्मदीयमहाभारतसंशोधनावसरे संशोध्य आकरप्रदर्शनपूर्वकं निर्दिष्टानि ।

✻ किञ्च महाभारतवाक्यानि टिप्पणीषु तत्र तत्र प्रासङ्गिकतया उदाहृतानि ।

एवं भागवतयादुपत्ये -शर्यातिकथाप्रसङ्गे आदिपर्ववचनमुदाहृतम् - 'यथोक्तमादिपर्वणि-जिगीषया ततो देवा वव्रिरे.. इत्यारभ्य 'दुहिता वृषपर्वणः ' इत्यन्तः ८० श्लोकाः ।

भरतराट्कथाप्रसङ्गेपि - आदिपर्ववचनम् -'तां विशोध्य तदा राजा देवदूतेन भारत... इत्यारभ्य 'मया शुभे' इत्यन्तो भागः ।

विश्वामित्रप्रसङ्गे गदापर्ववचनमुदाहृतम् -'सतु वव्रे वरं राजन् ब्राह्मणः स्यामहं त्विति ।

तथेति चावदद् ब्रह्मा सर्वलोकपितामहः इति गदापर्वणि' इति ।।

एवं उद्योगपर्ववचनम् -'प्रतिगृह्य तततो धर्मः... विश्वामित्रस्तथाभवत् ।

एवं शान्तिपर्ववचनम् -च्यवनाद्वरदानेन रुचिकस्य ... ब्राह्मण्यं समवाप्तवान् ।।'

एतादृशग्रन्थसमम्पादनकाले सहकृतवभ्द्यः समेभ्यः विद्भ्द्यः धन्यवादः ।।

सम्पादकमण्डली

# आजगरपर्व

## 03- 06- 147Adhyaya

महाभारततततात्पर्यनिर्णये २२ अध्याये

ऊषुश्च चतुरोऽब्दांस्ते पुनर्मेरौ प्रमोदिनः ।। ३१७ ।।

कथाभिर्वासुदेवस्य ध्यानेनाभ्यर्चनेन च ।

ययौ कालः सुखेनैव तेषां विष्णुरतात्मनाम् ।। ३१८ ।।

नैव शत्रूननुत्साद्य नानादाय महद् यशः ।

नाकृत्वा वासुदेवाज्ञां राज्ञां मुख्यगतिर्भवेत् ।। ३१९ ।।

तदन्येषां तु वर्णानां क्षमा बाह्येषु शत्रुषु ।

प्रायो धर्म इति प्रोक्तो हरेराज्ञाऽखिलस्य च ।। ३२० ।।

इति भीमवचः श्रुत्वा ससोदर्यो युधिष्ठिरः ।

राक्षसस्कन्धमारूढः कृष्णया चाऽययौ पुनः ।। ३२१ ।।

## १४८. अष्टचत्वारिंशदधिकशततमोऽध्यायः

अर्जुनसमागमानन्तरं युधिष्ठिरेण गन्धमादनादवतरणाध्यवसायः ।। १ ।। लोमशेन पाण्डवान् प्रति जयशीर्वचनपूर्वकं स्वर्ग प्रति गमनम् ।। २ ।। गन्धमादनादवतीर्णैः पाण्डवैः क्रमेण कैलासवृषपर्वसुबाह्वादिनिवासगमनपूर्वकं पुनर्द्वैतवनमेत्य सरस्वतीतीरे सुखविहरणम् ।। ३ ।।

जनमेजयः

तस्मिन्कृतास्त्रे रथिनां प्रवीरे प्रत्यागते भवनाद्वृत्रहन्तुः ।**

अतः परं किमकुर्वन्त पार्थाः समेत्य शूरेण धनञ्जयेन ।। १ ।।(०१)

वैशम्पायनः

वनेषु तेष्वेव तु ते नरेन्द्राः सहार्जुनेनेन्द्रसमेन वीराः ।**

तस्मिंश्च शैलप्रवरे सुरम्ये धनेश्वराक्रीडगता विजह्रुः ।। २ ।।(०२)

वेश्मानि तान्यप्रतिमानि पश्यन्क्रीडाश्च नानाद्रुमसन्निबद्धाः ।

चचार धन्वी बहुधा नरेन्द्रः सोऽस्त्रेषु यत्तः सततं किरीटी।। ३ ।।(०३)

अवाप्य वासं नरदेवपुत्राः प्रसादजं वैश्रवणस्य राज्ञः ।**

न प्राणिनां ते स्पृहयन्ति राजन्शिवश्च कालः स बभूव तेषाम्।। ४ ।।(०४)

समेत्य पार्थेन यथैकरात्र मूषुः समास्तत्र तदा चतस्रः ।**

पूर्वाश्च षट्ता दश पाण्डवानां शिवा बभूवुर्वसतां वनेषु ।। ५ ।।(०५)

ततोऽब्रवीद्वायुसुतस्तरस्वी जिष्णुश्च राजानमुपोपविश्य।**

यमौ च वीरौ सुरराजकल्पावेकान्तमास्थाय हितं प्रियं च ।। ६ ।।(०६)

---

(०१) (३) धिष्ठानैः; धिष्ठान; ०धिष्ठानां ; (४) प्रयोज्यन्ते; प्रयुज्येत, प्रयुञ्जीथाः;, प्रयुञ्जीत; कथञ्चन,

(०२) ((१)कृतार्थे; हि पार्थे (for कृतास्त्रे ); वरिष्ठे; प्रवीरे; प्रबर्हे (for प्रधाने ) २)शत्रोः (for हन्तुः ); ३) ततः (for अतः ) ; (४) धीरेण (for शूरेण ),

(०३) (१) (अ)नेकेषु (for तेष्वेव ); ततो; तदा; च ते; पुनद् (for तु ते ); (२) क-घ-कर्षाः, समानवीर्याः (for समेन वीरा); (३)तु (for च); शैले (for शैल ); च (for सु ); (४)वने (for गता ),

(०४)(१)वनानि (for वेश्मानि); (अ)पश्यन्; तत्र (for पश्यन्); (२)द्भुत०; विध० (for द्रुम०); संनिरुद्धाः; सनिबद्धाः (for संनिकर्षाः ); (३)नरेंन्द्र; महात्मा (for नरेन्द्रः ); (४)शस्त्रेषु; सोस्त्रेण; योस्त्रेषु (for सोऽच्छेषु ),

(०५) (१)वीरवर्याः (for देवपुत्राः );, (३) प्राणिनो यं०; प्राणिनां स्म;, स्पृहयिष्यन्ति (for ते स्पृह०यन्ति);, राज्यं (for राजञ् );,० (४) चिरं च कालं (for शिवश्च कालः );, च (for स );,

(०६) (२)ऊषा (for ऊषुः );, तदा (for समाम्);, ते च (for तत्र);, तथा समाश् (for तदा ); (३) तु दश; द्वादश; वा दश; तत्र च (for ता दश );, पूर्णाश्च वर्षा दश पा०; पूर्वास्तथा पञ्च च पां, (४) सुखा; समा (for शिवा );, सु,( स); सुखा (for वसतां),

तव प्रतिज्ञां कुरुराज सत्यां चिकीर्षमाणास्तदनु प्रियं च ।
ततो न गच्छाम वनान्यपास्य सुयोधनं सानुचरं निहन्तुम्।। ७ ।।(०१)

एकादशं वर्षमिदं वसामः सुयोधनेनात्तसुखाः सुखार्हाः ।**
तं वञ्चयित्वाधमबुद्धिशीलमज्ञातवासं सुखमाप्नुयाम ।। ८ ।।(०२)

तवाज्ञया पार्थिव निर्विशङ्का विहाय मानं विचरन्वनानि।
समीपवासेन विलोभितास्ते ज्ञास्यन्ति नास्मानपकृष्टदेशान् ।। ९ ।।(०३)

लक्षालङ्कारः- समीपवासेन विलोभितास्ते इत्यत्र अज्ञातवासाय अपकृष्टदेशान् बहुदूरगतान्मत्वा समीपवासेन विलोभिताः वञ्चितास्ते अस्मान्न ज्ञास्यन्ति ।

संवत्सरं तत्र विहृत्य गूढं नराधमं तं सुखमुद्धरेम ।**
निर्यात्य वैरं सफलं सपुष्पं तस्मै नरेन्द्राधमपूरुषाय ।। १० ।।(०४)

सुयोधनायानुचरैर्वृताय ततो महीमावस धर्मराज ।**
स्वर्गोपमं देशमिमं चरद्भिः शक्यो विहन्तुं नरदेव शोकः ।। ११ ।।(०५)

---

(०१) (२)उपेत्य काले (for उपोपविश्य); (३) क-ख-घ-ततो..भिगच्छेम, (४)आसाद्य (for आस्थाय); हितं प्रियं,

(०२) (२)माणस् (for माणाम्); तदनु (for त्वदनु ); प्रियशू (for प्रियं );(३)इतो (for ततो); नु न गच्छाम; न्वगच्छाम; वगन्तासिः धिगच्छामः; भि ( नु ); गच्छेम (for नुगच्छाम); गृहानपास्य (for वना);, (४) दुर्यो (for सुयो); बन्धं (for चरं);,

(०३) (१)इमं; इयं (for इदं );, वसाम;, (२)दुर्यो (for सुयो० ); (आ)शु (आ) प्त ०;, (for (आ) त्त) तद् (for तं );,(अ)धमयुद्धशीलम्; समशीलबुद्धिर्; यदसुद्धिलिम्; (अ) धमशीलबुद्धिम्; धर्मशीलबुद्दिम् (४) च सुखं वसामः (for सुखमा ); आन्पुमो वै आन्पुयाम,

(०४) (१)त्वदाज्ञया; (२)निहत्य (for विहाय ); कामं (for मानं); विचरामो; विचरन्तो; चरतो; नगरे; व्यचरं (for विचरन् विचरन्तः ); वसेम (for वनानि); विहाय चैनं त्वनुसञ्चरामः; (३) विलोभितः सः; विलोकितास्ते ( तास्तु ); तिरोहितास्ते; विमोहितास्ते; विलोभितास्तु; (४)हास्यन्ति (for ज्ञास्यन्ति); (अ)नाथान् (for नास्मान्); द्रेहान् (for देशान्); ज्ञास्यत्यवश्यं च निकृष्टदेशान्; ज्ञास्यन्ति देहानवकृष्टदेहान्,

(०५) ॅ (१)ते तु; तत्र, (for तं तु);, मूढाः गूढा (for ग्छुं );, (२) उद्धरामः (for उद्धरेम) ३)सुपुण्यं (for सपुष्पं );, (४)तस्मान् (for तस्मै);,०पौरुषाय,

कीर्तिस्तु ते भारत पुण्यगन्धा नश्येद्धि लोकेषु चराचरेषु।**
तत्प्राप्य राज्यं कुरुपुङ्गवानां शक्यं महत्प्राप्तुमथ क्रियाश्च ।। १२ ।।(०१)

इदं तु शक्यं सततं नरेन्द्र प्राप्तुं त्वया यल्लभसे कुबेरात्।**
कुरुष्व बुद्धिं द्विषतां वधाय कृतागसां भारत निग्रहे च ।। १३ ।।(०२)

तेजस्तवोग्रं न सहेत राजन्समेत्य साक्षादपि वज्रपाणिः ।
न हि व्यथां जातु करिष्यतस्तौ समेत्य देवैरपि धर्मराज ।। १४ ।।(०३)

तवार्थसिद्ध्यर्थमपि प्रवृत्तौ सुपर्णकेतुश्च शिनेश्च नप्ता।**
तथैव कृष्णोऽप्रतिमो बलेन तथैव चाहं नरदेववर्य।। १५ ।।(०४)

तथैव चाहं नरदेववर्य यमौ च वीरौ कृतिनौ प्रयोगे।**
त्वदर्थयोगप्रभवप्रधानाः शमं करिष्याम परान्समेत्य ।। १६ ।।(०५)

ततस्तदाज्ञाय मतं महात्मा तेषां च धर्मस्य सुतो वरिष्ठः ।
प्रदक्षिणं वैश्रवणाधिवासं चकार धर्मार्थविदुत्तमौजाः ।। १७ ।।(०६)

---

(०१) (१)दुर्यो (for सुयो);, धृताय; मृताय (for वृताय );, (२) आवस यस्यसि); प्राप्नुहि (for आहर); स्वर्गम्; देशम् (for शैलम्); चलद्भिः ४)विद्धर्तुं; विहातुं ; (for निहन्तुं); तव (for नर०) लोकः; लोचनः (for शोकः),

(०२) (१)तु; न (for च );, पुण्यबद्धा; पुण्यबन्धो; पुण्यकीर्ते; (२)नश्येद्धि; (३)राजन् (for राज्यं );जाङ्गलानां (for पुङ्गवानां );, (४)चक्रं (for शक्यं);, प्राप्यम् (for प्राप्तुम्) अविक्रियाश्च; अविक्रियां च (for अथ किं ,

(०३) (१)वर्षं ; (अ)शक्यं (for शक्यं);, (२) यल्लभते (for ०से);, (४) विग्रहे च; निग्रहे तु; निग्रहाय; निग्रहेषु,

(०४) (३)करिष्यतेसौ; गमिषयतस्तौ, तवार्थसिद्ध्यर्थमभिप्रपन्नो यथैव कृष्णः सह यादवैस्तैः ।

(०५) (१)त्वमर्थं; तवार्थं (for त्वदर्थ०); अपि (for अभि० ); प्रयुक्ताः; प्रवृद्धौ (for प्रवृत्तौ ); (२)सुवर्ण (for सुपर्णं ); (३) तथैव (for य); (४)वीर स ( च ); वीरस्तु; शूरस्तु (for राजन्म) ;तथैव चाहं नरदेववर्य,

(०६) (१)प्रवृत्तो; प्रपन्नो (for प्रवृत्तौ); (२)तथैव (for य ); रामः; राजन्; कृष्णौ (for कृष्णः); ते (for तैः ); (३)चाहं; चेमौ (for चावां ) ;तथैव राजन्नहमेकवीरो; (४)वयौ (for वीरौ ); युवानौ (for प्रयोग); योगे (for योग०);, प्रदानाः; ०प्रधानं (for ०प्रधानाः); समी०(समे); शमं (for समं); करिष्यन्ति (for ष्याम) समीपे (for समेत्य); प्रदक्षिणं स्थानमुपेत्य राजा पर्याक्रमद्वैश्रवणस्य राज्ञः ।,

आमन्त्र्य वेश्मानि नदीः सरांसि सर्वाणि रक्षांसि च धर्मराजः।
यथागतं मार्गमवेक्षमाणः पुनर्गिरिं चै निरीक्षमाणः ।। १८ ।।(०१)

समाप्तकर्मा सहितः सुहृद्भिर्जित्वा सपत्नान्प्रतिलभ्य राज्यम्।
शैलेन्द्र भूयस्तपसे जितात्मा द्रष्टा तवास्मीति मतिं चकार ।। १९ ।।(०२)
सम्प्रार्थयामास नगेन्द्रवर्यम्।(०३)

वृतश्च सर्वैरनुजैर्द्विजैश्च तेनैव मार्गेण पतिः कुरूणाम्।**
उवाह चैतान्गणशस्तथैव घटोत्कचः पर्वतनिर्झरेषु ।। २० ।।(०४)

तान्प्रस्थितान्प्रीतमना महर्षिः

पितेव पुत्राननुशिष्य सर्वान्।
स लोमशः प्रीतमना जगाम तेषां
विजयं तथोक्त्वा दिवौकसां पुण्यतमं निवासम् ।। २१ ।।(०५)

तेनार्ष्टिषेणेन तथानुशिष्टास्-

तीर्थानि रम्याणि तपोवनानि।
महान्ति चान्यानि सरांसि पार्थाः
सम्पश्यमानाः प्रययुर्नराग्र्याः ।। २२ ।।(०६)

---

(०१) (वैशं उ ०) १)समाज्ञाय; तदादाय (for तदा०ज्ञाय );, मतिं (for मतं );, (२)च (for स );, धर्मज्ञवतां; राजप्रवरो (for धर्मस्य सुतो );, मनीषी (for वरिष्ठः );णं (३) णं स्थानमुपेत्य राजा, ०(४) विदां वरिष्ठः; भृतां वरिष्ठः (for विदुत्तमौजाः ); पर्यक्रमद्वैश्रवणस्य राज्ञः,

(०२) (१)नदीसरांसि; नदीशरास्य; सरांसि नद्यः, ०)(३) अवेक्ष्यमाणः, ०) (४)पुरं (for पुनर् );, तं च (for चैव );, निरीक्ष्यमाणः, गन्तुं स ऐच्छत्सह सोदरीयैः, ,, ततो महात्मा स विशुद्धबुद्धिः,

(०३) ( (२)लब्धराज्यः (for लभ्य राज्यम् );, (३) शैले च (for शैलेन्द्र );, जितात्मा; य (त्त्रीधृ );, (४) भवामी ( तवास्मी);,

(०४) (१)च ( तु ) (for स );, (२) पुनर्निवृत्तः (for पतिः कुरू ० );, पुन निवृत्तः सह कृष्णया च, ० ) चैतान्; चैवं (for चैनान् );, गणशम्; सगणस् (for सगणांस् );,(४) अ-सगणा,

(०५) (२)पार्थान् (for सर्वान् );, स लोमशो दिवमेवोत्तमश्रीर्जगाम तेषां विजयं तदो ( दु०,

(०६) (१)तेनाष्टिषेणेन तथानुशिष्टास्; तेनानुशिष्टासवार्ष्टिषेणेन चापि, ०(४) त) नरेंन्द्र; नरादय

वैशम्पायनः
नगोत्तमं प्रस्रवणैरुपेतं दिशां
गजैः किन्नरपक्षिभिश्च ।**
सुखं निवासं जहतां हि तेषां
न प्रीतिरासीद्भरतर्षभाणाम् ।। २३ ।।(०१)

ततस्तु तेषां पुनरेव हर्षः
कैलासमालोक्य महान्बभूव ।**
कुबेरकान्तं भरतर्षभाणां
महीधरं वारिधरप्रकाशम् ।। २४ ।।(०२)

समुच्छ्रयान्पर्वतसन्निरोधौश्चश्र
गोष्ठान्हरीणां गिरिसेतुमालाः ।
बहून्प्रपातांश्च समीक्ष्य वीराः
स्थलानि निम्नानि च तत्र तत्र।। २५ ।।(०३)

तथैव चान्यानि महावनानि मृगद्विजानेकपसेवितानि।**
आलोकयन्तोऽभिययुः प्रतीतास्ते धन्विनः खड्गधरा नराग्र्याः ।। २६।।(०४)

---

(for नराग्र्यः),

(०१) (१)प्रश्रवणैद्; पुष्पफलैर् (for प्रस्रव );, (२) सदिग्गजैः (for दिशां गजैः );, पङ्क्तिभिश्च; यक्षपक्षिभिः; पक्षिसघैः (for पक्षिभिश्च );, (३) अ-निवासो जगता हितैषिणां, तपो० (for सुखं);, च (for नि० );, त्यजतां (for जहतां );, च तेषां; हितैषिणां (for हि तेषां );, (४)कुरुपुङ्गवानां (for भरत );

(०२) (१)च; स (for तु );, ० (२) शैलं समां (for कैलासमां );, कैलाश( स ) मालोकयतां बभूव,

(०३) (गोष्ठान्गिरीणां, (१)समुच्छ्रयात्; समेत्य तान् (for समुच्छ्रयान् );, सर्वतःसंनिरोधीन् (२) दृष्टाः कोष्ट; गोष्टं (for गोष्ठान् );, हरीणां (for गि );,विरमे तु शालाः; गिरिसेङ्कयमानाः; गिरिसेतुरक्षान्;गिरि गह्वराणि ( णां) (for गिरिसेतु०);, बहुप्रकारांश्च ( ०राणि) (for बहून्प्रपातांश्च );, प्रसमीक्ष्य (for समीक्ष्य );, वीरः; पार्थाः; राजन् (for वीराः);, (४)स्थानानि (for स्थलानि );, रत्नानि (for निम्नानि);,तथैव (for च तत्र );

(०४) (१)गन्धानि; चाल्पानि (for चान्यानि );, (२) प्रसेवि०; निषेवि०; ०पशोभि (for

वनानि रम्याणि नदीः(नद्यो) सरांसि गुहा गिरीणां गिरिगह्वराणि।
एते निवासाः सततं बभूवुर्दिवानिशं प्राप्य नरर्षभाणाम्।। २७ ।।(०१)

ते दुर्गवासं बहुधा निरुष्य व्यतीत्य कैलासमचिन्त्यरूपम्।
आसेदुरत्यर्थमनोरमं ते तमाश्रमाग्र्यं वृषपर्वणस्तु ।। २८ ।।(०२)

समेत्य राज्ञा वृषपर्वणा ते प्रत्यर्चितास्तेन च वीतमोहाः ।*
शशंसिरे विस्तरशः प्रवासं गिरौ यथावद्वृषपर्वणस्ते।। २९ ।।(०३)

सुखोषितास्तस्य त एकरात्रं पुण्याश्रमे देवमहर्षिजुष्टे।**
अभ्याययुस्ते बदरीं विशालां सुखेन वीराः पुनरेव वासम्।। ३० ।।(०४)

ऊषुस्ततस्तत्र महानुभावा नारायणस्थानगताः समग्राः ।
कुबेरकान्तां नलिनीं विशोकाः सम्पश्यमानाः सुरसिद्धजुष्टाम्।। ३१ ।।(०५)

तां चाथ दृष्ट्वा नलिनीं विशोकाः पाण्डोः सुताः सर्वनरप्रधानाः ।
ते रेमिरे नन्दनवासमेत्य द्विजर्षयो वीतमला यथैव ।। ३२ ।।(०६)

---

पसेवि );, (३)नुययुः (for ऽभि० );, नृवीरास् (for प्रतीता, );, नरेंन्द्राः (for नराग्र्याः);, तेजस्विनः खड्गधनुर्धराम्याः (ढ्याः),

(०१) (१)नदीः सरांसि (for सरांसि नद्यो);, (२) कन्दराणि (for गह्वराणि );, (३) वाते निवाताः (for एते निवासाः ); (४) निशां निशां; दिवानिशं; निशामुखं (for निशानिशं );, तु भारतानां (for नरं );

(०२) (१)तं दुग; तदुग्र (for ते दुर्ग);, नि( न्य )रूप्य; नितुष्य; तु, रम्यं०; निरस्य (for निरुष्य);, (२) विचिन्त्य (for व्यतीत्यं);, कैलाशम्, (३)अत्यन्त० (for अत्यर्थ०);, ०मनोनुगं; ०मनोरथं (for ०मनोरमं);, ते; तु (for वै);, (४) तद् (for तम् );, तु (for ते);,

(०३) (१)वीत (for राज्ञा); वै (for ते);(२)प्रदर्शिता (for प्रत्यर्चिता); (३) विस्तरत; (४) गिरौ; गिरिं; (for शिवं),

(०४) (१)सुखोचितास् ; तस्य (for तत्र ); तु; तदा (for त ); सुखोषिताः पथि तत्र त्रिरात्रं; (४) पुनराश्रमं तं (for पुनरेव वासम् ),

(०५) (२)समग्राः (for नराग्र्याः ); ० (३) विशोकां; वीतशोकाः,

(०६) (२)सर्वनरप्रधानाः; पञ्च पचेन्द्रकल्पाः ०नृप० (for नर०);
(४) सु (न) रर्षभा; द्विजर्षभा (for द्विजर्षयो;), मला; ० माना (for भया; ) तथैव (for यं ),

ततः क्रमेणोपययुर्नृवीरा यथाजवे(गते)नैव यथा(पथा) समग्राः ।
विहृत्य मासं सुखिनो बदर्यां किरातराज्ञो विषयं सुबाहोः ।। ३३ ।।(०१)

पीनांस्तुषारान्दरदांश्च सर्वान्देशान्कुलिन्दस्य च भूमिरत्नान्।
अतीत्य दुर्गं हिमवत्प्रदेशं पुरं सुबाहोर्ददृशुर्नृवीराः ।। ३४ ।।(०२)

श्रुत्वा च तान्पार्थिवपुत्रपौत्रान्प्राप्तान्सुबाहुर्विषये समग्रान्।
प्रत्युद्ययौ प्रीतियुतः स राजा तं चाभ्यनन्दन्वृषभाः कुरूणाम्।। ३५ ।।(०३)

समेत्य राज्ञा तु सुबाहुना ते सूतैर्विशोकप्रमुखैश्च सर्वे।**
सहेन्द्रसेनैः परिचारिकैश्च पौरोगवैर्ये च महानसस्थाः ।। ३६ ।।(०४)

सुखोषितास्तत्र त एकरात्रं सूतान्समादाय रथांश्च सर्वान्।
घटोत्कचं सानुचरं विसृज्य ततोऽभ्ययुर्यामुनमद्रिराजम्।। ३७ ।।(०५)

तस्मिन्गिरौ प्रस्रवणोपपन्नहिमोत्तरीयारुणपाण्डुसानौ।**

---

(०१) (१)ए व; (for (उ)प) (२) जवे पथे (for ०गते ),गताः (for पथा; ) समग्र्या; नराग्र्याः (for समग्राः ) (३) विसृज्य (for विहृत्य; ) वासं (for मासं; ) (४) विषये(for यं; ),

(०२) (१)वीरान्; पीनान् (for चीनान्);, तुषा (सी) रान्; तथारान्; तुखादान्; तुखातान् (for तुखारान्);, सदर्वान्; च सर्वान्; सदार्यान्; विदर्भान् सुदर्भान्; सुदुर्दान्; सदर्भान् (for सदार्वान् );, (२) कुनिन्दस्य; कु( पु )लिन्दस्य (for कुणिन्दस्य);, च भूमिरत्रान् ( सर्वदुर्दान्); च भूरिरम्यान् तथैव रत्नान् );(३) दुर्गान्; तूर्णं दुर्गे; दुःखं; देशं (for दुर्गं);, त्प्रदेशान् त्प्रदेशे (for त्प्रदेशं );, (४) नरेन्द्राः; समृद्धं (for नृवीराः);,

(०३) (१) तु (for च ); (२)विषयं; नगरं (for विषये);, (३) प्रत्युद्ययुः; प्रत्याययुः प्रत्यययौ; तदानीं (for स राजा ), (४)तान्; तत् (for तं); तु (for च );, अभ्य( प्य नन्दद् (for अभ्यनन्दन् );, ऋषभाः; वृषभः; ऋषभः; स पतिः वृषभं (for वृषभाः,

(०४) (१)वीरास् (for राज्ञा); (अ) थ; च (for तु );, (२) विशेष (for विशोकं ), सर्वे (for सर्वैः (३)०वारमुख्यैः (for चारकैश्च);, (४) गमैद्; गवा (for गवैट्); नसार्थाः; सनस्थाः (for नसस्थाः),

(०५) (१)उवासतुस् (for सुखोषितास् );, तु; च (for त );,एकरात्रे; एव सर्वे; मासमात्रं (for एकरात्रं ); (२) समा (for उपा० );, (३)विसर्ज्य (for विसृज्य ); (४) ययुर् (for ऽभ्ययुद् ); भास्वरम् ( यामुनम् ,

विशाखयूपं समुपेत्य चक्रुस्तदा निवासं पुरुषप्रवीराः ।। ३८ ।।(०१)

वराहनानामृगपक्षिजुष्टं महावनं चैत्ररथप्रकाशम्।**
शिवेन पार्था मृगयाप्रधानाः संवत्सरं तत्र वने विजह्रुः ।। ३९।।(०२)

तत्राससादातिबलं भुजङ्गं क्षुधार्दितं मृत्युमिवोग्ररूपम्।**
वृकोदरः पर्वतकन्दरायां विषादमोहव्यथितान्तरात्मा ।। ४० ।।(०३)

द्वीपोऽभवद्यत्र वृकोदरस्य युधिष्ठिरो धर्मभृतां वरिष्ठः ।**
अमोक्षयद्यस्तमनन्ततेजा ग्राहेण संवेष्टितसर्वगात्रम् ।। ४१ ।।(०४)

ते द्वादशं वर्षमुपोपयातं वने विहर्तुं कुरवः प्रतीताः ।**
तस्माद्वनाच्चैत्ररथप्रकाशात्श्रियाज्वलन्तस्तपसा च युक्ताः ।। ४२ ।।(०५)

ततश्च यात्वा मरुधन्वपार्श्र्वं सदा धनुर्वेदरतिप्रधानाः ।**
सरस्वतीमेत्य निवासकामाः सरस्ततो द्वैतवनं प्रतीयुः ।। ४३ ।।(०६)

समीक्ष्य तान्द्वैतवने निविष्टान्निवासिनस्तत्र ततोऽभिजग्मुः ।

---

(०१) (१)प्रश्रवणो (for प्रस्रवणो );, (२) वर्णे वप्रे (for सानौ);, हिंमोत्तरीये हिमपाण्डुवर्ने;
(३)जग्मुम् (for चक्रुश्च);, (४)नरदेवपुत्राः (for पुरुष० ,

(०२) (१)वाराह (for वराह ); विध० (for ०मृग );
(२) क-ख-घ-प्रविष्टा, महावनं (for महद्वनं );०रथ; वनं (for रथ०) प्रविष्टाः; प्रहृष्टाः (for ०प्रकाशम् ); (३)पार्था; याता (for यात्वा ); (४)यत्र च ते (for तत्र वने),

(०३) (१)बलो (for बलं); (२) (आ)त्त (for (उ)ग्र ); (३)कन्दरेषु (for कन्दरायां,

(०४) (१)त्यत्र; त्तात; त्तत्र (for द्यत्र); (३)यं मोक्षयद्; यो मोक्ष०; अमोच (for अमोक्ष०); यं तम्; चैनम् (for यस्तम्); पृथुलोहिताक्षं; तमजातशत्रुः तमनन्तमेधा, (४) कायं (for गात्रम् ),

(०५) (१)तद् (for ते); उपइह (अथ) याताः यातं (for यान्तं), ०
(२) विजहः विहर्तुं ), नरदेवपुत्राः कुरवः प्रयाताः, (३) चैत्ररथात्प्रहृष्टाः ०
(४) स्म; सु०; (अ) भि० १०, च ),०तप्ताः (for युक्ताः ,

(०६) (१)तु (for च) , च याता; तु याता; प्रयाता (for च यात्वा) पार्श्वे,
(२)सर्वे (for सदा), धराः (for रति) ,
(४) क-घ-निवासिनस्तत्र ततो..ङिजग्मुः; ख- सरस्तथा, सरस्तथा; सरस्तदा,

तपोदमाचारसमाधियुक्तास्तृणोदपात्रावरणाश्मकुट्टाः ।। ४४ ।।[०१]

प्लक्षाक्षरौहीतकवेतसाश्च तथा बदर्यः खदिराः शिरीषाः ।**
बिल्वेङ्गुदाः पीलुशमीकरीराः सरस्वतीतीररुहा बभूवुः ।। ४५ ।।[०२]

तां यक्षगन्धर्वमहर्षिकान्तामागारभूतामिव देवतानाम्।**
सरस्वतीं प्रीतियुताश्चरन्तः सुखं विजह्रुर्नरदेवपुत्राः ।। ४६ ।। [०३]

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अजगरपर्वणि पुनर्द्वैतवनप्रवेशे अष्टाचत्वारिंसदधिकशततमोऽध्यायः ।। १४८।।

(आजगरपर्वणि ......ऽध्यायः)

## 03- 06- 149Adhyaya

महाभारततत्तात्पर्यनिर्णये २२ अध्याये

पादेषु तेषु निवसत्सु हिमालयस्य याम्याश्रितेषु पवमानसुतः कदाचित् ।

धन्वी मृगाननुचरन् सहसाऽऽससाद हाऽऽयोः सुतं नहुषमाजगरोरुरूपम् ।। ३२२ ।।

---

(०१) (१)श्रुत्वैव; समेत्य (for समीक्ष्य) ते (for तान्) , वनं (for वने) , प्रविष्टान्; प्रहृष्टान्
(२) प्रवासिनम् एव धि (for भि०) , (३) ततो; ते वै (for तपो) , तृणोदपत्राहर रि णाम; तृणोदपत्रापणांश्म ०पत्राहरणाकुलेंद्रियाः; पात्रावरणाश्मकुट्टाः; पर्णाहरणाश्म; तृणातपत्राः दवस्त्रा भरणाश्म तृणोदपात्रावरणाः ।
आसनार्थं तृणेन पाद्यार्थमुदकपात्रेण च आवृण्वन्ति । पाठान्तरे आहरन्ति ।,

(०२) (१) क-ख-घ-पक्लक्षाश्व नागार्जुनवेतसाश्वमूस्रुही , प्लक्षाह्व (क्षाम्भ); प्लक्षाम्र; प्लक्षाश्च (for प्लक्षाक्ष) , रोहीतक; रोवेतस; नागा र्जुन; बैभीतक ,(for रौहीतक) , वीतसाश्च; भीतका; वेधसा ,(for वेतसा) , (२)स्रही; तथा (for रत्रुहा) , (३) पील; पडि०; पिप्पल; बिल्व; पीड (for पीलु),

(०३) (१)ते (for तां) , (२) मायाङ्गभूमामिव; मायाङ्गभूत्वा इव; आवासभूतामिव; आ (अ) गारभूता , (३) ०युक्ता; ययु; , युज (for युता) (४) वर्याः (for पुत्रा),

# १४९. एकोनपञ्चाशदधिकशततमो अध्यायः

जनमेजयः

कथं नागायुतप्राणो भीमो भीमपराक्रमः ।**
भयमाहारयत्तीव्रं तस्मादजगरान्मुने ।। १ ।।(०१)

पौलस्त्यं धनदं युद्धे य आह्वयति दर्पितः ।**
नलिन्यां कदनं कृत्वा निहन्ता यक्षरक्षसाम् ।। २ ।।(०२)

तं शंससि भयाविष्टमापन्नमरिसूदनम्।**
एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।। ३ ।।(०३)

यदृच्छया धनुष्पाणिर्बद्धखड्गो वृकोदरः ।**
ददर्श तद्वनं रम्यं देवगन्धर्वसेवितम् ।। ५ ।। (०४)

स ददर्श शुभान्देशान्गिरेर्हिमवतस्तदा।**
देवर्षिसिद्धचरितानप्सरोगणसेवितान् ।। ६ ।।(०५)

---

(०१) (२)भीमो भीमपराक्रमः (३)आसादयत् (for आहारयत्),

(०२) (१) क-ख-घ-..भ्ययात्, योध यद्; योजयद्; धनदं; आह्वयद्; , योभ्यधाद्; अभ्ययाद् (for योध्रह्वयद्) ,

(२) बलदर्पितं; य आह्वयति दर्पितः; आह्वयामास द; साक्षाद्वैश्रवणं तदा

(४) बलिनां; निहन्ता वीराणां (for वराणां),

(०३) ((२)०कर्शनं; ०सूदनं; ०मर्दनं (for कर्षणम्) हत्वा च राक्षसांस्तत्र वीरो बलसमन्वितः;(३) तं शंस भय, माविष्टमापन्नं मे पितामहं ,

वैशम्पायनः

बह्वाश्चर्ये वने तेषां वसतामुग्रधन्विनाम्।**
प्राप्तानामाश्रमाद्राजन्राजर्षेर्वृषपर्वणः ।। ४ ।।

/*(१)श्चर्यं; श्चर्य(for श्चर्ये) , (२)धन्वनां (for धन्विनाप्र) , (३)आश्रमं (for आश्रमाद्) ,तत्र (for राजन्) , (४)राजर्षे, (for राजर्षेर्,),

(०४) (२)धनुर्धरः वृकोदरः (३)चचार (for ददर्श) , दिव्यं; सर्वं; पुण्यं (for रम्यं) ,

(४) सिद्ध(for देव) ,पूजितं (for सेवितम्),

(०५) (१)ददर्श च तान् (for शुभान्) , (२)मार्गं (for गिरेट्) ,ततः तथा; सदा (for तदा),

चकोरैरुपचक्रैश्च पक्षिभिर्जीवजीवकैः ।
कोकिलैर्भृङ्गराजैश्च तत्र तत्र निनादितान् ॥ ७ ॥(०१)

नित्यपुष्पफलैर्वृक्षैर्हिमसंस्पर्शकोमलैः ।**
उपेतान्बहुलच्छायैर्मनोनयननन्दनैः ॥ ८ ॥(०२)

स सम्पश्यन्गिरिनदीर्वैदूर्यमणिसन्निभैः ।**
सलिलैर्हिमसङ्काशैर्हंसकारण्डवायुतैः ॥ ९ ॥(०३)

वनानि देवदारूणां मेघानामिव वागुराः ।**
हरिचन्दनमिश्राणि तुङ्गाकालीयकान्यपि ॥ १० ॥(०४)

लक्षालङ्कारः- मेघानामिव वागुरा इत्यत्र 'वागुरा मृगबन्धिनी'इत्यभिधानात् वागुराः बन्धनरज्जव इव स्थिताः ।

मृगयां परिधावन्स समेषु मरुधन्वसु।**
विध्यन्मृगाञ्शरैः शुद्धैश्चचार स महाबलः ॥ ११ ॥(०५)

भीमसेनस्तु विख्यातो महान्तं दंष्ट्रिणं बलात्।

निघ्नन्नागशतप्राणो वने तस्मिन्महाबलः ।

---

(०१) (१) शतपत्रैश्च; सितपत्रै; उपचक्रैश्च उपघुष्टांश्च (for चक्र०) ,
(२) शोभिताम्; वलूतैर् (for पक्षिभिर्) , जीविकैः (for जीवकैः)
(३) तु (for च) , (४) निना दितान्; ० विनादितं,

(०२) (२) ख-अयं पादो..नन्तरश्च न स्त : संस्पृश्य; ०स्पर्शन (for संस्पर्श) ,कोमलः;
कोकिलैः शीतलैः (for कोमलैः) , (३) उपेतं (for उपे तान्) ,
(४) हृदय (for नयन) ,नन्दनान् (for नन्दनैः),

(०३) (१)गिरिनदीं; गिरीश्चदीर्; गिरीनद्रीन् , (२) वैदूर्यं (for वैडूर्य) (३)सङ्काशैद् (for संस्पर्शैर् ) , शालिनैर्हैमसंस्पर्शैः,

(०४) (२)पाण्डराः; वागुरा (for वागुराः),मेघपङ्क्तिनिभानि च (३)चित्राणि (for मिश्राणि), (४)कालीयकानिव; काले (for काले यकतन्यपि (कैरपि,),

(०५)(१)परिधावन्त; पर्यधावन्स (त्स) मृगयापरिधावद्भिः (२)समेत्य (for षु) , विषमेषु च (for मरु), विषमासु च भूमिषु (३) तीक्ष्णै०; शुभ्रै (for शुद्धै०) (४)चचाल (for र), स महाबलः सुमहद्वनं,

मृगाणां स वराहाणां महिषाणां महाभुजः ।
विनिघ्नंस्तत्र तत्रैव भीमो भीमपराक्रमः ।
स मातङ्गशतप्राणो मनुष्यशतवारणः ।
सिंहशार्दूलविक्रान्तो वने तस्मिन्महाबलः ।
वृक्षानुत्पाटयामास तरसा वै बभञ्ज च ।
पृथिव्याश्च प्रदेशान्वै नादयंस्तु वनानि च ।
पर्वताग्राणि वै मृद्नन्नादयानश्च विज्वरः ।
प्रक्षिपन्पादपांश्चापि नादेनापूरयन्महीम्।।
वेगेन न्यपतद्भीमो निर्भयश्च पुनः पुनः ।
आस्फोटयन्क्ष्वेडयंश्च तलतालांश्च वादयन्।
चिरं(र) सम्बद्धदर्पस्तु भीमसेनो वने तदा।
गजेन्द्राश्च महासत्त्वा मृगेन्द्राश्च महाबलाः ।
भीमसेनस्य नादेन व्यमुञ्चन्त गुहा भयात्।
क्वचित्प्रधावंस्तिष्ठंश्च क्वचिच्चोपविशंस्तथा।
मृगप्रेप्सुर्महारौद्रे वने चरति निर्भयः ।
स तत्र मनुजव्याघ्रो वने वनचरोपमः ।
पद्भ्यामभिसमापेदे भीमसेनो महाबलः ।
स प्रविष्टो महारण्ये नादान्नदति चाद्भुतान्।
त्रासयन्सर्वभूतानि महासत्त्वपराक्रमः ।
ततो भीमस्य शब्देन भीताः सर्पा गुहाशयाः ।
अतिक्रान्तास्तु वेगेन जगामानुसृतः शनैः ।
ततोऽमरवरप्रख्यो भीमसेनो महाबलः ।

स ददर्श महाकायं भुजङ्गं लोमहर्षणम्।**
गिरिदुर्गे समापन्नं कायेनावृत्य कन्दरम् ॥ १२ ॥(०१)

पर्वताभोगवर्ष्माणमतिकायं महाबलम्।**
चित्राङ्गमङ्गजैश्चित्रैर्हरिद्रासदृशच्छविम् ॥ १३ ॥(०२)

गुहाकारेण वक्त्रेण चतुर्दंष्ट्रेण राजता।**
दीप्ताक्षेणातिताम्रेण लिहानं सृक्किणी मुहुः ॥ १४ ॥(०३)

त्रासनं सर्वभूतानां कालान्तकयमोपमम्।**
निःश्वासक्ष्वेडनादेन भर्त्सयन्तमिव स्थितम् ॥ १५ ॥(०४)

स भीमं सहसाभ्येत्य पृदाकुः कुपितो भृशम्।**
जग्राह अजगरो ग्राहो भुजयोरुभयोर्बलात् ॥ १६ ॥(०५)

लक्षालङ्कारः- स्फिजा तं क्षुधितो भृशम् इत्यत्र 'स्त्रियां स्फिजौ कटिः प्रोथ' इत्यभिधानात् स्फिजा कट्या तं भीमसेनम् ।

तेन संस्पृष्टगात्रस्य भीमसेनस्य वै तदा।**

---

(०१) ( (२)भुजगं रोम (for लोम),(३) गिरिदुर्ग, समासः भं कायैद् (for कायेन) ,(४)आ वृत्य , कन्धरां रं,

(०२) (१)सर्वतोभोग; पर्वताकार वर्ष्माणां; वर्मणं (for वर्ष्माणं) , (२) ख-अयं पादो..नन्तरश्च न स्तः, कालैशू; कायैशू; केशैशू; कौष्टैशू (for भोगैशू) चित्राङ्गमण्ड (मात) लैः; चन्द्रार्धमं; चन्द्राभ्रमं अतिकायं महाबलं (३) क-घ- मजिनैश्चित्रैर्हीरिद्रसदृशस्फुटम् । चित्राङ्गकोष्टकैशू; ०मङ्गदैशू; मङ्गजैशू; माचितैर्, गात्रैर् (for चित्रैर्), चित्राङ्गजैश्चित्ररुहैद्; विचिन्नमण्डलैश्चित्रं; चित्राङ्गमजिने चित्रे (४) रिद्र; मुरारि,

(०३) (२)भारत (for राजता) (३),अ भि (for अ ति) ,
(४)लिहानं; लेलिहन् सृक्किणी सृक्कणी ,(for सृक्किणी),

(०४) (१)सत्वानां (for भूतानां) , (३)नि(for निः) निःश्वासवात; साक्ष्वेड; ससिंह;
निःश्वसन्क्ष्वेड; सोत्थेन; ०सोत्क्ष्वेड (४) इव स्थितः; इवास्थितं; इवोत्थितं; इवोच्छ्रितं,

(०५) (१)भीत; (उ) त्पत्य (उ) पेतं (for (अ) भ्येत्य) , स समीपस्थ मभ्येत्य, (२) तृषितः;
भृषितं; बलवान्; क्षुधार्तः क्षुधितः; पाण्डवं (for पृदाकुः) त्वधितं; कुधितो; कुपि०; क्षुभि;
तृषि (for क्षुधि) , (४)बलं; अपि (for बलात्),

सञ्ज्ञा मुमोह सहसा वरदानेन तस्य हि ।। १७ ।।(०१)

दशनागसहस्राणि धारयन्ति हि यद्बलम्।**
तद्बलं भीमसेनस्य भुजयोरसमं परैः ।। १८ ।।(०२)

लक्षालङ्कारः- भुजयोर्न स मंसत इत्यत्र सः सर्पः भमिसेनस्य भुजयोः तद्बलं न मंसत अमंसत, अमंस्तेत्यर्थः । वरादि बहुसत्वसूचनाय एकवचनस्थाने बहुवचनम् ।

स तेजस्वी तथा तेन भुजगेन वशीकृतः ।**
विस्फुरन्शनकैर्भीमो न शशाक विचेष्टितुम् ।। १९ ।।(०३)

नागायुतसमप्राणः सिंहस्कन्धो महाभुजः ।**
गृहीतो व्यजहात्सत्त्वं वरदानविमोहितः ।। २० ।।(०४)

स हि प्रयत्नमकरोत्तीव्रमात्मविमोक्षणे।**
न चैनमशकद्वीरः कथञ्चित्प्रतिबाधितुम् ।। २१ ।।(०५)

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अजगरपर्वणि अजगरग्रहणे एकोनपञ्चाशदधिकशततमोऽध्यायः ।। १४९ ।।

---

(०१) (१)गात्रस्य, मानस्य (for मात्रस्य) , तेन संस्पर्शः स्पृश्य मानस्य
(२) किल (for तदा), (३)ननाश (for मुमोह) , (४)हि; वै (for ह),

(०२) (२)न०; स्म; (इ) वः (for हि), धारयन्ति महद्बलं,
(४)उभयोर् (for भुजयोद्), न समं (for असमं), बले; परे; वरं; परं (for परैः) , न समं विद्यते परैः,

(०३) (१)तदा; ततस् (for तथा) ,भूतो (for तेन), (२)भुजगेनाभिसंवृतः
(३)कृतकैर्; दशनैर् (for शनकैर्) दीनो; वीरो (for भीमो) ,
(४)किलेहितुं; किलेङ्गितुं (for विचे),

(०४) (१)बलः (for सम०), (२) बलः (for भुजः) ,
(३)व्यजहत्; भ्यजहात् प्यहात् भ्यहनद्वेगं व्यजहात्सत्वं सर्वं (for सत्त्वं) , (४) वरदानविमोहितः,

(०५) (१)सर्व (for स हि) (२) प्र (१ वि) (३) भीमः (for वीरः) ,
(४)अपि (for प्रति), रोधितुं (for बाधितुम् ,

(आजगरपर्वणि ......ऽध्यायः)

# 03- 06- 150Adhyaya

महाभारततत्तात्पर्यनिर्णये २२ अध्याये

पूर्वं हि वृत्रवधतोऽम्बुजनालतन्तुसंस्थे शचीप्रणयिनि प्रविचिन्त्य देवाः ।

चक्रुस्त्रिलोकपतिमायुसुतं वरं च दत्वाऽक्षिगोचरतपोऽस्य बलं च सर्वम् ॥ ३२३ ।

स सर्वसुरविप्रेन्द्रतपश्च बलमक्षयम् ।

अवाप्य ववृधे नित्यं दर्पादैच्छच्छचीमपि ॥ ३२४ ॥

स इन्द्रवचनाच्छच्या महर्षिगणवाहने ।

नियुक्तो वञ्चनायैव वाहयामास तानृषीन् ॥ ३२५ ॥

स शचीप्रतिषेधार्थमगस्त्येन महात्मना ।

वेदप्रामाण्यविषये पृष्टो नेत्याह मूढधीः।

प्रमाणमिति तेनोक्तः शिरस्येनं पदाऽहनत् ॥ ३२६ ॥

तदा भृगुं तस्य जटासु लीनं कदाऽपि तस्याक्षिपथं न यातम् ।

आविश्य कञ्जप्रभवः शशाप व्रजाऽशु पापाजगरत्वमेव ॥ ३२७ ॥

षष्ठे काले यस्त्वयाऽसादितः स्यात् स ते वशं यातु बलाधिकोऽपि ।

यदा गृहीतं पुरुषं निहन्तुं

न शक्ष्यसे यदि स त्वद्गृहीतः ।

शक्तोऽपि नाऽत्मानमभिप्रमोचयेत्

तदाऽस्य स्यात् त्वत्तपोऽग्र्यं बलं च ॥ ३२८ ॥

सर्वदेवमुनीन्द्राणां यत् तपस्त्वामुपाश्रितम् ।

तच्च सर्वं तमेवैति नात्र कार्या विचारणा ॥ ३२९ ॥

यदा प्रश्नांस्त्वदीयांश्च कश्चित् परिहरिष्यति ।
तदा गन्ताऽसि च दिवं विसृज्याऽजगरं तनुम् ।
स्मृतिश्च मत्प्रसादेन सर्वदा ते भविष्यति ।। ३३० ।।
भृगुदेहगतेनैवं शप्तः कमलयोनिना ।
पपाताजगरो भूत्वा नहुषः क्षणमात्रतः ।। ३३१ ।।
इन्द्रोऽप्यवाप स्वं स्थानमिष्ट्वा विष्णुं विपापकः ।
धर्मवृद्ध्यर्थमेवैतत् पापमासीच्छचीपतेः ।। ३३२ ।।
न हि लोकावनं पापं त्रैलोक्येशस्य वज्रिणः ।
वृत्रं हत्वा महानासेत्यादि वेदपदं च यत् ।। ३३३ ।।
क्वचित् पापं च पुण्यानां वृद्धये भवति स्फुटम् ।
वृत्रहत्या यथेन्द्रस्य जाता धर्मस्य वृद्धये ।। ३३४ ।।
देवानां वा मुनीनां वा भवेदेवं न वै नृणाम् ।
पापं यत् पुण्यमेवैतदसुराणां विलोमतः ।
एवं स्कान्दे हि वचनं न पापं तच्छचीपतेः ।। ३३५ ।।
नान्यस्य पदमाप्स्यन्ति तद् देवानां व्रतं परम् ।
तस्मात् तं नहुषं शक्रपदे विदधुरीश्वराः ।। ३३६ ।।
तस्मिन्नेवं निपतिते ब्रह्मणः शापकारणात् ।
अष्टाविंशतिमे प्राप युगे भीमस्तमुल्बणम् ।
जानन्नेव तदीयं तत् तप आदातुमीप्सया ।। ३३७ ।।
यत्तत् सुराणां सर्वेषां मुनीनां च तपः स्थितम् ।
तद् गृहीतुं वशगवदिच्छयैवाऽस मारुतिः ।। ३३८ ।।
देवानां हि नृजातानामल्पं व्यक्तं भवेद् बलम् ।

इच्छया व्यक्ततां याति वायोरन्येषु तच्च न ।। ३३९ ।।
नित्यं व्यक्ता गुणा विष्णोरिति शास्त्रस्य निर्णयः ।
एवमन्येऽपि हि गुणा मानुषादिषु जन्मसु ।। ३४० ।।
देवानां मानुषादौ तु शक्येऽप्यव्यक्तताकृते ।
धर्मवृद्धिर्भवेत् तेषां प्रीतो भवति केशवः ।। ३४१ ।।
तन्मानुषे बले तस्य वराद् वारितवत् स्थिते ।
दैवं बलं सुशक्तोऽपि व्यक्तं चक्रे न मारुतिः ।। ३४२ ।।
आत्ममोक्षाय न प्रश्नान् व्याजहार स चाभिभूः ।
विद्योपजीवनं धर्मो विप्राणामपि नो यतः ।। ३४३ ।।
किमुत क्षत्रियस्येति जानन्नपि वृकोदरः ।
तत्प्रश्नपरिहारेण नाऽत्ममोक्षं समैच्छत ।। ३४४ ।।
अयतन्तमपि ह्येनं चालनायापि नाशकत् ।
पूर्णोऽपि सर्वलोकानां बलेन नहुषस्तदा ।
वेष्टयित्वैव तं भीमं स्थितोऽसौ नाशकत् परम् ।। ३४५ ।।
भ्रातृमात्रादिषु स्नेहात् क्षिप्रमात्मविमोक्षणम् ।
इच्छन्नपि न मोक्षाय यत्नं चक्रे वृकोदरः ।
सर्वदेवमुनीन्द्राणां तप आदातुमत्रगम् ।। ३४६ ।।
भ्रात्रादिषु स्नेहवशान्न स्थातव्यमिहेत्यपि ।
मन्वानः कालतो भङ्गं स्वयमेवैष यास्यति ।
आज्ञया वासुदेवस्य दार्ढ्याद् देहस्य मे तथा ।। ३४७ ।।
स्रस्ताङ्गे पतिते सर्पे यास्यामीति विचिन्तयन् ।
तस्थौ भीमो हरिं ध्यायन् स्वभावान्न तदिच्छया ।। ३४८ ।।

तदैव ब्रह्मवचनात् पूर्वोक्तान् केशवाज्ञया ।
बलं तपश्च सर्वस्य तत्स्थमायाद् वृकोदरम् ।। ३४९ ।।
पूरिते नहुषस्थेन तपसा च बलेन च ।
भीमे स नहुषोऽथाऽसीत् स्रस्तभोगः शनैः शनैः ।। ३५० ।।

## १५०. पञ्चाशदधिकशततमोऽध्यायः

वैशम्पायनः
स भीमसेनस्तेजस्वी तथा सर्पवशं गतः ।**
चिन्तयामास सर्पस्य वीर्यमत्यद्भुतं महत् ।। १ ।।(०१)

उवाच च महासर्पं किमेनं(कामया) ब्रूहि पन्नग।**
कस्त्वं भो भुजगश्रेष्ठ किं मया च करिष्यसि ।। २ ।।(०२)

पाण्डवो भीमसेनोऽहं धर्मराजादनन्तरः ।**
नागायुतसमप्राणस्त्वया नीतः कथं वशम् ।। ३ ।।(०३)

सिंहाः केसरिणो व्याघ्रा महिषा वारणास्तथा।**
समागताश्च बहु(शत)शो निहताश्च मया युधि ।। ४ ।।(०४)

राक्षसाश्च पिशाचाश्च पन्नगाश्च महाबलाः ।**

---

(०१) (२)तदा (for तथा) , (३)सङ्गम्य (for सर्पस्य) , (४) सवीर्यस्याद्भुतं महत्,
(०२) (१)स उवाच (for उवाच च), सर्प; सत्वः; सत्वं (for सर्पं) , (२)क-ख-घ-किनेवं ब्रूहि, काम्यया; काम्यायां; को भवान्; कृपया; किमयं; को मया; किमेवं (for कामया) ,जगर (for भुजगं),

(०३) (१)स्मि (for हं) , (२) ०पुत्राद् (for राजाद्) , (४) त्वया कथं,
(०४) (१)केशरिणो रौद्रा (for व्याघ्रा) , (३) समाहताश्च; दमिता मया च, बहवो; शतशो (for बहुशो) , (४)तु (for च) , महा (for मया), रणे; युधि (for मृधे),

भुजवेगमशक्ता मे सोढुं पन्नगसत्तम ॥ ५ ॥[०१]

किं नु विद्याबलं किं नु वरदानमथो तव ।**
उद्योगमपि कुर्वाणो वशगोऽस्मि कृतस्त्वया ॥ ६ ॥[०२]

असत्यो विक्रमो नणामिति मे धीयते मतिः ।**
यथेदं मे त्वया नागबलं प्रतिहतं महत् ॥ ७ ॥[०३]

वैशम्पायनः
इत्येवंवादिनं वीरं भीममक्लिष्टकारिणम्।**
भोगेन महता गृह्य समन्तात्पर्यवेष्टयत् ॥ ८ ॥[०४]

निगृह्यैनं महाबाहुं ततः स भुजगस्तदा।**
विमुच्यास्य भुजौ पीनाविदं वचनमब्रवीत् ॥ ९ ॥[०५]

---

(०१) (१)राक्षसाश्च; नागाश्चापि (for दान०) , (२) पन्नगाश्च; यक्षाश्चैव (for राक्ष) , दैत्या यक्षाश्च राक्षसा:; यक्षाश्चाप्यथ राक्षसाः (३)न शक्ता; च शक्ता (for अशक्ता), ते; च (for मे), (४) वोढुं (for सोढुं),

(०२) (१)किं न; किं तु; कां नु; क्व नु; , का नु; का वा (for किं नु) ,तपो (for बलं) ,वापि; किं नु; वा किं; किं तु किञ्चिद् (for किं वा) , (२) अथो पुनः; अथापि वा (for ते), (३) तद्योगं; उद्यमं; अद्य ते; उद्यते (for उद्योगम्) ,ह्यपि (for चापि;) , ह्यप; ह्यथ (for अपि) , (४)बहुशो; विवशो (for वशगो) ,त्वया कृतः,

(०३) (१)अशक्यो; अनित्यो (for असत्यो), (२) क-ख-घ-निश्चिता, धीयते, नैष्ठिकी (for निश्चिता) ,मनः मतिः (३) वृथेदं (for य), त्वयि मे (for मे त्वया) ,यथा त्वया महाभाग, (४) प्रवि (for प्रति) , मम (for महत्),

(०४) ((२)वैशं उ वीरं भीमं कर्मणा (for कारिणम्) , (३) गृह्य; (आ) विष्टः (for सर्पः) , (४) भीमं तं, (for समन्तात्) , वारयत् (for ०वेष्टयत्),

(०५) (१)(ए) नं (for तं) ,० भागं; बाहुर् (for बाहुं), (२)तथा (for तदा) , समन्ता त्पर्यवारयन्; स तत्र, भुजगास्तथा, (३) (अ) थ; च (for अ स्य),

सर्पः-

दिष्टस्त्वं क्षुधितस्याद्य देवैर्भक्षो महाभुज ।**
दिष्ट्या कालस्य महतः प्रियाः प्राणा हि देहिनाम् ।। १० ।।(०१)

यथा त्विदं मया प्राप्तं सर्परूपमरिन्दम।**
तथावश्यं मया ख्याप्यं तवाद्य शृणु सत्तम ।। ११ ।।(०२)

इमामवस्थां सम्प्राप्तो ह्यहं कोपान्मनीषिणाम्।**
शापस्यान्तं परिप्रेप्सुः सर्वं तत्कथयामि ते ।। १२ ।।(०३)

नहुषो नाम राजर्षिर्व्यक्तं ते श्रोत्रमागतः ।**
तवैव पूर्वः पूर्वेषामायोर्वंशधरः सुतः ।। १३ ।।(०४)

तपोभिः क्रतुभिश्चैव विद्ययाभिजनेन च ।

त्रैलोक्यैश्वर्यमतुलं प्राप्तं मे विक्रमेण च ।

अथ सर्वनृपोन्माथी मदो मां समुपाविशत् ।(०५)

---

(०१) (१)दिष्टस् (for दिष्ट्या) , (२)भक्ष्यो; भक्ष्यं (for भक्षो) , देवैर् भक्षो, (३)ष्टः दत्तः दिष्ट्या, कालेन (for कालस्य) , महता (for महतः),

(०२) (१) हितं; हीदं (for त्विदं) , पूर्वं (for प्राप्तं) (२)स्पर्शरूपम्; सर्परूपम्; भुजगत्वम् (३) तथा,(for तद) ,मया (ममा) ख्येयं; त्वया मत्तः (for मया ख्याप्यं) , (४)कुरु शृणु हन्त मे (for सत्तम) ,श्रोतव्यं शृणु तन्मम,

(०३) (सर्प उ (२)रोषात्सुर; भयं कोपान्; कोपादस्मि (for ह्यहं कोपान् ) , महर्षिणां; महर्षिणः; मनीषिणः; महर्षिणा, (for मनीषि) , (३)प्रति (for परि), (४) तवाद्य; सर्वस्य; सर्वं ते (for सर्पस्य), सर्वं तत्कथयामि ते,

(०४) (१)नघुषो (for नहुषो), (२) व्यर्थं (for व्यक्तं), (३)तथैव (for तवैव), वर्यः (for पूर्वः), सर्वेषाम् (for पूर्वेषाम्) , (४)धरः (for करः), स्मृतः (for सुतः,

(०५) (सम्प्राप्य (for प्तः) ,

सहस्रं मुनिमुख्यानामुवाह शिबिकां मम ।

ततो विभ्रंशितश्चाहमगस्त्येन महात्मना ।

इमामवस्थां सम्प्राप्तः पश्य दैवमिदं मम ।

न दैवं प्रज्ञया तात न बलोत्साहशक्तिभिः ।(०१)

न सहायबलैश्चापि कश्चिदप्यतिवर्तते ।

कदाचिदसम्पदः ।

यथा प्राज्ञाश्च शूराश्च दृश्यन्ते दुःखजीविनः ।(०२)

भीच्छ्वर्वाश्च सुखिनस्तस्माद्दैवं हि कारणम् ।(०३)

**सोऽहं शापादगस्त्यस्य ब्राह्मणानवमन्य च ।****
**इमामवस्थामापन्नः पश्य दैवमिदं मम** ।। १४ ।।(०४)

पतितो हि विमानाग्र्यात्स मुनिः प्रार्थितो मया ।

कुरु शापान्तमित्येवं प्रोवाचेदं दयान्वितः ।

यस्तु ते व्याहृतान्प्रश्नान्प्रतिवक्ष्यति धर्मतः ।

स त्वां मोक्षयिता शापात्कस्मिंश्चित्कालपर्यये ।

न च ते मत्प्रसादेन स्मृतिभ्रंशो भविष्यति ।

---

(०१) ( **कृतं** (for **मिद**), **पश्य मे दैवपर्ययं यदि** (for **अथ**),

(०२) (**यदि** (for **यथा**),

(०३) ((**पं०२**)**अखिलं** (for **अतुलं**) , **नृपोत्सादं** (for **नृपोन्माथी**) ,

(०४) (१)**सोहमापद्गतो राजा** (२) **मत्य मन्य**, **वै** (for **च**), (३) **सम्प्राप्तः**; **सम्पन्नः** (for **आपन्नः**), (४) **देहम्**;**दर्पम्** (for **दैवम्**) , **इमं इदं मयि** (for **मम**),

बलवानपि जन्तुस्ते गृहीतो वश्यमेस्यति ।

**त्वां चेदवध्यं दायादमतीव प्रियदर्शनम्।****
**अहमद्योपयोक्ष्यामि विधानं पश्य यादृशम्** ॥ १५ ॥(०१)

**न हि मे मुच्यते कश्चित्कथञ्चित्प्रग्रहं गतः ।****
**गजो वा महिषो वापि षष्ठे काले नरोत्तम** ॥ १६ ॥(०२)

**नासि केवलसर्पेण तिर्यग्योनिषु वर्तता।****
**गृहीतः कौरवश्रेष्ठ वरदानमिदं मम** ॥ १७ ॥(०३)

**पतता हि विमानाग्र्यान्मया शक्रासनाद्द्रुतम्।****
**कुरु शापान्तमित्युक्तो भगवान्मुनिसत्तमः ।**(०४)
**स मामुवाच तेजस्वी कृपयाभिपरिप्लुतः** ॥ १८ ॥(०५)

यस्त्वया वेष्टितो राजन्मोहमेति महाबलम्।

---

(०१) (१)अमेध्यं (for अवध्यं) , ध्यं दायादम्; द्यमानं च (for ध्यमायान्तम्), अवश्यं तु मया दृष्टम्; अवध्यं (for श्यं), त्वां तु च; स्व दायादम्, (२) अ द्भुत (for प्रिय), (३)भोक्ष्यामि (for योक्ष्यामि), (४)मादृशं (for या),

(०२) (१)मुच्येत मे (for मे मुच्यते), किञ्चित् (for कश्चित्), (२) कदाचिद् (for कथञ्चिद्), प्रग्रहं ( ग्रहणं), (४) प्राप्तकालो; षष्ठकाले; प्राप्ते काले , परन्तप; द्विजोत्तम; विशेषतः ( नरो),

(०३) (१) नास्मि; नासीत् (for नासि), दर्पेण (for सर्पेण), (२) तिर्यग्योनौ हि; नौ प्र; नौ नि; नौ वि; नौ च, तिष्ठता; वर्तिना (for वर्तता),

(०४) (१)विमानाग्र्यान् (२)महा(for मया), सिंहा (for शक्रा) , सनच्युतात् (for सनाद् ०द्रुतम्), तदा (for द्रुतम्), (३) तदा; कदा (for कुरु), शापान्तः (४) मया स (for भगवान्,

(०५) (२)क्षमया (for कृपया), अ ति (for अ भि) , मुनिसत्तमः; समभि (for अ भि ,परि०),

मोक्षस्ते भविता राजन्कस्माच्चित्कालपर्ययात् ।। १९ ।।

यस्त्वया वेष्टितो राजन्मोहमेति महाबलः(०१)

सर्पः-

ततोऽस्मि पतितो भूमौ न च मामजहात्स्मृतिः ।

स्मार्तमस्ति पुराणं मे यथैवाधिगतं तथा ।। २० ।। (०२)

यस्तु ते व्याहृतान्प्रश्नान्प्रतिब्रूयाद्विभागवित्।**

स त्वां मोक्षयिता शापादिति मामब्रवीदृषिः ।। २१ ।।(०३)

गृहीतस्य त्वया राजन्प्राणिनोऽपि बलीयसः ।**

सत्त्वभ्रंशोऽधिकस्यापि सर्वस्याशु भविष्यति ।। २२ ।।(०४)

इह(इति) चाप्यहमश्रौषं वचस्तेषां दयावताम्।**

मयि सञ्जातहार्दानामथ तेऽन्तर्हिता द्विजाः ।। २३ ।।(०५)

सोऽहं परमदुष्कर्मा वसामि निरयेऽशुचौ।**

सर्पयोनिमिमां प्राप्य कालाकाङ्क्षी महाद्युते ।। २४ ।।(०६)

वैशम्पायनः-

---

(०१) (१) ख-यस्त्वयावेष्टितो राजन् नोहनेति महीबलः । (४) पर्यये कस्मिंश्चित्कालपर्यये,

(०२) (२)तु (for च), प्रजहात्; , प्रजहौ (for अजहात्), (३) स्मार्यम्; स्मर्तुम् ।। (for स्मार्तम्), अस्मि,(for अस्ति) ,यथा च (for यथैव), अ धिकृतं, अ पि गतं; अ वगतं (for अ धिगतं), तदा (for तथा),

(०३) (१)मे (for ते), (२) क-ख-घ-विशेषवित्, विशेषवत्; विशेषतःविभागवित् (for विशेष), (३) त्वा; मां (for त्वां) ,राजन् (for शापाद्), (४)शापान् (for इति), मुनिः(for ऋषिः),

(०४) (२)प्राणतोपि, (३)बल (for सत्त्व), श्चापि; स्येति (for स्यापि), (४) सर्पस्य; सर्पेण; सर्वथा (for सर्वस्य), अ पि (for आ शु,

(०५) (१)वां (for चा), (२)वाचम् (for वचस्), (३) संमान (for सञ्जात), हर्षाणाम्; हार्दस्य (for हार्दानाम्), (४)ततम् (for अथ), सहिता (for न्तर्हिता,

(०६) (१)सोहं कृत्वा सुदुष्कर्म (२) ख-वसामीह वने शुभे । क-घ-..शुभे। दृ ष्ट वने (for निरये) शुभे (for शुचौ), (३) प्राप्तः (for प्राप्य), (४)काल (for काला,

तमुवाच महाबाहुर्भीमसेनो भुजङ्गमम् ॥ २४ ॥

भीमसेनः-

न च कुप्ये महासर्प न चात्मानं विगर्हये ॥ २५ ॥(०१)

यस्मादभावी भावी वा मनुष्यः सुखदुःखयोः ।**
आगमे यदि वापाये न तत्र ग्लपयेन्मनः ॥ २६ ॥(०२)

दैवं पुरुषकारेण को वञ्चयितुमर्हति।**
दैवमेव परं मन्ये पुरुषार्थो निरर्थकः ॥ २७ ॥(०३)

पश्य दैवोपघाताद्धि भुजवीर्यव्यपाश्रयम्।**
इमामवस्थां सम्प्राप्तमनिमित्तमिहाद्य माम् ॥ २८ ॥(०४)

किन्तु नाद्यानुशोचामि तथाऽऽत्मानं विनाशितम्।**
यथा तु विपिने न्यस्तान्भ्रातॄन्राज्यपरिच्युतान् ॥ २९ ॥(०५)

हिमवांश्च सुदुर्गोऽयं यक्षराक्षससङ्कुलः ।**
मां समुद्वीक्षमाणास्ते प्रपतिष्यन्ति विह्वलाः ॥ ३० ॥(०६)

विनष्टमथ मां श्रुत्वा भविष्यन्ति निरुद्यमाः ।**

---

(०१) (वैश उ उ (१)बाहो (for बाहुर्), (२) महाबलः (for भुजं) , (३) न कुप्ये न कुप्ये तत् ; तत्र कुप्ये (for न ते कुप्ये), राज (for सर्प), नात्मनो ने द्विजोत्तम; वै द्विजोत्तम नृपसं,

(०२) (१)यत्स्याद्; यः स्याद्; तस्माद् (for यस्माद्), अवादी; अभावे (for अभावी), (४)तत्र न ग्राप ग्लाप (for ग्लप), जनः (for मनः),

(०३) (२)तिव; वञ्च; विव (for निव), (३) दैवतं हि (for दैवमेव) , (४)पौरुषं तु निरर्थकं,

(०४) (१)दैवो० (for दैवो०), पाताद् (घाताद्) वै (for हि), (२) श्रयात्; श्रितं; श्रयः (३) आपदं (for अवस्थां), आपन्नम् (for सम्प्राप्तम्) , (४)यन्निमित्तम्; सनिमित्तम् (for अनिमित्तम्) ,महद्धि मां; इहाद्य मे; इहोद्यमं (for इहाद्य माम्),

(०५) (१)नाभि; अ द्य न मां न, अ पि (for अ नु) ,अहं तु नानुशोचामि (३)हिं; सु (for तु), त्यक्तान् (for न्यस्तान्) , (४)राज्यात् (for राज्य),

(०६) (३) न मामुदीक्षमाणास्ते; मां समुद्वीक्षमाणास्ते (४)प्रयति, प्रतपि (for प्रपति),

धर्मशीला मया ते हि बाध्यन्ते राज्यगृद्धिना ।। ३१ ।।(०१)

अथवा नार्जुनो धीमान्विषादमुपयास्यति।**
सर्वास्त्रविदनाधृष्यो देवगन्धर्वराक्षसैः ।। ३२ ।।(०२)

समर्थः स महाबाहुरेकोऽपि सुमहाबलः ।**
देवराजमपि स्थानात्प्रच्यावयितुमञ्जसा ।। ३३ ।।(०३)

किं पुनर्धृतराष्ट्रस्य पुत्रं दुर्द्यूतदेविनम्।**
विद्धिष्टं सर्वलोकस्य दम्भमोहपरायणम् ।। ३४ ।।(०४)

मातरं चैव शोचामि कृपणां पुत्रगृद्धिनीम्।**
यास्माकं नित्यमाशास्ते महत्त्वमधिकं परैः ।। ३५ ।।(०५)

तस्याः कथं त्वनाथाया मद्विनाशाद्भुजङ्गम।**
सफलास्ते भविष्यन्ति मयि सर्वे मनोरथाः ।। ३६ ।।(०६)

नकुलः सहदेवश्च यमौ च गुरुवर्तिनौ।**

---

(०१) (१)विनाशम् (for विनष्टम्) ,मां (for वा) , (३)शील मयसू; शूलमयासू; शीलमयासू; ए ०शीलतया; ०शीलास्त्वया (for शीला मया) , तर्हि; तेपि (for ते हि) , (४) बध्यन्ते ( बाध्यन्ते) , गृद्धिनः; विग्रहाः; , गर्द्धिनः ०गृध्नुना,

(०२) (१)अ पि (for न) , (३)दिव्यास्त्र (for सर्वास्त्र), दिव्यास्त्रविधि द नाधृष्यो, (४)गन्धर्वदानवैः; दानवराक्षसैः,

(०३) (१)समर्थः सुमहाबाहो (२)एकः स; एकोपि; एको वा (for एकाह्ना), स (for सु), चान्तरेण मां (for सुमहाबलः), एकेनाह्ना (क्ष्णा) महाबलः (४) क-ख-घ-मोजसा, प्रा (for प्र) , अञ्जसा (for ओ०),

(०४) (२)चूतेन; तु यूय (for दुर्धूत०) , द्विष्टं हि; विष्टं हि; त्विष्टं हि; विनष्टं (for तद्विष्टं)
(४)दम्भमोह; लोभमोह; मानाल्लोभ,

(०५) (१)त्वेव; त्वनु (for चैव), (२) पुत्रगर्द्धिनीं; ०वर्द्धिनीं
(३)सा (for या), अ स्मासु (for अ स्माकं) , (४)शरैः (for परैः)

(०६) (१)कथं तस्यामनाथायां; कथं तस्या ह्य अ प्य नाथाया; तस्याः कथं (for कथं तस्याम् त्वनाथाया
(३)सफला (for अफला), (३)मम (for मयि) ,सर्व; ,सर्प (for सर्वे),

मद्बाहुबलसङ्गुप्तौ नित्यं पुरुषमानिनौ ।। ३७ ।।(०१)

भविष्यतो निरुत्साहौ भ्रष्टवीर्यपराक्रमौ।**
मद्विनाशात्परिद्यूनाविति मे वर्तते मतिः ।। ३८ ।।(०२)

वैशम्पायनः-

एवंविधं बहु तदा विललाप वृकोदरः ।**
भुजङ्गभोगसंरुद्धो नाशकच्च विचेष्टितुम् ।। ३९ ।।(०३)

युधिष्ठिरस्तु कौन्तेयो बभूवास्वस्थचेतनः ।**
अनिष्टदर्शनान्घोरानुत्पातान्परिचिन्तयन् ।। ४० ।।(०४)

दारुणं ह्यशिवं नादं शिवा दक्षिणतः स्थिता।**
दीप्तायां दिशि वित्रस्ता रौति तस्याश्रमस्य ह ।। ४१ ।।(०५)

एकपक्षाक्षिचरणा वर्तिका घोरदर्शना।**
रक्तं वमन्ती ददृशे प्रत्यादित्यमभासुरा ।। ४२ ।।(०६)

शशंस तस्मै पाञ्चाली चिरयातं वृकोदरम् ।

---

(०१) (२)यमौ च (for यमजौ) , (३)संस्तम्भौ; सङ्गुप्तौ; संरब्धौ,

(०२) (१) भविष्यतो ष्येते निरुत्साहौ, (३)नाश (for नाशात्), (४)निश्चिता (for वर्तते),

(०३) (वेशं उ १)तथा (for तदा) , (२)विलप्य च; विप्रलाप (for विल),
(३)संनद्धो; ०संरब्धो (for संरुद्धो) ,(४)न शशाक; नाशकत्स (for नाशकच्च),

(०४) (१)च (for तु) ,अ स्वस्त आ श्वस्त (for अ स्वस्य) , (३)अरिष्टदर्श; अतिदुर्दर्श (४) तान्विचिन्त; बहु चिन्त० (for परिचिन्त),

(०५) (१)करुणं; दारुणाम् (for दारुणं) , तु (for हि), (४)च; हि (for ह),

(०६) (१)पादाक्षि (for पक्षाक्षि) , चरणां; चरणान् वचना (for चरणा) , (२)नर्तका; मर्तुकां; ,नर्तुका; वर्तकीं; नर्तकी; वर्तिकां; जम्बुकी; अत्यन्तं; ,नत्यूहान् (हा) (for वर्तितका) ,०दर्शनाः; ०दर्शनां; दर्शनान् (३) क-घ-रुधिरं वमतो दर्शत् प्रत्यादित्यं खरस्वनात् । ख-वमन्तो रुधिरंभूरि प्रत्यादित्यं खरस्वनाः । असृग्र; रक्तं (for रुधिरं) , वमते; वमन्तीं; वमती; वमन्तीर् (for वमन्ती) , वमती दृष्टा; वमतोदर्शत् पश्यत् (for वमन्ती ददृशे) , (४)अपस्वना; अभासुरा रां; ०राः; अभास्वरा; अपस्वरां ( रं; राः;) ,अथाम्बरात्, खरस्वनान् दित्यसमस्वना; स्वरं; दित्यमहासुरा; दित्यपुरःमराः पवोपि तँश्च हम् ए क्ये ३ ये० त द कारश्चाप्यनिष्टःसमपद्यः,

स प्रतस्थे महाबाहुर्वौम्येन सहितो नृगः । ।

द्रौपद्या रक्षणं कार्यमित्युवाच धनञ्जयम्

**प्रववौ चानिलो रूक्षश्चण्डः शर्करकर्षणः ।****
**अपसव्यानि सर्वाणि मृगपक्षिरुतानि च ।। ४३ ।।**(०१)

**पृष्ठतो वायसः कृष्णो याहि याहीति शंसति।****
**मुहुर्मुहुः स्फुरति च दक्षिणोऽस्य भुजस्तथा ।। ४४ ।।**(०२)

**हृदयं चरणश्चापि वामोऽस्य परितप्यति।****
**सव्यस्याक्ष्णो विकारश्चाप्यनिष्टः समपद्यत ।। ४५ ।।**(०३)

**धर्मराजोऽपि मेधावी मन्यमानो महद्भयम्।****
**द्रौपदीं परिपप्रच्छ क्व भीम इति भारत।**(०४)
**शशंस तस्मै पाञ्चाली चिरयातं वृकोदरम् ।। ४६ ।।**(०५)

**स प्रतस्थे महाबाहुर्धौम्येन सहितो नृपः ।। ४७ ।।**(०६)

**कथयामास तत्सर्वं मृगान्हन्तुमितो गतम् ।****
**तच्छ्रुत्वा त्वरितो राजा भृशमुद्विग्नमानसः ।। ४८ ।।**(०७)

---

(०१) (१)चानिलो (for अ निलो) , (२)चश्च्रु (for चण्डः) , वर्पणः (for कर्पणः) , (३)सत्वानि; चैवासन्, (for मर्वाणि) , (४)शतानि च,

(०२) (२)वाचति; ; वासं शसं (for वाशं) , (३)स्फुरति च; प्रस्फुरतेतु (४) च (for अ स्य) , ततः; तदा (for तथा),

(०३) (१)चरणौ; चयनम् (for चरणम्),चास्य (for चापि) , हृदयं कम्पते तस्य,
(२)वामे;वासो (for वामो) ,वि० पि (for स्य) , परितप्यते; तप्यति; नृत्यति
(३) रवह्वयश्च (for स्य) , अ क्षणोर् (for क्ष्णो) ,विकारं च
(४) अ पि अ रिष्टः; ( अ ) निशं; अ निष्टं (for अ निष्टः),

(०४) (१)धर्मराजोपि मे (२) मन्य (for शङ्) ,महाभयं (४)भामिनि (for भारत),

(०५) (१)तस्य; राज्ञे (for तस्मै) , (२) चिरायातं,

(०६) (३)सम्प्रतस्थे; प्रतस्थे स नृप,

(०७) (४)प्रभुः (for नृपः), धौम्येन सह पाण्डवः,

**द्रौपद्या रक्षणं कार्यमित्युवाच धनञ्जयम्।****
**नकुलं सहदेवं च व्यादिदेश द्विजान्प्रति ।। ४९ ।।(०१)**

**स तस्य पदमुन्नीय तस्मादेवाश्रमात्प्रभुः ।****
**ददर्श पृथिवीं चिह्नैर्भीमस्य परिचिह्निताम् ।। ५० ।।(०२)**

मृगयामास कौन्तेयो भीमसेनं महावने ।
स प्राचीं दिशमास्थाय महतो गजयूथपान्।(०३)
ततो मृगसहस्राणि मृगेन्द्राणां शतानि च ।
पतितानि वने दृष्ट्वा मार्गं तस्याविशन्नृपः ।(०४)

**धावतस्तस्य वीरस्य मृगार्थं वातरंहसः ।****
**ऊरुवातविनिर्भग्ना द्रुमा व्यावर्जिताः पथि ।। ५१ ।।(०५)**

**स गत्वा तैस्तदा चिह्नैर्ददर्श गिरिगह्वरे।****
**गृहीतं भुजगेन्द्रेण निश्चेष्टमनुजं तदा ।। ५२ ।।(०६)**

रूक्षमारुतभूयिष्ठे निष्पत्रद्रुमसङ्कुले।
इ(ई)रिणे निर्जले देशे कण्टकिद्रुमसङ्कुले।
अश्मस्थाणुक्षुपाकीर्णे सुदुर्गे विषमोत्कटे।(०७)

---

(०१) (२)इत्युक्त्वा च (for इत्युवाच),
(०२) (१)अन्वीय (for उन्नीय) , (२) विभुः; पुनः (for प्रभुः),
(०३) (३)पदवीं (for पृथिवीं) , (४)पद (for परि),
(०४) (विदन्नृपः (for विशन्नृपः),
(०५) (१)धावमानस्य धा वी रस्य; ; सदृशं धावतस्तस्य (२)मृगार्थं णां (for यें) ,
(३) क-ख-घ- वात , ख-पातविनिर्भिन्नन्, भिक्षा; भिन्नान्; , भिग्रा (for भग्नान् )
(४) व्यावर्ति; आवर्जि (for व्यावर्जि० ), द्रुमा व्यावर्जि (र्ति) ताः पधि,
(०६) (१)गत्वा च तैम् चैतैस् तथा (for तदा),
(०७) (१)सङ्कुले (for सङ्कटे) ,(२)निर्जने (ले)
(३)क्षयां (for क्षुपा०) , (४) विचेष्टम् (for निश्चेष्टम्) ,तदा; स्थितं (for तथा),

(अस्मिन् आजगरपर्वणि १५५ अध्याये ५२ श्लोकाः सन्ति )

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अजगरपर्वणि युधिष्ठिरभीमदर्शने पञ्चशदधिकशततमोऽध्यायः ।। १५० ।।

(आजगरपर्वणि ......ऽध्यायः)

# 03- 06- 151Adhyaya

महाभारततत्तात्पर्यनिर्णये २२ अध्याये

गते भीमे निमित्तानि दृष्ट्वा राजा युधिष्ठिरः ।

पप्रच्छ क्व गतो भीम इति कृष्णां चलन्मनाः ।। ३५१ ।।

यातं मृगार्थं स निशम्य तस्यास्तदूरुवेगात् पतितान् नगेन्द्रान् ।

दृष्ट्वा पथा तेन ययौ स तत्र दृष्ट्वा च सर्पावृतमन्वपृच्छत् ।। ३५२ ।।

स कारणं नहुषात् सर्वमेव शुश्राव तत्प्रश्नमशेषतश्च ।

भ्रातृस्नेहाद् व्याकरोद् धर्मसूनुस्तदैव सोऽप्यारुहत् स्वर्गलोकम् ।। ३५३ ।।

दिव्याम्बरे कुण्डलिनि स्वपूर्वे गते विमानेन स धर्मराजः ।

भीमश्चाऽयात् स्वाश्रमायैव सर्वं युधिष्ठिरः कथयामास तत्र ।। ३५४ ।।

श्रुत्वा कृष्णा भ्रातरश्चास्य सर्वे सर्वे मुनीन्द्रा भीमसेनेऽतिभक्ताः ।

व्रीडां ययुर्भीमसेनग्रहेण तथाऽब्रुवन् स्नेहतो भीमसेनम् ।। ३५५ ।।

नैतादृशं साहसं तेऽनुरूपं शक्तोऽपि यत् स्वात्मनो मोक्षणाय ।

नैवाऽकरो यत्नमतो निजानां महद् दुःखं हृदये प्रार्पयस्त्वम् ।। ३५६ ।।

मैवं पुनः कार्यमिति ब्रुवन्तः समाश्लिषन् सर्व एवैत्य भीमम् ।

ततोऽहोभिः कैश्चिदापुः कुरूणां राष्ट्रं पार्था मुनिमुख्यैः समेताः ।। ३५७ ।।

# १५१. एकपञ्चाशदधिकशततमोऽध्यायः

वैशम्पायनः

**युधिष्ठिरस्तमासाद्य सर्पभोगेन वेष्टितम्।****
**दयितं भ्रातरं धीमानिदं वचनमब्रवीत्** ।। १ ।।[०१]

युधिष्ठिरः-

**कुन्तीमातः कथमिमामपदं त्वमवाप्तवान्।****
**कश्चायं पर्वताभोगप्रतिमः पन्नगोत्तमः** ।। २ ।।[०२]

वैशम्पायनः-

**स धर्मराजमालक्ष्य भ्राता भ्रातरमग्रजम्।****
**कथयामास तत्सर्वं ग्रहणादि विचेष्टितम्** ।। ३ ।।[०३]

अयमार्य महासत्त्वो भक्षार्थं मां गृहीतवान्।
नहुषो नाम राजर्षिः प्राणवानिव सं स्थितः ।

**युधिष्ठिरः**

मुच्यतामयमायुष्मन्भ्राता मेऽमितविक्रमः ।[०४]
वयमाहारमन्यं ते दास्यामः क्षुन्निवारणम्।

**सर्पः**

आहारो राजपुत्रोऽयं मया प्राप्तो मुखागतः ।

---

(०१) (१)धर्मराजः (for युधिष्ठिरम्) ,समा (for तमा) , (२)भोगेन (for ०भोगाभि) , (३) भ्रातरं दयितं भीमम्; धीमान् (for वीरम्) , (४)इदमित्यब्रवीद्वचः,
(०२) (२)इहाप्त (for अवाप्त) , आपदं प्राप्तवानसि; यदि त्वमिहमाप्तवान् (४)भुजगोत्तमः; नागसत्तमः (for पन्नं) ,भोगः पन्नगसत्तमः,
(०३) (१)धर्मराजं समालोक्य, (२)ततो (for भ्राता), (४)ग्राहेणाभिविचे वे ष्टितः,
(०४) (विक्रम (for विक्रमाः),

गम्यतां नेह स्थातव्यं श्वो भवानपि मे भवेत्।
व्रतमेतन्महाबाहो विषयं मम यो व्रजेत्।
स मे भक्षो भवेत्तात त्वं चापि विषये मम।
चिरेणाद्य मयाऽऽहारः प्राप्तोऽयमनुजस्तव ।
नाहमेनं विमोक्ष्यामि न चान्यमभिकाङ्क्षये।

युधिष्ठिरः

**देवो वा यदि वा दैत्य उरगो वा भवान्यदि।****
**सत्यं सर्प वचो ब्रूहि पृच्छति त्वां युधिष्ठिरः ।। ४ ।।**

किमर्थं च त्वया ग्रस्तो भीमसेनो भुजङ्गम।

**किमाहृत्य विदित्वा वा प्रीतिस्ते स्याद्भुजङ्गम।****
**किमाहारं प्रयच्छामि कथं मुञ्चेद्भवानिमम् ।। ५ ।।**[०१]

सर्पः

**नहुषो नाम राजाहमासं पूर्वस्तवानघ ।****
**प्रथितः पञ्चमः सोमादायोः पुत्रो नराधिप ।। ६ ।।**[०२]

**क्रतुभिस्तपसा चैव स्वाध्यायेन दमेन च ।****
**त्रैलोक्यैश्वर्यमव्यग्रं प्राप्तोऽहं विक्रमेण च ।। ७ ।।**[०३]

**तदैश्वर्यं समासाद्य दर्पो मामगमत्तदा।****
**सहस्रं हि द्विजातीनामुवाह शिबिकां मम ।। ८ ।।**[०४]

---

(०१) (१)किं (for वा) , (३)कम् (for किम्) , वा सर्प (for आहारं) ,विद्यते त्वां; प्रयच्छेम (for च्छामि),

(०२)

(०३) (२)बलेन च; च भारत (for दमेन च) , (३)अव्यग्रः; अग्र्यं च; अप्राप्यं (for अव्यग्रं) ,(४)प्राप्तोहं (for प्राप्तं मे) , विक्रमेण च,

(०४) (१) क-ख-घ-मव्यग्रंप्राप्तो विक्रमणेन च ।, ऐश्वर्यं हि (for तदैश्वर्यं) , (२)मोहो (for दर्पो) ,

ऐश्वर्यमदमत्तोऽहमवमन्य ततो द्विजान्।**
इमामगस्त्येन दशामानीतः पृथिवीपते ।। ९ ।।[०१]

न तु मामजहात्प्रज्ञा यावदद्येति पाण्डव ।**
तस्यैवानुग्रहाद्राजन्नगस्त्यस्य महात्मनः ।। १० ।।[०२]

षष्ठे काले मयाऽहारः प्राप्तोऽयमनुजस्तव ।**
नाहमेनं विमोक्ष्यामि न चान्यदपि कामये ।। ११ ।।[०३]

प्रश्नानुच्चारितानद्य व्याहरिष्यसि चेन्मम।**
अथ पश्चाद्विमोक्ष्यामि भ्रातरं ते वृकोदरम् ।। १२ ।।[०४]

युधिष्ठिरः

ब्रूहि सर्प यथाकामं प्रतिवक्ष्यामि ते वचः ।**
अपि चेच्छक्नुयां प्रीतिमाहर्तुं ते भुजङ्गम ।। १३ ।।[०५]

वेद्यं च ब्राह्मणेनेह तद्भवान्वेत्ति केवलम्।**
सर्पराज ततः श्रुत्वा प्रतिवक्ष्यामि ते वचः ।। १४ ।।[०६]

सर्पः

---

आविशत् (for अगमत्),पुरा (for तदा) ,सहस्रं स्वाणि, (for स्रं हि) , (४)वहन्ति (for उवाह)

(०१) (१)ऐश्वर्यान् (for ऐश्वर्य) ,मोहेन (for मत्तोहम्) , (२)मत्य (for मन्य) ,द्विजोत्तमान् (for ततो द्विजान्) , वाहयन्सर्वतो द्विजान्, (३)इमामवस्थामगमं, (४) शापेन (for आनीतः) , पृथिवीतले; इति मे स्मृतिः,

(०२) (१)तत्र; न च (for न तु) , मां नाजहात्; मां न ज; मां व्यज; मां व्याज; मां प्रजहत् (for मामजहात्) ,(२)अद्येह; अत्येति; अभ्येति; अन्वेति (for अद्येति) ,पाण्डवः,

(०३) (१)मयाहारः रं; समाहारः; महाराज; , ममाहारं (२) प्राप्तोस्मि भरतर्षभ, (४) न चान्यद् अपि (for अभि) काङ्क्ष्ये (for कामये),

(०४) (१)उच्चरितान् तुभ्यं; श्रुत्वा; अद्य; त्वं तु; तांस्त्वं (for तु त्वं) , (२)व्याकरि (for व्याहरि०)

(०५) (१)सर्प ब्रूहि ब्रूहि सर्वं, (२) प्रतिमोक्ष्यामि; शक्तितः (for ते वचः) , (३) कामम् (for प्रीतिम्,

(०६) (१)सत्यश् (for वेद्यं) च तु (for यद्) (अ)हं (इ) व (इ) ह वेद्यं च यद्ब्राह्मणेन ब्रूहि यत्ते मया वाच्यं तत्त्वं धर्मभृतां वर(२) वचः तव (for ततः) सर्पराजोथ तच्छ्रुत्वा (४) प्रतिमोक्ष्यामि,

**ब्राह्मणः को भवेद्राजन्वेद्यं किं च युधिष्ठिर ।**

**ब्रवीह्यतिमतिं त्वां हि वाक्यैरनुमिमीमहे ।। १५ ।।(०१)**

युधिष्ठिरः

**सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा।******

**दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृतिः(तः) ।। १६ ।।(०२)**

परेषां च गुणान्वेषी सततं पुरुषर्षभ ।

सतोपि दोषान्राजेन्द्र न गृह्णाति कदाचन ।(०३)(३)शंस (for राजम्)

दीनानुकम्पी सततं सततं साधुवत्सलः ।

नित्यं दानरतश्चैव त देवा ब्राह्मणं विदुः ।

सर्प उवाच ।

यत्नेन ब्रूहि राजेन्द्र कः कालः श्राद्धदानयोः ।

प्रश्नं प्रश्नविदां श्रेष्ठ सर्ववित्त्वं मतोसि मे ।

युधिष्ठिर उवाच ।

यत्र वै ब्राह्मणं पश्येच्छ्रोत्रियं ध्यानतत्परम् ।

धनं मन्येद्विशिष्टं तु स कालः श्राद्धदानयोः ।(०४)

सर्प उवाच ।

किं वेद्यं परमं राजम्प्रशंस मे त्वं युधिष्ठिर ।

सर्वज्ञोसि महाबाहो वाक्यैरनुमिमौमहे ।

---

(०१) (२) ख- शरीरनिष्ठं ब्रह्मण्यमात्मनिष्टमथापि वा । किं वेद्यं (३) प्रब्रूहि (for ब्रवीहि) , अतिमति-स्त्वं हि; मतिं हि त्वां; मतिं त्वाहं; मतित्वेन अनुमतिं तं त्वां हि (४) मिमीमहि; मिनोमि ते,

(०२) (१)दाक्ष्यं (for दानं) , तपः (for क्षमा) , शौचम् (for शीलम्) , (२)तपो (for दमो) (३) राजेन्द्र (for नागेन्द्र) , (४) स्मृतिः (for स्मृतः),

(०३) (२) किं सुखं भरतर्षभ,

(०४) (१) वरं (for धनं) ,(३) मन्ये (for मन्येद्),(४) तं कालं (for स कालः),

वेद्यं सर्प परं ब्रह्म निर्दुःखमसुखं च यत्।**
यत्र गत्वा न शोचन्ति भवतः किं विवक्षितम् ।। १७ ।।(०१)

सर्पः

चातुर्वर्ण्यं प्रमाणं च सत्यं च ब्रह्म चैव हि।
शूद्रेष्वपि च सत्यं च दानमक्रोध एव च ।। १८ ।।(०२)

आनृशंस्यमहिंसा च घृणा चैव युधिष्ठिर ।
वेद्यं यच्चात्र निर्दुःखमसुखं च नराधिप।
ताभ्यां हीनं पदं चान्यन्न तदस्तीति लक्षये ।। १९ ।।(०३)

तांश्च सर्वानशेषेण कथयस्व नराधिप

युधिष्ठिरः

शूद्रे तु यद्भवेल्लक्ष्म द्विजे तच्च न विद्यते।**
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ।। २० ।।(०४)

यत्रैतल्लक्ष्यते सर्प वृत्तं स ब्राह्मणः स्मृतः ।**
यत्रैतन्न भवेत्सर्प तं शूद्रमिति निर्दिशेत् ।। २१ ।।(०५)

यत्पुनर्भवता प्रोक्तं न वेद्यं विद्यतीति च ।

---

(०१) (१) यत्परमं (for सर्प परं,

(०२) (१) चेत्; तत्; ते (for च), (२) सत्याद्धि (for सत्यं च) , हि (for ह) ,
(३) हि च सत्यादि; च सत्यानि; च ज्ञानादि; यदा सत्यं (for च सत्यं च) ,
(४) अक्रोधम् (for अक्रोध) , चेति (for चैव,

(०३) (१)यथार्थ; यगत्थ; यच्चात्र; यच्चाथ; यद्ब्रह्म; यच्चार्थ (for यच्चात्थ)
(२)युधिष्ठिर; सुखं नृप (for नरा), (४) लक्ष्यते (for लक्षये),

(०४) (१) च तद्; तु यद्; चैव (for चैतद् ) , लक्ष्म (for लक्ष्यं) , (२)तच्चेन्; चैतन्; चैव
(for तच्च) दृश्यते लक्ष्यते (for विद्यते) , (३) नैव (for न वै),
(४)ब्राह्मणो न च; नैव ब्राह्मणः (for न च ब्रा),

(०५) (१) तल् (for (ए)तल्), लक्ष्यते सर्प यत्रैतत् यस्यैतत्; यस्यैव (२)तद्वृत्तं (for वृत्तं स) ,
स ब्राह्मण इति स्मृतः (३)सर्वं; सत्यं; नित्यं (for सर्प) , (४)शूद्र; , शूद्रं तम् (for तं शूद्रम्),

ताभ्यां हीनमतोऽन्यत्र पदं नास्ती(दमस्ती)ति चेदपि।। २२ ।। (०१)

एवमेतन्मतं सर्प ताभ्यां हीनं न विद्यते।**
यथा शीतोष्णयोर्मध्ये भवेन्नोष्णं न शीतता ।। २३ ।।(०२)

एवं वै सुखदुःखाभ्यां हीनं ना(नम)स्ति पदं क्वचित्।**
एषा मम मतिः सर्प यथा वा मन्यते भवान् ।। २४ ।।(०३)

सर्पः

यदि ते वृत्ततो राजन्ब्राह्मणः प्रसमीक्षितः ।**
वृथा जातिस्तदाऽऽयुष्मन्कृतिर्यावन्न विद्यते ।। २५ ।।(०४)

युधिष्ठिरः

जातिरत्र महासर्प मनुष्यत्वे महामते।**
सङ्करात्सर्ववर्णानां दुष्परीक्ष्येति मे मतिः ।। २६ ।।(०५)

सर्वे सर्वास्वपत्यानि जनयन्ति सदा नराः ।**
वाङ्मैथुनमथो जन्म मरणं च समं नृणाम् ।। २७ ।।(०६)

---

(०१) (१) भुजग (for भवता) , (२)भवतीति ह; विद्यतीति च ह विद्यते त्विति (यथा) ; विद्यते तथा वेद्यं त्वं वेद्यतीति ह; न तद्वेद्यं भवेत्त्विह अतीत्यान्यत्; इतीत्यत्र; अतोन्यत्र; इति ह्येतत्; अतो नान्यत्; अतीवान्यत्; ।। पदं नान्यत्; च वेवयत्र; अतोन्यत्तु; न वेद्यत्र; न मेन्यत्र (for अतीत्यात्र) , (४)अस्ति (for नास्ति), न च पश्यामि चेदपि,

(०२) (१)सत्यम् (for एवम्) ,मम (for एतन्) , परं; पदं (for मतं), सौम्य (for सर्प) , (२) तु (for न) , (४) नैव (for भवेन्), भवेच्छीतं न चोष्णता,

(०३) (२)चास्ति; नास्ति (for अस्ति), (४)कथं (for यथा,

(०४) (१)वै (for ते), यदि वृत्तं ततो राजन्; यद्येतद्वत्ततो रा; यदव्रतं ततो रा, (२)मीक्ष्यते(for ०मीक्षितः), (३) क-ख-घ-व्था जीतिस्तदायुष्मन् जातिर्या चात्र दृश्यते । विना; वृथा यथा (for व्यर्था) , तथा; तवा; त्वया (for तदा), (४) वृत्तं; क्रिया (for कृतिर्) जातेः; यस्मात् (for यावत्) ,न विद्यते; प्रशस्यते (for न दृश्यते), कृतिर्या (पृथिव्यां )चात्र दृश्यते;

(०५) (१) सत्व (for सर्प) , (२)मानुषत्वे; मनुष्येषु; मनुष्यत्वं विशिष्यते; विधीयते; प्रशस्यते (for महामते) (४) दुर्निरीक्ष्य इति स्मृतिः,

(०६) (२) सदा (for यदा,

इदमार्षं प्रमाणं च ये यजामह इत्यपि।**
तस्माच्छीलं प्रधानेष्टं विदुर्ये तत्त्वदर्शिनः ।। २८ ।।(०१)

प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते।
ततस्तु नामकरणं ततश्चौलं विधीयते ।। २९ ।।(०२)

ततोपनयनं प्रोक्तं द्विजातीनां यथाविधि ।
तदा(त्रा)स्य माता सावित्री पिता त्वाचार्य उच्यते ।। ३० ।।(०३)

तावच्छूद्रसमो ह्येष यावद्वेदे न जायते।**
तस्मिन्नेवं मतिद्वैधे मनुः स्वायम्भुवोऽब्रवीत् ।। ३१ ।।(०४)

कृतकृत्याः पुनर्वर्णा यदि वृत्तं न विद्यते।**
सङ्करस्त्वत्र नागेन्द्र बलवान्प्रसमीक्षितः ।। ३२ ।।(०५)

यत्रेदानीं महासर्प संस्कृतं वृत्तमिष्यते।**
तं ब्राह्मणमहं पूर्वमुक्तवान्भुजगोत्तम ।। ३३ ।।(०६)

सर्पः

---

(०१) (१) हि; मे (for च) , ()२ (उ त क्य अ पि) , (३) प्रमाणेष्टं (for प्रधानेष्टं),
(०२) (१) नाभेर्वर्धनात्; नाभिदर्शनात्; कर्तनात्; लवनात् ;
(०३) (१) तावत् (for वृत्त्या) ,ज्ञेयो (for ह्येष) (२)वेदी; वेदो; वेदान् (for वेदे), युज्यते (for जायते), तथो (for ततो),क्रमं (for विधि,
(०४) (३)तस्मिन्; तस्मात् (for अस्मिन्),एव (for एवं) ,मतित्वे च; मतिर्देवो; मतं द्वैधं;, मतं द्वेधा विधं द्वेधा (for मतिद्वैधे),
(०५) (१)कृतकृत्यः सर्ववर्णा सवर्णाय (for पुनर्वर्णा), (२)न नश्यति ते; न दूष्यते; ननु द्रुते नशिष्यति (for न विद्यते) , (३)संस्कारम् (for सङ्करम्) ,त्वस्य; तस्य (for तत्र), राजेन्द्र; विप्रस्य (for नागेन्द्रः), (४) क-घ-बलवान्ना समीक्ष्यते,
ख-संस्कारस्तत्र नागेन्द्र बलवान् प्रसमीक्ष्यते।
(पं१) स ह वीक्षितः; मतवी; सर्प वीक्ष्यतः; असमीक्षितः; न (प्र) समीक्ष्यते (for प्रसमी०),
फलभावे तु दृश्यते तदभावे समीक्ष्यते,
(०६) (२)सत्कृतं; यत्कृतं ० ते (for संस्कृतं), (४)तु भुजङ्गम (for भुजगो,

श्रुतं विदितवेद्यस्य तव वाक्यं युधिष्ठिर ।
भक्षयेयमहं कस्माद्भ्रातरं ते वृकोदरम् ॥ ३४ ॥(०१)

अ

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अजगरपर्वणि युधिष्ठिरसर्पसंवादे एकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥

(आजगरपर्वणि ......ऽध्यायः)

## 03- 06- 152Adhyaya

# १५२. द्विपञ्चाशदधिकशततमोऽध्यायः

युधिष्ठिरः

भवानेतादृशो लोके वेदवेदाङ्गपारगः ।
ब्रूहि किं कुर्वतः कर्म भवेद्गतिरनुत्तमा ॥ १ ॥(०२)

सर्पः

पात्रे दत्त्वाप्रियाण्युक्त्वा सत्यमुक्त्वा च भारत।**
अहिंसानिरतः स्वर्गं गच्छेदिति मतिर्मम ॥ २ ॥ (०३)

दानाद्वा सर्प सत्याद्वा किमतो गुरु दृश्यते।**
अहिंसाप्रिययोश्चैव गुरुलाघवमुच्यताम् ॥ ३ ॥(०४)

सर्पः

दानं च सत्यं तत्त्वं वा अहिंसा प्रियमेव च ।**

---

(०१) (२)महामते (for युधि) , आरण्यः,आरण्य आ (अ) जगर,

(०२) (१) ३दृशे चोक्ते (for दृशो लोके) , (३) सर्प (for कर्म) , (४) भूतिर् (for गतिर्),

(०३) (१)दानं (for पात्रे) , (for दद्यात् (for दत्त्वा) , (२) (ए)व; अ पि (for च),

(०४) (१)दानं सत्यं (for दानाद् सत्याद्) , दानाद्वा सत्यवाक्याद्वा, (२)किं नाम किमतः; किं चातः पर (वर) मुच्यते,० (३)चापि (for चैव),

एषां कार्यगरीयस्त्वाद्दृश्यते गुरुलाघवम् ॥ ४ ॥(०१)

कस्माच्चिद्दानयोगाद्धि सत्यमेव विशिष्यते।**
सत्यवाक्याच्च राजेन्द्र किञ्चिद्दानं विशिष्यते ॥ ५ ॥(०२)

(वा)क्वचिद्दानप्रयोगात् इत्यत्र सत्यकथने सति कस्याप्यनिष्टं न भवति चेत् दानादपि सत्यमेव विशिष्यते । चोरेण हिंसार्थं ब्राह्मणान्वेषणे क्रियमाणे सत्यवचनेन हिंराप्राप्तेः तादृशस्थले सत्यादपि दानमेव विशिष्यते ।

एवमेव महेष्वास प्रियवाक्यान्महीपते।**
अहिंसा दृश्यते गुर्वी ततश्च प्रियमिष्यते ॥ ६ ॥(०३)

एवमेतद्भवेद्राजन्कार्यापेक्षमनन्तरम्।**
यदभिप्रेतमन्यत्ते ब्रूहि यावद्ब्रवीम्यहम् ॥ ७ ॥(०४)

युधिष्ठिरः
कथं स्वर्गे गतिः सर्प कर्मणां च फलं ध्रुवम्।**
अशरीरस्य दृश्येत प्रब्रूहि विषयांश्च म ॥ ८ ॥(०५)

सर्पः
तिस्रो वै गतयो राजन्परिदृष्टाः स्वकर्मभिः ।**

---

(०१) (१)दानेन तत्वं; दानेन सह (for दाने रतत्वं), च तत्वं; च सत्वं; च सत्यं; तत्वं च; भारत (for रतत्वं च) , सत्ये वा; ३प्र सत्यं वा (सत्यं च), दानं च सत्यं तत्वं वा, (२) (अ) प्यहिंसा (for अहिंसा),प्रिययोस्तथा (for मेव च) , (३)तेषां; पर; अत्र (for एषां), यस्त्वं (for ०यसवाद्) उच्यते (for दृश्यते),

(०२)(१)क्वचिच्च (for कस्माच्चिद्), वा (for हि), तस्माच्च दानयोगाद्वा; क्वचिद्दानप्रयोगाद्धि; दान योगाच्च केषाश्चित् , (२) एतद्; एवं (for एव), (३)राजर्षे (for राजेन्द्र) , (४)किचिद् (for किञ्चिद्,

(०३) (१)महाराज (for महे), (२) प्रियवाक्यं; प्रियं वाक्यं; प्रियाद्वाक्यान्, वशिष्यते; महामते (for मही), (४)तस्याश्च (for तत,

(०४) (१)एव (for एतद्), (२)काङ्क्ष्याप्रेक्षम्; कार्याविक्षम्; कार्यं वेद्यम् (for कार्यापेक्षम्), अनुत्तमं (for अनन्तरम्), (३)अन्यं (for अन्यत्), तु त्वं (for ते), यथा त्वं मन्यसे राजान्, (४)तत् ते (for (अ) हम),

(०५)(१)स्वर्ग (for स्वर्गे), (३)दृश्यन्ते (for दृश्येत), (४) विषयं च प्रब्रूहि विषयांश्च मे,

मानुषं स्वर्गवासश्च तिर्यग्योनिश्च तत्त्रिधा ।। ९ ।।(०१)

तत्र वै मानुषाल्लोकाद्दानादिभिरतन्द्रितः ।**
अहिंसार्थसमायुक्तैः कारणैः स्वर्गमश्नुते ।। १० ।। (०२)

विपरीतैश्च राजेन्द्र कारणैर्मानुषो भवेत्।**
तिर्यग्योनिस्तथा तात विशेषश्चात्र वक्ष्यते ।। ११ ।।(०३)

कामक्रोधसमायुक्तो हिंसालोभसमन्वितः ।**
मनुष्यत्वात्परिभ्रष्टस्तिर्यग्योनौ प्रसूयते ।। १२ ।।(०४)

तिर्यग्योन्याः पृथग्भावो मनुष्यार्थे विधीयते।**
गवादिभ्यस्तथाश्वेभ्यो देवत्वमपि दृश्यते ।। १३ ।।(०५)

सोऽयमेता गति(ती)स्तात जन्तुश्चरति कार्यवान्।**
नित्ये महति चात्मानमवस्थापयते द्विजः ।। १४ ।।(०६)

जातो जातश्च बलवान्(वद्) भुङ्क्ते चात्मा स देहवान्।**

---

(०१) (१)मिश्रा (for तिस्रो), वि(for वै), (२) च (for स्व), जगदि ०ती ष्टा यथाविधि विधिस्मृताः मानुषं; मनुष्यः (for मानुष्यं), वासं (४)च ते; तथा; तासू (for च तत्),

(०२) (१) ख-तत्रैव मानुषाल्लोकात्तपोदानक्रियादिभिः। तत्रैव; तत्रापि; तत्रैवं; तत्र तं; अत्रैव मानुषाल्लोकान् मानुषा लोकाद्; मानुषा लोका (२)अनादिभिः (for अतन्द्रितः), (३) अहिंसार्थः समायुक्तः अहिंसार्थैश्च कार्यार्थैः(४) उच्यते अश्नुते,

(०३) (३)गतान्; यथा (for तथा), पार्थ; चात्र (for तात), (४)विशेषं ,लक्ष्यते; दृश्यते (for वक्ष्यते विषयस्तात लक्ष्यत,

(०४) (१)लोभ; राग (for क्रोधं), मोह (for लोभ),(२) यदा त्वत्र महत्वेन हिंसार्थो यं लोभ एव च ०योनिः (for योनौ), (३)मनुष्यमा ष्य आ विशेन्मोहात्स,(४) प्रजायते (for प्रसू) तिर्यग्योनिषु जायते तिर्यगवशो ग्वशगो भवेत्,

(०५) (२)तिर्यग्योन्याः;०ग्योनौ पृथग्भावे (२)मनुष्यत्वाद्; ष्यत्वं; ष्यार्थे; मानुष्यत्वं विधीयतां (३)तथाश्विभ्यो ०(४)अभि (for अपि), भिद्यते; विद्य (for दृश्य,

(०६) (१)ह्येता (for एता), तात (for सर्वा), सोयमेतावतीर्जातीर् (२)काल; वीर्य (for कार्य), (३)निम्ने; तिक्ते (for नित्ये), (४)यदि (for अव),स्थापयति; स्थाप्य चरेन् च वै; स्थापय वै (for स्थापयते), द्विजः (for नृप,

फलार्थस्तात निष्पृक्तः प्रजापालनभावनः ।। १५ ।।(०१)

युधिष्ठिरः
शब्दे स्पर्शे च रूपे च तथैव रसगन्धयोः ।**
तस्याधिष्ठानमव्यग्रो ब्रूहि सर्प यथातथम् ।। १६ ।।(०२)

किं न गृह्णासि(ति) विषयान्युगपत्वं(च्च) महामते।**
एतावदुच्यतां चोक्तं सर्वं पन्नगसत्तम ।। १७ ।।(०३)

सर्पः}
यदात्मद्रव्यमायुष्मन्देहसंश्रयणान्वितम्।**
करणाधिष्ठितं भोगानुपभुङ्क्ते यथाविधि ।। १८ ।।(०४)

ज्ञानं चैवात्र बुद्धिश्च मनश्च भरतर्षभ।**
तस्य भोगाधिकरणे करणानि निबोध मे ।। १९ ।।(०५)

मनसा तात पर्येति क्रमशो विषयानिमान्।**
विषयायतनस्थेन(स्थो) हि भूतात्मा क्षेत्रनिःसृतः(मास्थितः)।। २० ।।(०६)

---

(०१) (१)ततो।; जातौ (for जातो), जातौ; मातुर् (for जातशू्), बलवद्; भगवान् (for बलं), (२)नात्माथ; चात्माय; चात्माथ; चात्मापि; आत्मा च; नाम्राथ; नाम्नाय; नामय (for चात्मा स) भुङ्क्ते स्व त्म फलसम्भवं (३)क-ख-घ-प्रजोर्थे न तु निर्वृत्तः, प्रजार्थेन तु ० र्थं कर्म (for फलार्थस्तात), चारु; प्र तत्र (for तात), निष्कृत्तः;निर्मुक्तः निर्दिष्टः; निष्पन्नः; निर्वृत्तः निष्पत्तिः (for निष्पृक्तः), (४)पालन (for लक्षण),

(०२) (१)शब्दस्पर्शे (३)कस्य (for तस्य), अव्यग्रो (for ग्र), (४)सर्वं; तन्मे (for सर्प),

(०३) ((१)नु तु; च (for न), गृह्णाति (for सि),वा; च (for त्वं),(२) महीपते (for महामते),युगपच्च महाबुद्धे विषयान् यं किं न गृह्णति गृह्यते; गृह्णते (३)चोक्तं सर्वं चोक्त्वा (for चोक्तं), स एवमुच्यतां चोक्तः (४)सर्वं ब्रूहि महामते,

(०४) (१)तदा (for यदा),बुद्धिम् (for द्रव्यम्),यदामुत्रवानायुष्मन्, (२) देहे(for देहे), (३)कारणाधिष्ठितं तान्; करणाधिष्ठितो (for तान्), (४)युङ्क्ते (for भुङ्क्ते,

(०५) ((१)ज्ञानं चैव मनश्चात्र मनश्चैव महाभाग, बुद्धिश्च नरसत्तम (त्री), (३)भोगाधिकारेण (४)कर (for करं),

(०६) (१)स तु (for तात), मनः सततमन्वेति ०पर्येति (३) यतनं वेत्ति; यतनस्थे तु; स्थाने;

तत्र चापि नरव्याघ्र मनो जन्तोर्विधीयते।**
तस्माद्युगपदत्रास्य ग्रहणं नोपपद्यते ।। २१ ।।(०१)

स आत्मा पुरुषव्याघ्र भ्रुवोरन्तरमाश्रितः ।**
बुद्धि द्रव्येषु सृजति विविधेषु परावराम् ।। २२ ।।(०२)

बुद्धेरुत्तरकाला च वेदना दृश्यते बुधैः ।**
एष वै राजशार्दूल विधिः क्षेत्रज्ञभावनः ।। २३ ।।(०३)

युधिष्ठिरः
मनसश्चापि बुद्धेश्च ब्रूहि मे लक्षणं परम्।**
एतदध्यात्मविदुषां परं कार्यं विधीयते ।। २४ ।।(०४)

सर्पः
बुद्धिरात्मानुगातीव(गा तात) उत्पातेन विधीयते।**
तदाश्रिता हि सञ्ज्ञैषा बुद्धिस्तस्यैषिणी भवेत् ।। २५ ।।(०५)

बुद्धिरुत्पद्यते कार्यान्मनस्तूत्पन्नमेव हि।**
बुद्धेर्गुणविधानेन मनस्तद्गुणवद्भवेत् ।। २६ ।।(०६)

---

स्थो हि; स्थानं; त्वेन, (४)क्षेत्रमाश्रितः; ०मिश्रितः; मास्थितः; निश्चितः; विष्ठितः भूतक्षेत्रं विनिश्चितं,

(०१) (१)तत्र (for अत्र),अ वि च अत्रास्य अर्थस्य (४)विधीयते (for नोप),

(०२) (२)रन्तरतः स्थितः आस्थितः (for आश्रितः), (३) तद्वै (for बुद्धिं), बुद्धि द्रव्येषु सृजति (४) विषयेषु (for विवि), अ पवारणां; अ परावरां; परावरान्; परापरां; परां परां; परावरा,

(०३) (१)कालाच्च; काला च कालोत्थं कालाथ बुद्धेरुत्तमकालाच्च; , बुद्धेरुत्तारकालाश्च (२) वेदनं; चेतसो; चेतना (for वेदना), आ देश्यते (for दृश्यते), (३) पृथग् (for एष), ते (for वै), नर (for राज), (४)विधि; विधिं, (for विधिः), क्षेत्रस्य (for क्षेत्रज्ञ),विधिवत्क्षेत्रभावनः,

(०४) (२)किं (for मे), (३)यत्तद् (for एतद्), वपुषां (for विदुषां), (४)विधीयतां,

(०५) (१)आत्मगता (for आत्मानुगा), अ त्यन्तं अ तीव (for तात), (२) उत्पन्नेन, उत्पन्नेति; उत्पन्नस्य (for उत्पातेन), (३) अ पि; (ए)षा (for हि), सञ्ज्ञा च हि; सा ज्ञेया विज्ञेया; तस्यैषा (for सञ्ज्ञैषा), (४)बुद्धिस् (for विधिम्),तस्येषिणे; तस्यैव० वै; तस्यैषणा; तस्येषिणो; तस्यैषिणी; तत्रैषणे; तस्यैषणो,

(०६) (१)बुद्धिर् (for बुद्धेर्),० विधिर्नाम; ० विधानेन; विधिर्नास्ति (२)तपद्गुण (for तु गुण),

**एतद्विशेषणं तात मनोबुद्ध्योर्यदन्तरम्।****
**त्वमप्यत्राभिसम्बुद्धः कथं वा मन्यते भवान् ॥ २७ ॥**[०१]

**युधिष्ठिरः**
**अहो बुद्धिमतां श्रेष्ठ शुभा बुद्धिरियं तव ।****
**विदितं वेदितव्यं ते कस्मात्समनुपृच्छसि ॥ २८ ॥**[०२]

**सर्वज्ञं त्वां कथं मोह आविशत्स्वर्गवासिनम्।****
**एवमद्भुतकर्माणमिति मे संशयो महान् ॥ २९ ॥**[०३]

कथं च सर्पतां यातो भवान्ठयाख्यातुमर्हति ।[०४]

**सर्पः**
**सुप्रज्ञमपि चेच्छूरमृद्धिर्मोहयते नरम्।****
**वर्तमानः सुखे सर्वो मुह्यतीति मतिर्मम ॥ ३० ॥**[०५]

**सोऽहमैश्वर्यमोहेन मदाविष्टो युधिष्ठिर ।**
**पतितःप्रतिसम्बुद्धस्त्वां तु सम्बोधयाम्यहम् ॥ ३१ ॥**[०६]

**कृतं कार्यं महाराज त्वया मम परन्तप।****

---

(३) स्सुपद्यते, (for उत्पद्यते),कार्यान् (for कार्ये), (४)च (for हि),

(०१) (१)एतत्तात विशेषेण (२) बुद्धा चा बुद्धेर् (for बुद्ध योद्),यदन्तरं (for मयेरितम्), (३) अति; अपि ( for अभि), सङ्क्रुद्धः; सन्तुष्टः; सम्बद्धः; सम्बन्धं; सम्बद्धं (for सम्बुद्धः), (४)कथं कामं वा मन्यसे स्वयं,

(०२) (२)शुद्धा; महा; कृता; मता; नाम्रा (for शुभा), अयं (for इयं), (४)सम् (for माम्),कस्मान्नहुष, पृच्छसि,

(०३) (१)सर्वज्ञत्वात्; सर्वज्ञ त्वां; धर्मज्ञं त्वां (for सर्वज्ञं त्वां), (२) प्राविशत्; ह्यगमत् (for आविशत्),वासिनां; गामिनं,,

(०४) (एतद (for एवम,

(०५) (१)सुप्राज्ञम् वै (for चेत्),दूरम् (for शूरम्), (२)बुद्धिर् (for ऋद्धिर्), (४) मुह्यती (for नावैती),

(०६) (२)यदा विष्टो; मदयुक्तो अ वमन्य वै (for युधि), (३) पातितः; प्रतीतः (for पतितः), बुद्धः सन् (for सम्बुद्धम्), (४) अतः (for अहम्,

क्षीणः शापः सुकृच्छ्रो मे त्वयासम्भाष्य साधुना ।। ३२ ।।(०१)

अहं हि दिवि दिव्येन विमानेन चरन्पुरा।**
अभिमानेन मत्तः सन्कश्चिन्नान्यमचिन्तयम् ।। ३३ ।।(०२)

ब्रह्मर्षिदेवगन्धर्वयक्षराक्षसपन्नगाः ।**
करान्मम प्रयच्छन्ति सर्वे त्रैलोक्यवासिनः ।। ३४ ।।(०३)

चक्षुषा यं प्रपश्यामि प्राणिनं पृथिवीपते।**
तस्य तेजो हराम्याशु तद्धि दृष्टेर्बलं मम ।। ३५ ।।(०४)

ब्रह्मर्षीणां सहस्रं हि उवाह शिबिकां मम।**
स मामपनयो राजन्भ्रंशयामास वै श्रियः ।। ३६ ।।(०५)

तत्र ह्यगस्त्यः पादेन वहन्स्पृष्टो मया मुनिः ।
अगस्त्येन ततोऽस्म्युक्तो ध्वंस सर्पेऽति वै रुषा ।। ३७ ।।(०६)

लक्षालङ्कारः- अदृष्टेत तत इत्यत्र अदृष्टेन अगस्त्यहृदयान्तस्स्थितेन अदृष्टेन ब्रह्मणा ।

ततस्तस्माद्विमानाग्र्यात्प्रच्युतश्च्युतलक्षणः ।**

---

(०१) (३)पापः (for शापः),स (for सु), कृत्स्नप; कृच्छ्रान् (for कृच्छ्रो),

(०२) (१)नव्येन (for दि), (२)आ चरं (for चरन्), (३)अपि; अति (for अभि),सन्तप्तः; मनसि (for मत्तः सन्), वै (for सन्),किश्चिन्; कच्चिन्; क्वचिन् (for कश्चिन्),नान्यं किश्चिद् (for कश्चिन्नान्यम्),कश्चि (किश्चि; कश्चि), दन्यन्न चिन्तये,

(०३) (१)ब्राह्मणा; महर्षि (for ब्रह्मर्षि), व्यक्तभिर्देवगन्धर्वाः; ब्रह्मदेवर्षिगन्धर्व (२) पन्नगाः (for किंनराः), (३) कामानू वरं (for करान्), (४)सर्व (for सर्वे,

(०४) (१)सं (for यं), च (for प्र), (२) प्राणिनां श्वर; तले (for पते), (३)प्राणान् (for तेजो), (४)तथा (for तद्धि), दृष्टेर्बलं र्बलैर् (for दृष्टिबलं), महत् (for मम),

(०५) (१)मह (for ब्रह्म),तु (for हि),सहस्राणि (for ०स्रं हि), (२)प्रोवाह; वहन्ति (for उवाह), (३)ममा (for माम), (४)भारत (for वै श्रियः,

(०६) (१)अ पि (for हि),पापेन; तु मया (for पादेन), (२)पदा (for वहन्),महा (for मया),अगस्त्येन (for अदृष्टेन), हि; पि (for स्मि ), उ क्तं (for उ क्तो), (४)ध्रुवं (for ध्वंस), तदा; मृषा (for रुषा),सर्पस्त्वं च भवेति ह,

प्रपतन्बुबुधेऽऽत्मानं व्यालीभूतमधोमुखम् ।। ३८।।[०१]

आयाचं तमहं विप्रं शापस्यान्तो भवेदिति।**
सर्प उवाच प्रमादात्सम्प्रमूढस्य भगवन्क्षन्तुमर्हसि।। ३९ ।।[०२]

ततः स मामुवाचेदं प्रपतन्तं कृपान्वितः ।**
युधिष्ठिरो धर्मराजः शापात्त्वां मोक्षयिष्यति ।। ४० ।।[०३]

अभिमानस्य घोरस्य पापस्य च नराधिप।**
फले क्षीणे महाराज फलं पुण्यमवाप्स्यसि ।। ४१ ।।[०४]

ततो मे विस्मयो जातस्तद्दृष्ट्वा तपसो बलम्।**
ब्रह्म च ब्राह्मणत्वं च येन त्वाहमचूचुदम् ।। ४२ ।।[०५]

सत्यं दमस्तपो दानमहिंसा धर्मनित्यता।**
साधकानि सदा पुंसां न जातिर्न कुलं नृप ।। ४२ ।।[०६]

अरिष्ट एष ते भ्राता भीमसेनो महाबलः ।**
स्वस्ति तेऽस्तु महाराज गमिष्यामि दिवं पुनः ।। ४३ ।।[०७]

---

(०१) (१) विमा नाग्र्यात् (२)च्युतः प्रच्युतः (for प्रच्युतश्च्युत),लक्षणः (for भूषणः), (३) प्रा (for प्र (४)व्याध; व्याल (for व्याली),

(०२) (२)भविष्यति (for भवे०), सर्प उ (३) क-ख-घ-अज्ञानात्, प्रमादात्सं (दं मे ) प्रमूढस्य (४)भगवान् वक्तुम् (for क्षन्तुम्),

(०३) (२)प्रवदन्तं (for प्रप), दया (for कृपा), (४)त्वा (for त्वां,

(०४) (१)अति (for अभि), चैतस्य (for घोरस्य), (२)धनस्य; पाप शापं ( बल), (३) स्वा ह्य निर्दिष्टं (for महा), (४)पुण्यं फलम्,

(०५) (१)अति (for ततो), (२) दृष्ट्वा तत् तं दृष्ट्वा (३)ब्रह्मचर्यं ब्राह्मणत्वं (४)तेन (for येन), चा (for त्वा), अनूनुदं (for अम्लदम्,

(०६) (१)तपो दमो (for दमस्तपो), योगम्; दानम् (for योगम्), (२) त्वहिंसा (for अहिंसा), धर्म; ज्ञान (for दान),नित्यदा मित्युत; मित्यतः (for नित्यता), अहिंसा चापि सर्वशः (३) सतां (for सदा), (४)क्वचित् (for नृप), न ज्ञातिर्न बलं नृप,

(०७) (१)अरिष्टाद् (for अरिष्ट), एव (for एष), (२) मुक्तो भीमो बलः (for भुजः), भीमसेनो महाबलः (३)बाहो, (for राज), गमिष्येहं (for ष्यामि), दिवं पुनः गच्छामि त्रिदिवं नृप,

स चायं पुरुषव्याघ्र कालः पुण्य उपागतः ।
तदस्मात्कारणात्पार्थ कार्यं मम महत्कृतम् ॥ ४५ ॥[०१]

वैशम्पायनः

ततस्तस्मिन्मुहूर्ते तु विमानं कामगामि वै।**
अवपातेन महता तत्रावाप तदुत्तमम् ॥ ४६ ॥

इत्युक्त्वाऽऽजगरं देहं मुक्त्वा स नहुषो नृपः ।**
दिव्यं वपुः समास्थाय गतस्त्रिदिवमेव ह ॥ ४७ ॥[०२]

युधिष्ठिरोऽपि धर्मात्मा भ्रात्रा भीमेन सङ्गतः ।**
धौम्येन सहितः श्रीमानाश्रमं पुनरागमत् ॥ ४८ ॥[०३]

ततो द्विजेभ्यः सर्वेभ्यः समेतेभ्यो यथातथम्।**
कथयामास तत्सर्वं धर्मराजो युधिष्ठिरः ॥ ४९ ॥[०४]

तच्छ्रुत्वा ते द्विजाः सर्वे भ्रातरश्चास्य ते त्रयः ।**
आसन्सुव्रीडिता राजन्द्रौपदी च यशस्विनी ॥ ५० ॥[०५]

ते तु सर्वे द्विजश्रेष्ठाः पाण्डवानां हितेप्सया।**
मैवमित्यब्रुवन्भीमं गर्हयन्तोऽस्य साहसम् ॥ ५१ ॥[०६]

---

(०१) ((१)चापि (for चायं),(२) उपागतः (for उपस्थितः), (४)तन्मे (for मम,

(०२) ((१)कामगं शुभं (for गामि वै),अपदानेन; अपपातेन; अपवादेन (for अवपातेन २) मुक्त्वा (for त्यक्त्वा), नृप (for नृपः),यातम् (for गतस्), हि; च (for ह) दिवं वि; व्यं दिव्यवपुर्भूत्वा स्वकर्मविजितं ययौ,(३) अ-क-ख-घ-क दिव्यं; दिव्यां इति पाठः साधुः,

(०३) (१)तु (for अ पि),ततो युधिष्ठिरो राजा, (२)भीमसेनेन; भीमेन सह (for भ्रात्रा भीमेन), (४)आगमत्; अभ्ययात् (for अभ्यगात्,

(०४) ( (१)पूर्वेभ्यः (for स), ततो द्विजेषु सर्वेषु समेतेषु यथा, (४) पुत्रो (for ०राजो),

(०५) (१)द्विजश्रेष्ठा (for द्विजाः सर्वे), (२) च तथा; चापि ते; चास्य ये; चैव ते (for चास्य ते), (३)सुविस्मिता; सुपीडिताः पार्था (for राजन्), आसन्सुप्रतिमनसो,

(०६) (१)च; नु (for तु), द्विजाः श्रेष्ठाः (२)च्छया (for प्सया), (३)नैवम् (for मैवम्), उ

पाण्डवास्तु भयान्मुक्तं प्रेक्ष्य भीमं महाबलम्।**
हर्षमाहारयाश्चक्रुर्विजह्रुश्च मुदा युताः ।। ५२ ।।(०१)

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अजगरपर्वणि

युधिष्ठिरसर्पसंवादे पञ्चमो..ध्यायः ।। १५२ ।।

---

क्तवान्; अब्रवीद् (for अब्रुवन्),

(०१) (३)यामासुर् (for याश्चकुद्), (४)अन्विताः (for युताः),आरण्यः आजगर समाप्त नहुष चापा, विमोचनभीमसेनमोक्षणं; नहुषशापविमोचनं,

# मार्कण्डेयसमस्यापर्व

## 03- 06- 153Adhyaya

महाभारततात्पर्यनिर्णये २२ अध्याये

मार्कण्डेयस्तदाऽऽगत्य तेषामकथयत् कथाः ।

बह्वश्चैव विचित्राश्च भाषात्रयसमन्विताः ।। ३७२ ।।

लोकदर्शनमाश्रित्य देवाश्च मुनयस्तथा ।

ब्रूयुः कथास्तत्र शिक्षा ग्राह्या नार्थः कथञ्चन ।। ३७३ ।।

अर्थः समाधिभाषासु ग्राह्यः सर्वोऽप्यसंशयम् ।

परदर्शनभाषासु ज्ञेयं तद्दर्शनं तथा ।। ३७४ ।।

ग्राह्यो नार्थो वैदिकं तु दर्शनं ग्राह्यमेव हि ।

अन्यार्थो गुह्यभाषासु ग्राह्य एवं विनिर्णयः ।। ३७५ ।।

## १५३. त्रिपञ्चाशदधिकशततमोऽध्यायः

**वैशम्पायन उवाच**

**निदाघान्तकरः कालः सर्वभूतसुखावहः ।****

**तत्रैव वसतां तेषां प्रावृट्समभिपद्यत** ।। १ ।।(०१)

**छादयन्तो महाघोषाः खं दिशश्च बलाहकाः ।****

---

(०१) (१) निदाघानन्तरः, (३) स्म (for एव );

(४) प्रावृरण्णामाभ्यपद्यत; प्रावृट्कालोभ्यपद्यत; प्रावृट्समभिपद्यते; प्रावृट्कालोभ्यवर्तत,

प्रववर्षुर्दिवारात्रमसिताः सततं तदा ।। २ ।। (०१)

तपात्ययनिकेताश्च शतशोऽथ सहस्रशः ।**
अपेतार्कप्रभाजालाः सविद्युद्विमलप्रभाः ।। ३ ।।(०२)

विरूढशष्पा धरणी मत्तदंशसरीसृपा।
बभूव पयसा सिक्ता शान्ता सर्वमनोरमा ।। ४ ।।(०३)

न स्म प्रज्ञायते किञ्चिदम्भसा समवस्तृते।**
समं वा विषमं वापि नद्यो वा स्थावराणि च ।। ५ ।।(०४)

क्षुब्धतोया महावेगाः श्वसमाना इवाशुगाः ।**
सिन्धवः शोभयाश्चक्रुः काननानि तपात्यये ।। ६ ।।(०५)

नदतां काननान्तेषु श्रूयन्ते विविधाः स्वनाः ।**
वृष्टिभिश्च्छाद्यमानानां वराहमृगपक्षिणाम् ।। ७ ।।(०६)

स्तोककाः शिखिनश्चैव पुंस्कोकिलगणैः सह ।**
मत्ताः परिपतन्ति स्म दर्दुराश्चैव दर्पिताः ।। ८ ।।(०७)

तथा बहुविधाकारा प्रावृण्मेघानुनादिता।**
अभ्यतीता शिवा तेषां चरतां मरुधन्वसु ।। ९ ।।(०८)

---

(०१) (१) महाघोराः; (२) वलाहकाः, (३) प्रववहुर्; अभ्यवषुर्र्, (४) घनाः (for तदा,
(०२) (१) तपात्यये निकेताः; उपादाय निकेताः, तु; ते(for च);
(२) क०ख०घ०वलाहकाः, वलाहका;(for सह),
(३) ज्वालाः (for जालाः); अपत्राः कदलीजालाः; (४) सविद्युन्मण्डलप्रभाः,
(०३) (१) धरणी (for पृथिवी); (२) मत्तपक्षि;
(४) शान्ता सर्वा (च सु)मनोहरा; शान्ता सर्वमनोरमा; शान्तधूमरजोगुणा,
(०४) (२) अम्भसा समभिप्लुते; अम्भसा परमद्भुते; अद्भिर्लोके परिप्लुते; (४) च (for वा,
(०५) (१) वेगाः; ०घोरा (for घोषाः); (२) ख० श्वन्ते इव; घ०श्वसन्त इव, श्वसन्त,(त्य) इव शीघ्रगाः,
(०६) (२) स्वराः; गिरः (for स्वनाः), (३) छाद्य (for ताडय,
(०७) (१) ख०गणाःपरिनदन्ति स्व तर्पिताश्चैव दर्पिताः । (३) परिनदन्ति; परिगदन्ति,
(०८) (१) काराः; (२) नुनादिताः; ०भिनादिताः,

क्रौञ्चहंससमाकीर्णा शरत्प्रमुदिताभवत्।**
रूढकक्षवनप्रस्था प्रसन्नजलनिम्नगा ॥ १० ॥[०१]

विमलाकाशनक्षत्रा शरत्तेषां शिवाभवत्।**
मृगद्विजसमाकीर्णा पाण्डवानां महात्मनाम् ॥ ११ ॥[०२]

दृश्यन्ते शान्तरजसः क्षपा जलदशीतलाः ।**
ग्रहनक्षत्रसङ्घैश्च सोमेन च विराजिताः ॥ १२ ॥[०३]

कुमुदैः पुण्डरीकैश्च शीतवारिधराः शिवाः ।**
नदीः पुष्करिणीश्चैव ददृशुः समलङ्कृताः ॥ १३ ॥[०४]

आकाशनीकाशतटां तीरवानीरसङ्कुलाम्।**
बभूव चरतां हर्षः पुण्यतीर्थां सरस्वतीम् ॥ १४ ॥[०५]

ते वै मुमुदिरे वीराः प्रसन्नसलिलां शिवाम्।**
पश्यन्तो दृढधन्वानः परिपूर्णां सरस्वतीम् ॥ १५ ॥[०६]

तेषां पुण्यतमा रात्रिः पर्वसन्धौ स्म शारदी।**
तत्रैव वसतामासीत्कार्तिकी जनमेजय ॥ १६ ॥[०७]

पुण्यकृद्भिर्महासत्त्वैस्तापसैः सह पाण्डवाः ।**

---

(३) अभ्यतीताः; अप्यतीता; अभ्यतीयात, शिवासू; गिरासू,
(०१) (१) हंसक्रौचगणा (समा)कीर्णा; क्रौञ्चहंससमा; ततः क्रौञ्चगणा;
(२) शरत्प्रमुदिता; शरत्प्राणिहिता; (३) रूढकक्ष्य; रूढशष्प०; (४) निम्नगाः,
(०२) (३) मृगद्विजगणा०; मृगपक्षिसमा ,
(०३) (१) पश्यतां; दृश्यन्ते; ततस्तु, शान्तरजसां; (२) जलदसेविता; (४) विराजता,
(०४) (३) नद्यः पुष्करिण्यश्च नद्यश्च; (४) दृश्यन्ते; पश्यन्तः (for ददृशुः),
(०५) (१) नीकाशतटी; ०सङ्काशतटां; सं (नी) काशजलां;
(२) ती (नी)रवानीर०; नीलनीवार०; तीरवानर; (४) पश्यतां (for चरतां,
(०६) (१) प्रमुदिता (for मुमुदिरे); (२) शुभां; गिरां (for शिवाम्); (४) प्रतिं (for परि०,
(०७) (२) सु०; च (वि०) (for स्म,

तत्सर्वे भरतश्रेष्ठाः समूहुर्योगमुत्तमम् ॥ १७ ॥[०१]

तमिस्राभ्युदये तस्मिन्धौम्येन सह पाण्डवाः ।**
सूतैः पौरोगवैश्चैव काम्यकं प्रययुर्वनम् ॥ १८ ॥[०२]

अ

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि काम्यकवनप्रवेशे त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥

(मार्कण्डेयसमस्यापर्वणि ......ऽध्यायः)

## 03- 07- 154Adhyaya

# १५४. चतुःपञ्चाशदधिकशततमोध्यायः

वैशम्पायनः

काम्यकं प्राप्य कौरव्य युधिष्ठिरपुरोगमाः ।**
कृतातिथ्या मुनिगणैर्निषेदुः सह कृष्णया ॥ १ ॥[०३]

ततस्तान्परिविश्वस्तान्वसतः पाण्डुनन्दनान्।**
ब्राह्मणा बहवस्तत्र समन्तात्पर्यवारयन्[०४]
अथाब्रवीद्द्विजः कश्चिदर्जुनस्य प्रियः सखा ॥ २ ॥[०५]

---

(०१) (१) तापसैश्च (for महासत्त्वैस्); (२) तैः सर्वैः (for तापसैः);पांडवै; (३) ते सर्वे०; तत्पर्व; तत्सर्वे; ततस्ते (for तत्सर्वं);भरतश्रेष्ठ; (४) बभूवुर्; समूषुर्,

(०२) (१) तस्मिन्नभ्युदये तत्र (तस्मिन्); (३) सार्धं (for चैव,

(०३) (१) कौरव्या; कौरव्य (for कौन्तेया,

(०४) (२) वसतस्तत्र पाण्डवान्; (३) वसतस् (for बहवस्); (४) पाण्डवान् (for समन्तात्),

(०५) (१) द्विजश्रेष्ठः;प्रियः कश्चिद्,

स एष्यति महाबाहुर्वशी शौरिरुदारधीः ।[01]
विदिता हि हरेर्यूयमिहायाताः कुरूद्वहाः ॥ ३ ॥

सदा हि दर्शनाकाङ्क्षी श्रेयोऽन्वेषी च वो हरिः ॥ ४ ॥[०२]

बहुवत्सरजीवी च मार्कण्डेयो महातपाः ।**
स्वाध्यायतपसा युक्तः क्षिप्रं युष्मान्समेष्यति ॥ ५ ॥[०३]

वैशम्पायनः

तथैव ब्रुवतस्तस्य प्रत्यदृश्यत केशवः ।**
शैब्यसुग्रीवयुक्तेन रथेन रथिनां वरः ॥ ६ ॥[०४]

मघवानिव पौलोम्या सहितः सत्यभामया।**
उपायाद्देवकीपुत्रो दिदृक्षुः कुरुसत्तमान् ॥ ७ ॥

अवतीर्य रथात्कृष्णो धर्मराजं यथाविधि।**
ववन्दे मुदितो धीमान्भीमं च बलिनां वरम् ॥ ८ ॥[०५]

पूजयामास धौम्यं च यमाभ्यामभिवादितः ।**
परिष्वज्य गुडाकेशं द्रौपदीं पर्यसान्त्वयत् ॥ ९ ॥[०६]

स दृष्ट्वा फाल्गुनं वीरं चिरस्य प्रियमागतम्।**
पर्यष्वजत दाशार्हः पुनः पुनररिन्दमः ॥ १० ॥[०७]

तथैव सत्यभामापि द्रौपदीं परिषस्वजे।**

---

(०१) (३) स एष्यति; आयातीह; एष्यतीति;महाबुद्धिर्; (४) शुचिर् (for शौरिर्,
(०२) (३) सदा च; स चापि (सदापि); (४) चरो; च यो (for च वो,
(०३) (२) मार्काण्डेयः ।, महायशाः; (४) उपैष्यति (for समे,
(०४) (१) (ए)तद् (for (ए)व);तस्य ब्रुवतः, (२) प्रत्य० केशवः; (३) शैब्य०(for सैन्य,
(०५) (२) युधिष्ठिरं (for यथा); (३) (ऽ)थ मुदा (for मुदितो,
(०६) (१) स(for च); (३) महाभागां; महाराज (for गुडा); (४) परिसान्त्वयत्; परिसान्त्वयन्,
(०७) (१) फाल्गुनं (फल्गुणं); (३) परि (for पर्य); (४) एनम्; एवम् (for पुनर्), अरिन्दमः; अरिन्दम;पुनरेवारिमर्दन,

पाण्डवानां प्रियां भार्यां कृष्णस्य महिषी प्रिया ।। ११ ।।(०१)

ततस्ते पाण्डवाः सर्वे सभार्याः सपुरोहिताः ।**
आनर्चुः पुण्डरीकाक्षं परिवव्रुश्च सर्वशः ।। १२ ।।(०२)

कृष्णस्तु पार्थेन समेत्य विद्वान्धनञ्जयेनासुरतर्जनेन।**
बभौ यथा भूतपतिर्महात्मा समेत्य साक्षाद्भगवान्गुहेन।। १३ ।।(०३)

ततः समस्तानि किरीटमाली वनेषु वृत्तानि गदाग्रजाय।**
उक्त्वा यथावत्पुनरन्वपृच्छत्कथं सुभद्रा च स चाभिमन्युः ।। १४ ।।(०४)

धौम्यं च कृष्णां च युधिष्ठिरं च यमौ च भीमं च दशार्हसिंहः ।
उवाच दिष्ट्या भवतां शिवेन प्राप्तः किरीटी मुदितः कृतास्त्रः ।।

स पूजयित्वा मधुहा यथावत्पार्थं च कृष्णां च पुरोहितं च ।**
उवाच राजानमभिप्रशंसन्युधिष्ठिरं तत्र सहोपविश्य।। १६ ।।(०५)

श्रीभगवान्
धर्मः परः पाण्डव राज्यलाभात्तस्यार्थमाहुस्तप एव राजन्।**
सत्यार्जवाभ्यां चरता स्वधर्मं जितस्त्वयायं च परश्च लोकः ।। १७ ।।(०६)

अधीतमग्रे चरता व्रतानि सम्यग्धनुर्वेदमवाप्य कृत्स्नम्।**
क्षात्रेण धर्मेण वसूनि लब्ध्वा सर्वे ह्यवाप्ताः क्रतवः पुराणाः ।। १८ ।।(०७)

---

(०१) (१) च (for (अ)पि); (३) प्रिया भार्या,

(०२) (३) अभ्यर्च्य (for आनर्चुः); (४) समन्ततः (for च सर्वशः,

(०३) (२) मर्दनेन (for तर्जनेन

(०४) (२) गदाधराय; (३) अन्वगच्छत्; (४) स चा (for तथा);तस्मिन्सु (तथ्यं सु) भद्रां च तथा भिमत्युं,

(०५) (१) सं (for स); यथैव (for यथावत्); (२) पार्थं (for पार्थाँन्); (४) तेन (for तत्र,

(०६) ( श्रीकृष्ण उ; १) धर्मात् (for धर्मः);पुनः; परं (for परः);राज्य लाभस्; (२) तथार्थ; तत्पार्थ; तदर्थ; तस्यादि (for तस्यार्थ); तव (for तप);एष(for एव); (३) च; हि; सु०(for स्व०,

(०७) (१) अधीतमार्गे; अतीतमग्रे, चरितं व्रतं च (for चरता व्रतानि); (२) सम्यक्तया वेदम्; (४) सर्वे कृताश्च; सर्वेप्यवाप्ताः; प्राप्ताश्च सर्वे, सुपुण्याः (for पुराणाः,

**न ग्राम्यधर्मेषु रतिस्तवास्ति कामान्न किञ्चित्कुरुषे नरेन्द्र्।**
**न चार्थलोभात्प्रजहासि धर्मं तस्मात्प्रभावादसि धर्मराजः ।। १९ ।।**(०१)

**दानं च सत्यं च तपश्च राजन्श्रद्धा च बुद्धिश्च क्षमा धृतिश्च ।**
**अवाप्य राष्ट्राणि वसूनि भोगानेषा परा पार्थ सदा रतिस्ते।। २० ।।**(०२)

आपत्स्वपि त्वं न जहासि राजन्,।।(०३)

**यदा जनौघः कुरुजाङ्गलानां कृष्णां सभायामवशामपश्यत्।**
**अपेतधर्मव्यवहारवृत्तं सहेत तत्पाण्डव कस्त्वदन्यः ।। २१ ।।**(०४)

**असंशयं सर्वसमृद्धकामः क्षिप्रं प्रजाः पालयितासि सम्यक्।**
**इमे वयं निग्रहणे कुरूणां यदि प्रतिज्ञा भवतः समाप्ता।। २२ ।।**(०५)

धौम्यं च भीमं च युधिष्ठिरं च यमौ च कृष्णां च दशार्हसिंहः ।

उवाच दिष्ट्या भवतां शिवेन प्राप्तः किरीटी मुदितः कृतास्त्रः ।(०६)

**प्रोवाच कृष्णामपि याज्ञसेनीं दशार्हभर्ता सहितः सुहृद्भिः ।**

**कृष्णे धनुर्वेदरतिप्रधानास्तवात्मजास्ते शिशवः सुशीलाः ।**
**सद्भिः सदैवाचरितं सुहृद्भिश्चरन्ति पुत्रास्तव याज्ञसेनि।। २४ ।।**(०७)

---

(०१) (१) ग्रामधर्मेषु; ग्राम्यधर्मे च; (२) कोपो (पे) न कश्चित्पुरुषो नरेद्र; (४) प्रभावाद् (for स्वभावाद्);धर्मराज,

(०२) (२) श्रद्धा च बुद्धिश्च क्षमा धृतिश्च; क्षमा च (श्रुतश्च)शान्तिश्च दमो धृतिश्च,

(०३) (३) चास्त्राणि (for राष्ट्राणि); (४) येषां (for एषा); सदा,रतिः, एषां भवेत्पार्थ रतिःसदाः(स्वभा) रैः; येषां सदा पार्थ रतिः परार्था,

(०४) (१) यथा; राज्ये (हृतं) (for यदा);कुरूणां; जनौघाः; निविष्टः;च देशं (for जनौघः); (२) च भार्याम् (for सभायाम्);भगवान् (for अवशाम्);अवशां च पश्यन्, अपश्यन्,

(०५) (१) वेगं (for कामः); (३) अद्यैव तन्निग्रहणं कुरूणां,

(०६) (१/२) कृष्णां भीमं;धौम्यं च भीमं च यमौ च कृष्णां युधिष्ठिरं चापि दशार्ह, (३) दृष्ट्वा; शिष्यो (for दिष्ट्या);भवता,

(०७) (१) ततश्च; ददर्श (for प्रोवाच);अभि यज्ञसेनीं; अपि यज्ञ; अतियज्ञं; अथयाज्ञ, (२)दाशार्ह,

दिष्ट्या समग्रासि धनञ्जयेन समागतेत्येवमुवाच कृष्णः ।(०१)

**राज्येन राष्ट्रैश्च निमन्त्र्यमाणः(णाः) पित्रा च कृष्णे तव सोदरैश्च ।**
**न यज्ञसेनस्य न मातुलानां गृहेषु बाला रतिमाप्नुवन्ति।। २५ ।।(०२)**

**आनर्तमेवाभिमुखाः शिवेन गत्वा धनुर्वेदरतिप्रधानाः ।****
**तवात्मजा वृष्णिपुरं प्रविश्य तदैव (न दैव)तेभ्यः स्पृहयन्ति कृष्णे।। २६ ।।(०३)**

**यथा त्वमेवार्हसि तेषु वृत्तं प्रयोक्तुमार्या च तथैव कुन्ती।****
**तेष्वप्रमादेन तथा करोति तथैव भूयश्च तथा सुभद्रा ।। २७ ।।(०४)**

**यथानिरुद्धस्य यथाभिमन्योर्यथा सुनीथस्य यथैव भानोः ।****
**तथा विनेता च गतिश्च कृष्णे तवात्मजानामपि रौक्मिणेयः ।।२८ ।।(०५)**

**गदासिचर्मग्रहणेषु शूरानस्त्रेषु शिक्षासु रथाश्वयाने।****
**सम्यग्विनेता विनयत्यतन्द्रस्तांश्चाभिमन्युः सततं कुमारः ।। २९ ।।(०६)**

**स चापि सम्यक्प्रणिधाय शिक्षां शस्त्राणि चैषां विधिवत्प्रदाय।**

---

(०१) ((१)समेतासि (for समग्रासि),) ४) तवा (था)त्मजा (for सत्यव्रता);यथाव्रतास्ते शिशवः सुखार्हाः; (५) यदि स्म दैवाचरितं;सुहृद्भिश् (for समाधिं,

(०२) (१) राज्येन पु (मं)त्रैश्च; राज्येन भोगेन; राज्यैश्च भोगैश्च; राजन्यपुत्रैश्च; युक्तैर्नियुक्तैश्च; राज्ञा (ज्यं) नियुक्तैश्च,

(०३) (१) आनर्तमेवा०भिरताः; आनर्तवासाभिमुरवाः,

(०४) (१) एषा (for एवा);वृत्तं (for वृत्ति); यथा त्वमेवाभिमतेषु वृत्ति,; (२) तथैव (for य); (३) (अ)प्रमादेषु; प्रमादेन; प्रमोदेन (for (अ)प्रमादेन);तथा; मुदा (for सदा); (४),माता च; मा तात; तथैव; ततश्च; यथा च सदा; ततः (for तथा),

(०५) (२) सुनीतस्य, तथैव (for य); (३) रतिं (for गतिं); (४) तथा (for तवा); रौहिणेयः,

(०६) (१) गदासिचक्र, शूरा (for शूरान्); (२) शस्त्रेषु (for अस्त्रेषु); (३) विनीतान् (for विनेता);विनयेदतन्द्रीस्; विनयत्यतन्द्रस्; (४) तांश्चाभिमन्युं च सनत्कुमारः; तांश्चाभि०मन्युं च ( न्युश्च) सदा कुमारान्,

तवात्मजानां च तथाभिमन्योः पराक्रमैस्तुष्यति रौक्मिणेयः ।। ३० ।।[०१]

यदा विहारं प्रसमीक्षमाणाः प्रयान्ति पुत्रास्तव याज्ञसेनि।**
एकैकमेषामनुयान्ति तत्र रथाश्च यानानि च दन्तिनश्च ।[०२]

वैशम्पयानः

अथाब्रवीद्धर्मराजं तु कृष्णो दशार्हयोधाः कुकुरान्धकाश्च ।।३१।।
एते निदेशं तव पालयन्तस्तिष्ठन्तु यत्रेच्छसि तत्र राजन्।।३२ ।।[०३]

योधास्तवार्थेषु नरेन्द्रयन्ता कुर्वन्तु कार्यं सरथाः सनागाः ।

आवर्ततां कार्मुकवेगवाता हलायुधप्रग्रहणा मधूनाम्।**
सेना तवार्थेषु नरेन्द्र यत्ता ससादिपत्त्यश्वरथा सनागा ।। ३३ ।।[०४]

प्रस्थाप्यतां पाण्डव धार्तराष्ट्रः सुयोधनः पापकृतां वरिष्ठः ।**
स सानुबन्धः ससुहृद्गणश्च भौमस्य सौभाधिपतेश्च मार्गम्।। ३४ ।।[०५]

कामं तथा तिष्ठ नरेन्द्र तस्मिन्यथा कृतस्ते समयः सभायाम्।
दाशार्हयोधैस्तु हतारियोधं प्रतीक्षतां नागपुरं भवन्तम् ।। ३५ ।।[०६]

व्यपेतमन्युर्व्यपनीतपाप्मा विहृत्य यत्रेच्छसि तत्र कामम्।**

---

(०१) (२) शस्त्राणि (for अस्त्राणि);शिक्षां; तेषां (for चैषां);विधिवत् (for गुरु); (४) रौहिणेयः,

(०२) (१) यथा; सदा (for यदा);विहारान्, प्रसमीक्ष्य; (३) अनुयाति; उपयान्ति; (४) रथाश्वयानानि, वाजि; हस्ति (for दन्ति,

(०३) (१) च (for तु);दाशार्ह; (३) पालयन्तसू; यन्तु; (४) तिष्ठन्तु;धर्मराज; यत्र राजन्,

(०४) (१) ०वेगवाहा; (२) यदूनां (for मधूनाम्); (३) तवार्थेन; त्वदर्थेषु; तु पार्थाय; तवार्थाय,

(०५) (३) सहानु (for स सानु०); ससुहृज्जनश्च; (४) भौमस्य; शाल्व (for सौभ);स मार्गः(for च मार्गम्,

(०६) (१) तदा (for तथा);नराधिप त्वं (for नरेन्द्र तस्मिन्); (३) दशार्हयोधैस्तु (श्च); दाशार्हसेना तु; यथार्हयोधैस्तु; दाशार्हयोधास्तु;समाधियोगं (धं०); हतारि (धि) योधं; हतार्हयोध; ममानुयात्वा; (४) प्रत ीक्ष्यतां,नागपुरे,प्रभग्नं (for भवन्तम्,

**ततः प्रसिद्धं प्रथमं विशोकः प्रपत्स्यसे नागपुरं सुराष्ट्रम्   ।। ३६ ।।**(०१)

वैशम्पायनः

**ततस्तदाज्ञाय मतं महात्मा यथावदुक्तं पुरुषोत्तमेन।****
**प्रशस्य विप्रेक्ष्य च धर्मराजः कृताञ्जलिः केशवमित्युवाच ।**(०२)

युधिष्ठिरः

**कालोदये तच्च ततश्च भूयः कर्ता भवान्कर्म न संशयोऽस्ति।। ३७ ।।**(०३)

**यथाप्रतिज्ञं विहृतश्च कालः सर्वाः समा द्वादश निर्जनेषु।**
**अज्ञातचर्यां विधिवत्समाप्य भवद्गताः केशव पाण्डवेयाः ।। ३८ ।।**

**असंशयं केशव पाण्डवानां भवान्गतिस्त्वच्छरणा हि पार्थाः ।। ३९।।**(०४)

एषैव बुद्धिर्जुषतां सदा त्वां सत्ये स्थिताः केशव पाण्डवेयाः ।
सदानधर्माः सजनाः सदाराः सबान्धवास्त्वच्छरणा हि पार्थाः ।

युधिष्ठिरः

**तथा वदति वार्ष्णेये धर्मराजे च भारत।**
**अथ पश्चात्तपोवृद्धो बहुवर्षसहस्रधृक्।**
**प्रत्यदृश्यत धर्मात्मा मार्कण्डेयो महातपाः                ।। ४० ।।**(०५)

अजरश्चामरश्चैव रूपौदार्यगुणान्वितः ।
व्यदृश्यत तथा युक्तो यथा स्यात्पञ्चविंशकः ।

---

(०१) (२)ख०अयं पादो..नन्तरश्च न स्तः, कालं (for कामम्); (३) प्रसिद्धं (for समृद्धं); समृद्ध (द्धः; ०द्धि) प्रभवं (for समृद्धं प्रथमं);प्रसभं; प्रभवं;);सततं (for प्रथमं); (४) सम्प्राप्स्यसे; प्रयास्यसे,

(०२) (१) आदाय (for आज्ञाय); (२) उक्तः,

(०३) ((३/४) कर्ता (for भूयः); तथा (for कर्ता,

(०४) (१) क०विसृज्य कालं सर्वाः; ख०घ०विहृत्य कालं. सर्वाः, स विवृत्य कालं; च विहृत्य कालं (for विहृतश्च कालः,

(०५) (२) पार्थिवे (for भारत); (३) ततः (for अथ);वयो (for तपो०); (४) धृत्; ०दृक्(for धृक्)०; (६) मार्कंडेयो, मुनिः (for ०तपाः,

महावराहकोट्यां च ब्रह्मणामयुतानि च ।

व्यचिन्तयन्महात्मा वै तथा रामं सलक्ष्मणम् ।

**तमागतमृषिं वृद्धं बहुवर्षसहस्रिणम्।****
**आनर्चुर्ब्राह्मणाः सर्वे कृष्णश्च सह पाण्डवैः ।। ४१ ।।(०६)**

उपातिष्ठन्त ते सर्वे पाण्डवास्सहयादवाः ।

**तमर्चितं सुविश्वस्तमासीनमृषिसत्तमम्।****
**ब्राह्मणानां मतेनाह पाण्डवानां च केशवः ।। ४२ ।।(०७)**

कृष्णः

**शुश्रूषवः पाण्डवास्ते ब्राह्मणाश्च समागताः ।****
**द्रौपदी सत्यभामा च तथाहं परमं वचः ।। ४३ ।।(०८)**

**पुरावृत्ताः कथाः पुण्याः सदाचारान्सनातनान्।****
**राज्ञां स्त्रीणामृषीणां च मार्कण्डेय विचक्ष्व नः ।। ४४ ।।(०९)**

वैशम्पायनः

**तेषु तत्रोपविष्टेषु देवर्षिरपि नारदः ।****
**आजगाम विशुद्धात्मा पाण्डवानवलोककः ।। ४५ ।।(१०)**

**तमप्यथ महात्मानं सर्वे ते पुरुषर्षभाः ।**
**पाद्यार्घ्याभ्यां यथान्यायमुपतस्थुर्मनीषिणः ।। ४६ ।।(११)**

---

(०६) (२) ०सहस्रिकं; (३) अभ्यर्चन् (for आनर्चुर्);पाण्डवाः(for ब्राह्मणाः);उपातिष्ठन्त ते सर्वे; (४) सह पाण्डवैः, कृष्णश्च ब्राह्मणैः सह; पाण्डवाः सहयादवाः,

(०७) (१) स तमभ्यर्च्य विश्वस्तम्; (२) ऋषिपुङ्गवं; (३) पाण्डवानां (for ब्राह्म); (४) यादवानां; ब्राह्मणानां (for पाण्ड,

(०८) (१/२) पाण्डवाः ब्राह्मणाः; (४) तवेदं मधुरं वचः,

(०९) (१) कुर्वन् (for पुण्याः); (२) सदाचारान्सनातनान्; (४) दिदृक्षवः; प्रचक्ष्व नः; वदस्व नः,

(१०) (१) विद्धेषु ०(for विश्वेषु); (४) अवलोकयन्,

(११) (१) ते तं चाथ; नमस्कृत्य (for तमप्यथ);महात्मानः; (२) पाण्डवाः (for सर्वे ते);पाण्डवास्ते

नारदस्त्वथ देवर्षिर्ज्ञात्वा तांस्तु कृतक्षणान्।**
मार्कण्डेयस्य वदतस्तां कथामन्वमोदत ।। ४७ ।।(०१)

उवाच चैनं कालज्ञः स्मयन्निव सनातनः ।**

नारदः

ब्रह्मर्षे कथ्यतां यत्ते पाण्डवेषु विवक्षितम् ।। ४८ ।।(०२)

वैशम्पायनः

एवमुक्तः प्रत्युवाच मार्कण्डेयो महातपाः ।**

मार्कण्डेयः

क्षणं कुरुध्वं विपुलमाख्यातव्यं भविष्यति ।। ४९ ।।

वैशम्पायनः

एवमुक्त्वा(क्ताः) क्षणं चक्रुः पाण्डवाः सह तैर्द्विजैः ।**
मध्यन्दिने यथाऽऽदित्यं प्रेक्षन्तस्ते महामुनिम् ।। ५० ।।(०३)

अस्मिन् मार्कण्डेयसमस्यापर्वणि १५४ अध्याये ५० श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां आरण्यकपर्वणि
चतुःपञ्चाशदधिकशततमोऽध्यायः ।। १५४ ।।

(मार्कण्डेयसमस्यापर्वणि २ अध्यायः)

---

सुरर्षभाः; (३) यथान्याय्यम्; (४) मनीषिणः; महामुनिं;उत्पेतुः सुमनीषिणः ,

(०१) (१) देवांस्तान् (for देवर्षिर्); (२) च (for तु);ज्ञात्वा तान् (विज्ञाय) कृतलक्षणान् ;तान्विज्ञाय कृत; (४) सोन्वमोदत; अन्वमोदयत्; अनुमोदते, ताः कथास्त्व (था अ)न्वमोदत,

(०२) (१) धर्मज्ञः; कालज्ञं; (२) मार्कँडेयं (for स्मयन्निव);सनातनः (for स नारदः), (३) महर्षे (for ब्रह्मर्षे); तत् (for ते,

(०३) (२) सहितैर् (for सह तैर्); (३) सूर्यं (for (आ)दित्यं);
(४) प्रेक्ष्यमाणा; पश्यन्तस्तं (for प्रेक्षन्तस्तं), ते (for तं,

# 03- 06- 155 Adhyaya

# १५५. पञ्चपञ्चाशदधिकशततमोध्यायः

वैशम्पायनः

तं विवक्षन्तमालक्ष्य कुरुराजो महामुनिम् ।**
कथासञ्जननार्थाय चोदयामास पाण्डवः ।। १ ।।(०१)

भवान्दैवतदैत्यानामृषीणां च महात्मनाम्।**
राजर्षीणां च सर्वेषां चरितज्ञः पुरातनः ।। २ ।।(०२)

सेव्यश्चोपासितव्यश्च मतो नः काङ्क्षितश्चिरम्।**
अयं च देवकीपुत्रः प्राप्तोऽस्मानवलोककः ।। ३ ।।(०३)

भवत्येव हि मे बुद्धिर्दृष्ट्वाऽऽत्मानं सुखाच्च्युतम्।**
धार्तराष्ट्रांश्च दुर्वृत्तानृध्यतः प्रेक्ष्य सर्वशः ।। ४ ।।(०४)

लक्षालङ्कारः- सर्वतः प्रेक्ष्य गृध्यत इत्यत्र सर्वतः सतः सर्वं गृध्यतः आकाङ्क्षमाणान् 'गुधु अभिकाङ्क्षायाम्' इति धातुः ।

कर्मणः पुरुषः कर्ता शुभस्याप्यशुभस्य वा।**
स फलं तदुपाश्नाति कथं कर्ता स्विदीश्वरः ।। ५ ।।(०५)

कुतो वा सुखदुःखेषु नृणां ब्रह्मविदां वर ।
इह वा कृतमन्वेति परदेहेऽथ वा पुनः ।। ६ ।।(०६)

---

(०१) (१) विवक्षितम्, आमन्त्र्य; आलोक्य (for आलक्ष्य), (२) महाद्युतिः; (३) नोद० (for चोद०,

(०२) युधिष्ठिरः; १) भगवन्देवदैत्यानाम्; (३) पूर्वेषां (for स); (४) पुरातनः (for सना,

(०३) (१) मेध्यश्चोपास्थबुद्धिश्च; (२) ततो नः; मनोज्ञः; मत्तो नः; त्वन्नो न,

(०४) (१) भ्रमत्येव; भवानेव (for भवत्येव);ब्रूहि (for बुद्धिर्); (३) तान्सर्वान् (for दुर्वृत्तान्);
(४) नृत्यतः; दृष्यतः (for ऋध्यतः);सर्वतः,ऋद्धान्प्रेक्ष्य च सर्वशः,

(०५) (२) (अ)थ (for (अ)पि);वा (for च); (३) स फलं (for स्वफलं,

(०६) (१) हठे; भोक्ता; हठो; कुतो (कथं); हठाद्; हर्ता (for अथ); (२) नणां,

देही च देहं सन्त्यज्य मृग्यमाणः शुभाशुभैः ।**
कथं संयुज्यते प्रेत्य इह वा द्विजसत्तम ॥ ७ ॥(०१)

ऐहलौकिकमेवेह उताहो पारलौकिकम्।**
क्व च कर्माणि तिष्ठन्ति जन्तोः प्रेतस्य भार्गव ॥ ८ ॥(०२)

एतत्सर्वं यथावृत्तं मुने वक्तुमिहार्हसि ।

मार्कण्डेयः

त्वद्युक्तोऽयमनुप्रश्नो यथावद्वदतां वर ।
विदितं वेदितव्यं ते स्थित्यर्थं त्वं तु पृच्छसि ॥ ९ ॥

अत्र ते कथयिष्यामि तदिहैकमनाः शृणु।**
यथेहामुत्र च नरः सुखदुःखमुपाश्नुते ॥ १० ॥(०३)

निर्मलानि शरीराणि विशुद्धानि शरीरिणाम्।**
ससर्ज धर्मतन्त्राणि पूर्वोत्पन्नः प्रजापतिः ॥ ११ ॥

अमोघफलसङ्कल्पाः सुव्रताः सत्यवादिनः ।**
ब्रह्मभूता नराः पुण्याः पुराणाः कुरुसत्तम ॥ १२ ॥(०४)

सर्वे देवैः समायान्ति स्वच्छन्देन नभस्तलम्।**
ततश्च पुनरायान्ति सर्वे स्वच्छन्दचारिणः ॥ १३ ॥(०५)

---

(०१) (१) देही देहं, तु (ह) (for च); (२) मृष्य (for मृग्य);
(३) उभौ (for कथं) संसृज्यते; वियुज्यते; (४) देहवान् (for इह वा);इह वापि द्विजोत्तम,
(०२) (१) इह (for ऐह);एतावद्; एवेह (for एवैतद्); (३) वा (for च); कर्मणि, कृतकर्माणि तिष्ठन्ति,
/*(१) यदुक्तो; त्वयोक्तो; त्वदुक्तो; तद्युक्तो; (३) च (for ते); (४) स्मृत्यर्थम्, त्वनु०; त्वं तु; त्वत्र (for अनु०,
(०३) (१) अहं; तात; तत्र (for अत्र);वर्ण; कथ (for वर्त); (३) अथे; यत्रे (for यथे,
(०४) (१) फल (for बल); (२) सद्वृत्ता;सुवृत्ताः (for सुव्रताः);सिद्धार्था निरुपद्रवाः; (४) कुरुसत्तम; पुरुषर्षभ,

(०५) (१) सर्वदेवैः,समं यान्ति; (२) नभस्थलं; (४) सर्वे,(स्वर्गे) छन्दविहारिणः,

स्वच्छन्दमरणाश्चासन्नराः स्वच्छन्दचारिणः ।**
अल्पबाधा निरातङ्काः सिद्धार्था निरुपद्रवाः ।। १४ ।।[०१]

द्रष्टारो देवसङ्घानामृषीणां च महात्मनाम्।**
प्रत्यक्षाः सर्वधर्माणां दान्ता विगतमत्सराः ।। १५ ।।[०२]

आसन्वर्षसहस्रीयास्तथा पुत्रसहस्रिणः ।**
ततः कालान्तरेऽन्यस्मिन्पृथिवीतलचारिणः ।। १६ ।।[०३]

कामक्रोधाभिभूतास्ते मायाव्याजोपजीविनः ।**
लोभमोहाभिभूताश्च त्यक्ता देहैस्ततो नराः ।। १७ ।।[०४]

अशुभैः कर्मभिः पापास्तिर्यङ्निरयगामिनः ।**
संसारेषु विचित्रेषु पच्यमानाः पुनः पुनः ।। १८ ।।[०५]

मोघेष्टा मोघसङ्कल्पा मोघज्ञाना विचेतसः ।
नाथन्तस्सर्वकामानां नास्तिका भन्नसेतवः ।। १९ ।।

सर्वाभिशङ्किनश्चैव संवृत्ताः क्लेशदायिनः ।

---

(०१) (२) सर्वे (for नराः);स्वच्छन्दचारिणः; (३) क०सर्वाबाधानुमतिकाः सर्वार्थ; ख०स्वल्पायासा नीरातङ्काः घ०सर्वबाधाविनिर्मुक्ताः सर्वार्था,अल्पाबाधा; स्वल्पायासा; निराबाधा; स्वल्पा (ल्प) बाधा, निरी,;निरीति(ती) काः; (४) नीरुजा; स्वल्पार्था (for सिद्धार्था);निरुपस्कृताः,

(०२) (१) स्रष्टारो; (३) प्रत्यक्षा (क्षं)०सर्वधर्माणः; प्रत्यक्षं सर्वधर्माणां; प्रकृत्या सर्वधर्माणः; (४) शान्ता (for दान्ता,

(०३) (१) आयुरू (for आसन्);सहस्रीयाः; सहस्रेण; (२) वर्षं (for पुत्र); (३) तस्मिन् (for ऽन्यस्मिन्); (४) तथा क्षत्रसहस्रिणः पृथिंवीतलवासिनः

(०४) (२) धर्मव्याजोप; मायाव्यामोह; (३) मोहलोभाभिभूताश्;ते (for च);
(४) त्यक्ता देहैस् (त्यक्तदेहास्); त्यक्तदेहैस्; सदा; तदा (for ततो,

(०५) (१) अशुभिः; आशुभिः(for अशुभैः);पापैस् (for पापास्); (२) निरयभागिनः; निरयगामिनः; गामिनभागिनः; नरकभा (भो) गिनः; (३) विचिन्त्येषु (for विच) ;
(४) पश्य; पात्य (for पच्य,

**अशुभैः कर्मभिश्चापि प्रायशः परिचिह्निताः ।। २० ।।**(०१)

काङ्क्षिणः सर्वकामानां नास्तिका भिन्नसेतवः ।।(०२)

**दौष्कुल्या व्याधिबहुला दुरात्मानोऽप्रतापिनः**
**भवन्त्यल्पायुषः पापा रौद्रकर्मफलोदयाः ।**
**नाथन्तः सर्वकामानां नास्तिका भिन्नचेतसः ।। २१ ।।**(०३)

लक्षालङ्कारः- दुरात्मानो..पतापिन इत्यत्र अपकतापिनः पश्चात्तापरहिताः । नाथन्तः याचन्तः 'नाथृ याच्ञायाम्' इति धातुः ।

**जन्तोः प्रेतस्य कौन्तेय गतिः स्वैरिह कर्मभिः ।**
**प्राज्ञस्य हीनबुद्धेश्च कर्मकोशः क्व तिष्ठति ।। २२ ।।**(०४)

**क्वस्थस्तत्समुपाश्नाति सुकृतं यदि वेतरत्।**
**इति ते दर्शनं यच्च तत्राप्यनुनयं शृणु ।। २३ ।।**(०५)

मार्कण्डेय उवाच ।

त्वद्युक्तोऽयमनुप्रश्नः शृणु भारत तत्त्वतः ।(०६)

**अयमादिशरीरेण देवसृष्टेन मानवः ।**
**शुभानामशुभानां च कुरुते सञ्चयं महत् ।। २४ ।।**(०७)

---

(०१) (१) मोधेच्छा; (२) विबुद्धयः(for विचे);मोघ (ह)ज्ञानविचेतसः; ज्ञान०विबुद्धयः,

(०२) (३) सर्वाभि०; (४) क्लेशभाजनाः;,दायिनः; (५) चैव (for चापि,

(०३) (१) दौःकुला; दुर्बला; (२) पता०पिनः; पि तापिनः; भिमानिन;नुतापिन, (३) एवं तु (for भवन्ति);पापाद्; प्राण; (४) फलोपगा; (५) क०- नाथन्तस्सर्वकामान् वै नास्तिका भिन्नचेतसः ईहन्तः (अभाग्याः); तथातः; काङ्क्षिणः(for नाथन्तः);सर्वकायणां; भूतानां; कामान्वै, नाथवतः सर्वकामान्; (६) भिन्न चेतसः,

(०४) (२) गतिं (for गतिः); एव (for इह);युधिषिर उ; (३) प्राप्त (for प्राज्ञ);बुद्धेषु; बुद्धेर्वा, प्राज्ञविहीन बुद्धेस्तु,

(०५) (१) काथ for क्स्थस्);च तमुपा; तं समुपा; तत्तदुपा; तु तमुपा; सन्समुपा; (२) वेतरं; चेतरत् ,

(०६) (मार्कण्डेय उं; (४) ०) तथा०; तस्य; तच्च (for तत्र);(अ)प्यनुनीयं शृणुष्व मे,

(०७) (२) दैवसृष्टेन; देवैः सृष्टेन; देवदृष्टेन; (४) मुहुः(for महत्); कुरुते कोषसञ्चयं,

आयुषोऽन्ते प्रहायेदं क्षीणप्रायं कलेवरम्।**
सम्भवत्येव युगपद्योनौ नास्त्यन्तराभवः ।। २५ ।।(०१)

तत्रास्य स्वकृतं कर्म छायेवानुगतं सदा।**
फलत्यथ सुखार्हो वा दुःखार्हो वाथ जायते ।। २६ ।।(०२)

अनुशेते शयानं च तिष्ठन्तं चानुतिष्ठति ।
अनुधावति धावन्तं पूर्वकर्म कृतं नरम् ।(०३)

कृतान्तविधिसंयुक्तः स जन्तुर्लक्षणैः शुभैः ।**
अशुभैर्वा निरादानो लक्ष्यते ज्ञानदृष्टिभिः ।। २७ ।।(०४)

एषा तावदबुद्धीनां गतिरुक्ता युधिष्ठिर ।
अतः परं ज्ञानवतां निबोध गतिमुत्तमाम् ।। २८ ।।(०५)

मनुष्यास्तप्ततपसः सर्वागमपरायणाः ।**
स्थिरव्रताः सत्यपरा गुरुशुश्रूषणे रताः ।। २८ ।।(०६)

सुशीलाः शुक्लजातीयाः क्षान्ता दान्ताः सुतेजसः ।**
शुचियोन्यन्तरगताः प्रायशः शुभलक्षणाः ।। ३० ।।(०७)

जितेन्द्रियत्वाद्वशिनः शुक्लत्वान्मन्दरोगिणः ।**
अबाधाश्च परित्रासा भवन्ति निरुपद्रवाः ।। ३१ ।।(०८)

---

(०१) (१) वि (for प्र); (२) क्षीणप्राणं; (४) (अ)त्र सम्भवं; (अ)त्र संशयः (for (अ) न्तराभवः,

(०२) (१) तस्य (for तत्र); (अ)पि,(for (अ)स्य); सुकृतं; तत्कृतं,

(०३) (३) भव(for फल); (अ)त्र (for (अ)थ);सुखार्हे; (४) दुःखार्हे, अथ; उप०; अभि० (for अपि,

(०४) (४) क०घ०वृत्तिभिः, स्थानदृष्टिभिः; ज्ञानवृष्टिभिः; वृत्तिभि; लक्षणैर्ज्ञानवृत्तिभिः,

(०५) (१) अबुद्धानां; (२) नराधिप (for युधि);गतिर्,

(०६) (३) स्थिरवृत्ताः; स्थितव्रताः,

(०७) (२) कान्ता; क्लान्ता (for क्षान्ता); सुचेतसः; (३) शुचि,

(०८) (१) सत्कृत्यान्; शुद्धात्वानू, मन्दरागिणः; (३) अल्पाबाधपरित्रासाद्; अल्पबाधपरित्रासा; अल्पाबाधापरित्रासा; अल्पाबाधा निरातङ्का; अल्पबाधापरि० त्रासा; अबाधा अपरित्रासा,

च्यवन्तं जायमानं च गर्भस्थं चैव सर्वशः ।
स्वमात्मानं परं चैव बुध्यन्ते ज्ञानचक्षुषा ।। ३२ ।।

कर्मभूमिमिमां प्राप्य पुनर्यान्ति सुरालयम्।
कृत्वा शुभानि कर्माणि ज्ञानेन भरतर्षभ ।। ३३ ।।[०१]

ऋषयस्ते महात्मानः प्रत्यक्षागमबुद्धयः ।[०२]

किञ्चिद्दैवाद्धठात्किञ्चित्किञ्चिदेव स्वकर्मभिः ।**
प्राप्नुवन्ति नरा राजन्मा तेऽस्त्वन्या विचारणा ।। ३४ ।।[०३]

इमामत्रोपमां चापि निबोध वदतां वर ।
मनुष्यलोके यच्छ्रेयः परं मन्ये युधिष्ठिर ।। ३५ ।।[०४]

इह वैकस्य नामुत्र अमुत्रैकस्य नो इह ।**
इह वामुत्र चैकस्य नामुत्रैकस्य नो इह ।। ३६ ।।[०५]

धनानि येषां विपुलानि सन्ति नित्यं रमन्ते सुविभूषिताङ्गाः ।
तेषामयं शत्रुवरघ्न लोको नासौ सदा देहसुखे रतानाम्।। ३७ ।।[०६]

ये योगयुक्तास्तपसि प्रसक्ताः स्वाध्यायशीला जरयन्ति देहान्।}
जितेन्द्रियाः प्राणिवधे निवृत्तास्तेषाम्तु(मसौ) नायमरिघ्न लोकः
।।३८।।[०७]

---

(०१) (१) श्रयन्तं; भवन्तं (for च्यवन्तं); भवन्ति ज्ञानमानाश्च; (२) गतस्थं चैव; स्वगर्भस्थं च; स्वर्गस्थाश्चैव, सर्वदा; सर्वथा; (३) स्वमात्मजं; (४) ०चक्षुषा,

(०२) (१) दृष्टयः (for बुद्धयः),)(६) प्रयास्यन्ति पुनर्दिवं,

(०३) (१) देवात् (for दैवात्);दै (दे) ववशात् (for दैवाद्धठात्); वधात्; हतात् (for हठात्); (२) स्वभावतः; (३) महाराज; महात्मानो (for नरा राजन्); (४) तेसत्वत्र; स्त्वनु; स्त्यन्या; न्याभूद् (for तेऽस्त्वन्या);जातेत्यागूढ०वारणा (चारिणः,

(०४) (१) अन्येपामां (for अत्रो); चैव (for चापि); (३) ज्ञेयः (for श्रेयः,

(०५) (१) इहैवे (व)कस्य; इह चैकस्य; (२) कस्य (for (ए)कस्य); (३) वा (for चा०,

(०६) (१) चैषां (for येषां); (२) भुवि भूषिताङ्गाः; सुः(च) विभूषिताश्च; (४) ग्राम्य (for देहं,

(०७) (१) युक्तयोगासू (for योगयुक्तासू); प्रयुक्ताः; प्रसिक्ताः; (२) स्वाध्यायवन्तो,जनयन्ति, देहं;

ये धर्ममेव प्रथमं चरन्ति धर्मेण लब्ध्वा च धनानि काले।**
दारानवाप्य क्रतुभिर्यजन्ते तेषामयं चैव परश्च लोकः ।। ३९ ।।[०१]

ये नैव विद्यां न तपो न दानं न चापि मूढाः प्रजने यतन्ति।
न चानुगच्छन्ति सुखानि भोगांस्तेषामयं नैव परश्च लोकः ।। ४० ।।[०२]

सर्वे भवन्तस्त्वतिवीर्यसत्त्वा दिव्यौजसः संहननोपपन्नाः ।**
लोकादमुष्मादवनिं प्रपन्नाः स्वधीतविद्याः सुरकार्यहेतोः ।। ४१ ।।[०३]

कृत्वैव कर्माणि महान्ति शूरास्तपोदमाचारविहारशीलाः ।**
देवानृषीन्प्रेतगणांश्च सर्वान्सन्तर्पयित्वा विधिना परेण।। ४२ ।।[०४]

स्वर्गं परं पुण्यकृतो निवासं क्रमेण सम्प्राप्स्  यथ कर्मभिः स्वैः ।
मा भूद्विशङ्का तव कौरवेन्द्र दृष्ट्वाऽऽत्मनःक्लेशमिमं सुखार्हम् ।। ४३।।[०५]

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि पञ्चपञ्चाशदधिकशततमोऽध्यायः ।। १५५ ।।

---

(३) भूतिपथे (for  भूतहिते);नियुक्तासू; जितेन्द्रियाः प्राणिवधे निवृत्तासू,
(०१) (२) नि (for  च);लोके (for  काले); (३) धनानि (for  दारान्);यजन्ति,
(०२) (१) येषां न (for  ये नैव);विद्या; (२) यजन्ते; यतन्ति; यजस्ते;
(३) चानु; चापिचाभि०(for  चाधि०);सुखानि सुखानु (नि) भोगानू; सुरवान्न ( न्य) भोगान्; सुखानुभाग्यासू; धनानि भार्यासू; , (शुभान्यभागासू) (ग्यासू); शुभान्नभोगान्; धनान्यभाग्यासू;
(४) न (for  च);लोकः (for  नास्ति),
(०३) (१) ०वीर्यवन्तो; (३) च दिवं (for  अवनिं);
(४) स्वधीतवेदाः; स्वधीत्य विद्याः; स्वाः (त्व) धीतविद्याः,
(०४) (१) (इ)ह (for (ए)व); (२) हार (for  चार); (३) भूतगणंश्च; प्रेतगतांश्च, पूर्वान् (for  सर्वान्),
(०५) (१) स्वर्गे, पुण्यकृतो, (४) दृष्ट्वात्मानं; दृष्ट्वा महा (मनः०),सुखार्हः; ०र्हाः; र्हं; ०र्हाः;

# १५५. पञ्चपञ्चाशदधिकशततमो अध्यायः

## मार्कण्डेयेन युधिष्ठिरादीन् प्रति प्राणिनां सुकृतदुष्कृतफलभोगादिप्रकारनिरूपणम् ॥

**वैशम्पायनः**

तं विवक्षन्तमालक्ष्य कुरुराजो महामुनिम्।**
कथासञ्जननार्थाय चोदयामास पाण्डवः ॥ १ ॥[०१]

भवान्दैवतदैत्यानामृषीणां च महात्मनाम्।**
राजर्षीणां च सर्वेषां चरितज्ञः पुरातनः ॥ २ ॥[०२]

सेव्यश्चोपासितव्यश्च मतो नः काङ्क्षितश्चिरम्।**
अयं च देवकीपुत्रः प्राप्तोऽस्मानवलोककः ॥ ३ ॥[०३]

भवत्येव हि मे बुद्धिर्दृष्ट्वाऽऽत्मानं सुखाच्च्युतम्।**
धार्तराष्ट्रांश्च दुर्वृत्तानृध्यतः प्रेक्ष्य सर्वशः ॥ ४ ॥[०४]

कर्मणः पुरुषः कर्ता शुभस्याप्यशुभस्य वा।**
स फलं तदुपाश्नाति कथं कर्ता स्विदीश्वरः ॥ ५ ॥[०५]

कुतो वा सुखदुःखेषु नृणां ब्रह्मविदां वर ।
इह वा कृतमन्वेति परदेहेऽथ वा पुनः ॥ ६ ॥[०६]

देही च देहं सन्त्यज्य मृग्यमाणः शुभाशुभैः ।**

---

(०१) (१) विवक्षितम्, आमन्त्र्य; आलोक्य (for आलक्ष्य), (२) महाद्युतिः; (३) नोद० (for चोद०),
(०२) युधिष्ठिरः; (१) भगवन्देवदैत्यानाम्; (३) पूर्वेषां (for स); (४) पुरातनः (for सना),
(०३) (१) मेध्यश्चोपास्थबुद्धिश्च; (२) ततो नः; मनोज्ञः; मत्तो नः; त्वन्नो न,
(०४)(१) भ्रमत्येव; भवानेव (for भवत्येव);ब्रूहि (for बुद्धिर्); (३) तान्सर्वान् (for दुर्वृत्तान्); (४) नृत्यतः; दृष्यतः (for ऋध्यतः);सर्वतः,ऋद्धान्प्रेक्ष्य च सर्वशः,
(०५)(२) (अ)थ (for (अ)पि);वा (for च); (३) स फलं (for स्वफलं),
(०६)(१) हठे; भोक्ता; हठो; कुतो (कथं); हठाद्; हर्ता (for अथ); (२) नणां,

कथं संयुज्यते प्रेत्य इह वा द्विजसत्तम ॥ ७ ॥[०१]

ऐहलौकिकमेवेह उताहो पारलौकिकम्।**
क्व च कर्माणि तिष्ठन्ति जन्तोः प्रेतस्य भार्गव ॥ ८ ॥[०२]

एतत्सर्वं यथावृत्तं मुने वक्तुमिहार्हसि ।

**मार्कण्डेयः**

त्वद्युक्तोऽयमनुप्रश्नो यथावद्वदतां वर ।
विदितं वेदितव्यं ते स्थित्यर्थं त्वं तु पृच्छसि ॥ ९ ॥[०३]

अत्र ते कथयिष्यामि तदिहैकमनाः शृणु।**
यथेहामुत्र च नरः सुखदुःखमुपाश्नुते ॥ १० ॥[०४]

निर्मलानि शरीराणि विशुद्धानि शरीरिणाम्।**
ससर्ज धर्मतन्त्राणि पूर्वोत्पन्नः प्रजापतिः ॥ ११ ॥[०५]

अमोघफलसङ्कल्पाः सुव्रताः सत्यवादिनः ।**
ब्रह्मभूता नराः पुण्याः पुराणाः कुरुसत्तम ॥ १२ ॥[०६]

सर्वे देवैः समायान्ति स्वच्छन्देन नभस्तलम्।**
ततश्च पुनरायान्ति सर्वे स्वच्छन्दचारिणः ॥ १३ ॥[०७]

---

(०१)(१) देही देहं, तु (ह) (for च); (२) मृष्य (for मृग्य); (३) उभौ (for कथं); संसृज्यते; वियुज्यते; (४) देहवान् (for इह वा);इह वापि द्विजोत्तम,
(०२) (१) इह (for ऐह);एतावद्; एवेह (for एवैतद्); (३) वा (for च); कर्मणि, कृतकर्माणि तिष्ठन्ति,
(०३)(१) यदुक्तो; त्वयोक्तो; त्वदुक्तो; तद्युक्तो; (३) च (for ते); (४) स्मृत्यर्थम्, त्वनु०; त्वं तु; त्वत्र (for अनु०),
(०४)(१) अहं; तात; तत्र (for अत्र);वर्ण; कथ (for वर्त); (३) अथे; यत्रे (for यथे),
(०५)(१/२) शरीराणि विशुद्धानि; (३) शशंस (for ससर्ज);सर्व (for धर्म),
(०६)(१) फल (for बल); (२) सद्वृत्ता;सुवृत्ताः (for सुव्रताः);सिद्धार्था निरुपद्रवाः; (४) कुरुसत्तम; पुरुषर्षभ,
(०७) (१) सर्वदेवैः,समं यान्ति; (२) नभस्थलं; (४) सर्वे,(स्वर्गे) छन्दविहारिणः,

**स्वच्छन्दमरणाश्चासन्नराः स्वच्छन्दचारिणः ।****
**अल्पबाधा निरातङ्काः सिद्धार्था निरुपद्रवाः ॥ १४ ॥**(०१)

**द्रष्टारो देवसङ्घानामृषीणां च महात्मनाम्।****
**प्रत्यक्षाः सर्वधर्माणां दान्ता विगतमत्सराः ॥ १५ ॥**(०२)

**आसन्वर्षसहस्रीयास्तथा पुत्रसहस्रिणः ।****
**ततः कालान्तरेऽन्यस्मिन्पृथिवीतलचारिणः ॥ १६ ॥**(०३)

**कामक्रोधाभिभूतास्ते मायाव्याजोपजीविनः ।****
**लोभमोहाभिभूताश्च त्यक्ता देहैस्ततो नराः ॥ १७ ॥**(०४)

**अशुभैः कर्मभिः पापास्तिर्यङ्निरयगामिनः ।****
**संसारेषु विचित्रेषु पच्यमानाः पुनः पुनः ॥ १८ ॥**(०५)

**मोघेष्टा मोघसङ्कल्पा मोघज्ञाना विचेतसः ।**
**नाथन्तस्सर्वकामानां नास्तिका भन्नसेतवः ॥ १९ ॥**

**सर्वाभिशङ्किनश्चैव संवृत्ताः क्लेशदायिनः ।**
**अशुभैः कर्मभिश्चापि प्रायशः परिचिह्निताः ॥ २० ॥**(०६)

---

(०१)(२) सर्वे (for नराः);स्वच्छन्दचारिणः; (३) क०सर्वाबाधानुमतिकाः सर्वार्थ; ख०स्वल्पायासा नीरातङ्काः घ०सर्वबाधाविनिर्मुक्ताः सर्वार्था,अल्पाबाधा; स्वल्पायासा; निराबाधा; स्वल्पा (ल्प) बाधा, निरी,;निरीति(ती) काः; (४) नीरुजा; स्वल्पार्था (for सिद्धार्था);निरुपस्कृताः,

(०२)(१) स्रष्टारो; (३) प्रत्यक्षा (क्षं)०सर्वधर्माणः; प्रत्यक्षं सर्वधर्माणां; प्रकृत्या सर्वधर्माणः; (४) शान्ता (for दान्ता),

(०३) (१) आयुरू (for आसन्);सहस्रीयाः; सहस्रेण; (२) वर्षं (for पुत्र); (३) तस्मिन् (for ऽन्यस्मिन्); (४) तथा क्षत्रसहस्रिणः पृथिंवीतलवासिनः,

(०४)(२) धर्मव्याजोप; मायाव्यामोह; (३) मोहलोभाभिभूताश्;ते (for च); (४) त्यक्ता देहैस् (त्यक्तदेहास्); त्यक्तदेहैस्; सदा; तदा (for ततो),

(०५)(१) अशुभिः; आशुभिः(for अशुभैः);पापै (for पापास्); (२) निरयभागिनः; निरयगामिनः; गामिनभागिनः; नरकभा (भो) गिनः; (३) विचिन्त्येषु (for विच) ; (४) पश्य; पात्य (for पच्य),

(०६)(१) मोधेच्छा; (२) विबुद्धयः(for विचे);मोघ (ह)ज्ञानविचेतसः; ज्ञान०विबुद्धयः,

काङ्क्षिणः सर्वकामानां नास्तिका भिन्नसेतवः ।।[०१]

दौष्कुल्या व्याधिबहुला दुरात्मानोऽप्रतापिनः
भवन्त्यल्पायुषः पापा रौद्रकर्मफलोदयाः ।**
नाथन्तः सर्वकामानां नास्तिका भिन्नचेतसः ।। २१ ।।[०२]

युधिष्ठिरः

जन्तोः प्रेतस्य कौन्तेय गतिः स्वैरिह कर्मभिः ।**
प्राज्ञस्य हीनबुद्धेश्च कर्मकोशः क्व तिष्ठति ।। २२ ।।[०३]

क्वस्थस्तत्समुपाश्नाति सुकृतं यदि वेतरत्।**
इति ते दर्शनं यच्च तत्राप्यनुनयं शृण ।। २३ ।।[०४]

त्वद्युक्तोऽयमनुप्रश्नः शृणु भारत तत्त्वतः ।[०५]

अयमादिशरीरेण देवसृष्टेन मानवः ।**
शुभानामशुभानां च कुरुते सञ्चयं महत् ।। २४ ।।[०६]

आयुषोऽन्ते प्रहायेदं क्षीणप्रायं कलेवरम्।**
सम्भवत्येव युगपद्योनौ नास्त्यन्तराभवः ।। २५ ।।[०७]

तत्रास्य स्वकृतं कर्म छायेवानुगतं सदा।**

---

(०१) (३) सर्वाभि०; (४) क्लेशभाजनाः;,दायिनः; (५) चैव (for चापि),
(०२) (१) दौःकुला; दुर्बला; (२) पता०पिनः; पि तापिनः; भिमानिन;नुतापिन,; (३) एवं तु (for भवन्ति);पापाद्; प्राण; (४) फलोपगा; (५) क०नाथन्तस्सर्वकामान् वै नास्तिका भिन्नचेतसः ।, ईहन्तः (अभाग्याः); तथातः; काङ्क्षिणः(for नाथन्तः);सर्वकायणां; भूतानां; कामान्वै, नाथवतः सर्वकामान्; (६) भिन्न चेतसः,
(०३)(२) गतिं (for गतिः);एव (for इह); (३) प्राप्त (for प्राज्ञ);बुद्धेषु; बुद्धेर्वा, प्राज्ञविहीन बुद्धेस्तु,
(०४)(१) काथ (for क्वस्थस्);च तमुपा; तं समुपा; तत्तदुपा; तु तमुपा; सन्समुपा; (२) वेतरं; चेतरत् ,
(०५) मार्कण्डेय उं; (४) तथा०; तस्य; तच्च (for तत्र);(अ)प्यनुनीयं शृणुष्व मे,
(०६)(२) दैवसृष्टेन; देवैः सृष्टेन; देवदृष्टेन; (४) मुहुः(for महत्); कुरुते कोषसञ्चयं,
(०७)(१) वि (for प्र); (२) क्षीणप्राणं; (४) (अ)त्र सम्भवं; (अ)त्र संशयः (for (अ) न्तराभवः),

फलत्यथ सुखार्हो वा दुःखार्हो वाथ जायते ॥ २६ ॥[०१]

अनुशेते शयानं च तिष्ठन्तं चानुतिष्ठति ।

अनुधावति धावन्तं पूर्वकर्म कृतं नरम् ।[०२]

कृतान्तविधिसंयुक्तः स जन्तुर्लक्षणैः शुभैः ।**

अशुभैर्वा निरादानो लक्ष्यते ज्ञानदृष्टिभिः ॥ २७ ॥[०३]

अतः परं ज्ञानवतां निबोध गतिमुत्तमाम् ॥ २८ ॥[०४]

मनुष्यास्तप्ततपसः सर्वागमपरायणाः ।**

स्थिरव्रताः सत्यपरा गुरुशुश्रूषणे रताः ॥ २८ ॥[०५]

सुशीलाः शुक्लजातीयाः क्षान्ता दान्ताः सुतेजसः ।**

शुचियोन्यन्तरगताः प्रायशः शुभलक्षणाः ॥ ३० ॥[०६]

जितेन्द्रियत्वाद्वशिनः शुक्लत्वान्मन्दरोगिणः ।**

अबाधाश्च परित्रासा भवन्ति निरुपद्रवाः ॥ ३१ ॥[०७]

च्यवन्तं जायमानं च गर्भस्थं चैव सर्वशः ।

स्वमात्मानं परं चैव बुध्यन्ते ज्ञानचक्षुषा ॥ ३२ ॥ [०८]

---

(०१)(१) तस्य (for तत्र); (अ)पि,(for (अ)स्य); सुकृतं; तत्कृतं०,
(०२)(३) भव(for फल); (अ)त्र (for (अ)थ);सुखार्हे; (४) दुःखार्हे, अथ; उप०; अभि० (for अपि),
(०३) (४) क०घ०वृत्तिभिः, स्थानदृष्टिभिः; ज्ञानवृष्टिभिः; वृत्तिभि; लक्षणैर्ज्ञानवृत्तिभिः
एषा तावदबुद्धीनां गतिरुक्ता युधिष्ठिर ।,
(०४)(१) अबुद्धानां; (२) नराधिप (for युधि);गतिर्,
(०५)(३) स्थिरवृत्ताः; स्थितव्रताः,
(०६)(२) कान्ता; क्लान्ता (for क्षान्ता); सुचेतसः; (३) शुचि,
(०७)(१) सत्कृत्यान्; शुद्धात्वान्, मन्दरागिणः; (३) अल्पाबाधपरित्रासाद्; अल्पबाधपरित्रासा; अल्पाबाधापरित्रासा; अल्पाबाधा निरातङ्का; अल्पबाधापरि० त्रासा; अबाधा अपरित्रासा,
(०८) (१) श्रयन्तं; भवन्तं (for च्यवन्तं); भवन्ति ज्ञानमानाश्च; (२) गतस्थं चैव; स्वगर्भस्थं च; स्वर्गस्थाश्चैव, सर्वदा; सर्वथा; (३) स्वमात्मजं; (४) ०चक्षुषा,

कर्मभूमिमिमां प्राप्य पुनर्यान्ति सुरालयम्।
कृत्वा शुभानि कर्माणि ज्ञानेन भरतर्षभ ।। ३३ ।।

ऋषयस्ते महात्मानः प्रत्यक्षागमबुद्धयः ।(०१)

किञ्चिद्दैवाद्धठात्किञ्चित्किञ्चिदेव स्वकर्मभिः ।**
प्राप्नुवन्ति नरा राजन्मा तेऽस्त्वन्या विचारणा ।। ३४ ।।(०२)

इमामत्रोपमां चापि निबोध वदतां वर ।
मनुष्यलोके यच्छ्रेयः परं मन्ये युधिष्ठिर ।। ३५ ।।(०३)

इह वैकस्य नामुत्र अमुत्रैकस्य नो इह ।**
इह वामुत्र चैकस्य नामुत्रैकस्य नो इह ।। ३६ ।।(०४)

धनानि येषां विपुलानि सन्ति नित्यं रमन्ते सुविभूषिताङ्गाः ।
तेषामयं शत्रुवरघ्न लोको नासौ सदा देहसुखे रतानाम् ।। ३७ ।।(०५)

ये योगयुक्तास्तपसि प्रसक्ताः स्वाध्यायशीला जरयन्ति देहान्।
जितेन्द्रियाः प्राणिवधे निवृत्तास्तेषाम्तु(मसौ) नायमरिघ्न लोकः ।। ३८ ।।(०६)

ये धर्ममेव प्रथमं चरन्ति धर्मेण लब्ध्वा च धनानि काले।**
दारानवाप्य क्रतुभिर्यजन्ते तेषामयं चैव परश्च लोकः ।। ३९ ।।(०७)

---

(०१)(दृष्टयः (for बुद्धयः),)(६) प्रयास्यन्ति पुनर्दिवं,

(०२) (१) देवात् (for दैवात्);दै (दे) ववशात् (for दैवाद्धठात्);वधात्; हतात् (for हठात्); (२) स्वभावतः; (३) महाराज; महात्मानो (for नरा राजन्); (४) तेसत्वत्र; स्त्वनु; स्त्यन्या; न्याभूद् (for तेऽ स्त्वन्या);जातेत्यागूढ०वारणा (चारिणः),

(०३) (१) अन्येपामां (for अत्रो); चैव (for चापि); (३) ज्ञेयः (for श्रेयः),

(०४)(१) इहैवे (व)कस्य; इह चैकस्य; (२) कस्य (for (ए)कस्य); (३) वा (for चा०),

(०५) (१) चैषां (for येषां); (२) भुवि भूषिताङ्गाः; सुः(च) विभूषिताश्च; (४) ग्राम्य (for देहं),

(०६)(१) युक्तयोगास् (for योगयुक्तास्); प्रयुक्ताः; प्रसिक्ताः; (२) स्वाध्यायवन्तो,जनयन्ति, देहं; (३) भूतिपथे (for भूतहिते);नियुक्तास्; जितेन्द्रियाः प्राणिवधे निवृत्तास्,

(०७)(२) नि (for च);लोके (for काले); (३) धनानि (for दारान्);यजन्ति,

ये नैव विद्यां न तपो न दानं न चापि मूढाः प्रजने यतन्ति।
न चानुगच्छन्ति सुखानि भोगांस्तेषामयं नैव परश्च लोकः ।। ४० ।।(०१)

सर्वे भवन्तस्त्वतिवीर्यसत्त्वा दिव्यौजसः संहननोपपन्नाः ।**
लोकादमुष्मादवनिं प्रपन्नाः स्वधीतविद्याः सुरकार्यहेतोः ।। ४१ ।।(०२)

कृत्वैव कर्माणि महान्ति शूरास्तपोदमाचारविहारशीलाः ।**
देवानृषीन्प्रेतगणांश्च सर्वान्सन्तर्पयित्वा विधिना परेण ।। ४२ ।।(०३)

स्वर्गं परं पुण्यकृतो निवासं क्रमेण सम्प्राप्स्यथ कर्मभिः स्वैः ।
मा भूद्विशङ्का तव कौरवेन्द्र दृष्ट्वाऽऽत्मनःक्लेशमिमं सुखार्हम् ।। ४३ ।।(०४)

अस्मिन् पर्वणि १५५ अध्याये ४३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि पकश्चपश्चाशदधिकशततमोऽध्यायः ।। १५५ ।।

(मार्कण्डेयसमस्यापर्वणि ३ अध्यायः)

## 03- 06- 156 Adhyaya

# १५६. षट्पञ्चाशदधिकशततमोऽध्यायः

**मुनिना मार्कण्डेयेन युधिष्ठिरादीन् प्रति मृतस्य पुनरुजीवनशक्त्यादिरूपब्राह्मणमाहात्म्य कथनम् ।।**

---

(०१)(१) येषां न (for ये नैव);विद्या; (२) यजन्ते; यतन्ति; यजस्ते; (३) चानु; चापि; चाभि०(for चाधि०);सुखानि भोगासू; सुखानु (नि) भोगानू; सुरवान्न ( न्य)भोगान्; सुखानुभाग्यासू; धनानि भार्यासू; , (शुभान्यभागास्) (ग्यास्); शुभान्नभोगान्; धनान्यभाग्यास्; (४) न (for च);लोकः (for नास्ति);
(०२) (१) ०वीर्यवन्तो; (३) च दिवं (for अवनिं); (४) स्वधीतवेदाः; स्वधीत्य विद्याः; स्वाः (त्व) धीतविद्याः,
(०३)(१) (इ)ह (for (ए)व); (२) हार (for चार); (३) भूतगणंश्च; प्रेतगतांश्च, पूर्वान् (for सर्वान्),
(०४) (१) स्वर्गे, पुण्यकृतो, (४) दृष्ट्वात्मानं; दृष्ट्वा महा (मनः०),सुखार्हः; ०र्हाः; र्हैं; ०र्हाः; र्थैं,

वैशम्पायनः

मार्कण्डेयं महात्मानमूचुः पाण्डुसुतास्तदा।**

पाण्डवाः

माहात्म्यं द्विजमुख्यानां श्रोतुमिच्छाम कथ्यताम् ।। १ ।।(०१)

एवमुक्तः स भगवान्मार्कण्डेयो महातपाः ।**
उवाच सुमहातेजाः सर्वशास्त्रविशारदः ।। २ ।।(०२)

मार्कण्डेयः

हैहयानां कुलकरो राजा परपुञ्जयः ।**
कुमारो रूपसम्पन्नो मृगयां व्यचरद्बली ।। ३ ।।(03)

चरमाणस्तु सोऽरण्ये तृणवीरुत्समावृते।
कृष्णाजिनोत्तरासङ्गं ददर्श मुनिमन्तिके ।। ४ ।।(०४)

स तेन निहतोऽरण्ये मन्यमानेन वै मृगम्।(०५)
व्यथितः कर्म तत्कृत्वा शोकोपहतचेतनः ।। ५ ।।

जगाम हैहयानां वै सकाशं प्रथितात्मनाम्।(०६)
राज्ञां राजीवनेत्रोऽसौ कुमारः पृथिवीपतिः ।। ६ ।।

तेषां च तद्यथावृत्तं कथयामास वै तदा।(०७)
सुकुमारो महीपालो हेहयानां महीभृताम् ।। ७ ।।

---

(०१) (१/२) ततो युधिष्ठिरो राजा मार्कँडेयमुवाच ह; (४) इच्छामि,
(०२)(२) महानृषिः (for तपाः); (३/४) कथयामास माहात्म्यं ब्राह्मणानां महात्मनां; उवाच सुमहात्मानं राजानं सर्वशास्त्रवित्,
(०३) (१) हेहयानां, कुले जातो (for कुलं); (४) व्यचरद् (for अच),
(०४) (१) च (for तु);ततो; तदा;, तु यो (for तु सो); (२) समाकुले;
(०५)(४) मुनिसत्तमं (५) हिंसितो (for निहतो),
(०६)(३) हेहयानां, स (for वै),
(०७)(२) पृथिवीपतिः, (३) तथावृत्तं; (४) कौरव (for वै तदा);

तं चापि हिंसितं तात मुनिं मूलफलाशिनम्।**
श्रुत्वा दृष्ट्वा च ते तत्र बभूवुर्दीनमानसाः ॥ ८ ॥[०१]

कस्यायमिति ते सर्वे मार्गमाणास्ततस्ततः ।**
जग्मुश्चारिष्टनेम्नोऽथ तार्क्ष्यस्याश्रममञ्जसा ॥ ९ ॥[०२]

तेऽभिवाद्य महात्मानं तं मुनिं नियतव्रतम्।**
तस्थुः सर्वे स तु मुनिस्तेषां पूजामथाहरत् ॥ १० ॥[०३]

ते तमूचुर्महात्मानं न वयं सत्क्रियां मुने।**
त्वत्तोऽर्हाः कर्मदोषेण ब्राह्मणो हिंसितो हि नः ॥ ११ ॥

तानब्रवीत्स विप्रर्षिः कथं वो ब्राह्मणो हतः ।**
क्व चासौ ब्रूत सहिताः पश्यध्वं मे तपोबलम् ॥ १२ ॥[०४]

ते तु तत्सर्वमखिलमाख्यायास्मै यथातथम्।
नापश्यंस्तमृषिं तत्र गतासुं ते समागताः ॥ १३ ॥ [०५]

अन्वेषमाणाः सव्रीडाः स्वप्नवद्गतचेतनाः ।
तानब्रवीत्तत्र मुनिस्तार्क्ष्यः परपुरञ्जय ॥ १४ ॥[०६]

स्यादयं ब्राह्मणः सोऽथ युष्माभिर्यो विनाशितः ।**

---

(०१)(१) ते; तचू (for तं); (२) फलाशनं; (३) श्रुत्वा दृष्ट्वा, तत्रैव (for ते तत्र),
(०२)(१) क्वासौ स; क्व चायम्; (३) ० नेम्नोथ; नाशाय; नेमिश्च; नेमेस्तु; नेमेश्च; (४) उत्तमं (for अञ्जसा),
(०३)(२) ऋषिं (for मुनिं);शंसितव्रतं; नियतव्रतं, मुनिं सुनियतव्रतं; (३) च (for तु); (४) अथाकरोत्; समाहरत्; समारभेत्,
(०४) (१) ब्रह्मर्षिः; राजर्षिः; (२) केन (for कथं);वा; भो (for वो); (३) च मां (for चासौ);ब्रूहि,
(०५)(१) ते तत्र; तच्च ते (for ते तु तत्); (३) मुनिं (for ऋषिं), (४) गतायुसू,वै (for ते);समाहताः; समाहिताः;
(०६)(१) अन्विष्यं, व्रीडिताः; सुव्रीडा;; (२) सुप्तवद्; स्वदुःख०,गतचेतना; गतचेतसः, तं विप्रं दीनमानसाः,

पुत्रो ह्ययं मम नृपास्तपोबलसमन्वितः ।। १५ ।।(०१)

ते च दृष्ट्वैव तमृषिं विस्मयं परमं गताः ।**
महदाश्चर्यमिति वै ते ब्रुवाणा महीपते ।। १६ ।।(०२)

मृतो ह्ययमुपानीतः कथं जीवितमाप्तवान्।
किमेतत्तपसो वीर्यं येनायं जीवितः पुनः ।**
श्रोतुमिच्छामहे विप्र यदि श्रोतव्यमित्युत ।। १७ ।।(०३)

स तानुवाच नास्माकं मृत्युः प्रभवते नृपाः ।**
कारणं वः प्रवक्ष्यामि हेतुयोगसमासतः ।। १८ ।।(०४)

मृत्युः प्रभवते येन नास्माकं नृपसत्तमाः ।। १९ ।।

शुद्धाचारा अनलसाः सन्ध्योपासनतत्पराः ।
शुद्धान्नाः शुद्धसुधना ब्रह्मचर्यव्रतान्विताः ।। २० ।।

सत्यमेवाभिजानीमो नानृते कुर्महे मनः ।
स्वधर्ममनुतिष्ठामस्तस्मान्मृत्युभयं न नः ।। २१ ।।(०५)

यद्ब्राह्मणानां कुशलं तदेषां कथयामहे।**
नैषां दुश्चरितं ब्रूमस्तस्मान्मृत्युभयं न नः ।। २२ ।।(०६)

अतिथीनन्नपानेन भृत्यानत्यशनेन च ।**

---

(०१)(३) सोत्र (for सोऽथ); (४) यो युष्माभिर्; समाहतः(for विना),
(०२)(१) च (for तु); (३) सहसा० (for महदा०); ते (for वै); (४) ते (for वि०);
(०३)(१) (ऽ)पि (for हि);अथो दृष्टः; उपानीतः; इतो दृष्टः, (२) कथं जीवति त्वात्मवान्; (३) ते तत्; तु तत् (for एतत्);तपसां; (४) (अ)सौ (for (अ)यं); (५) इच्छामि, ब्रह्मर्षे (for विप्र०);श्रोतुमिच्छामहे विप्र,
(०४)(३) च; तत् (for वः); (४) हेतुयुक्तं;सनातनं; समागतः, हेतुयोगसमासतः,
(०५)(२) जपयज्ञपरायणाः; (३) कारणं च न तिष्ठामसू; (४) मृत्युरयं,
(०६)(३) तेषां हि (नैषां वि०) चरितं ब्रूमः,

तेजस्विदेशवासाच्च तस्मान्मृत्युभयं न नः ॥ २३ ॥[०१]

सम्भोज्य शेषमश्नीमस्तस्मान्मृत्युभयं न नः ।
शान्ता दान्ताः क्षमाशीलास्तीर्थदानपरायणाः ।
पुण्यदेशनिवासाच्च तस्मान्मृत्युभयं न नः ।

देशे (देश) वासश्न,

एतद्वै लेशमात्रं वः समाख्यातं विमत्सराः ।**
गच्छध्वं सहिताः सर्वे न पापाद्भयमस्ति वः ॥ २४ ॥[०२]

एवमस्त्विति ते सर्वे प्रतिपूज्य महामुनिम् ।**
स्वदेशमगमन्हृष्टा राजानो भरतर्षभ ॥ २५ ॥[०३]

अस्मिन् पर्वणि १५६अध्याये २५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि ब्राह्मणमहात्म्यकथने षट्पञ्चाशदधिकशततमोऽध्यायः ॥ १५६ ॥

(मार्कण्डेयसमस्यापर्वणि ४ अध्यायः)

## 03- 06- 157 Adhyaya

# १५७. सप्तपञ्चाशदधिकशततमोऽध्यायः

**मार्कण्डेयेन युधिष्ठिरादीन् प्रति वैन्यस्याश्वनेधे अत्रिगौतमविवादानुवादेन ब्राह्मणमाहात्म्यकथनम् ॥**

---

(०१)(१) आतिथ्येन; अतिथिषु (for अति०थीन्); (अ)न्नदानेन; (२) भृत्या०नप्य०; ०नन्व०; ०नत्या०; ०न्नात्य० (for ०नत्य० );भृत्यानां भरणेन च; तथा भृत्याशनेन च; भृत्यानामशनेन च,
(०२)(१) उद्देशमात्रं (for वै लेश०); मात्रेण (for मात्रं वः),
(०३) (३) स्वं देशम्; स्वां दिशम्; स्वदेशान्; (४) भरतर्षभाः; राजसत्तम,

**मार्कण्डेयः**

**भूय एव महाभाग्यं ब्राह्मणानां निबोध मे।**
**वैन्यो नामेह राजर्षिरश्वमेधाय दीक्षितः ॥ १ ॥**

**तमत्रिर्गन्तुमारेभे वित्तार्थमिति नः श्रुतम्।**(०१)
**भूयोऽर्थं नानुरुध्यत्स धर्मव्यक्तिनिदर्शनात् ॥ २ ॥**(०२)

**स विचिन्त्य महातेजा वनमेवान्वरोचयत्।****
**धर्मपत्नीं समाहूय पुत्रांश्चेदमुवाच ह ॥ ३ ॥**(०३)

**अत्रिः**

**प्राप्स्यामः फलमत्यन्तं बहुलं निरुपद्रवम्।****
**अरण्यगमनं क्षिप्रं रोचतां वो गुणाधिकम्।**(०४)

**मार्कण्डेयः**

**तं भार्या प्रत्युवाचाथ धर्ममेवानुतन्वती ॥ ४ ॥**

**भार्या**

**वैन्यं गत्वा महात्मानमर्थयस्व धनं बहु ॥ ५ ॥**

**स ते दास्यति राजर्षिर्यजमानोऽर्थितो धनम्।**(०५)

---

(०१) (१) महाभाग्यं (for तु माहात्म्यं);, (३) वैण्यो, (अ)त्र (for (इ)ह); (४),अश्वमेधेन; (५) चात्रिर् (for अत्रिर्);अत्रिर्गंतुं तमारेभे; (६) धनार्थ,(for वित्तार्थं),

(०२)(१) भूयोर्थं (र्थं);नान्वरुध्यत,भूयो यथा नान्वरुध्यद्; भूय एवानुरु (न्वबु) ध्यत्स; भूयो धनार्थितां (०र्मार्थिनो) नैच्छद्; भूयो धनानुरुन्ध्यन्त्य; भूयो (ध्रुवो) धनानुरोधाच्च; (२) धर्मव्यय०(०वृत्ति० );,

(०३)(३) स वि (सं) चिन्त्य (for सश्चिन्त्य स);च; सु०(for स); (४) (अ)नुरोदयत्; (अ)न्वरोचतः(अ) न्वचिन्तयन्; (अ)न्वरोचयेत; (६) स आनाय्य (for समा),

(०४)(१) प्राप्स्याम; प्राप्स्यामि, अत्यर्थं; (२) बहु तन् (for बहुलं); (४) वै; वा (for वो),

(०५)(१) ता (for तं);(अ)थ (for (इ)दं); (२) धनम् (for धर्मम्);(अ)न्वरुध्यती; (अ)नुरुध्यते (तां); (अ)नु (च)रुन्धती; (अ)नुतन्वती; (३) वैण्यं,महाबाहुम्; (४) आनयस्व (for अर्थ); (६) महा०; ()र्थिते

तत आदाय विप्रर्षे प्रतिगृह्य धनं बहु
भृत्यान्सुतान्संविभज्य ततो व्रज यथेप्सितम् ॥ ६ ॥(०१)

एष वै परमो धर्मो धर्मविद्भिरुदाहृतः ॥ ७ ॥(०२)

**अत्रिः**

**कथितो मे महाभागो गौतमेन महात्मना।****
**वैन्यो धर्मार्थसंयुक्तः सत्यव्रतसमन्वितः ॥ ८ ॥(०३)**

द्वेष्टारः किन्तु नः सन्ति वसन्तस्तत्र वै द्विजाः ।**
यथा मे गौतमः प्राह ततो न व्यवसाम्यहम् ॥ ९ ॥(०४)

तत्र स्म वाचं कल्याणीं धर्मकामार्थसंहिताम्।**
मयोक्तामन्यथा ब्रूयुस्ततस्ते वै निरर्थिकाम् ॥ १० ॥(०५)

गमिष्यामि महाप्राज्ञे रोचते मे वचस्तव ।**
गाश्च मे दास्यते वैन्यः प्रभूतं चार्थसञ्चयम् ॥ ११ ॥(०६)

**मार्कण्डेयः**

एवमुक्त्वा जगामाशु वैन्ययज्ञं महातपाः ।**

---

(तं) भृशं (for धनम्),
(०१)(१) तच्चादाय नु विप्रर्षे; (२) प्रति ग्रहधनं; (३) धनान्; वृत्या; वृत्यान् (for भृत्यान्); द्रव्यं सम्पाद्य बहुशस्; ,
(०२)(१) ते (for वै);प्रथमो (for परमो); (२) विद्वद्भिः समु ( सुहृ) दाहृतः(विचरत्समृगाहृतः),
(०३)(१) वै (for मे); महाभागो (ग); (३) वैण्यो,धर्मसमायुक्तः; (४) परायणः,
(०४)(१/२) त्व (त०; चा )त्र सन्ति (for त्वस्ति तत्र);निवत्स्यति, च;(इ)ह (for हि), द्वेष्टारः किं तु नः सन्ति वसन्तस्तत्र वै द्विजाः; (३) स (for मे); (४) यतो (for ताते); न व्यवस्याम्यहं ततः( पुनः); तथा वक्ष्याम्यहं तव; ततो वर्णामि साध्वहं; व्यवस्यामि तथा त्वहं,
(०५)(१) ततःस(स्म);तत्रापि (for तत्र स्म);कल्याणि; (२) धर्मकार्या (मा) र्थसंयुतां; (४) सर्वे (for ते वै); निरर्थकं; र्थकाः; र्थिकां; निदर्शकाः; निरर्थतां,
(०६) (१) महाप्रज्ञे; महाभागे; (अ)थवा भद्रे; महाप्राज्ञः, (२) रोचतां; (३) नैव(for गाश्च), ,वैण्यः; (४) च धनं महत्; चार्थसंहितं; धनसञ्चयं,

गत्वा च यज्ञायतनमत्रिस्तुष्टाव तं नृपम् ॥ १२ ॥(०१)

*अधिकपाठः ० वाक्यैर्मङ्गलसंयुक्तैः पूजयानोऽब्रवीद्वचः ।

**अत्रिः**

राजन्धन्यस्त्वमीशश्च भुवि त्वं प्रथमो नृपः ।

स्तुवन्ति त्वां मुनिगणास्त्वदन्यो नास्ति धर्मवित् ।

(02)

**मार्कण्डेयः**

तमब्रवीदृषिः क्रुद्धो वचनं वै महातपाः ॥ १३ ॥(०३)

**गौतमः**

मैवमत्रे पुनर्ब्रूया न ते प्रज्ञा समाहिता।**

अत्र नः प्रथमं स्थाता महेन्द्रो वै प्रजापतिः ॥ १४ ॥(०४)

**मार्कण्डेयः**

अथात्रिरपि राजेन्द्र गौतमं प्रत्यभाषत ॥ १५ ॥

अयमेव विधाता हि यथैवेन्द्रः प्रजापतिः ।**

त्वमेव मुह्यसे मोहान्न प्रज्ञानं तवास्ति ह ॥ १६ ॥(०५)

**गौतमः**

जानामि नाहं मुह्यामि त्वमेवात्र विमुह्यते।**

---

(०१) (१) (अ)थ; (ए)व (for (आ)शु); (२) वैण्य; (४) इति (for अत्रिस्), मुनिः(for नृपम्);
(०२) (१) वैन्यस्त्वम्; धन्यस्त्वम्; विधिस्त्वम्; इन्द्रस्त्वम्, राजन्वन्यविरिचश्च; (२) विभुस्त्वं; प्रभुश्च (for भुवि त्वं); (३) स्तुवन्तु, त्वा,(for त्वां); (४) त्वदन्यो न, वाग्भिर्मन्त्रपरायणाः,
(०३)(१) ततो; तत्रा; (for तम);ऋषिं, क्रुद्धो (for तत्र); (२) वचनं वै; वचस्तत्र ,गौतम ,
(०४)(१) उ०; नैवम् (for मैवम्); अन्यं; आशु०; अत्र (for अत्रे); (२) समन्विता (for समाहिता); (३) अत्रे (for अत्र);ते; वै (for नः);प्रथमः स्थाता; प्रथमो धाता,

(०५)(१) एष (for अपि); (३) अलम् (for अयम्);एष (for एव);हि (for च); (४) यथा चेन्द्रः; तथैवेन्द्रः (महेन्द्रो वै); (६) प्रज्ञा न (for प्रज्ञानं);न च (for तव), वै; मे; च (for ह);न प्रज्ञा विद्यते तव,

स्तौषि त्वं दर्शनप्रेप्सू राजानं जनसंसदि ॥ १७ ॥(०१)

न वेत्थ परमं धर्मं न चावैषि प्रयोजनम्।**
बालस्त्वमसि मूढश्च वृद्धः केनापि हेतुना ॥ १८ ॥(०२)

**मार्कण्डेयः**

**विवदन्तौ तथा तौ तु मुनीना दर्शने स्थितौ।****
ये तस्य यज्ञे संवृत्तास्तेऽपृच्छन्त कथं त्विमौ ॥ १९॥(०३)

प्रवेशः केन दत्तोऽयमुभयोर्वैन्यसंसदि।**
उच्चैः समभिभाषन्तौ केन कार्येण धिष्ठितौ ॥ २० ॥(०४)

ततः परमधर्मात्मा काश्यपः सर्वधर्मवित्।**
विवादिनावनुप्राप्तौ तावुभौ प्रत्यवेदयत्।(०५)
अथाब्रवीत्सदस्यांस्तु गौतमो मुनिसत्तमान् ॥ २१ ॥(०६)

गौतम उवाच

आवयोर्व्याहृतं प्रश्नं शृणुत द्विजसत्तमाः ।**
वैन्यं विधातेत्याहात्रिरत्र नौ संशयो महान् ॥ २२ ॥(०७)

---

(०१)(१) नैव; त्वां न (for नाहं);नावमुह्येहं (यं; त); (२) विवित्सुस्त्वं;, त्वमेवात्र; त्वं विवित्सुर्;त्वं विवित्सुर् (किङ्कथस्त्वं) विमुह्यसि; त्वं विकत्थन्न लज्जसे, ; (३) तुष्यते; स्तुष्यसि; तुष्यति; तुष्यसे; तुष्यसि; इष्यते (for स्तोष्यसे); तुष्यतेभ्युदये प्रेप्सुः; स्तौषि त्वं दर्शनप्रेप्सुः; (४) राजानं जनसंसदि,
(०२) (१) वेत्सि (for वेत्थ);ब्रह्म (for धर्मं); (२) चावैमि; च वै वि०चा,( वा) स्त्यत्र; तेस्त्यत्र; वास्त्वृषि (for चावैषि);प्रदर्शनं (for प्रयो); (३) अति०(for असि०); (४) (अ)सि (for (अ)पि),
(०३)(३) मार्कण्डेय उ; ये तत्र; ते तत्र; एतस्य,येस्य यज्ञे सुसद्भटत्तासू; (४) पृच्छन्ति; पृच्छन्तः,
(०४)(२) उभयोर् (for अनयोर्);वैण्य; (४) वष्ठितौ; वेष्टितौ; धिष्ठितौ,
(०५)(१) परमधर्मज्ञः; (२) कश्यपः स ह (for सर्व०);(३) विवदन्तावनु; (४) प्रत्यषेधयत्; षेधत,
(०६) (१) तान् (for तु); (२) मुनिसत्तमः; तापसोत्तमान्; ,
(०७) (१) व्यावृतं पुण्यं (for प्रश्नं); (२) शृणुतो; शृणुध्वं; शृण्वतो; शृणु तद्; द्विजसत्तमाः; (३) वैन्यं, (अ)त्राह (for (अ)हात्रिर् ); (४) तत्र, न चात्र (अत्र नौ); नौ (for नः),

ततस्तद्गौतमेनोक्तं वाक्यं वैन्यस्य संसदि ।।*

मार्कण्डेयः

श्रुत्वैव तु महात्मानो मुनयोऽभ्यद्रवन्द्रुतम् ।। २३ ।।(०१)

सनत्कुमारं धर्मज्ञं संशयच्छेदनाय वै।(०२)
पप्रच्छुः प्रणताः सर्वे ब्रह्माणमिव सोमपाः ।। २४ ।।

स च तेषां वचः श्रुत्वा यथातत्त्वं महातपाः ।**
प्रत्युवाचाथ तानेव धर्मार्थसहितं वचः ।। २५ ।।(०३)

सनत्कुमारः

ब्रह्म क्षत्रेण सहितं क्षत्रं च ब्रह्मणा सह ।
राजा वै प्रथितो धर्मः प्रजानां पतिरेव च ।। २६ ।।(०४)

स एव शक्रः शुक्रश्च स धाता च बृहस्पतिः ।
संयुक्तौ दहतः शत्रून्वनानीवाग्निमारुतौ। ।।*(०५)
प्रजापतिर्विराट्सम्राट्क्षत्रियो भूपतिर्नृम्पः ।। २७ ।।

य एभिः स्तूयते शब्दैः कस्तं नार्चितुमर्हति ।। २८ ।।(०६)

पुरायोनिर्युधाजिच्च अभिया मुदितो भवः ।**
स्वर्णेता सहजिद्बभ्रुरिति राजाभिधीयते ।। २९ ।।(०७)

---

(०१)(१) तु ते (for (ए)व तु);
(०२)(२) ( ऽ)भ्य (प्या; भ्या) गमन्; प्राद्रवन्; मुनयः समभिमुवन्; (३) सर्वज्ञं (for धर्मज्ञं),
(०३)(१) तु; वै (for च); (३) च; स (for अथ);एव (for एवं),
(०४)(२) ब्रह्मसंहितं (for ब्रह्मणा सह),
(०५) (३) प्रथितो (for प्रथमो); (४) गति०(for पतिः); (५) एष (for एव); शक्रः शुक्रः; एष शक्रश्च;
(६) सविता (for स धाता); च (for स);धाता सह (for स धाता स),
(०६) (१) राजा भोजो; राज्यभाक्स (for प्रजापतिर्); (२) नृपतिर् (for भूपतिर्);स हि गोप्ता पतिर्नृप;
(३) श्रूयते; ज्ञा०(for स्तू०),
(०७)(२) अभियादुदि (,चि)तो; सुभिक्षानुचितो; प्रभावाभ्युचितो (for अभिया मुदितो), भवेत्; ()भवत्

सत्ययोनिः पुराविच्च सत्यधर्मप्रवर्तकः ।**
अधर्मादृषयो भीता बलं क्षत्रे समादधन्।[०१]

पुरा यो ब्रह्मणा सृष्टः प्रजानां परिपालने ।
दुष्टानां निग्रहं कर्ता स च राजाभिधीयते ।
स्त्यं मन्युर्दया रक्षा धर्माधर्माविलोकनम् ।
विधन्ते यस्य चाराश्न स राजेत्यभिधियते ।
अस्माभिर्ब्राह्मणैः क्षत्रं क्षत्रेण ब्रह्म चाव्ययम् ।[०२]

तस्माद्धि ब्रह्मणा क्षत्रं क्षत्रेण ब्रह्मचाव्ययम् ।। ३० ।।

आदित्यो दिवि देवेषु तमो नुदति तेजसा।**
तथैव नृपतिर्भूमावधर्मान्नुदते भृशम् ।। ३१ ।।[०३]

ततो राज्ञः प्रधानत्वं शास्त्रप्रामाण्यदर्शनात्।**
उत्तरः सिद्ध्यते पक्षो येन राजेति भाषितम् ।। ३२ ।।[०४]

अत्रिणा व्याहृतं पूर्वं तत्तथैव न चान्यथा । [०५]

**मार्कण्डेयः**

ततः स राजा संहृष्टः सिद्धे पक्षे महामनाः ।**
तमत्रिमब्रवीत्प्रीतः पूर्वं येनाभिसंस्तुतः ।। ३३ ।।[०६]

---

(for भवः);सुभिक्षानुचितोद्भवः; (३) अत्रेः(न्ये)ता; स्वर्नेता; सं (स्वं) नेता (for स्वर्णेता);सत्य; विश्व (for सह० ); (४) विधी (for (अ)० भिधी),
(०१)(१) सत्यमृत्युर्; सत्ययोनिर्;युधाजिच्च; पुराविच्च; यथा जीवः; (३) अकर्माद्, (४) समादधुः,
(०२)( तस्माद्धि ब्रह्मणा क्षत्रं),
(०३)(४) (अ)धर्मान्; नृपते (for नुदते),
(०४)(१) एवं०; ततो; अथो (for अतो);प्रमाणत्वं (for प्रधान०); (२) शास्त्रे प्रामाण्यदर्शनम् (नात्),
(०५) (३) सु उत्तरं;पक्षे; (४) भाषितः,
(०६)(२) महात्मना (नः); महाबला; (३) ब्रह्मवित् (for अब्रवीत्); तमब्रवीत्ततःप्रीतः; (४) यो न (for येन);(अ)भि मे स्तुतं; (अ)पि संस्तुतं; (अ)भिः (हि), सत्कृतः; (अ)भिसंस्कृतः,

**वैन्यः**

**यस्मात्पूर्वं मनुष्येषु ज्यायांसं मामिहाब्रवीः ।**
**सर्वदेवैश्च विप्रर्षे सम्मितं श्रेष्ठमेव च ॥ ३४ ॥(०१)**

**तस्मात्तेऽहं प्रदास्यामि विविधं वसु भूरि च ।(०२)**
**दासीसहस्रं श्यामानां सुवस्त्राणामलङ्कृतम् ॥ ३५ ॥(०३)**

**दशकोटीर्हिरण्यस्य रुक्मभारांस्तथा दश।****
**एतद्ददामि विप्रर्षे सर्वज्ञस्त्वं मतो हि मे मतः ॥ ३६ ॥**

**मार्कण्डेयः**

**तदत्रिर्न्यायतः सर्वं प्रतिगृह्याभिसत्कृतः ।****
**प्रत्युज्जगाम तेजस्वी गृहानेव महातपाः ॥ ३७ ॥(०४)**

**प्रदाय च धनं प्रीतः पुत्रेभ्यः प्रयतात्मवान्।****
**तपः समभिसन्धाय वनमेवान्वपद्यत ॥ ३८ ॥(०५)**

अस्मिन् पर्वणि १५७अध्याये ३८ श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि सप्तपञ्चाशदधिकशततमो अध्यायः ॥ १५७ ॥**

**(मार्कण्डेयसमस्यापर्वणि ५ अध्यायः)**

---

(०१)(१) तस्मात्; यन्मां, सर्वमनुष्येभ्यो; पूर्वं मनुष्येषु; (२) त्वम् (for माम्); अब्रवीत्; (३) सर्वैर् (for सर्व०);

(०२)(४) संमतं, ज्येष्ठमेव; श्रेय एव; (६) भूरिशः (for भूरि च),

(०३) (१) अश्वानां (for श्यामानां);सुरूपाणाम्; सुवर्णानाम्;,*.

(१) दशकोटीर् (०टी); दशकोटिर्; (२) रुक्मभा (हा) रासू; (३) ददामि;विप्रर्षे; ते वित्तं (for ते विप्र); (४) मतो हि मे (for हि मे मतः),

(०४)(१) तत्रा; ततो०(for तद०);ऋषिर् (for अत्रिर्); (२) महातपाः; (अ)भिसत्कृतः, प्रतिसङ्गृह्यमात्मनः; (३) प्रत्युज्जगाम; प्रीत्या जगाम; (४) महामनाः; महायशाः,

(०५)(१) आदाय, प्रीतिः; (२) प्रियतात्मवान्; प्रियमाप्तवान्; (३) ततः(forतपः), समनु०(for समभि०); (४) (अ)भ्य (for (अ)न्व०),

## 03- 06- 158 Adhyaya

# १५८. अष्टपञ्चाशदधिकशततमोऽध्यायः

१५८. मार्कण्डेयेन युधिष्ठिरादीन् प्रति दानाग्निहोत्रमाक्षादिनिरूपकतार्क्ष्यसरस्वतीसंवादानुवादः ॥

**मार्कण्डेयः**

अत्रैव च सरस्वत्या गीतं परपुरञ्जय।**
पृष्टया मुनिना वीर शृणु तार्क्ष्येण धीमता ॥ १ ॥(०१)

**तार्क्ष्यः**

किं नु श्रेयःपुरुषस्येह भद्रे कथं
कुर्वन्न च्यवते स्वधर्मात्।**
आचक्ष्व मे चारुसर्वाङ्गि कुर्यां
त्वया शिष्टो न च्यवेयं स्वधर्मात् ॥ २ ॥ (०२)

कथं वाग्निं जुहुयां पूजये वा कस्मिन्काले केन धर्मो न नश्येत्।
एतत्सर्वं सुभगे प्रब्रवीहि यथा लोकान्विरजाः सञ्चरेयम् ॥ ३ ॥(०३)

**मार्कण्डेयः**

(०१)(१)तु (for च); (२) नीतं (for गीतं); (३) जुष्टया; पृष्टं यन्; पृष्टवान्, तेन; धीर; राजन् (for वीर); पृष्टया मुनिवाक्यं हि; (४) तदा; यत्तु (for शृणु),

(०२)(१) वै; तु (for नु);श्रेष्ठं (for श्रेयः);देवि; लोके; शोभने (for भद्रे); (२) पूर्वं (for कुर्वन्), (३) कुर्यात् (for सर्वं); (४) (अ)नुः,

(०३)(१) वाग्निं; वह्निं; चाग्निर्,जुहुयात, पूजयेयं; पूज(र) येद्वा; (२) यस्मिन् लोके (for काले); धर्मेण (for धर्मो न); (३) कृत्स्नं; क्षिप्रं (for सर्वं); (४) विमले; विमलान्; विरजान् (जा);सम्प्रपश्ये (श्येत्; धे) (for सञ्चरेयम्),

एवं पृष्टा प्रीतियुक्तेन तेन शुश्रूषुमीक्ष्योत्तमबुद्धियुक्तम्।**
ताक्ष्यं विप्रं धर्मयुक्तं हितं च सरस्वती वाक्यमिदं बभाषे ॥ ४ ॥[०१]

### सरस्वती

यो ब्रह्म जानाति यथाप्रदेशं स्वाध्यायनित्यः शुचिरप्रमत्तः ।
स वै पारं देवलोकस्य गन्ता सहामरैः प्राप्नुयात्प्रीतियोगम् ॥ ५ ॥[०२]

तत्र स्म रम्या विपुला विशोकाः
सुपुष्पिताः पुष्करिण्यः सुपुण्याः ।
अकर्दमा मीनवत्यः सुतीर्था
हिरण्मयैरावृताः पुण्डरीकैः ॥ ६ ॥[०३][०४]
महीयमानाः पृथगप्सरोभिः ।
सुपुण्यगन्धाभिरलङ्कृताभि
र्हिरण्यवर्णाभिरतीव हृष्टाः ॥ ७ ॥[०५]

परं लोकं गोप्रदास्त्वाप्नुवन्ति दत्त्वा सुवर्णं(नड्वाहं) सूर्यलोकं व्रजन्ति।
वासो दत्त्वा चान्द्रमसं तु लोकं दत्त्वा हिरण्यममरत्वमेति ॥ ८ ॥[०६]

---

(०१) (२) शुश्रूषुणानुत्तमबुद्धि; शुश्रूषुणा चोत्तमबुद्धि० युक्ता (क्ता; क्त); (३) ऋषिं; त्व्रषिं (for विप्रं);धर्मयुक्तां हितां; (४) वाचमिमां (for वाक्यमिदं),

(०२)(१) यथा प्रदेशे; यथानिदेशं; यथोपदेशं; (२) स्वाध्या (स्वन्या)ययुक्तः; यत्तः; (३) पारं (पारे; मानं); परं (for पुरो);देवा (वेद)लोकस्य (परलोकस्य); वेदपुरस्य; (४) प्रीतियोगात,

(०३)तासां तीरेष्वासते पुण्यभाजो

(०४) (१) (अ)स्य (for स्म);विमला (for विपुला); (२) सुरम्याः; च पुण्याः; सुपुष्पाः,

(०५)(१) तीर्थेष्वासते, पुण्यशीला; पुण्यभाजो; (२) प्रगीयमानः(नाः); महीयमानाः ; (४) क घ-ष्टाः, सुवर्णवर्णाभिर्; ०वल्लीभिर्; ०शृङ्गाभिर्; ०गन्धाभिर्, हृष्टाः(for हृष्टः),

(०६)(१) चामुवन्ति; (२) गत्वा (for दत्त्वा);(अ)नडुहं; सुवर्णँ; स्वर्णँ, स्वर्ग० (for सूर्य); प्रयान्ति (for व्रजन्ति); (३) चन्द्रमसं; चान्द्रमसं,च; तु (for स);वासो दत्वा चन्द्रमश्चन्द्रलोकं; वासो दत्वा स चन्द्रमसः सलोकतां; (४) अमर (त्वमर०; च सुर)त्वम् (for अमृतत्वम्), व्रजन्ति (for एति),

धेनुं दत्त्वा सुप्रभां सुप्रदोहां कल्याणवत्सामपलायिनीं च ।
यावन्ति रोमाणि भवन्ति तस्यास्तावद्वर्षाण्यासते देवलोके।। ९ ।।(०१)

अनड्वाहं सुव्रतं यो ददाति हलस्य वोढारमनन्तवीर्यम्।**
धुरन्धरं बलवन्तं युवानं प्राप्नोति लोकान्दश धेनुदस्य।। १० ।।(०२)

*अधिकपाठः ९१४*

ददाति यो वै कपिलां सचैलां कांस्योपदोहां द्रविणैरुत्तरीयैः ।
तैस्तैर्गुणैः कामदुहाथ भूत्वा नरं प्रदातारमुपैति सा गौः ।। ।।
यावन्ति रोमाणि भवन्ति धेन्वास्तावत्फलं भवति गोप्रदाने।
पुत्रांश्च पौत्रांश्च कुलं च सर्वमासप्तमं तारयते परत्र।। ।।
सदक्षिणां काञ्चनचारुशृङ्गीं कांस्योपदोहां द्रविणैरुत्तरीयैः ।**
धेनुं तिलानां ददतो द्विजाय लोका वसूनां सुलभा भवन्ति।। ।।
स्वकर्मभिर्दानवसन्निरुद्धे तीव्रान्धकारे नरके सम्पतन्तम्।**
महार्णवे नौरिव वातयुक्ता दानं गवां तारयते परत्र।। १३ ।।
यो ब्राह्मदेयां तु ददाति कन्यां भूमिप्रदानं च करोति विप्रे।**
ददाति दानं विधिना च यश्च स लोकमाप्नोति पुरन्दरस्य। ।। (03)

यः सप्त वर्षाणि जुहोति तार्क्ष्य हव्यं त्वग्नौ नियतः साधुशीलः ।
सप्तावरान्सप्त पूर्वान्पुनाति पितामहानात्मना कर्मभिः स्वैः ।। ११ ।।(०४)

---

(०१)(१) सुप्रभां; सुव्रतः कांस्यदोहां; सुप्रदोहां; स्वादु स्वादु; साधुदेहं, धेनुं दत्वा सुप्रदोहां सुशृगीं; (२) अपलायनीं; (४) तावन्ति (for तावद्);वर्षान् (for वर्षाणि);(आ)सते देवा (स्वर्ग)लोक,

(०२) (१) सुव्रतो; सुभृतो; (४) लोकं (for लोकान्),

(०३) (यः वै;द्रविणैरुत्तरीयैः,कामदुघाथ,भवति (for लभते);०गौर० (for चारुं) ,द्रविणैरुत्तरीयैः, मानवसंनिब (रु)द्धं;स्वकर्मनिर्माणवशान्नि०रुद्धं,सम्पतन्तं (for पतन्तं);ब्राह्मदेयां;विधिवत् (for विधिना);गवां (for च यश्र्);(स योगमायाति पुरन्दरस्य,)

(०४)(१) सुहव्यं (for हव्यं);चाग्नौ; अग्नौ; तदग्नौ; त्वाग्नौ; तदाग्नौ,नियतः (for सुव्रतः); पुण्यशीलः; (३) सप्तापरान्; सप्तावारान्; (४) आत्मभिः; आत्मना,

### तार्क्ष्यः

किमग्निहोत्रस्य व्रतं पुराणमाचक्ष्व मे पृच्छतश्चानुरूपे।**
त्वयानुशिष्टोऽहमिहाद्य विद्यां यदग्निहोत्रस्य व्रतं पुराणम् ।। १२ ।।(०१)

### सरस्वती

न चाशुचिर्नाप्यनिर्णिक्तपाणिर्नाब्रह्मविज्जुहुयान्नाविपश्चित्।
बुभुत्सवः शुचिकामा हि देवा नाश्रद्दधानाद्धि हविर्जुषन्ति।। १३ ।।(०२)

नाश्रोत्रियं देवहव्ये नियुञ्ज्यान्मोघं पुरा सिञ्चति तादृशो हि।
अपूर्वमश्रोत्रियमाह तार्क्ष्य न वै तादृग्जुहुयादग्निहोत्रम् ।। १४ ।।(03)

कृशाश्च ये जुह्वति श्रद्दधानाः सत्यव्रता हुतशिष्टाशिनश्च ।
गवां लोकं प्राप्य ते पुण्यगन्धं पश्यन्ति देवं परमं चापि सत्यम् ।।१५ ।।(०४)

### तार्क्ष्यः

क्षेत्रज्ञभूतां परलोकभावे कर्मोदये बुद्धिमतिप्रविष्टाम्।**
प्रज्ञां च देवीं सुभगे विमृश्य पृच्छामि त्वां का ह्यसि चारुरूपे ।। १६ ।।(०५)

---

(०१)(१) फलं (for व्रतं);पुराणे;किमग्निहोत्रं प्रवृतं पुराणं; (२) चारुशीले; साधुशीले; चानुरूपे; चारुनेत्रे; (४) यदग्निहोत्रं प्रवृतं पुराणं,

(०२) (१) वा (forचा);०निर्निक्त० (०निमित्त) (for ०निर्णिक्त०);न चाशुचिं न व्यतिरिक्तपाणिः; (२) नाविपश्चित् जुहुयात्; (३) बुभुक्षिताः; बुभुत्सवः शुद्धि (for शुचि); (४) धानस्य (for धानाद्धि),

(०३)(१)जुहुयात्; नाश्रोत्रियो;देवहव्यं (०रथे); देवहव्येषु युञ्ज्यान्; (२) क-ख-घ-परा, पुरा (for परा);तादृशं हि; तादृगेव; तादृशोहं; (३) अपूर्वमश्रो; (४) न चैतादृग्,

(०४) (१) कृशाश्च ये; ये ते कृशा; ये वै कृशान् (कृशानुं; कृशा; विप्रा) (for कृशानुं ये);जुह्वते; (३) लोके, यान्ति (for प्राप्य),गन्धाः (for गन्धं); (४) देवं पृच्छामि पश्यन्ति ते तं परमादिदेवं,

(०५)(१) पृच्छामि; क्षेत्रज्ञलोकं; ०भूते; ०भूत; ०भावः; (२) क-घ-निष्टा निविष्टा, धर्मोदये,(for कर्मो); बुद्धिमतिप्रदिष्टां; बुद्धिमभि (०नु) प्रविष्टां; (३) ते वंशप्रज्ञां; दैवीं (तव) च प्रज्ञां; प्राहा देवीं (for प्रज्ञा च दवीं);दैवीं, विमृष्य; बिभर्षि (for विमृश्य);दैवीं च (च) प्रज्ञां सुभगे त्वं बिभर्षि) (ब्रवीषि); (४) त्वा (for त्वां);न्वसि (for ह्यसि),,

### सरस्वती

अग्निहोत्रादहमभ्यागतास्मि विप्रर्षीणां संशयच्छेदनाय।**
त्वत्संयोगादहमेतमब्रुवं भावे स्थिता तथ्यमर्थं यथावत् ॥ १७ ॥(०१)

### तार्क्ष्यः

न हि त्वया सदृशी काचिदस्ति विभ्राजसे ह्यतिमात्रं यथा श्रीः ।
रूपं च ते दिव्यमनन्तकान्ति प्रज्ञां च देवीं सुभगे बिभर्षि॥ १८ ॥(०२)

### सरस्वती

श्रेष्ठानि यानि द्विपदां वरिष्ठ यज्ञेषु विद्वन्नुपपादयन्ति।**
तैरेव चाहं सम्प्रवृद्धा भवामि चाप्यायिता रूपवती च विप्र ॥ १९ ॥ (०३)

यच्चापि द्रव्यमुपयुज्यते ह वानस्पत्यमायसं पार्थिवं वा।**
दिव्येन रूपेण च प्रज्ञया च तेनैव सिद्धिरिति विद्धि विद्वन् ॥ २० ॥(०४)

लक्षालङ्कारः-यच्चापि वाक्यम् इत्यत्र वाक्यं यज्ञे विनियुक्तमन्त्ररूपम्, वानस्पत्यं समिदादिरूपम् , पायसं पयस्सम्बन्धि दधिघृतादिरूपम् , पार्थिवं व्रीहियवादिरूपम् ।

### तार्क्ष्यः

इदं श्रेयः परमं मन्यमाना व्यायच्छन्ते मुनयः सम्प्रतीताः ।

---

(०१) (१) अ(इहा०; ताक्ष्या)ग्निहोत्रादहमागतास्मि; अग्निहोत्रादहमभ्ययाद्गतास्मि; अग्निहोत्रादाहवनीयादभ्याग तास्मि; (२) विप्रर्षीणां (for विप्रर्ष); ०च्छेदनार्थं; (३) एवम्; एतम्; एवैतद् (for एतद्);अब्रवं; (४) भाव०(for भावे);तथ्यमन्नं; तथ्यमर्थ्यं; सत्यमर्थं यथार्कं (for यथावत्),

(०२)(३) अत्यर्थकान्तं; अनन्तकान्तिं; अतीवकान्तं (for अत्यन्त); (४) देवि स्वप्रज्ञां; दैवीं सुप्रज्ञां; देवि सप्रज्ञां; दैवीं प्रज्ञां (for प्रज्ञां च देवीं);दैवीं; देवी (वि); त्वं बिभर्षि (for बिभ०),

(०३)(१) क क-घ-निष्ठा निविष्टा, द्रव्याणि; ज्येष्ठानि; (२) विद्याम् (for विद्वन्); (३) चाहं (for (अ)हं); सम्प्रहृष्टा; सम्प्रवृत्ता; (४) चाप्या (for आप्या),

(०४) (१) पात्रम् (for द्रव्यम्);उपयुज्यति;वा; (इ)ह; भवान्वा (for ह); (२) यो वानस्पत्यम् (for वानस्पत्यम्); आयसं पार्थिवं, पायसं; चायसं; वैणवं; तैजसं (for आयसं);च (for वा); (३) प्रत्ययाच् (for प्रज्ञया); (४) तवैव; तेनैति; तेनैमि (for तेनैव);सिद्धैर्; सिद्धिम्; सिद्धाम्; सिद्धम् विहिता; इह मां (for इति);मां च (for विद्धि),

आचक्ष्व मे तं परमं विशोकं मोक्षं परं यं प्रविशन्ति धीराः [०१]
साङ्ख्या योगा परमं यं विदन्ति परं पुराणं तमहं न वेद्मि ।। २१ ।।[०२]

लक्षालङ्कारः- प्रत्ययात् (न्) श्रद्धरूपविश्वासाच्च व्यायच्छन्ते उपदिशन्ति ।

**सरस्वती**

तं वै परं वेदविदः प्रपन्नाः परं
परेभ्यः प्रथितं पुराणम्।**
स्वाध्यायवन्तो व्रतपुण्ययोगै-
स्तपोधना वीतशोका विमुक्ताः ।। २२ ।।[०३]

लक्षालङ्कारः- तं वै परम् इत्यत्र स्वाध्यायदानव्रतपुण्ययोगैः तं मोक्षं प्रपन्ना भवन्ति ।

तस्याथ मध्ये वेतसः पुण्यगन्धः सहस्रशाखो विपुलो विभाति।
तस्य मूलात्सरितः प्रस्रवन्ति मधूदकप्रस्रवणाः सुपुण्याः ।। २३ ।।[०४]

लक्षालङ्कारः- तस्य मोक्षस्य, वेतसः ज्ञानानन्दमयः नदीकर्दमसम्भूतः तृणगुल्म विशेषः । नादेयी चाम्बुवेतसा इत्यमरः । सरितः सूक्ष्मप्रकृत्यंशमया अनाद्यनन्तकालेऽपि विद्यमाना मुक्तोपभोग्यनद्यः मधूदकप्रस्रवणाः मध्वेव उदकं तस्य प्रस्रवणं यासु ताः ।

शाखां शाखां महानद्यः संयान्ति सिकताशयाः ।**
धानापूपा मांसशाकाः सदा पायसकर्दमाः ।। २४ ।।[०५]

(०१)(२) यच्छन्दतो (for व्याय);सुप्रणीताः; सुप्रतीताः; मन्यमानाः (for सम्प्र); (३) मे तत्; ते तान् (for मे तं); (४) शुभं (for परं);प्रवदन्ति; प्रदिशन्ति,
(०२)(साङ्ख्ये योगं ( गे);साङ्ख्यं योगं, विदन्ति,)
(०३)(१) तद्वै; वेदविदं; (२) परमं (for प्रथितं); (३)स्वाध्यायवन्तो व्रत; (४) गत (for वति),
(०४)(१) मन्ये (for मध्ये);वमन्तः; चेतसः; वेधसः; (२) विपुलो (for विमलो); (३) तस्येह; तस्याथ (for तस्य);प्रच्यवन्ति; (४) मधूदकाः प्रस्रवणा; सुपुण्याः (वमन्यः); पुण्यगन्धाः(for रमण्यः);मधूदकं प्रस्रवण्यः सुरभ्याः,
(०५)(१) शाखाः शाखा; (२) सर्पैति, स यान्ति, सिकता यथा; सिकताः;(तां) समाः; सिकताशयाः (पयसा समाः); सिकतैः समाः (मं); (३) पाना (पथा) पूपा, मांसकूलाः (कामाः),धाराःप्रपा मामशोकाः; धानापूपारगाः

यस्मिन्नग्निमुखाः देवाह सेन्द्राः सहमरुद्गणाः ।
ईजिरे क्रतुभिः श्रेष्ठैस्तत्पदं परमं मुने ।। २५ ।।(०१)

अस्मिन् पर्वणि १५८ अध्याये २५ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि अष्टपञ्चाशदधिकशततमोऽध्यायः ।। १५८ ।।

(मार्कण्डेयसमस्यापर्वणि . अध्यायः)

## 03- 06- 159 Adhyaya

# १५९.एकोनषष्ट्यधिकशततमोऽध्यायः

**मार्कण्डेयेन युधिष्ठिरादीन् प्रति मत्स्यरूपिणो हरेर्वैवस्वतमनोश्च चरितप्रतिपादक-मत्स्योपाख्यानकथनम् ।।**

**वैशम्पायनः**

ततः स पाण्डवो विप्रं मार्कण्डेयमुवाच ह ।**
कथयस्वेति चरितं मनोर्वैवस्वतस्य च ।। १ ।।(०२)

**मार्कण्डेयः**

विवस्वतः सुतो राजन्महर्षिः सुप्रतापवान् ।**
बभूव नरशार्दूल प्रजापतिसमद्युतिः ।। २ ।।(०३)

ओजसा तेजसा लक्ष्म्या तपसा च विशेषतः ।**

---

पुण्याः,
(०१)(१) तस्मिन् (for यस्मिन्); (२) मरुद्गणाः; (३) पुण्यैस्; मुख्यैस् (for श्रेष्ठैस्) ; (४) परं (for पदं);सुखं; मम; पदं (for मुने);तत्परं परमश्नुते।
(०२)/*(१) ततश्च; तत्र स्म (for ततःस); विप्रं (for भूयो); (३) (इ)ति (for (इ)ह); (४) ह; च (for मे),
(०३) (१) राजा (for राजन्); (२) महर्षिः सु (स; च)प्र; (३) मुनिशार्दूलः; राजशार्दूल; नृपशा० (for नरशा०),

अतिचक्राम पितरं मनुः स्वं च पितामहम् ॥ ३ ॥[०१]

ऊर्ध्वबाहुर्विशालायां बदर्यां स नराधिप।**
एकपादस्थितस्तीव्रं चकार सुमहत्तपः ॥ ४ ॥[०२]

अवाक्शिरास्तथा चापि नेत्रैरनिमिषैर्दृढम्।**
सोऽतप्यत तपो घोरं वर्षाणामयुतं तदा ॥ ५ ॥[०३]

तं कदाचित्तपस्यन्तमार्द्रचीरजटाधरम्।
चीरिणीतीरम् आगम्य मत्स्यो वचनमब्रवीत् ॥ ६ ॥[०४]

**मत्स्यः**

भगवन्क्षुद्रमत्स्योऽस्मि बलवद्भ्यो भयं मम।**
मत्स्येभ्यो हि ततो मां त्वं त्रातुमर्हसि सुव्रत ॥ ७ ॥[०५]

दुर्बलं बलवन्तो हि मत्स्या मत्स्यं विशेषतः ।**
आस्वदन्ति सदा वृत्तिर्विहिता नः सनातनी ॥ ८ ॥[०६]

तस्माद्भयौघान्महतो मज्जन्तं मां विशेषतः ।**

---

(०१)(१/२) तेजसा तपसा; (४) सर्व०(स्वं च),तं (for स्वं),

(०२)(२) जनाधिप; नराधिप; (३) पादे (for पाद);पूर्वं (for तीव्रं); (४) चकार (for चचार);स (for सु०),

(०३)(१) अर्वाविराः; अवाक्यार्षिः ०क्शिराः स्थितश्चापि; ततश्चापि; तथा तस्थौ; चापि नेत्रैः; तु तत्रापि (for तथा चापि); (२) दृढैः; अपि (for दृढम्);रुद्धैरुन्नि मिषैर्दहन्; (३) तपं; महा०; ततो(for तपो); (४) तपः(for तदा),

(०४)(३) चीरिणी० (वीरणा०); वीरणी०;तीर्थम् (for ०तीरम्);अध्यास्य; आसाद्य (for आगम्य),

(०५)(१) क्षत्र० (for क्षुद्र);(ऽ)हं (for ऽस्मि); (२) स्थलं (for भयं);महत् (for मम) ; (३) मत्स्थादेभ्यसू (for मत्स्येभ्यो हि); (ऽ)पि (for हि); भयार्तं मां; भयान्मां त्वं; तथा (तो) भीतं; तथा मां त्वं,

(०६)(१) दुर्लभं (for दुर्बलं); (२)मत्स्या मत्स्यं मत्स्यो मत्स्यं; मत्स्यं मत्स्यो; मत्स्यान्मत्स्या; (३) खादयन्ति; आस्वदन्ति; आददन्ति (for भक्षयन्ति),सदा; तथा (for यथा),

त्रातुमर्हसि कर्तास्मि कृते प्रतिकृतं तव ॥ ९ ॥(०१)

**मार्कण्डेयः**

स मत्स्यवचनं श्रुत्वा कृपयाभिपरिप्लुतः ।**
मनुर्वैवस्वतोऽगृह्णात्तं मत्स्यं पाणिना स्वयम् ॥ १० ॥(०२)

उदकान्तमुपानीय मत्स्यं वैवस्वतो मनुः ।**
अरञ्जले प्राक्षिपत्तं चन्द्रांशुसदृशप्रभे(भम्) ॥ ११ ॥(०३)

लक्षालङ्कारः- अरञ्जले प्राक्षिपत् इत्यत्र अरम् अलं जलं यस्मिन् पूर्यते तत् अरञ्जलम् । अरञ्जलः स्यान्मणिकः कर्कर्यालुः इत्यभिधानात् जलपूरणपात्रविशेषः । रञ्जणिगे इत्यपभ्रंशभाषा ।

स तत्र ववृधे राजन्मत्स्यः परमसत्कृतः ।**
पुत्रवत्स्वीकरोत्तस्मै मनुर्भावं विशेषतः ॥ १२ ॥(०४)

अथ कालेन महता स मत्स्यः सुमहानभूत्।**
अलिञ्जरे यथा चैव नासौ समभवत्किल।(०५)
अथ मत्स्यो मनुं दृष्ट्वा पुनरेवाभ्यभाषत ॥ १३ ॥(०६)

**मत्स्यः**

---

(०१) (१) भयाद्धि; भुजौघान्; भयान्मां (for भयौघान्); (२) मज्ज०मानं (for मज्जन्तं मां);मा; च (for मां); (४) वचः (for तव);कृतप्रतिकृतस्तव,
(०२) (१) माकंडेय उ०; मत्स्यस्य वचनं श्रुत्वा; स मत्स्यस्य वचः श्रुत्वा; (४) स्वायम्भुवो (for वैवस्वतो);मत्स्यं तं
(०३)(१) उदकान्तम्;उपादाय; (३) अरञ्जिरे; अलञ्जिरे; अलिञ्जिरे; अरञ्जरे; च; तं (for स); (४) प्रभे,
(०४)(३/४) स्वीकरोत् (for चाकरोत्);तस्मान्; तस्मै (for तस्मिन्); तस्मिन् भावं, अनुभावं (for मनुर्भावं),
(०५)(२) मत्स्यः स संवर्धन्,सः; , तु (for सु०);(३) अरञ्जिरे; अलञ्जर०; अलञ्जिर०; अलिञ्जिरे; अरञ्जरे (अरञ्जरं; अरञ्जर०),यदा; यथा (for जले);नैव (for चैव); (४) नायं (for नासौ);तदा (for किल),
(०६)(३) तु; वा; हि (for ऽद्य); त्वं (for (अ)न्यत्);

भगवन्साधु मेऽद्यान्यत्स्थानं सम्प्रतिपादय || १४ ||(०१)

**मार्कण्डेयः**

उद्धृत्यालिञ्जरात्तस्मात्ततः स भगवान्मनुः ।**
तं मत्स्यमनयद्वापीं महतीं स मनुस्तदा || १५ ||(०२)

तत्र तं प्राक्षिपच्चापि मनुः परपुरञ्जय।**
अथावर्धत मत्स्यः स पुनर्वर्षगणान्बहून् || १६ ||(०३)

द्वियोजनायता वापी विस्तृता चापि योजनम्।
तस्यां नासौ समभवन्मत्स्यो राजीवलोचन || १७ || (०४)

विचेष्टितुं च कौन्तेय मत्स्यो वाप्यां विशाम्पते। (05)
मनुं मत्स्यस्ततो दृष्ट्वा पुनरेवाभ्यभाषत || १८ ||

**मत्स्यः**

नय मां भगवन्साधो समुद्रमहिषीं प्रियाम्।
गङ्गां तत्र निवत्स्यामि यथा वा तात मन्यसे || १९ ||(०६)

**अधिकपाठः ९१६**

निदेशे हि मया तुभ्यं स्थातव्यमनसूयता।

---

(०१)(४) वै (for सं०),
(०२) (१) घ-अलिञ्जरे, अरञ्जिरात्; अलञ्जिरात्; अलिञ्जिरात्; अरञ्जरात्; (२) ऋषिः; मनुः (for मुनिः); (३) आनयद्; (४) तु; तं (for स);ततसू (for मनुसू);स्वयं (for तदा); महतीं वारि संयुतां,
(०३)(१) सत्कृतं (for तत्र तं);चा० (for प्रा); (२) मुनिः (for मनुः),जयः (for जय) ;मत्स्यं मनुजसत्तम,
(०४)(१) त्रि०(for द्वि);यतो वापि; ०यतश्चापि; (२) विस्तृतश्, चायुतत्रयं; च द्वियोजनं ;(३) तस्यां न स्थातुमशकन्; तस्यां न शेषमभवन्;
(०५)(४) लोचनः; (५) विचेष्टितं च(for वा); यदा तोये (for च कौन्तेय); (६) अरिन्दम (for विशां पते ),
(०६)(१) लब्ध्वा (for दृष्ट्); मत्स्य उ०; (३) मा (for मां); (४) प्रभुं; प्रति; प्रियां (for प्रभो); (५/६) यथावत् (for यथा वा);मन्यसे प्रभो (for तात मन्यसे), गङ्गां नात्रापि (त्र वि०);शक्रोमि वस्तुं मतिमतां वर,

वृद्धिर्हि परमा प्राप्ता त्वत्कृते हि मयानघ ।[०१]

एवमुक्तो मनुर्मत्स्यमनयद्भगवान्वशी।**
समुद्रमहिषीं गङ्गां स्वयं प्राक्षिपदेव च ।। २० ।।[०२]

लक्षालङ्कारः- समुद्रमहिषिं गङ्गाम् इत्यत्र समुद्रमहिषी समुद्रपत्नीम् ।

स तत्र ववृधे मत्स्यः किञ्चित्कालमरिन्दम।**
ततः पुनर्मनुं दृष्ट्वा मत्स्यो वचनमब्रवीत् ।। २१ ।।[०३]

**मत्स्यः**

गङ्गायां हि न शक्नोमि बृहत्त्वाच्चेष्टितुं प्रभो।**
समुद्रं नय मामाशु प्रसीद भगवन्निति ।। २२ ।।[०४]

**मार्कण्डेयः**

उद्धृत्य गङ्गासलिलात्ततो मत्स्यं मनुः स्वयम्।**
समुद्रमनयत्पार्थ तत्र चैनमवासृजत् ।। २३ ।।[०५]

सुमहानपि मत्स्यस्तु स मनोर्नयतस्तदा।**
आसीद्यथेष्टहार्यश्च स्पर्शगन्धसुखस्य वै ।। २४ ।।[०६]

लक्षालङ्कारः- आसीद्यथेष्टहार्य इत्यत्र यथेष्टहार्यः सुखेन हर्तुं नेतुं शक्यः ।

यदा समुद्रे प्रक्षिप्तः स मत्स्यो मनुना तदा।**

---

(०१) (त्वन्निदेशे (शान्) मया नित्यं(तात),सूयया (for ०सूयता);तेयं (for ते हि),)

(०२) (३) मुनिर् (for मनुर्,); (२) आनयद्; गमयद् (for अनयद्);गङ्गां नदीं नदीं तां तत्र चैवैनं; (४) अच्युत; तं; एव च (for अच्युतः),

(०३) (२) कश्चित् (for किञ्चित्); (३) मत्स्यो (for पुनर्); (४) पुनरेवाभ्यभाषत,

(०४) (१) न हि; (२) महत्वा (for बृहत्त्वा);विभो; मुने (for प्रभो); (४) मम (for इति),

(०५)(२) तं मत्स्यं च (for ततो मत्स्यं); (३) आनयत, राजन् (for पार्थ),

(०६)(१) तु ((अ)सौ); तं; च (for सन्); (२) मनोः सु०; मनोस्तु; मनोर्वै (for स मनोर्); नयतस् ; मुनिनस् (for मनसस्); (३) यथेष्टमार्यः; मखेषु हार्यः; सुखेष्टहार्यः; यथेव हार्यः; यथेष्टभार्यः (for यथेष्ट०हार्यः);सन्; स; तु (for च) ; (४) सुखस्य; सहश्च (for सुखश्च); सर्व० गर्धः स तत्र वै,

तत एनमिदं वाक्यं स्मयमान इवाब्रवीत् ॥ २५ ॥[०१]

भगवन्हि कृता रक्षा त्वया सर्वा विशेषतः ।**
प्राप्तकालं तु यत्कार्यं त्वया तच्छ्रूयतां मम ॥ २६ ॥[०२]

अचिराद्भगवन्भौममिदं स्थावरजङ्गमम्।**
सर्वमेव महाभाग प्रलयं वै गमिष्यति ॥ २७ ॥[०३]

सम्प्रक्षालनकालोऽयं लोकानां समुपस्थितः ।**
तस्मात्त्वां बोधयाम्यद्य यत्ते हितमनुत्तमम् ॥ २८ ॥[०४]

लक्षालङ्कारः- सम्प्रक्षालनकालोऽयम् इत्यत्र लोकानां पातालादिभूपर्यन्तलोकानां सं सम्यक् प्रक्षालनं जले निमज्जनम् । 'यच्चेङ्गं यच्च नेङ्गनि । तस्य सर्वस्य सम्प्राप्तः कालः परमदारूण' इति वचनात् लोकस्थप्राणिनां नाशोऽस्ति । 'ततो हिमवतः शृङ्गं यत्परं जलादुपरि विद्यमानं इति वचनात् उत्तङ्गहिमवदादिपर्वतशृङ्गात् अधो भाग एव समुद्रजलकल्लोल इति सूचितम् ।

चराणां स्थावराणां च यच्चेङ्गं यच्च नेङ्गति।**
तस्य सर्वस्य सम्प्राप्तः कालः परमदारुणः ॥ २९ ॥[०५]

लक्षालङ्कारः- चराणां स्थावराणाम् इत्यत्र यत् इङ्गम् ' इङ्ग चेष्टायाम्' इति धातोः चेष्टावत् ।

नौश्च कारयितव्या ते दृढा युक्तवटाङ्कुरा।**

---

(०१)(१) प्राक्षिप्तः; प्राप्तः स (for प्रक्षिप्तः); (२) मत्स्यस्तु; समुद्रे (for स मत्स्यो), सह (for तदा); (३) तत्र (for तत);पुनर्; मनुर् (for एनम्); (३) त्वथा०(for इवा),
(०२)(१) हि कृता; कृतैव मे (for कृता हि मे); कृताभिरक्षा भगवन्; (२) मम; सर्व०(for सर्वा); (३) कालेषु (for कालं तु);यथा (for तु यत्);
(०३)(१) लोकम् (for भौमम्); (२) सर्वं; जगत्; इमं (for इदं); (४) च (for वै),
(०४)(१) स (for सं);समुप० नेङ्गति,
(०५)(१) क-ख-घ-त्रासनं - नेङ्गते ।, चराणां; भूतानां; त्रासनं; जङ्गम०'(for त्रसानां);जङ्गमानां स्थावराणां; (२) यश्चैगं; यत्त्वेगं; यच्चेगद्, नेङ्गित (for नेङ्गति),

तत्र सप्तर्षिभिः सार्धमारुहेथा महामुने ।। ३० ।।[०१]

लक्षालङ्कारः- युक्तवटाङ्कुरा इत्यत्र युक्तः वटाङ्कुरः दीर्घरज्ज्वाकारेण स्थिता वटशिफा यस्यां सा ।

बीजानि चैव सर्वाणि यथोक्तानि द्विजैः पुरा।**
तस्यामारोहयेर्नावि सुसङ्गुप्तानि भागशः ।। ३१ ।।[०२]

नौस्थश्च मां प्रतीक्षेथास्ततो मुनिजनप्रिय।**
आगमिष्याम्यहं शृङ्गी विज्ञेयस्तेन तापस ।। ३२ ।।[०३]

एवमेतत्त्वया कार्य आपच्छास्मिन् व्रजाम्यहम्।**
**ता न शक्या महत्यो वै आपस्तर्तुं मया विना।**
नातिशङ्क्यमिदं चापि वचनं मे त्वया विभो ।। ३३ ।।[०४]

लक्षालङ्कारः- आपृच्छास्मिन् व्रजाम्यहम् अस्मिन् उडुपे माम् आपृच्छ तत्वानि विचारय ।

*अधिकपाठः [०५]

एवं करिष्य इति तं स मत्स्यं प्रत्यभाषत।**
जग्मतुश्च यथाकाममनुज्ञाप्य परस्परम् ।। ३४ ।।[०६]

---

(०१)(२) क-वाटिका; ख-घ-कवाटिका, दृढ; यथा (for दृढा);मुक्त० युक्ता; रज्जु० (for युक्त०);वटारका; कवाटिका; पटाकरा (for ०वटाकरा); (४) आरोहेथा; आरुहेस्त्वं; आरोहाथ (for आरुहेथा),
(०२)(१) बीजानां, कर्माणि (for सर्वाणि); (२) ख-अयं पादोऽनन्तरश्च न स्तः, द्विजैः पुरा (for पुरा मया); (३) आरोपयेर् (for हयेद्); (४) सुगुप्तायां विभागशः (विशेषतः; विभावसुः),
(०३)(१) तस्थुश्च; तत्स्थश्च; तत्रस्थो (for नौस्थश्च); तां; मा (for मां); उपे (for प्रती०); (२) ततो; सदा; तथा (for तदा);०प्रियः०(४) तेन वै मुने; स्वेन तेजसा
(०४)(१) एव (for एतत्); (२) त्वां पृष्ट्वा हि; त्वामापृष्टो (for आपृष्टोऽसि),
(०५)(न च शक्यमिदं वारि; त्वया (for आपस्),) (३) नाभिशङ्क्यम्; नाति(भि)क्रम्यम्; न च (वि०) शङ्क्यम् (for नातिशङ्क्यम्) ,वारि (for चापि); (४) ममान्तिके; महामुने (for ममाभिभो);वचनं मम चान्तिके; त्वया तर्तुं मया विना वचनं मे त्वया विभो,
(०६)(१) करिष्यामि (for करिष्ये);च (for तं); (२) मत्स्यं स; (३) तौ (for च);कालम् (for कामम्),

ततो मनुर्महाराज यथोक्तं मत्स्यकेन ह
बीजान्यादाय सर्वाणि सागरं पुप्लुवे तदा।**
नौकया शुभया वीर महोर्मिणमरिन्दम ॥ ३५ ॥(०१)

चिन्तयामास च मनुस्तं मत्स्यं पृथिवीपते ॥ ३६ ॥(०२)

स च तच्चिन्तितं ज्ञात्वा मत्स्यः परपुरञ्जय।**
शृङ्गी तत्राजगामाशु तदा भरतसत्तम ॥ ३७ ॥(०३)

तं दृष्ट्वा मनुजव्याघ्र मनुर्मत्स्यं जलार्णवे।**
शृङ्गिणं तं यथोक्तेन रूपेणाद्रिमिवोच्छ्रितम् ॥ ३८ ॥(०४)

वटारकमयं पाशमथ मत्स्यस्य मूर्धनि।**
मनुर्मनुजशार्दूल तस्मिन्शृङ्गे न्यवेशयत् ॥ ३९ ॥(०५)

संयतस्तेन पाशेन मत्स्यः परपुरञ्जय।**
वेगेन महता नावं प्राकर्षल्लवणाम्भसि ॥ ४० ॥(०६)

स च तांस्तारयन्नावा समुद्रं मनुजेश्वर ।

---

(०१)(२) हि (for ह); (४) सागरं पुप्लुवे, समुद्रं (for सागर); (५) नौकया; नावाया शु; थ (for नावा तु);प्रभया (for शु०);धीरो; भावी (for वीर); (६) दमं (for दम),
(०२)(१) स (for च); मुनिस् (for मनुस्);
(०३)(३) तु (for च);तं (for तच्); (४) जयः; (५) तदा०; तथा० (for तत्रा); सुग्रीवस्तं जगामाशु; (६) तथा (for तदा),
(०४)(१) मनुजेन्द्रेन्द्रो; मनुजव्याघ्र (मनुरव्यग्रो); जेन्द्रेण; जेन्द्रेथ; (२) स तु मत्स्यं; मत्स्यं मनुर्, महार्णवे; जलाशये; (३) च; तु (for तं);तथोक्तेन; (४) चयोच्छ्रितं ; ०मिवोत्थितं; मिवोन्नतं,
(०५) (१) वटाकार०; वटारक०; पटाकार०; पटाकर०,पाशैर् (for पाशम्); (२) अपात्स्यन् (अपश्यन्) मत्स्यमूर्धनि; (४) तस्य (for तस्मिन्);देशे (for शृङ्गे); न्यवेशयेत् ; दयत्,
(०६)(१) सङ्गत; सा (सं) सित०; संसक्तः (for संयत);स शिरस्थेन पाशेन; (२) ०जयः; (३) योगेन (for वे०),

नृत्यमानमिवोर्मीभिर्गर्जमानमिवाम्भसा || ४१ ||(०१)

क्षोभ्यमाणा महावातैः सा नौस्तस्मिन्महोदधौ।**
घूर्णते चपलेव स्त्री मत्ता परपुरञ्जय || ४२ ||(०२)

नैव भूमिर्न च दिशः प्रदिशो वा चकाशिरे।**
सर्वमाम्भसमेवासीत्खं द्यौश्च नरपुङ्गव || ४३ ||(०३)

एवम्भूते तदा लोके सङ्कुले भरतर्षभ।**
अदृश्यन्तर्षयः सप्त मनुर्मत्स्यस्तथैव च || ४४ ||(०४)

एवं बहून्वर्षगणांस्तां नावं सोऽथ मत्स्यकः ।**
चकर्ष तन्द्रितो राजंस्तस्मिन्सलिलसञ्चये || ४५ ||(०५)

लक्षालङ्कारः- चकर्ष तन्द्रित इत्यत्र तन्द्रितः नौकाधीनः सन् ।

ततो हिमवतः शृङ्गं यत्परं भरतर्षभ।**
तत्राकर्षत्ततो नावं स मत्स्यः कुरुनन्दन।(०६)
अथाब्रवीत्तदा मत्स्यस्तानृषीन्प्रहसन्शनैः || ४६ ||

मत्स्यः-

---

(०१)(१) स च तान् (स तया) तारयन्नावा (यामास); (२) ०श्वरं; ०श्वरः; (३) गर्ज० (for नृत्य);(ऊ) र्म्यौ वै; (उ)चैश्च (for ऊर्मीभिर्); (४) चलमान०; ०वल्गमान; तर्जयान०, गच्छन्नि (ते) व तदाम्भसि,
(०२)(१) ०माणं (for माणा); (३) घूर्णितैशू; जुघूर्ण (for घूर्णते),
(०३)(१) न वै (for नैव); (२) च (for वा); (३) सर्वदा (for सर्वम्);अम्भसम्; सलिलम् (for आम्भसम्);सर्वमम्भोमयं चासीत्; (४) नद्यश्च (for खं द्यौश्च),
(०४)(१) काले (for लोके); (२) ले नरपुङ्गव; (३) अदृश्यन्सप्त ऋषयो; अदृश्यन्नषयः सप्त; अदृश्यतर्षयः सप्त; सप्तर्षयो मनुर्मत्स्थो; (४) (ऽ)प्यदृश्यन्त (for मनुर्मत्सः);सदैव; स चैव; तथैव (for सहैव); हि; च (for ह),
(०५) (२) नावं तां, स स्म; स तु; स च; स्म स; सोपि; सोस्य (for सोऽथ),
(०६)(१) हिमवते श्रुङ्गे; (२) भरतर्षभ; (३) र्षत तां, र्षतदा (for र्षन्ततो);ताम्रं; नावि (for नावं); (४) मत्स्यकः (for स मत्स्यः);कुति०(for कुरु);मत्स्यः कौरवा (कौन्तेय)०नन्दन,

अस्मिन्हिमवतः शृङ्गे नावं बध्नीत मा चिरम् ॥ ४७ ॥(०१)

**मार्कण्डेयः**

सा बद्धा तत्र तैस्तूर्णमृषिभिर्भरतर्षभ।**
नौर्मत्स्यस्य वचः श्रुत्वा शृङ्गे हिमवतस्तदा ॥ ४८ ॥(०२)

तच्च नौबन्धनं नाम शृङ्गं हिमवतः परम्।**
ख्यातमद्यापि कौन्तेय तद्विद्धि भरतर्षभ।(०३)
अथाब्रवीदनिमिषस्तानृषीन्संहितस्तदा ॥ ४९ ॥(०४)

**मत्स्यः**

अहं प्रजापतिर्ब्रह्मा मत्परं नाधिगम्यते।**
मत्स्यरूपेण यूयं च मयास्मान्मोक्षिता भयात् ॥ ५० ॥

(05)

मनुना च प्रजाः सर्वाः सदेवासुरमानुषाः ।**
स्रष्टव्याः सर्वलोकाश्च यच्चेङ्गं यच्च नेङ्गति ॥ ५१ ॥(०६)

तपसा चापि तीव्रेण प्रतिभास्य भविष्यति।**
मत्प्रसादात्प्रजासर्गे न च मोहं गमिष्यति ॥ ५२ ॥(०७)

---

(०१)(१) अथा; तदा० (for ततो०);महा०(for तदा); (२) इव (for शनैः); (३) तस्मिन् (for अस्मिन्),

(०२)(१) वै तूर्णम्; तस्थौ नाव (for तैस्तूर्णम्,); (३) तैर्; ते (for नौर्); मनुर्मत्स्य०(for नौर्मत्स्यस्य);मत्स्यवचनं (for मत्स्यस्य वचः),

(०३)(१) तेद्य (for तच्च); (४) तद्धि तं (for तद्विद्धि);मनुजर्षभ; मनुजाधिप; मनुजेश्वर; पुरुषर्षभ,

(०४)(१) तथा (for अथा०);संहितः (for संहितान्);तथा (for तदा);

(०५)(४) तत्परं; नापरं;(for मत्परं);नाव०; नाभि०(for नाधि०);गच्छति (for गम्यते); (५) वै (for च); (६) मोचिता (for मोक्षिता),

(०६)(२) मानुषाः (for ०मानवाः); (४) नेङ्गते०; नेङ्गितं (for नेङ्गति),

(०७)(१) (अ)पि (for (अ)ति०);(२) प्रतिभात्र; ०भास्यं; भाष्य; ०भास्यो; भावं; शक्तिश्चास्य; (३) सर्वा

**मार्कण्डेयः**

**इत्युक्त्वा वचनं मत्स्यः क्षणेनादर्शनं गतः ॥ ५३ ॥**(०१)

**स्रष्टुकामः प्रजाश्चापि मनुर्वैवस्वतः स्वयम् ।**
**प्रमूढोऽभूत्प्रजासर्गे तपस्तेपे महत्ततः ॥ ५४ ॥**(02)

**तपसा महता युक्तः सोऽथ स्रष्टुं प्रचक्रमे।****
**सर्वाः प्रजा मनुः साक्षाद्यथावद्भरतर्षभ ॥ ५५ ॥**(०३)

**वैशम्पायनः**

**इत्येतन्मात्स्यकं नाम पुराणं परिकीर्तितम्।****
**आख्यानमिदमाख्यातं सर्वपापहरं मया ॥ ५६ ॥**(०४)

**य इदं शृणुयान्नित्यं मनोश्चरितमादितः ।**
**स सुखी सर्वपूर्णार्थः सर्वलोकमियान्नरः ॥ ५७ ॥**(०५)

अस्मिन् पर्वणि १५९अध्याये ५७श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि मत्स्योपाख्याने**

**एकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥**

**(मार्कण्डेयसमस्यापर्वणि अध्यायः)**

## 03- 06- 160 Adhyaya

---

(for सर्गे); (४) न त्वं (for न च); गमिष्यसि,
(०१)(२) क्रमेण (क्षणेन); (३) चैव (for चापि);
(०२)(२) स्वायम्भुवः(for वैवं); (३) स, भूयो वै; संमूढोभूत्; (४) ततस् त्री तपस्);तदा; तपः(for तत),महातपाः (for महत्ततः),
(०३)(१) तपसा महता; (२) ततः (for सोऽथ); सोऽथ स्रष्टुं,
(०४)(१) एतत्ते; इत्येवं (for इत्येतन्); मत्स्यकं (for मा०); (२) पुराण०; पुराणे; प्रधाने (पुराणं); (३) आख्यानं आख्यातं,
(०५)(१) इदं यः य इमं; (२) अद्दत; आत्मन (for आदित); (३) सुखं (for सुखी) ,सर्वपूर्णार्थ(यु); पूर्णकामा (सर्वा)र्थः, (४) सर्व (for स्वर्ग);व्रजेन् (for इयान्); सर्वान्कामानवाप्नुयात्,

# १६०. षष्ट्यधिकशततमोऽध्यायः

१६०. मार्कण्डेयेन युधिष्ठिरादीन् प्रति कृतादियुगचतुष्टधर्मकथनपूर्वकं प्रलयवर्णनम् युगचतुष्टयस्य वर्षसङ्ख्यानं कलिप्रभावप्रकथनं च ।।१।। तथा प्रलयजले परिप्लवता मार्कण्डेयेन वटशाखाशायिनः शिशुरूपस्य हरेरुदरान्तः प्रविश्य ब्रह्मण्डदर्शनपूर्वकं पुनर्बहिर्निर्गमनम् ।।२।।

**वैशम्पायनः**

**ततः स पुनरेवाथ मार्कण्डेय यशस्विनम्।****
**पप्रच्छ विनयोपेतो धर्मराजो युधिष्ठिरः ।। १ ।।(०१)**

**युधिष्ठिरः**

**नैके युगसहस्रान्तास्त्वया दृष्वा महामुने।**
**न चापीह समः कश्चिदायुष्मान्दृश्यते तव ।। २ ।।(०२)**

लक्षालङ्कारः- नैकं युगसहस्रान्ताः इत्यत्र एकं न भवति यथा नैकं बहव इत्यर्थः ।

**वर्जयित्वा महात्मानं ब्रह्माणं परमेष्ठिनम्।** (03)
**न तेऽस्ति सदृशः कश्चिदायुषा ब्रह्मवित्तम ।। ३ ।।(०४)**

**अनन्तरिक्षे लोकेऽस्मिन्देवदानववर्जिते।****
**त्वमेव प्रलये विप्र ब्रह्माणमुपतिष्ठसे ।। ४ ।।(०५)**

**प्रलये चापि निर्वृत्ते प्रबुद्धे च पितामहे।****

---

(०१)(१) (आ)ह (for (अ)थ); (२) तप० (for यश०),

(०२)(१) एते; नैते (for नैके); (२) ०मते (for मुने); (४) तव दृश्यते; विद्यते तव आयुष्मान्दृश्यते (०न्विद्यते) तव;,

(०३)आयुष्मांस्तात (०स्तव) विद्यते,

(०४)(२) ब्रह्मसत्तम; ब्राह्मणोत्तम (for ब्रह्मवित्तम),

(०५)(१) अन्तारिक्षेथ (क्षे च) लोके; (३) नित्यं (for विप्र); (४) तिष्ठसे; तिष्ठति,

त्वमेकः सृज्यमानानि भूतानीह प्रपश्यसि ॥ ५ ॥ (01)

चतुर्विधानि विप्रर्षे यथावत्परमेष्ठिना।**
वायुभूता दिशः कृत्वा विक्षिप्यापस्ततस्ततः ॥ ६ ॥(०२)

त्वया लोकगुरुः साक्षात्सर्वलोकपितामहः ।**
आराधितो द्विजश्रेष्ठ तत्परेण समाधिना ॥ ७ ॥

*अधिकपाठः ० कपाठे९१९*

स्वप्रमाणमथो विप्र त्वया कृतमनेकशः ।

घोरेणाविश्य तपसा वेधसो निर्जितास्त्वया।

नारायणाङ्कप्रख्यस्त्वं साम्परायेऽतिपठ्यसे।

भगवाननेकशः कृत्वा त्वया विष्णोश्च विश्वकृत्।

कर्णिकोद्धरणं दिव्यं ब्रह्मणः कामरूपिणः ।

रत्नालङ्कारयोगाभ्यां दृग्भ्यां दृष्टस्त्वया पुरा।

(इदं (for अथो); ०सोन्तर्हितासू (for सो निर्जितासू);०णांश० (for ०णाङ्क०),स्म पठ्यसे; (ऽ)तिपठ्यते;विष्णुश्च, कार्णिकोद्धारिणां; कटकोद्धरणं, ०योग्याभ्यां)

तस्मात्तवान्तको मृत्युर्जरा वा देहनाशिनी।**
न त्वां विशति विप्रर्षे प्रसादात्परमेष्ठिनः ॥ ८ ॥(०३)

यदा नैव रविर्नाग्निर्न वायुर्न च चन्द्रमाः ।**
नैवान्तरिक्षं नैवोर्वी शेषं भवति किञ्चन ॥ ९ ॥(०४)

---

(०१)(१) पि चापि वा वायुभूता; महति (for निर्वृत्ते);निवृत्ते प्रलये चापि; (२) प्रयुद्धे ; प्रवृद्धे; (३) एकः (for एव);सर्वभूतानि (for सृज्य०); (४) प्रपश्यति, सृज्यमानानि पश्यसि,

(०२)वा वायुभूता; (२) प्रसादात्परमेष्ठिनः; (३) भूतां दिशं, सर्वा (for कृत्वा); (४) निक्षिप्य, ( अ)थ (for (आ)पः),

(०३)(१) देहान्तको; सर्वान्तगो; तवान्तको, विष्णुर् (for मृत्युर्); (२) देहनाशनी; ०घातिनी; (३) त्वां (for त्वा); ब्रह्मर्षे (for विप्रर्षे),

(०४)(१) यथा (for यदा); वै न (for नैव); (३) न वान्तरिक्षं,

तस्मिन्नेकार्णवे लोके नष्टे स्थावरजङ्गमे।**
नष्टे देवासुरगणे समुत्सन्नमहोरगे ॥ १० ॥(०१)

शयानममितात्मानं पद्मोत्पलनिकेतनम्।**
त्वमेकः सर्वभूतेशं ब्रह्माणमुपतिष्ठसि ॥ ११ ॥(०२)

एतत्प्रत्यक्षतः सर्वं पूर्वं वृत्तं द्विजोत्तम।**
तस्मादिच्छाम्यहं श्रोतुं सर्वहेत्वात्मिकां कथाम् ॥ १२ ॥(०३)

अनुभूतं हि बहुशस्त्वयैकेन द्विजोत्तम।**
न तेऽस्त्यविदितं किञ्चित्सर्वलोकेषु नित्यदा ॥ १३ ॥(०४)

**मार्कण्डेयः**

**हन्त ते वर्त(र्ण)यिष्यामि नमस्कृत्वा स्वयम्भुवे।****
पुरुषाय पुराणाय शाश्वतायाव्ययाय च ॥ १४ ॥ (०५)

*अधिकपाठः अव्यक्ताय सुसूक्ष्माय निर्गुणाय गुणात्मने।*(06)

स एष पुरुषव्याघ्र पीतवासा जनार्दनः ।**
एष कर्ता विकर्ता च भूतात्मा भूतकृत्प्रभुः ॥ १५ ॥(०७)

---

(०१)(१) तस्माद् (for तस्मिन्);घोरे; काले (for लोके); (२) नष्ट; (३) नष्ट०;(४) समुत्पन्न०; समुत्सन्ने,
(०२)(१) संशिता; संश्रितां; अपि चा० (for अमिता); (२) पद्मोत्पल०(for पद्मे पद्म०) ;निभेक्षणं ०(for निकेतनम्); (३) एव (for एकः), (४) तिष्ठति; तिष्ठसे,
(०३)(१) एतां; एवं; यत्तत् (for एतत्);प्रत्यक्षतां; प्रत्यक्षितं,सर्वां (पूर्वं); दृष्टं(for सर्वं); (२) पूर्ववृत्ता; पूर्वं वृत्तं, (३) ०म्यहं (for महे); (४) सर्वां (for सर्व०); हेत्वात्मिकीं (एवात्मि०; ०हेत्वात्म०); क्रियां (for कथाम्),
(०४) (१) अन्तर्भूतं (for अनुभूतं);सु०(for हि); (२) त्वयैतद् (व) द्विजसत्तम,
(०५)(१) वर्ता (०र्ण) यिष्यामि (सम्प्रवक्ष्यामि); (२) नमस्कृत्य,
(०६) (अध्यक्षाय (for अव्यक्ताय); महा० (for गुणा ),)
(०७)(१) स एष; स एव; य एव (for य एष); पुरुषव्याघ्र (for पृथु०); (४) सर्वभावेन; भूतभावन०,भूतात्मा भूतकृत्प्रभुः,

अचिन्त्यं महदाश्चर्यं पवित्रमिति चोच्यते।**
अनादिनिधनं भूतं विश्वमव्ययमक्षयम् ॥ १६ ॥[०१]

एष कर्ता न क्रियते कारणं चापि पौरुषे।**
यद्येष पुरुषो वेद वेदा अपि न तं विदुः ॥ १७ ॥[०२]

सर्वमाश्चर्यमेवैतन्निर्वृत्तं राजसत्तम।**
आदितो मनुजव्याघ्र कृत्स्नस्य जगतः क्षये ॥ १८ ॥[०३]

चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगम्।**
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥ १९ ॥[०४]

त्रीणि वर्षसहस्राणि त्रेतायुगमिहोच्यते।**
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च ततः परम् ॥ २० ॥[०५]

लक्षालङ्कारः- तस्य तावच्छती सन्ध्या सन्ध्यांशश्च ततः परम् इत्यत्र तावच्छती चतुःशती सन्ध्या सन्ध्याया मध्यमभागः ततः सन्ध्यातः परम् उपरि पूर्वं च सन्ध्यांशोऽपि तावच्छती पूर्वं द्विशती पश्चात् द्विशती इत्यर्थः ।

त्रीणि वर्षसहस्राणि त्रेतायुगमिहोच्यते।

लक्षालङ्कारः- श्रीणी वर्षसहस्राणि त्रेतायुगमिहोच्यते ॥

---

(०१) (२) इह; इति (for अपि);चोच्यते (विद्यते)(for चोत्तमम्); (३) भूत्वा (for भूतं); (४) अक्षयम् अव्ययम्, रक्षकम्; अक्षरम् (for अक्षयम्),

(०२)(२) कारणादपि; शरणं चापि (for कारणं चापि);पौरुषम्; (३) य एष; यद्येष (यत्क्षेत्रं); ये ह्येष; यदेवं; यो ह्येतं; को ह्येनं; य एनं (for यो ह्येनं);पुरुषो (for पुरुषं);वेद (for वेत्ति); (४) वेदा (for देवा);तद् (for तं),

(०३) (१) ०भूतं हि; मेतस्मिन्; ०मेतद्धि; मेतस्मान् (for मेवैतन्); (२) निवृत्तं; निर्वृतं,

(०४)(२) वर्षाणि (for णां); (३) अस्य; कृते; तच्च (for तस्य);चतुःशती; तावद्धती (for तावच्छती);सङ्ख्या (for सन्ध्या); (४) तथापरः; तथाविधः; ततः परः,

(०५)(२) अथो० (for इहो);त्रेता स्यात्परिमाणतः; (३) तस्यासू; तच्च (for तस्य); सख्या (for सन्ध्या); (४) ततः परः; तथापरः; तथाविधः,

तथा वर्षसहस्रे द्वे द्वापरं परिमाणतः ।**
तस्यापि द्विशती सन्ध्या सन्ध्यांश्च तथाविधः ।। २१ ।।[०१]

लक्षालङ्कारः- तस्यापि द्विशति इत्यत्र पूर्वमेकशतं पश्चादेकशतं सन्ध्यांश इत्यर्थः ।

सहस्रमेकं वर्षाणां ततः कलियुगं स्मृतम्
तस्य वर्षशतं सन्धिः सन्ध्यांशश्च ततः परम्।**
सन्धिसन्ध्यांशयोस्तुल्यं प्रमाणमुपधारय ।। २२ ।।[०२]

लक्षालङ्कारः- तस्य वर्षशतम् इत्यत्र पूर्वं पञ्चाशत् पश्चात्पञ्चाशत् सन्ध्यांश इत्यर्थः ।

क्षीणे कलियुगे चैव प्रवर्तेत कृतं युगम् ।। २३ ।।[०३]

एषा द्वादशसाहस्री युगाख्या परिकीर्त्तिता।[०४]
एतत्सहस्रपर्यन्तमहो ब्राह्ममुदाहृतम् ।। २४ ।।[०५]

लक्षालङ्कारः- एतत्साहस्रम् इत्यत्र एतत्सहस्रम् एतेषां चतुर्युगाणां सहस्रम् अहः दिवा ।

विश्वं हि ब्रह्मभवने सर्वतः परिवर्त्तते।**
लोकानां मनुजव्याघ्र प्रलयं तं विदुर्बुधाः ।। २५ ।।[०६]

अल्पावशिष्टे तु तदा युगान्ते भरतर्षभ।**

---

(०१)(१) यस्य; ततो; अथ (for तथा); (३) तत्रा (for तस्या);द्वे (for द्वि०);सङ्ख्या (for सन्ध्या); (४) ततः परः तथापरः; तथाविधः; ततः परे,

(०२)(१) वर्षाणि (for णां);तथा (for ततः); (२) शती (for शतं);सन्धिः (विद्धि) ,(for सन्ध्या); (४) तथापरः; तथा परं; ततः परः; (५) सन्धि०(for सन्ध्या०);(६) अव; चोप (for उप०),

(०३)(२) प्रवर्तेत; प्रावर्तत; प्रवर्तेति; प्रवर्तत, कृतं युगे; पुनःकृतं; कृतं पुनः कृतं प्रवर्तते युगं; ,

(०४)(१) एष; एवं (for एषा); (२) युगसङ्ख्या प्रकीर्तिता,

(०५)(२) अहर्ब्रह्मम्; महद्राह्मम्; अहर्ब्राह्मम्; अहः ब्राह्मम्; अहर्ब्राहयम्; अथो ब्राह्मम्;

(०६)(३) भुवने; दिवसे; सदने (for ० भवने); (४) सर्वतः; सर्वत्र,

सहस्रान्ते नराः सर्वे प्रायशोऽनृतवादिनः ॥ २६ ॥(०१)

लक्षालङ्कारः- सहस्रान्ते कलियुगवर्षसहस्रान्ते ।

यज्ञप्रतिनिधिः पार्थ दानप्रतिनिधिस्तथा।**
व्रतप्रतिनिधिश्चैव तस्मिन्काले प्रवर्तते ॥ २७ ॥(०२)

लक्षालङ्कारः- यज्ञप्रतिनिधिः इत्यत्र यज्ञप्रतिनिधिः अयज्ञः अयज्ञः। एवमुत्तरत्रापि ज्ञातव्यम् ।

ब्राह्मणाः शूद्रकर्माणस्तथा शूद्रा धनार्जकाः ।**
क्षत्रधर्मेण वाप्यत्र वर्तयन्ति गते युगे ॥ २८ ॥(०३)

निवृत्तयज्ञस्वाध्याया दण्डाजिनविवर्जिताः ।**
ब्राह्मणाः सर्वभक्षाश्च भविष्यन्ति कलौ युगे ॥ २९ ॥(०४)

अजपा ब्राह्मणास्तात शूद्रा जपपरायणाः ।**
विपरीते तदा लोके पूर्वरूपं क्षयस्य तत् ॥ ३० ॥(०५)

क्षत्रधर्मेण वाऽप्यत्र वर्तयन्ति युगक्षये।
बहवो म्लेच्छराजानः पृथिव्यां मनुजाधिप ॥ ३१ ॥ (०६)

---

(०१)(१) अल्पावशिष्टं; पुण्यावशिष्टे; अल्पेव, च (for तु); ततो (for तदा),
(०२)(१) यज्ञः(for यज्ञ०);०प्रतिविधिः दानं; तात (for पार्थ); (२) धर्म० (for दान०) ; तदा (for तथा); (३) तत्र; ज्ञान०(for व्रत०),
(०३)(२) धनार्जनाः तथा शूद्रान्नभोजिनः; (३) क्षात्र (for क्षत्र०);चा०(for वा); (४) वर्तन्ते वै (for वर्तयन्ति);कृते गते; युगे युगे; कृते युगे; कलौ युगे; युगक्षये (for गते युगे),
(०४)(२) दण्डोदक; स्थालीपाक; दण्डाजिन; (३)० भक्ष्या; (४) भवन्तीह; भवन्ति हि (for भविष्यन्ति);गते युगे; युगे युगे; युगक्षये (for कलौ युगे),
(०५) (१) चापि; चैव; तत्र (for तात); (२) जप्य०; जाप्य०;(जप०) जीव,नित्यं शूद्रप०; (३) विपरीतं; रीतसू, तथा (for तदा);काले; रूपे; लोकः (for लोके); (४) पूर्वं यद्यस्य तस्य तत्; रूपे क्षये नृप; ० रूपं गमिष्यति,
(०६) (२) भरतर्षभ; मनुजर्षभ;

मृषानुशासिनः पापा मृषावादपरायणाः ।(०१)
आन्ध्राः शकाः पुलिन्दाश्च यवनाश्च नराधिपाः ।। ३२ ।।(02)

काम्बोजा बाह्लिकाः शूरास्तथाऽऽभीरा नरोत्तम।(०३)
युगान्ते मनुजव्याघ्र तथाकाराश्च भारत ।
न तदा ब्राह्मणः कश्चित्स्वधर्ममुपजीवति ।। ३३ ।। (०४)
क्षत्रियाश्चापि वैश्याश्च विकर्मस्था नराधिप ।। ३५ ।।(०५)
अल्पायुषः स्वल्पबलाः स्वल्पवीर्यपराक्रमाः ।। ३४ ।।(०६)
अल्पसाराल्पदेहाश्च तथा सत्याल्पभाषिणः ।(०७)
बहुशून्या जनपदा मृगव्यालावृता दिशः ।। ३५ ।।

युगान्ते समनुप्राप्ते वृथा च ब्रह्मवादिनः ।**
भोवादिनस्तथा शूद्रा ब्राह्मणाश्चार्यवादिनः ।। ३६ ।।(०८)

युगान्ते मनुजव्याघ्र भवन्ति बहुजन्तवः ।
न तथा घ्राणयुक्ताश्च सर्वगन्धा विशाम्पते ।। ३७ ।। (०९)

---

(०१)(३) मृषा० (for मिथ्या०); (४) मिथ्या०; नृपा (for मृषा०),
(०२)(१) अन्ध्राः,सुह्माः(for शकाः); (२) क-ख-स्सिणिकाश्शूद्रास्, ०धिप (for धिपाः);,
(०३)(१) काम्भोजाः,बाह्लिकाः; उन्ध्रकाः; कुणिकाः; सिणिकाः; औदकाः; दौर्णिकाः (for और्णिकाः);शुद्धास्; शूरास् (for शूद्रास्); (२) चीना; भुवि; वीरा; हीना (for (आ)भीरा); नरोत्तमाः; नराधिप,
(०४) (१) दाता (for तदा); (२) सुधर्मम्; स्वधर्मान् (for स्वधर्मम्);अनु (for उप०);
(०५)(३) क्षत्रियाणि (for क्षत्रियाः);चापि; ह्यपि (for अपि); शूद्रा०; शूरा० (for वैश्या०);
(०६)*(1) त्वल्प० (for स्वल्प); (२) स्वल्पतेजाः प०;स्वल्पतेजः प०; स्व(अ) ल्पवीर्यपराक्रमाः(यणाः);,
(०७)(३) अल्पसाराल्पदेहाश्च; साराश्च देहाश्च; (४) अल्पसत्वाल्प०; अल्पसत्याल्प०,
(०८)(१) रत्न०(for बहु०);मूलया (for शून्या); (२) बहु०(for मृग०);र्दिता; ०न्विता (for ०वृता); (३) मनुजव्याघ्र (for समं); (४) ब्रह्मवादिनःचौर्यं; स्वार्थं०; त्वर्थ०; नार्य० (for चार्य०),
(०९)(३)क-ब्रह्मणा युक्तास्सकर्वगाथा, तदा (for तथा);ब्राह्मणा युक्ताः (for घ्राणयुक्ताश्च);तु (for च);

रसाश्च मनुजव्याघ्र न तथा स्वादुयोगिनः ।(०१)

लक्षालङ्कारः- न यथा गन्धयुक्ता इत्यत्र सर्वगन्धाः कस्तूरीकर्पूरादिगन्धाः तथा द्वापरादियुगेष्विव न ।

बहुप्रजा ह्रस्वदेहाः शीलाचारविवर्जिताः ॥ ३८ ॥(०२)(०३)

मुखे भगाः स्त्रियो राजन्भविष्यन्ति युगक्षये।
अट्टशूला जनपदाः शिवशूलाश्चतुष्पथाः ॥ ३९ ॥(०४)

केशशूलाः स्त्रियो राजन्भविष्यन्ति युगक्षये।(०५)

लक्षालङ्कारः- अट्टशूला जनपदा इत्यत्र ' अट्टमन्नमिति प्रोक्तं शूलो विक्रयणं स्मृतम् । केशो भग इति प्रक्तो ब्राह्मणास्तु चतुष्पथा' इति वचनात् अट्टस्य अन्नस्य शूलं विक्रयणं येषां ते अट्टशूलाः चतुष्पथाः ब्राह्मणाः शिवस्य वेदस्य शूलं विक्रयणं येषां ते शिवशूलाः, द्रव्यकट्टलिकां कृत्वा वेदोपदेष्टार इत्यर्थः । स्त्रियः केशस्य भगस्य शूलं विक्रयणं यासां ताः केशशूलाः, पणे दत्ते तद्फोगाय स्वभगदात्र्य इत्यर्थः ।

*अधिकपाठः ० कपाठे९२२*

अट्मन्नमिति प्राहुः शूलं विक्रयमुच्यते ।
वेदः शिवमिति प्रोक्तं ब्राह्मणाश्च चतुष्पथाः ।
केशो भग इति प्रोक्तस्तं विक्रीयैव भुञ्जते ।

अल्पक्षीरास्तथा गावो भविष्यन्ति जनाधिप।

---

(०१)(४) सर्वे; बहु० (for सर्व०);वनस्पतौ (for विशां पते); (६) साधु० (for स्वादु०);बीजं च परिहीयते,

(०२)(३) भगमुख्याः; सुखे रताः (for मुखेभगाः);भोगमोक्षाप्तयो राजन्; मुखक्षीरास्तथा गावो; (४) भवन्तीह (for भवि०); जनाधिप (for युगं०),

(०३)(१) तथा लोकाः; स्वल्पदेहाः (for ह्रस्वदेहाः);

(०४)(१) ०शीला (for ०शूला);,

(०५)(१) शि(श)वशीलां; (२) सर्वा; चैव (for राजन्);प्रमदाः (योषित) केशशूलाश्र (शीलिऽ; शूलिन्यो;शीलिन्यो); (३) कलौ युगे (for युग); भवन्ति युगसङ्क्ये,

अल्पपुष्पफलाश्चापि पादपा बहुवायसाः ।। ४० ।।[०१]

ब्रह्मवध्यानुलिप्तानां तथा मिथ्याभिशंसिनाम्।**
नृपाणां पृथिवीपाल प्रतिगृह्णन्ति वै द्विजाः ।। ४१।।[०२]

लोभमोहपरीताश्च मिथ्याधर्मध्वजावृताः ।**
भिक्षार्थं पृथिवीपाल चश्रूर्यन्ते द्विजा दिशः ।। ४२ ।।[०३]

लक्षालङ्कारः- चश्रूर्यन्ते द्विजा इत्यत्र इतस्ततो गर्हितं अतिशयेन चरन्ति चश्रूर्यन्ते ।

करभारभयात्पुंसो गृहस्थाः परिमोषकाः ।**
मुनिच्छद्माकृतिच्छन्ना वाणिज्यमुपभुञ्जते: ।। ४३ ।।[०४]

लक्षालङ्कारः- करहारभयात् इत्यत्र पुंसः पुमांसः करहारस्य कररूपद्रव्यापहारस्य भयात् गृहस्थाः जानपदप्रच्छन्नाः परिमो(क्ष)षकाः करस्य परिमो(श्र)षकाः ।

मिथ्या च नखरोमाणि धारयन्ति तदा द्विजाः ।
अर्थलोभान्नरव्याघ्र तथा च ब्रह्मचारिणः ।। ४४ ।।[०५]

आश्रमेषु वृथाचाराः पानपा गुरुतल्पगाः ।। ४५ ।।[०६]

---

(०१) (२) भवन्तीह (for भवि०);नराधिप; युगक्षये (for जना०); (३) चैव (for चापि); (४) बहुशाखिनः,

(०२) (१) ०हत्याव०; ०वध्यानु०(०वध्याभि०); ०हत्याभि०; ०वध्योव०; ०बिद्योप०; ०हत्यानु० (for ०वध्याव०); (२) ०भिशासिनां; ०नुशा०(नाशं)सिनां; (३) नृपशार्दूल (for पृथि०); (४) च; ते (for वै),

(०३) (२) ०ध्वजव्रताः; (३) भक्ष्यार्थं; भिक्षार्थे;पृथिवीं सर्वां; पृथिवीपालं; (४) (चरिष्यन्ति);चश्रूर्यन्ते द्विजा दिशः; दिशो दश; द्विजातयः,

(०४)(१) ०हार०(for ०भार);भयाः (for भयात्);पुम्भिः; भीता; पुंसां (for पुंसो); (२) गृहस्थ; गार्हस्थ्य०;परिपोषकाः; ०मोचकाः; ०मोषकैः; ०शोध( ०मोषि)काः; ०मोहकैः; ०पोषकैः; ०मोक्षकाः; (३) मुनिच्छद्मानुसञ्छन्ना; (४) ०जीव्यते; ०सेव्यते; ०जीविनः; ०युज्यते; भुञ्जते; ०सेवते,

(०५)(२) तदा (तथा; सदा) द्विजाः; नरास्तथा; नराः सदा; (३) अल्प० लोभान्; अर्थलाभान्; अन्नलोभान्; (४) मिथ्या च; तथा च; चरन्ति (for वृथा च); ,ब्रह्मवादिनः,

(०६) (१) व्रता०; दुरा० (for वृथा०); (२) मनसा; मानवा; पानगा (for पानपा);

इह लौकिकमीहन्ते मांसशोणितवर्धनम् ।(०१)

लक्षालङ्कारः-इहलौकिकम्इत्यत्रइहलोकिकम्एतल्लोकसम्बन्धि,ऐहिकमात्रफलरूपमित्यर्थः मांसशोणितवर्धनं यथेष्टान्नपानादिना स्वशरीरमांसशोणितवर्धनम् ईहन्ते कुर्वन्तीत्यर्थः ।

पारलौकिककार्येषु प्रमत्ता भृशनास्तिकाः ।। ४६ ।। (०२)

बहुपाषण्डसङ्कीर्णाः परान्नगुणवादिनः ।
आश्रमा मनुजव्याघ्र भविष्यन्ति युगक्षये ।। ४७ ।।(०३)

यथर्तुवर्षी भगवान्न तथा पाकशासनः ।
न चापि सर्वबीजानि सम्यग्रोहन्ति भारत ।। ४८ ।।

अधर्मफलमत्यर्थं तदा भवति चानघ ।(०४)

*अधिकपाठः हिंसाभिरामश्च जनस्तथा सम्पद्यतेऽशुचिः ।

फलं धर्मस्य राजेन्द्र सर्वत्र परिहीयते।
अधर्मफलमत्यर्थं तथा भवति चानघ ।। ४९ ।।(०५)

तदा च पृथिवीपाल यो भवेद्धर्मसंयुतः ।**
अल्पायुः स हि मन्तव्यो न हि धर्मोऽस्ति कश्चन ।। ५० ।।(०६)

भूयिष्ठं कूटमानैश्च पण्यं विक्रीणते जनाः ।**

---

(०१)(३) इह० (for ऐह०);ईहन्ति; कर्मौते; ईयन्ते (for ईहन्ते); (४) ०वर्धनाः,
(०२)(प्रसुप्ता (for प्रमत्ता);भृशमास्थिताः,)
(०३)(१) ०पाषाण्ड०; ०पाषाण; (२) परानुगुण; परान्ना (न्न०)बहु; (४) प्रभवन्ति; भविष्यन्ति (for न भवन्ति);भवन्ति युगसङ्क्ष्ये,
(०४) (१) अकालवर्षी; (२) तदा (for तथा); (३) तथा; चापि (for तदा); (४) समारोहन्ति; सम्प्ररो,
(०५)(सफलं धर्मराजेन्द्र सर्वतः (for सर्वत्र),) (५) इत्यर्थं; अत्यन्तं (for अत्यर्थं); (६) तथा (for तदा); भारत (for चानघ),
(०६)(१) तदा (for तथा); (२) संहितः (for संयुतः); (३) ह; च; तु (for हि),

वणिजश्च नरव्याघ्र बहुमाया भवन्त्युत ।। ५१ ।।(०१)

लक्षालङ्कारः- भूयिष्ठं कूटमानैः इत्यत्र कूटमानैः कपटप्रस्थादिप्रमाणैः ।।

धर्मिष्ठाः परिहीयन्ते पापीयान्वर्धते जनः ।**
धर्मस्य बलहानिः स्यादधर्मश्च बली तथा ।। ५२ ।।(०२)

अल्पायुषो दरिद्राश्च धर्मिष्ठा मानवास्तथा।**
दीर्घायुषः समृद्धाश्च विधर्माणो युगक्षये।(०३)

नगराणां विहारेषु विधर्माणो युगक्षये।

अधर्मिष्ठैरुपायैश्च प्रजा व्यवहरन्त्युत ।। ५३ ।। (०४)
सञ्चयेन तथाल्पेन भवन्त्याढ्यमदान्विताः ।। ५४ ।। (05)

धनं विश्वासतो न्यस्तं मिथो भूयिष्ठशो नराः ।**
हर्तुं व्यवसिता राजन्पापाचारसमन्विताः ।। ५५ ।।(०६)

*अधिकपाठः २७* नैतदस्तीति मनुजा वर्तन्ते निरपत्रपाः ।(०७)

पुरुषादानि सत्त्वानि पक्षिणोऽथ मृगास्तथा।**

---

(०१)(१) गूढं (for कूटं); (२) पुण्यं; पण्यान्, विक्रीयते; विक्रीडते,जनः; द्विजाः; (४) छद्मं (for बहुं);(अ) तः; च (for (उ)त),

(०२)(१) विशिष्टाः(for धर्मिष्ठाः); (२) पापिष्ठो (for पापीयान्); (३) धर्मश्च) (for स्य) ;च (for स्याद्); (४) अधर्मी च; (अ)प्यधर्मी च; (अ)प्यधर्मश्च; (अ)प्यधर्मस्य; ह्यधर्मस्य (for अधर्मश्च);बली तदा; बलीयसा; बलायतिः; बलायते, अधर्मः प्रबलस्तदा,

(०३)(२) तथा (for तदा); (४) अधर्माणां (for विधं); दिनक्षये,

(०४) (१) अपायैं (for उपायै); तु (for च);

(२) व्यवहरति; चान्वचरन्ति (for व्यवहरन्ति);च (for (उ)त);

(०५)(३) तथा; (अ)सि च (for ( अ)पि च); (४) आढ्य॰(for आढ्या),

(०६)(२) इतो; मिथ्या (for मिथो);शोभनाः (for शोनराः); (३) हन्तुं (for हर्तुं); व्यवस्यन्ति तदा (for व्यवसिता राजन्); (४) मायामद॰; पापाचार॰ (for मायाचार);समेधिताः (for समन्विताः),

(०७)( वर्तन्ते (for वर्तन्ति); निरुपद्रवाः (for निरप),)

नगराणां विहारेषु चैत्येष्वपि च शेरते ।। ५६ ।।(०१)

सप्तवर्षाष्टवर्षाश्च स्त्रियो गर्भधरा नृप।**
दशद्वादशवर्षाणां पुंसां पुत्रः प्रजायते ।। ५७ ।।(०२)

भवन्ति षोडशे वर्षे नराः पलितिनस्तथा।**
आयुः क्षयो मनुष्याणां क्षिप्रमेव प्रपद्यते ।। ५८ ।।(०३)

क्षीणायुषो महाराज तरुणा वृद्धशीलिनः ।**
तरुणानां च यच्छीलं तद्वृद्धेषु प्रजायते ।। ५९ ।।(०४)

विपरीतास्तदा नार्यो वञ्चयित्वार्हतः पतीन्।**
व्युच्चरन्त्यपि दुःशीला दासैः पशुभिरेव च ।। ६० ।।(०५)

*अधिकपाठः ९२८*

वीरपत्न्यस्तथा नार्यः संश्रयन्ति नरान्नृप।
भर्तारमपि जीवन्तमन्यान्व्यभिचरन्त्युत।। ६१ ।(०६)

तस्मिन्युगसहस्रान्ते सम्प्राप्ते चायुषः क्षये।**
अनावृष्टिर्महाराज जायते बहुवार्षिकी ।। ६१ ।।(०७)

---

(०१)(२) (ऽ)थ ग्रहासू; (ऽ)धिग्रहासू (for ऽथ मृगासू);तदा (for तथा);विहारेषु वर्षाणां); (४) न चैत्येष्वपि शेरते,
(०२)(२) ०धृता (for धरा); (४) प्रसूं (for प्रजा०); पुंसां पुत्रा भवन्ति च,
(०३) (२) पुत्राशू (for नराः);च पलितां (for पलितिन); नराः पलितयौवनाः; (३) क्षयं; ०क्षये; (४) प्रजायते; प्रवर्तते (for प्रप),
(०४)(१) क्षीणायुषो (for क्षीणे युगे); (२) वृद्धशालिनः; (३) तच्छीलं; यद्वृत्तं; (४) (उ)प०; (अ)पि (for प्र),
(०५)(१) तथा; ततो (for तदा); (२)क-ख-घ-रहः, (आ)र्हतः (for रहः);परान् (for पतीन्); (३) दुर्वाचश्च; विचरन्ति (for व्युच्चरन्ति); च (for (अ)पि);राजेन्द्र (for दुःशीला),
(०६)(तदा (for तथा); सङ्गृह्णन्ति; सङ्गृह्यन्ति; श्रयिष्यन्ति (for संश्रयन्ति);नराधिप; तथा नरान् (for नरान्नृप); उप० (for अपि);अन्यं (for अन्यान्),)
(०७)(२) च युग०(for चायुषः); (४) शतं (for बहु ),

ततस्तान्यल्पसाराणि सत्त्वानि क्षुधितानि वै।**
प्रलयं यान्ति भूयिष्ठं पृथिव्यां पृथिवीपते ॥ ६२ ॥(०१)

ततो दिनकरैर्दीप्तैः सप्तभिर्मनुजाधिप।**
पीयते सलिलं सर्वं समुद्रेषु सरित्सु च ॥ ६३ ॥(०२)

यच्च काष्ठं तृणं चापि शुष्कं चार्द्रं च भारत।**
सर्वं तद्भस्मसाद्भूतं दृश्यते भरतर्षभ ॥ ६४ ॥(०३)

ततः संवर्तको वह्निर्वायुना सह भारत।**
लोकमाविशते पूर्वमादित्यैरुपशोषितम् ॥ ६५ ॥(०४)

ततः स पृथिवीं भित्त्वा प्रविश्य च रसातलम्।**
देवदानवयक्षाणां भयं जनयते महत् ॥ ६६॥(०५)

निर्दहन्नागलोकं च यच्चकिंचित्क्षिताविह ।**
अधस्तात्पृथिवीपाल सर्वं नाशयते क्षणात् ॥ ६७ ॥(०६)

ततो योजनविंशानां सहस्राणि शतानि च ।**
निर्दहत्यशिवो वायुः स च संवर्तकोऽनलः ॥ ६८ ॥(०७)

लक्षालङ्कारः- ततो योजनविंशानां सहस्राणि शतानि च इत्यत्र योजनविंशानां सहस्राणि

---

(०१)(१) तद् (for तानि); (२) क्षुभिं (for क्षुधि); वै (for च),
(०२)(४) सरसु नदिषु (for सरित्सु),
(०३) (१) वापि (for चापि); (३) तत्सर्वं; (४) पुरुषर्षभ,
(०४) (१/२) वायुरग्निना (for वह्निर्वायुना); सहितो भृशं (for सह भारत); (३) वर्षशते (for आविशते); (४) भास्करैर् (for आदित्यैर्); उपतापितं; उपशोभितं; उपशोधितं; परिवारितं,
(०५)(१) च (for स);पृथिवी सर्वा (for पृथिवीं भित्त्वा); (२) प्रविश्य च (for समा); (३) मानुष (for दानव); (४) महान् (for महत्);
(०६)(१) यद् (for च); (२) कृतां (for क्षितां); (३) पृथिवीनाथ; पृथिवीं राजन्; (४) सर्वान् (for सर्वं); नाश (राज) यति,
(०७) (१)०कोटीनां (for विंशानां);योजनानां (येन नावां) समन्ताद्धि; (३) अशि०वैर्घोरै (for अशिवो वायुः);निर्दह्यन्तेशिवैर्घोरैः; (४) तथा; तदा (for स च); सांवर्तकोनलः; संवर्तकादिभिः ०कोंशुभिः); ०काग्निभिः,

द्विदशसहस्राणीत्यर्थः योजनविंशानां शतानि द्वे सहस्रे । मिलित्वा द्वाविंशतिसहस्रयोजनपर्यन्तं ऊर्ध्वं ज्वालाभिर्निर्दहति । ततः तदुपर्यति वायुवेगादिना सर्गपर्यन्तं दीप्तः ।

सदेवासुरगन्धर्वं सयक्षोरगराक्षसम्।**
ततो दहति दीप्तः स सर्वमेव जगद्विभुः ।। ६९ ।।(०१)

ततो गजकुलप्रख्यास्तडिन्मालाविभूषिताः ।**
उत्तिष्ठन्ति महामेघा नभस्यद्भुतदर्शनाः ।। ७० ।।(०२)

केचिन्नीलोत्पलश्यामाः केचित्कुमुदसन्निभाः ।
केचित्किञ्जल्कसङ्काशाः केचित्पीताः पयोधराः ।। ७१ ।।
कारण्डकनिभाः केचित्केचिदिङ्गुलिकप्रभाः ।।(०३)

केचिद्धारिद्रसङ्काशाः काका(र)ण्डवनिभास्तथा।**
केचित्कमलपत्राभाः केचिद्धिङ्गुलसप्रभाः ।। ७२ ।।(०४)
केचिद्दारिद्र्यसङ्काशाः केचित्पीताः पयोधराः ।।(०५)

केचित्पुरवराकाराः केचिद्गजकुलोपमाः ।
केचिदञ्जनसङ्काशाः केचिन्मकरसन्निभाः ।। ७३ ।। (०६)

---

(०१)(१) ०गन्धर्वं; (२) ०मानुषं; (३) गर्जन्; जगद् (for ततो);दीप्तांशुः; दीप्तः सन् ततः स दहते दीप्तः; (४) सर्वानेव दिवौकसः ( विभावसुः ),

(०२)(२) तडिद्गुण०; विद्युज्ज्वाला (for तडिन्माला०);समन्विताः; विभूषणाः (for विभूषिताः); (३) उत्तिष्ठन्ते, घना (गणा) राजन् (for महामेघा),

(०३)(३) हारिद्रं; कुञ्जरं (for किञ्जल्क); (४) पीनाः; पीत (for पीताः);केचि० द्विमलवत्प्रभाः; केचिन्मकरसंस्थिताः,

(०४)(१) द्विरदसङ्काशाः; हरिद्रासदृशाः; कुञ्जरसङ्काशाः; (२) कारण्डवनिभासू, परे; तदा (for तथा);केचिन्मकरसंनिभाः; केचित्काकनिभास्तथा; केचित्कारण्डवप्रभाः,

(०५) (३) कुरन्दकनिभाः केचित्; (४) हिङ्गुलसप्रभाः; किंशुकसप्रभाः; हिङ्गुलसंनिभाः; अङ्कुरितप्रभाः; हिङ्गुलिकप्रभाः; हि स्फटिकप्रभाः,

(०६)(१) केचि०त्केचित्प्लवाकाराः; केचिच्च तुहिनाकाराः; (२) अलि०कुलो; कूलोपमास्तथा ; मरकतप्रभाः(for गजकुलो० ); (३) कुञ्जरं (for अञ्जनं); (४) ०वर्चसः (for धूसरा); ०संनिभाः(for संस्थिताः);,

विद्युन्मालापिनद्धाङ्गाः समुत्तिष्ठन्ति वै घनाः ।[०१]
घोररूपा महाराज घोरस्वननिनादिताः ॥ ७४ ॥[०२]

ततो जलधराः सर्वे व्याप्नुवन्ति नभस्तलम्।[०३]
गर्जन्तः पृथिवीपाल पृथिवीधरसंनिभाः ॥ ७५ ॥

तैरियं पृथिवी सर्वा सपर्वतवनाकरा।**
आपूर्यते महाराज सलिलौघपरिप्लुता ॥ ७६ ॥[०४]

ततस्ते जलदा घोरा राविणः पुरुषर्षभ।**
सर्वतः प्लावयन्त्याशु चोदिताः परमेष्ठिना ॥ ७७ ॥[०५]

वर्षमाणा महत्तोयं पूरयन्तो वसुन्धराम्।**
सुघोरमशिवं रौद्रं नाशयन्ति च पावकम् ॥ ७८ ॥[०६]

ततो द्वादशवर्षाणि पयोदास्त उपप्लवे।**
धाराभिः पूरयन्तो वै चोद्यमाना महात्मना ॥ ७९ ॥[०७]

ततः समुद्रः स्वां वेलामतिक्रामति भारत।**
पर्वताश्च विदीर्यन्ते मही चाप्सु निमज्जति ॥ ८० ॥[०८]

---

(०१)(१) ०निबद्धाङ्गा; ०वदद्धाङ्गाः; ०विन (०विनि) द्धाङ्गाः; (२) तोयदाः; ते घनाः,
(०२)(१) महत्तोयं (for महां); (२) ०स्वर; ०रूप (for ०स्वन०);निनादिनः; विनादिनः (०ताः);विमुञ्चन्ति नभोगताः;
(०३)(३) सर्वं (for सर्वे); (४) पूरयन्ति; व्यामुञ्चन्ति (for व्याप्नु०); नभस्थलं,
(०४) (२) सपत्तन०; ०वनान्तरा; (२) आपूर्यत,
(०५)(२) भरतर्षभ, घोरारावविराविणः; (३/४) पर्वतान् (for सर्वत);प्लावयन्तस्ते; प्रचरन्त्याशु (for प्लावं);नोदिं (for चौदिं);परूषा सर्व० तस्त्यक्ताः प्लावयन्त्याशु चोदिताः,
(०६)(१) महातोयं (for महन्तोयं);परमेष्ठिना वर्षमाणाः; (३) अघोरम् (for सुं);शीघ्रं (for रौद्रं ),
(०७)(२) तद्; तु (for ते);उपप्लुतां पयोदास्तस्तरुर्महीं; (३) सूदं (for पूर); (४) नोद्यं (for चोद्यं);द्योतमाना महास्वनाः,
(०८)(१) समुद्राः तां (for स्वां); (२) अतिक्रामन्ति; (३) विदी०; (अ) अ-व्यशीर्यन्त, पि दीं (for विशीं), (४) चापि विलीयते; चाप्सु निमज्जति; च प्रतिशीर्यते; चापि व्यलीयत; चापि व्यशीर्यत; चापि विदीर्यते,

सर्वतः सहसा भ्रान्तास्ते पयोदा नभस्तलम्।**
संवेष्टयित्वा नश्यन्ति वायुवेगपराहताः ॥ ८१ ॥(०१)

ततस्तं मारुतं घोरं स्वयम्भूर्मनुजाधिप।**
आदिः पद्मालयो देवः पीत्वा स्वपिति भारत ॥ ८२ ॥(०२)

तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजङ्गमे।**
नष्टे देवासुरगणे यक्षराक्षसवर्जिते ॥ ८३ ॥ (03)

निर्मनुष्ये महीपाल निःश्वापदमहीरुहे।**
अनन्तरिक्षे लोकेऽस्मिन्भ्रमाम्येकोऽहमाहतः ॥ ८४ ॥(०४)

एकार्णवे जले घोरे विचरन्पार्थिवोत्तम।**
अपश्यन्सर्वभूतानि वैक्लव्यमगमं ततः ॥ ८५ ॥(०५)

ततः सुदीर्घं गत्वाहं प्लवमानो नराधिप।**
श्रान्तः क्वचिन्न शरणं लभाम्यहमतन्द्रितः ॥ ८६ ॥(०६)

ततः कदाचित्पश्यामि तस्मिन्सलिलसश्चये।**
न्यग्रोधं सुमहान्तं वै विशालं पृथिवीपते ॥ ८७ ॥(०७)

---

(०१)(१) सह सम्भ्रान्तासू, (२) ते पयोदाः; (३) संवेष्टय सद्यो नश्यन्ति; (४) ०समाह (समाहि) ता,
(०२)(१) क-ख-घ-सक्तत्सलिलं,तत्सलिलं (for तं मारुतं);तूर्णं (for घोरं); (२) भूयो भूयो नराधिप; (३) आदिः (for आदि); (४) सपदि; स्वपति (for स्वपिति),
(०३) (३) नष्ट०(for नष्टे); नरे (for गंणे); (४) प्रण(नं) ष्टोरगराक्षसे,
(०४) महाराज (for महीं); (२) निःस्वाध्यायं; (३) अन्तरिक्षे च; नान्तरिक्षे च (for अनन्तरिक्षे); (४) भ्रमाम; भ्राम्यामि; क्रमामि; भ्राम्याम (for भ्रमामि);आदितः; आहतः; आतुरः (for आदृतः),
(०५)(१) एकार्णव, महा (for जले);तत एकार्णवजले; (४) वैकृत्यम् (for वैक्लब्यम्) ; ततः (तदा;) (for परम्),
(०६)(१) (अ)हं (for तु); (२) नरोत्तम; रसाधिप (for नरां); (३) शान्तं; क्लान्तः (for श्रान्तः); (४) अरिन्दम (for अतन्द्रितः),ऽलब्धवानस्म्यनिन्दित (०तन्द्रितः ; निदितः)
(०७)(२) सश्चये; संनिधौ; (३) तु (for सु०); च (for वै) ,

शाखायां तस्य वृक्षस्य विस्तीर्णायां नराधिप।**
पर्यङ्के पृथिवीपाल दिव्यास्तरणसंस्तृते ।। ८८ ।।(०१)

उपविष्टं महाराज पद्मेन्दुसदृशाननम्।**
फुल्लपद्मविशालाक्षं बालं पश्यामि भारत ।। ८९ ।।(०२)

ततो मे पृथिवीपाल विस्मयः सुमहानभूत्।**
कथं त्वयं शिशुः शेते लोके नाशमुपागते ।। ९० ।।(०३)

तपसा चिन्तयंश्चापि तं शिशुं नोपलक्षये।**
भूतं भव्यं भविष्यं च जानन्नपि नराधिप ।। ९० ।।(०४)

अतसीपुष्पवर्णाभः श्रीवत्सकृतभूषणः ।**
साक्षाल्लक्ष्म्या इवावासः स तदा प्रतिभाति मे ।। ९२ ।।(०५)

ततो मामब्रवीद्बालः स पद्मनिभलोचनः ।**
श्रीवत्सधारी द्युतिमान्वाक्यं श्रुतिसुखावहम् ।। ९३ ।।

### श्रीभगवान्

जानामि त्वां परिश्रान्तं ततो विश्रामकाङ्क्षिणम्।**
मार्कण्डेय इहास्स्व त्वं यावदिच्छसि भार्गव ।। ९४ ।।(०६)

अभ्यन्तरं शरीरे मे प्रविश्य मुनिसत्तम।**

---

(०१)(२) विस्तीर्णस्य; (४) सम्भृते; सेविते; ०संवृते, शयानं दृष्ट्वा न्शिशुं,
(०२)(१) महीपाल (for महां); (२) पद्मेदु०; (३) निकाशाक्षं; पलाशाक्षं, प्रफुल्लपद्मशालाक्षं,
(०३)(१) तं दृष्ट्वा मे महाराज; (२) यः समपद्यत; (३) चायं (for त्वं); (४) लोकनाश उपागते,
(०४)(१) तमसा;चिन्तयानोपि; चिन्तितश्चापि; (३) भविष्यं च; (४) महामते (for नरां),
(०५) (१) ०वर्णाङ्गः;० सङ्काशः; ०वर्णाभं; सङ्काशं; (२) ०लक्षणं; ०भूषणः; (३) स्वयं (for साक्षाल्); (४) तदा०प्रभृति भाति मे,
(०६)(१) देवदेव उ; ,श्रीभगवानुवाच; त्वां (for त्वा); (२) ततो; तथा (for तात); (३) इहास त्वं; महासत्व (for इहास्स्व त्वं); (४) इच्छामि (for इच्छसि),

आस्स्व भो विहितो वासः प्रसादस्ते कृतो मया ।। ९५ ।।[०१]

मार्कण्डेयः

ततो बालेन तेनैवमुक्तस्यासीत्तदा मम।**
निर्वेदो जीविते दीर्घे मनुष्यत्वे च भारत ।। ९६ ।।[०२]

ततो बालेन तेनास्यं सहसा विस्तृ(वृ)तं कृतम्।**
तस्याहमवशो वक्त्रे दैवयोगात्प्रवेशितः ।। ९७ ।।[०३]

ततः प्रविष्टस्तत्कुक्षिं सहसा मनुजाधिप।**
सराष्ट्रनगराकीर्णां कृत्स्नां पश्यामि मेदिनीम् ।। ९८ ।।[०४]

लक्षालङ्कारः- सराष्ट्रनगराकारां कृत्स्नां पश्यामि मेदिनीम् इत्यादिग्रन्थस्यायं भावः मार्कण्डेयेन महाप्रलयो दर्शनीय इति प्रार्थितो भगवान्नारायणस्तात्कानिकस्वाप्नमहीमहीधरादिसृश्टिप्रलयवत् स्वशक्त्या निर्मितं महाप्रलयप्रतिनिधिं कश्चित्प्रलयं मार्कण्डेयाय प्रदर्श्य स्वोदरस्थमविनष्टमेव सकलं प्रपञ्चं पुनः प्रदर्शयामीस । सहरदैनन्दिनप्रलयत्वे ब्रह्मणो निद्रायां मार्कण्डेयस्य प्रबोधायोगादिति ज्ञातव्यम् ।

गङ्गां शतद्रुं सीतां च यमुनामथ कौशिकीम्।**
चर्मण्वतीं वेत्रवतीं चन्द्रभागां सरस्वतीम् ।। ९९ ।।[०५]

सिन्धुं चैव विपाशां च नदीं गोदावरीमपि।**
वस्वोकसारां नलिनीं नर्मदां चैव भारत ।। १०० ।।[०६]

---

(०१)(१) अनन्तरं; अभ्यन्तरे; अभ्यन्तर०; शरीरे, शरीराभ्यन्तरं मे त्वं; (२) मुनिपुङ्गव, (३) त्वदर्थे; आस्यतां; शाश्वतो; आस्वेह; आस्व त्वं (for आस्स्व भो), विहितं वासं,

(०२)(१) ततस्तनैव वालेन; (३) निर्वेदो (०दं) जीविताद्दीर्घान्; (४) मानुषत्वे च; मनुष्यत्वे च; मानुष्याच्चैव; मनुष्यत्वेन,

(०३)(१) अथ (for आस्यं); (२) विकृतं; संविदं; विस्तृतं (for विवृतं); महदास्यं विकासितं; (३) अविशं (for अवशो);वक्त्रे; (४) वायुवेगात् (for दैवयोगात्) ;मायया सम्प्र०,

(०४)(१) प्रविष्टः तत्कुक्षौ; तं कुक्षिं; (३) सराष्ट्रा (for ष्ट्र),

(०५)(१) शतह्रदो; शतद्रुतां (for शतद्रुं); शीतां; असितां (for सीतां),च; (२) चाथ (for अथ),

(०६) (२) तथा (for अपि); (३) वशोकसारां; वस्वौक; काम्बोजमालां; विश्वौकसारां; वस्वेक; (४) कावेरीं

नदीन्ताम्रां च वेणां च पुण्यतोयां शुभावहाम्।

सुवेणां कृष्णवेणां च इरामां च महानदीम्।

वितस्तां च नरव्याघ्र कावेरीं सरितां वराम् ।। १०१ ।।(०१)

शोणां(णं) च पुरुषव्याघ्र विशल्यां किम्पुनामपि ।। १०२ ।।

वितस्तां च महाराज कावेरीं च महानदीम्।(०२)

एताश्चान्याश्च नद्योऽहं पृथिव्यां या नरोत्तम।**

परिक्रामन्प्रपश्यामि तस्य कुक्षौ महात्मनः ।। १०३ ।।(०३)

ततः समुद्रं पश्यामि यादोगणनिषेवितम्।**

रत्नाकरममित्रघ्न पयसो निधिमुत्तमम् ।। १०४ ।।(०४)

तत्र पश्यामि गगनं चन्द्रसूर्यविराजितम्।

---

नर्मदां तथा; नर्मगां सुभगामथ,

(०१)(१)ख-इतोऽर्घ चतुष्टयं नास्ति सत्स्थाने आधोलिखितमर्घद्धयं द्दश्यतेकावेरीं ताम्रपणीं च पयोष्णीमपि पाण्डव ।, तुङ्गभद्रां कृष्णवेणीं कमलां च महानदीम् । तएताश्चा इत्यादि ।। क-घ-तार्मपर्णी च परमामपि वेणां शुभावहाम् ।, तापीं; वापीं (for ताम्रां);वेणां; मुण्डां; वेण्वां (for वेण्णां);ताम्रां च कृष्णवेणां च; नदीं वापीं च बण्णां च; नदीं तां ताम्रपर्णी (०र्णी) च; नदीं तापीं च पेण्णां च; (२) वेत्रा (मद्रा)मपि च भारत; पद्मामपि च पाण्डव; प(स)०रमामपि (०थ) पाण्डव; तुङ्गां पद्मावतीमपि; (३) तुवेण्णां; तुवेणां; तु (वे)ष्णां; तुयेणां; कु (सु)० वेणां; सुवेण्वां; सुवर्णां; सुवेमां; सुवेष्णां; भूवेष्णां (for सुवेणां);कृष्णवेण्णां च ; वर्णां च;वेण्वां च (for वेणां च);तुङ्गबण्णां कृष्णबण्णां;, तुङ्गभद्रां कृष्णवेणीं (ण्यां) ;तुङ्गवेण्णां कृष्णवेणां; (४) कयि (०य) मां च; कपिशां (सां) च; इरां चैव; कपिलां च; कल (०लि) मां च; कमलां च (for इरामां च);शरावतीं (for महां) ,कपिशा (कयिमा) मथ भारत;

(०२)(नरव्याघ्र; महाभाग (for महाराज); सरितां वरां (for च महानदीम्)) (५) क-शोणंच - कम्बुनामपि घ-शेणां च - कम्हुरामपि, शोणां च, शोणं चैव नरव्याघ्र; (६) विशालां; वैशाल्यां (for विशल्यां); कम्पनामपि; कम्बुना० (कम्बुनीं); किम्पुना; यमुनां; कर्बुरा,

(०३)(१) नद्यो वै; या नद्यः; सरितः (for नद्योऽहं); (२) राजसत्तम; मानवोत्तम; या नराधिप; वा नरोत्तम; (३) परिक्राभ्यत्; क्रमान्; क्रमन्; (४) तस्य कुक्षौ,

(०४) (१/२) समुद्रं पुरुषा (च नर; मनुज)व्याघ्र भीमनक्रसमाकुलं; (४) पयसां (for पयसो); पयसो (सां) निधिमुत्तमं,

जाज्वल्यमानं तेजोभिः पावकार्कसमप्रभम् ॥ १०५ ॥[०१]

पश्यामि च महीं राजन्काननैरुपशोभिताम्।[०२]
सपर्वतवनद्वीपां निम्नगाशतसङ्कुलाम् ॥ १०६ ॥[०३]

यजन्ते हि तदा राजन्ब्राह्मणा बहुभिर्मखैः ।**
क्षत्रियाश्च प्रवर्तन्ते सर्ववर्णानुरञ्जनैः ॥ १०७ ॥[०४]

वैश्याः कृषिं यथान्यायं कारयन्ति नराधिप।**
शुश्रूषायां च निरता द्विजानां वृषलास्तदा ॥ १०८ ॥[०५]

ततः परिपतन्राजंस्तस्य कुक्षौ महात्मनः ।**
हिमवन्तं च पश्यामि हेमकूटं च पर्वतम् ॥ १०९ ॥[०६]

निषधं चापि पश्यामि श्वेतं च रजतान्वितम्।**
पश्यामि च महीपाल पर्वतं गन्धमादनम् ॥ ११० ॥[०७]

*अधिकपाठः ९३३*

पारियात्रं च पर्वतम् ।

नैषधं चापि पश्यामि०[०८]

(०१) (१) तत्र (for ततः);नगरं (for गगनं); (२) चन्द्र० सूर्य०;
(०२) (४) काग्नि० (for कार्क); समप्रभं; (५) महा (for महीं); (६) ०शोभितं,
(०३)(वनोद्देशां (for वनद्वीपां), कुलं (for शत),)
(०४)(१) च (for हि);महाराज; सदा राजन्; तथा रा; ततो रां; (२)क-ख-ब्रह्माणात्र पशुङिस्सह,ख-ब्रह्मणा विविधैस्सवैः, पशुभिः (for बहु०), मखैः;सह (for सवैः); (४) सर्वे (for सर्व०);रञ्जनैः ,
(०५)(१) महाराज (for यथां); (३) शुश्रूष णायां; शुश्रूषणे च; (४) तदा (for तथा),
(०६) (१) परिपतद्; स पर्यटन् ;परिभ्रमन्; (२) तस्य कुक्षौ; (३) प्र०(for च); (४) भारत (for पर्वतम्);विध्यं च गिरिमुत्तमं,
(०७)(१) अ-क-ख-अर्धचतुष्टयं नासत्ति, महेद्रं (for निषधं),चैव (for चापि),
(०८) (२) विध्यं (for श्वेतं);रजतासितं; ०न्वितं; रजतं तथा; गिरिसत्तमं; (३) तं पश्यामि (for पश्यामि च); महाराज (for महीं); (४) तत्र वै (for पर्वतं),

मन्दरं मनुजव्याघ्र नीलं चापि महागिरिम्।**
पश्यामि च महाराज मेरुं कनकपर्वतम् ॥ १११॥(०१)

महेन्द्रं चैव पश्यामि विन्ध्यं च गिरिमुत्तमम्।**
मलयं चापि पश्यामि पारियात्रं च पर्वतम् ॥ ११२ ॥(०२)

एते चान्ये च बहवो यावन्तः पृथिवीधाराः ।**
तस्योदरे मया दृष्टाः सर्वे रत्नविभूषिताः ॥ ११३ ॥(०३)

सिंहान्व्याघ्रान्वराहांश्च पश्यामि मनुजाधिप
पृथिव्यां यानि चान्यानि सत्त्वानि जगतीपते ॥११४ ॥(०४)

तानि सर्वाण्यहं तत्र पश्यन्पर्यचरं तदा ॥ ११५ ॥(०५)

कुक्षौ तस्य नरव्याघ्र प्रविष्टः सञ्चरन्दिशः ।**
शक्रादींश्चापि पश्यामि कृत्स्नान्देवगणानहम् ॥ ११६ ॥(०६)

*अधिकपाठः ९३४*

साध्यान्रुद्रांस्तथाऽऽदित्यान्गुह्यकान्पितरस्तदा।
सर्पान्नागान्सुपर्णांश्च वसूनप्यश्विनावपि।। ११२ ॥ (०७)

---

(०१)(१) पुरुषं ;च नरं (for मनुजं); (२) चैव (for चापि); (३) पृथिव्यां; अपश्यं (for पश्यामि); महीपाल; महाशैले; नरव्याघ्र (for महां); (४) काश्चनं (for कनकं),
(०२)(१) चापि (for चैव); (२) सह्यं (for वन्ध्यं); गिरिसत्तमं; (३) मलयं च महाशैलं; (४) पान्त्रं (for यात्रं);विध्यं (सह्यं) च गिरिमुत्तमं,
(०३)(४) सर्वे (for सर्व०),
(०४) (१) सिंहव्याघ्र०(घ्रान्); (२) पश्यामि (for नागांश्च);वसुधाधिप, नानारूपान्न० ०राधिप; (३/४) तीर्थानि (for चान्यानि);चान्यानि सत्त्वानि, पृथिवीं (for जगतीं);,
(०५) (२) शश्वत् (for पश्यन्);०पत (for चरं);तथा (for तदा),
(०६)(२) प्रविष्टं; प्रविश्य, सर्वतो (for सञ्चरन्);तदा (for दिशः); (३) चैव; अपि; च प्र (for चापि); (४) सर्वान्; सर्व० (for कृत्स्नान्);तदा; अहं (for तथा),
(०७)( साध्या रुद्रास्तथादित्या गुह्यकाः (for कांन्);गुह्यकांश्च पितृण्टस्तथा, सर्पा नागाः सुपर्णाश्च वसवोथां (वों चां) (for वसूनप्यं),)

गन्धर्वाप्सरसो यक्षानृषीँश्चैव महीपते।
दैत्यदानवसङ्घांश्च नागांश्च मनुजाधिप।**
सिंहिकातनयांश्चापि ये चान्ये सुरशत्रवः ।। ११७ ।।(०१)

यच्चिकिञ्चिन्मया लोके दृष्टं स्थावरजङ्गमम्
सर्वं पश्याम्यहं राजंस्तस्य कुक्षौ महात्मनः ।। ११८ ।।(०२)

चरमाणः फलाहारः कृत्स्नं जगदिदं विभो। (03)
अन्तःशरीरे तस्याहं वर्षाणामधिकं शतम् ।। ११९ ।।(०४)

न च पश्यामि तस्याहं देहस्यान्तं कदाचन।(०५)
सततं धावमानश्च चिन्तयानो विशाम्पते ।। १२० ।।

भ्रमंस्तत्र महीपाल यदा वर्षगणान्बहून्।**
आसादयामि नैवान्तं तस्य राजन्महात्मनः ।। १२१ ।।(०६)

*अधिकपाठः

भ्रमंस्तत्र महीपाल यदा वर्षगणान्बहून् ।।*(०७)

---

(०१)(१) यक्षाः; (२) ऋषयश्च; किंनराश्च (for ऋषीँश्चैव); (३) देव०; दैत्या (for दैत्य०), ०सङ्घाश्च; (४) कालेयाश्च, महीपते (for नरां);नागांश्च मनुजाधिप; (५) तनयश्चापि ; तन०याश्चापि; ०तनयादीश्च; ०तनयाश्चैव; (६) (ऽ)सुर०सत्तमाः,

(०२)(१) यावत् (for यच्च);भवेल्; जना (for मया); (२) कृत्स्नं; द्रष्टुं (for दृष्टं) ; (३/४) तच्च (सर्वं; तस्य) पश्याम्यहं राजन् (सर्वं),तस्य कुक्षौ,

(०३)(५) धारायणो निराधार; च ( त्व) रमाणो फलाहारः(निराहारः; महाराज); (६) विभो; प्रभो; विभौ (for तदा),

(०४)(२) क-ख-मयुतायुतम्; घ- वर्षायुतशतं चिरम्, वर्षाणामयुतायुतं; (३) अथ; तत्र; न स (for न च);तत्र (for तस्य);अन्तं (for अहम्);

(०५) (४) कर्हि० (for कुत्रं);देहमाद्यं कथश्चन; देहस्यान्तं कदाचन (कर्हिचित्; न कुत्रचित्),

(०६)(१/२) सततं ( तं) परिधावंश्च चिन्तयंश्च महाद्युते (मते),

(०७)(३) नासादयामि तस्यान्तं ,(स्याहं); नासादयमहं राजन्; (४) अन्तं; अहं (for तस्य),शिशोः (for मार्गं);तस्य महां,

ततस्तमेव शरणं गतोऽस्मि विधिवत्तदा।**
वरेण्यं वरदं देवं मनसा कर्मणैव च ॥ १२२ ॥(०१)

ततोऽहं सहसा राजन्वायुवेगेन निःसृतः ।**
महात्मनो मुखात्तस्य विवृतात्पुरुषोत्तम ॥ १२३ ॥(०२)

ततस्तस्यैव शाखायां न्यग्रोधस्य विशाम्पते।**
आस्ते मनुजशार्दूल कृत्स्नमादाय वै जगत् ॥ १२४ ॥(०३)

तेनैव बालवेषेण श्रीवत्सकृतलक्षणम्।**
आसीनं तं नरव्याघ्र पश्याम्यमिततेजसम् ॥ १२५ ॥(०४)

ततो मामब्रवीद्बालः स प्रीतः प्रहसन्निव ।**
श्रीवत्सधारी द्युतिमान्पीतवासा महाद्युतिः ॥ १२६ ॥(०५)

**श्रीभगवान्**

अपीदानीं शरीरेऽस्मिन्मामके मुनिसत्तम।**
उषितस्त्वं सुविश्रान्तो मार्कण्डेय ब्रवीमि ते(हि मे) ॥ १२७ ॥(०६)

मुहूर्तादथ मे दृष्टिः प्रादुर्भूता पुनर्नवा।**
यया निर्मुक्तमात्मानमपश्यं लब्धचेतसम् ॥ १२८ ॥(०७)

---

(०१)(३) शरण्यं (for वरेण्यं); (४) मनसा कर्मणा, गिरा; तथा (for (ए)व च),
(०२) (१) महता (for सहसा); (३) मुखाम्भोजाद् (for मुखात्तस्य), (४) अमरात्; अमलात् (for विवृतात्) ;पुरुषर्षभ (for ०षोत्तम),
(०३)(२) महात्मनः (for विशां पते); (३) क-ख-घ- र नर, पुरुषं; स नर० (for मनुज), (४) आपीय (for आदाय),
(०४)(१) बालवेशेन; (२)क-घ-श्रीवत्साङ्कविभूषणम्, लक्षणः; लक्ष्मणा,
(०५)(१) वीरः; बालः; प्रीतः; राजन् (for वीर); (२) शरीरं; स प्रीतः; स वीर (for स बालः); (४) महाद्युते; महामते; जगत्पतिः,
(०६)(१) क-घ-अपारे मे, (२) मामिके; मामकैः, मुनिरब्रवीत्; (३) भ्रमितं (उषितं) परिं स विं; स्म वि; हि विं (for सुवि० ); (४) ब्रवीमि ते०; महा मुने (for ब्रवीहि मे),
(०७) (१) मुहूर्तमपि; ०र्तादिव (for ०र्तादथ); (२) नृप; नर; नव (for नवा),

*अधिकपाठः ० कपाठे९३६*

तं दृष्ट्वा देवदेवेशं मुनिर्वचनमब्रुवम् ।।*[०१]

तस्य ताम्रतलौ तात चरणौ सुप्रतिष्ठितौ।**
सुजातौ मृदुरक्ताभिरङ्गुलीभिर्विराजितौ ।। १२९ ।।[०२]

प्रयत्नेन मया मूर्ध्ना गृहीत्वा ह्यभिवन्दितौ।**
दृष्ट्वा परिमितं तस्य प्रभावममितौजसः ।। १३० ।।[०३]

विनयेनाञ्जलिं कृत्वा प्रयत्नेनोपगम्य ह ।**
दृष्ट मया स भूतात्मा देवः कमललोचनः ।। १३१ ।।[०४]

तमहं प्राञ्जलिर्भूत्वा नमस्कृत्येदमब्रुवम्।**
ज्ञातुमिच्छामि देवत्वां मायां चैतां तवोत्तमाम् ।। १३२ ।।[०५]

आस्येनानुप्रविष्टोऽहं शरीरे भगवंस्तव ।**
दृष्टवानखिलान्सर्वान्समस्तान्जठरे हि ते ।। १३३ ।।[०६]

तव देव शरीरस्था देवदानवराक्षसाः ।**
यक्षगन्धर्वनागाश्च जगत्स्थावरजङ्गमम् ।। १३४ ।।[०७]

---

(०१)(३) यदा; यथा; माया० (for यया);विमुक्तम् (for निर्मुक्तम्); (४) लब्ध (मूढ) चेतनं,
(०२) (१) ताम्रोत्पलौ (for ताम्रतलौ); तावच् (for तात); (३) सुजात (for ०तौ); (४) अलङ्कृतं; विराजितौ (for अलङ्कृतौ),
(०३)(१) प्रणतेन; प्रयत्नेन; (२) (अ)पि; च; (अ) क-ख-घ-महात्मनस्तस्य, स्य (for हि); नन्दितौ; ०वादितौ (for ०वन्दितौ); (४) ०परमिदं तस्य; ०परमिमं तस्य;०परममेतस्य; महात्मनस्तस्य,
(०४) (२) पश्चा०त्तेन (for प्रयत्नेन); (अ)भिं (for (उ)प०);ह (for च); (४) मया (for देवः),
(०५)(१) तमिमं, प्राञ्जलीकृत्वा; (२) नमस्कृत्वेदम्, अब्रवीत्; अब्रवं; (३) देवेश; देव त्वा; (४) एतां; चैतां (for चेमां);नरोत्तम; अनुत्तमां (for तवोत्तमाम्),
(०६) (१) आस्ये च (for आस्येन); ऽ(अ)हं प्रविष्टोस्मि (for (अ)नुप्रविष्टोऽहं); (२) शरीरे (for शरीरं);देहं तव नरो (तव सुरो०; ते पुरुषो)त्तम; (३) दृष्टवान्निखिलान्; अखिलान्दृष्टवान्, सर्वान् (for लोकान्); (४) समन्ताज् (for समस्ताञ्);उदरे (for जठरे);हि ते (for तव),
(०७)(१) शरीरस्थान्, तव देहे मया दृष्टा; (२/३) ०राक्षसान्, ०नागांश्च; (४) जगच्च स्थाणुजङ्गमं;

त्वत्प्रसादाच्च मे देव स्मृतिर्न परिहीयते।**
द्रुतमन्तःशरीरे ते सततं परिवर्तिनः ॥ १३५ ॥[०१]

*अधिकपाठः ९३७*
निर्गतोऽहमकामस्तु इच्छया ते महाप्रभो।

इच्छामि पुण्डरीकाक्ष ज्ञातुं त्वाहमनिन्दितम् ॥ १३६ ॥[०२]

इह भूत्वा शिशुः साक्षात्किं भवानवतिष्ठते।
पीत्वा जगदिदं सर्वमेतदाख्यातुमर्हसि ॥ १३७ ॥[०३]

किमर्थं च जगत्सर्वं शरीरस्थं तवानघ ।**
कियन्तं च त्वया कालमिह स्थेयमरिन्दम ॥ १३८ ॥[०४]

एतदिच्छामि देवेश श्रोतुं ब्राह्मणकाम्यया।
त्वत्तः कमलपत्राक्ष विस्तरेण यथातथम्।**
महद्ध्येतदचिन्त्यं च यदहं दृष्टवान्प्रभो ॥ १३९ ॥[०५]

इत्युक्तः स मया श्रीमान्देवदेवो महाद्युतिः ।**
सान्त्वयन्मामिदं वाक्यमुवाच वदतां वरः ॥ १४० ॥[०६]

अस्मिन् पर्वणि १६० अध्याये १४०श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि

---

जगत्स्थावरजङ्गमान्,

(०१)(२) मतिर् (for स्मृतिर्); (४) ०धावता; ०वर्तिनः,

(०२)(१) यतिष्ये (for इच्छामि); (२) अनिन्दितं; अनन्दितं; अनिन्दितः, (३) शुचिः (for शिशुः), (४) को (for किं);अनुतिष्ठति; अधि (अव)तिष्ठति (०ते);

(०३)(१) सर्वम् (for विश्वम्); (४) एतद्व्याख्यातुमर्हति,

(०४) (१) विश्वं (for सर्वं); (३) महा०; मया (for त्वया); (४) अनिन्दित (for अरिन्दम),

(०५)(१) (अ)हं देव (श्रोतुं) (for देवेश); (२) देवेश द्विजकाम्यया; (४) यथा तथा, ; (५) ०देतद्; ०ध्येयम् (for ०द्ध्थेतद्);त्वां (for च); (६) पृष्टवानहं (for द्रष्टवान्प्रभो),

(०६)(२) महाप्रभुः; ०प्रभो; ०द्युते (for ०द्युतिः); (४) वर,

मार्कण्डेयसमास्यापर्वणि षष्ट्यधिकशततमोऽध्यायः ।। १६० ।।

(मार्कण्डेयसमस्यापर्वणि २ अध्यायः)

## 03- 06- 161 Adhyaya

# १६१. एकषष्ट्यधिकशततमोऽध्यायः

१६१. शिशुरूपिणा हरिणा मार्गण्डेयं प्रति स्वरूपपरिचयप्रदानं, स्वमाहात्म्यकथन-पूर्वकमन्तर्धानं च ।।१।। मार्कण्डेयेन युधिष्ठिरादीन् प्रति कृष्णस्य सर्वोत्तमत्वप्रतिपादनेन तं प्रतिशरणगमनचोदना ।।२।। पाण्डुपुत्रैः श्रीकृष्णस्य समुपाश्रयणं च ।

देवः

**काम देवा अपि न मा विप्र जानन्ति तत्त्वतः ।****
**त्वत्प्रीत्या तु प्रवक्ष्यामि यथेदं विसृजाम्यहम् ।। १ ।।(०१)**

**पितृभक्तोऽसि विप्रर्षे मां चैव शरणं गतः ।****
**ततोदृष्टोऽस्मि ते साक्षाद्ब्रह्मचर्यं च ते महत् ।। २ ।।(०२)**

**अपां नारा इतिपुरा सञ्ज्ञाकर्म कृतं मया।****
**तेन नारायणोऽप्युक्तो मम तत्त्वयनं सदा ।। ३ ।।(०३)**

**अहं नारायणो नाम प्रभवः शाश्वतोऽव्ययः ।****

---

(०१) (१) देवदेव उं; श्री०भगवान्, न; च (for (अ)पि), ब्रह्मा; ब्रह्मन्; नित्यम् (for विप्र), कामं (कामाद्) देवा अपि न मां; न देवा नर्षयश्चैव, (२) हि; (अ)भि०), (for वि०), विप्र जानन्ति तत्वतः, (३) त्वां (for त्वत्०), प्रतीक्षामि (for प्रव०), (४) विचरां (for विसृजां), श्रूयतां वचनं मम;,
(०२)(१) देवर्षे; मे भक्तो, (२) चापि (for चैव), (३) ततो (for अतो), तुष्टो (for दृष्टो); तपसा (for ते साक्षाद्);
(०३)(१) अ (आ)पां (for आपो); मया; सदा; पुरा (for प्रोक्ताः), (२) नाम पूर्वं; सञ्ज्ञाकर्म (पूर्वं); तासां नाम (for सञ्ज्ञानाम), कृता (for कृतं), किल (for मया), (३) (ऽ)पि (for (ऽ)स्मि) तेन नारायणेत्युक्तः (४) ता ह्ययनं; ते ह्ययनं; तत्त्वयनं (for तद्धचयनं), तदा(for सदा);

विधाता सर्वभूतानां संहर्ता च द्विजोत्तम ॥ ४ ॥[०१]

अहं विष्णुरहं ब्रह्मा शक्रश्चाहं सुराधिपः ।**
अहं वैश्रवणो राजा यमः प्रेताधिपस्तथा ॥ ५ ॥

अहं शिवश्च सोमश्च का(क)श्यपोऽथ प्रजापतिः ।**
अहं धाता विधाता च यज्ञश्चाहं द्विजोत्तम ॥ ६ ॥[०२]

अग्निरास्यं क्षितिः पादौ चन्द्रादित्यौ च लोचने।**
शश्च(सदिशं) च नभः कायो वायुर्मनसि मे स्थितः ॥ ७ ॥[०३]

(९३८) अधिकपाठः
द्यौर्मूर्धा खं दिशः श्रोत्रे तथापः स्वेदसंम्भवाः ।

मया क्रतुशतैरिष्टं बहुभिः स्वाप्तदक्षिणैः ।**
यजन्ते वेदविदुषो मां देवयजने स्थितम् ॥ ८ ॥[०४]

पृथिव्यां क्षत्रियेन्द्राश्च पार्थिवाः स्वर्गकाङ्क्षिणः ।**
यजन्ते मां तथा वैश्याः स्वर्गलोकजिगीषया ॥ ९ ॥[०५]

चतुःसमुद्रपर्यन्तां मेरुमन्दरभूषणाम्।**

---

(०१)(१) सोहं (for अहं), देवः (for नाम); (२) प्रवरः (for प्रभवः), (३) जनिता (for विधाता); (४) संहत्या (for संहर्ता);
(०२)(१) विश्वं०; शुकं (for शिवं), (२) काश्यपः (अ)थ (for च);
(०३)(२) स्तनान्तरे (for च लोचने); ( मे; च (for खं), श्रोत्रं (for स्वेदं)), (३) सदिशशू; सदिव्यं; तद्दिव्यं (for सदिशं); ते; स (for च), कर्णौ (for कायो), नभश्च सकलं कायो (लः कालो) (४) सं०(for मे); वायुर्मे नासिके स्थितः;
(०४) (२) चाप्तं; त्वाप्तं(for स्वाप्तं), (३) यजतो (for यजन्ते) वेदविद्वांसो, (४) देवा (वेद) सदने (for यजने) स्थिताः;
(०५) (१) क्षत्रिये पार्थिवेद्रां० (for क्षेत्रि), ब्राह्मणाः क्षत्रिया०श्चैव; (२) क्षत्रियाः; ये चान्ये; यजन्ते (for पार्थिवाः), (३) अथो; यथा (for तथा), (४) सर्वलोक०; स्वर्गलोकजिगषिया; कं जिगीषया (०वः); के जिगीषवः;

**शेषो भूत्वाहमेवैतां धारयामि वसुन्धराम् ॥ १० ॥[०१]**

**वाराहं रूपमास्थाय मयेयं जगती पुरा।****
**मज्जमाना जले विप्र वीर्येणासीत्समुद्धृता ॥ ११ ॥[०२]**

**अग्निश्च वडवावक्त्रो भूत्वाहं द्विजसत्तम।****
**पिबाम्यपः समाविद्धास्थाश्चैव(सदा विद्वंस्ताश्चैवं) विसृजाम्यहम्॥ १२ ॥[०३]**

**ब्रह्म वक्त्रं भुजौ क्षत्रमूरू मे संस्थिता विशः ।****
**पादौ शूद्रा भवन्तीमे विक्रमेण क्रमेण च ॥ १३ ॥[०४]**

**ऋग्वेदः सामवेदश्च यजुर्वेदोऽप्यथर्वणः ।****
**मत्तः प्रादुर्भवन्त्येते मामेव प्रविशन्ति च ॥ १४ ॥[०५]**

**यतयः शान्तिपरमा यतात्मानो बुभुत्सवः ।****
**कामक्रोधद्वेषमुक्ता निःसङ्गा वीतकल्मषाः ॥ १५ ॥[०६]**

**सत्त्वस्था निरहङ्कारा नित्यमध्यात्मकोविदाः ।****
**मामेव सततं विप्राश्चिन्तयन्त उपासते ॥ १६ ॥[०७]**

---

(०१)(१) चतुःसागरं, (२) भूषिता; भूषितां; भूषिता; (३) (ए)नां; (ए)को (for (ए)तां);
(०२)(१) वराहं; वराह०(for वाराहं); (२) पुरेयं (for मयेयं); पृथिवी (for जगती); मया (for पुरा); (३) निमज्जती (ज्जते; ज्जन्ति ज्जति); (for मज्जं); जल० निधौ (for जले विप्र);
(०३)(२) भूत्वा चाहं द्विजोत्तम, (३) शिरसि (for पिबामि), (आ)प; (अ)हं (for (अ) पः),सदा विद्वान्; समास्थाय; समाविद्वन्; सदा विद्वन्; सदा विद्धाः; जलं विद्वन्; सदा विद्धान्; सदा०बद्धासू (for समाविद्धाः); (४) तथैव (for ताश्चैव); लोकांश्चैव सृजाम्यहं;
(०४)(२) संस्थिता (for संश्रिता); (३) भवन्तीमे (for भजन्ते मे) (४) व्युत्क्रमेण (for विक्रं);
(०५)(२) तु; हि (for (अ)पि); अथर्वकः; अथर्व च, यजुर्वेदस्तथैव च (३) ततः(for मत्तः); (४) (उ)त (for च);
(०६)(१) यान्तिं (for शान्तिं); (२) जितात्मानो; विचेतसः; (ऽ)तिचेतसः; बुभुत्सवः, (३) कामक्रोधैश्च निर्मुक्ताः; अकोध (क्रोधा; काम)०द्वेषसंयुक्ता, (४) निःसञ्ज्ञा;
(०७)(१) सत्यस्था; (२) त्मचिन्तकाः, (३) काममेव स तं विप्राः;

अहं संवर्तको वह्निरहं संवर्तकोऽनलः ।**
अहं संवर्तकः सूर्यस्त्वहं संवर्तकोऽनिलः ॥ १७ ॥[०१]

तारारूपाणि दृश्यन्ते यान्येतानि नभस्तले।**
मम वै रोमकूपाणि विद्धि त्वं द्विजसत्तम ॥ १८ ॥[०२]

रत्नाकराः समुद्राश्च सर्व एव चतुर्दिशम्।**
वसनं शयनं चैव नि(वि)लयं चैव विद्धि मे ॥ १९ ॥[०३]

९३९*अधिकपाठः मयैव सुविभक्तास्ते देवकार्यार्थसिद्धये।

कामं क्रोधं च हर्षं च भयं मोहं तथैव च ।**
ममैव विद्धि रोमाणि सर्वाण्येतानि सत्तम ॥ २० ॥[०४]

प्राप्नुवन्ति नरा विप्र यत्कृत्वा कर्म शोभनम्।**
सत्यं दानं तपश्चोग्रमहिंसा चैव जन्तुषु ॥ २१ ॥[०५]

मद्विधानेन विहिता मम देहविहारिणः ।**
मयाऽऽविर्भूतविज्ञाना विचेष्टन्ते न कामतः ॥ २२ ॥[०६]

सम्यग्वेदमधीयाना यजन्ते विविधैर्मखैः ।**

---

(०१)(१) सांवर्तको,वह्निर् (for ज्योतिर्); (२) सांवर्तको (ऽ)नलः; (ऽ)निलः (for यमः); सांवर्तकः (४) त्वहं; ह्यहं (for अहं), सांवर्तको, (ऽ)नलः; यमः (for ऽनिलः);

(०२)(१) भावारूपाणि; (२) ये चान्येता (for यान्येतानि); नभस्थले, (३) मम वै (ममैव) रोमकूपाणि; (४) मां (for त्वं);

(०३)(२) चतुर्दिशः; दिशो दश; (३) वसतिं; सवनं (for वसनं); (४) विलयं; नियतं (for निलयं), विद्धि मे ब्राह्मणोत्तम;,

(०४)(१) कामक्रोधौ, कामः क्रोधश्च हर्षश्च; कामक्रोधौ भयं मोहं; (२) लोभं; हर्षं (for भयं); मोहासू; चैव (for मोहं), वै (for च); (३) रोमाणि (for रूपाणि);

(०५)(२) कामतः (for शोभनं); (३) शौचं (for चोग्रं); (४) अहिंसां; अहिंसाश्च (for अहिंसा); सर्व० (for चैव);

(०६)(१) महता; सहिता (for विहिता); (२) ममादेशवि० हारिणः, (३) मयाविर्भूतं मयाप्रहत०;, (४) विचेष्ठन्ति;

शान्तात्मानो जितक्रोधाः प्राप्नुवन्ति द्विजातयः ॥ २३ ॥(०१)

प्राप्तुं न शक्यो यो विद्वन्नरैर्दुष्कृतकर्मभिः ।**
लोभाभिभूतैः कृपणैरनार्यैरकृतात्मभिः ॥ २४ ॥(०२)

तं मां महाफलं विद्धि नराणां भावितात्मनाम् ।**
सुदुष्प्रापं विमूढानां मार्गं योगैर्निषेवितम् ॥ २५ ॥(०३)

भावितात्मनां; */

त्वमेवाप्यं विजानीहि नराणां भावितात्मनाम् ।(०४)

यदा यदा च धर्मस्य ग्लानिर्भवति भारत(सत्तम)।**
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम्।
तसकक्षमानवैश्चाहम् अवध्यो देवदानवै ॥ २६ ॥(०५)

दैत्या हिंसानुरक्ताश्च अवध्याः सुरसत्तमैः ।**

राक्षसाश्चापि लोकेऽस्मिन्यदोत्पत्स्यन्ति दारुणाः ।(०६)
तदाहं सम्प्रसूयामि गृहेषु शुभकर्मणाम् ॥ २७ ॥(०७)

प्रविष्टो मानुषं देहं सर्वं प्रशमयाम्यहम् ॥ २८ ॥(०८)

सृष्ट्वा देवमनुष्यांस्तु गन्धर्वोरगराक्षसान् ।

---

(०१)(२) यजन्ते (for यजन्तो),सवै;(for मखैः), (४) द्विजास्ततः; द्विजादयः;
(०२) (४) नरैर्यैर् (for अनार्यैर्), अजितां (for अकृतां);
(०३) (१) तस्मान्; तन्मे (for तं मां); महाबलं; महत्फलं; (२) सुकृतकर्मणां; नराणां
(०४)(३) सर्वभूतानां; सर्वमूढानां, (४) योग०(for यौगैर्);
(०५)(१) हि (for च); (२) भार्गव; वै मुने; भारत (for सत्तम), ग्लानिर्भ०रतसत्तम;क-ख-घ- सर्वैश्च मनुजैश्चाहम्,
(०६)(१) सयक्षमा०नुषै (नवै)श्चाहं; सर्वैश्च मनुजैश्चाहं; सर्वैः समानुषैश्चाहं, (२) अवध्यो देवदानवैः (३) रक्षोभ्यं; राक्षसैं (for राक्षसां), (४) (उ)त्पद्यन्ति; (उ) त्पत्स्यन्ते; पश्यन्ति; वत्स्यन्ति (for (उ) त्पत्स्यन्ति); दारुणं;
(०७)(१) सम्प्रसूये वै; समसूयामि; सुप्रसूयामि, (२) कर्मिणां,
(०८) (१) प्रविश्य (for ०ष्टो); (२) (उ)त (for (अ)हम्); तत्सर्वं प्रशमाम्युत;

स्थावराणि च भूतानि संहराम्यात्ममायया ।। २९ ।।[०१]

कर्मकाले पुनर्देहमविचिन्त्यं सृजाम्यहम्।
आविश्य मानुषं देह मर्यादाबन्धकारणात् ।। ३० ।।[०२]

श्वेतः कृतयुगे वर्णः पीतस्त्रेतायुगे मम।**
रक्तो द्वापरमासाद्य कृष्णः कलियुगे तथा ।। ३१ ।।[०३]

त्रयो भागा ह्यधर्मस्य तस्मिन्काले भवन्ति च ।
यदा भवति मे वर्णः कृष्णो वै मुनिसत्तम ।। ३२ ।।[०४][०५]

अन्तकाले च सम्प्राप्ते कालो भूत्वातिदारुणः ।
त्रैलोक्यं नाशयाम्येकः कृत्स्नं स्थावरजङ्गमम् ।। ३३ ।।[०६]

अहं त्रिवर्त्मा विश्वात्मा सर्वलोकसुखावहः ।**
आविर्भूः सर्वगोऽनन्तो हृषीकेश उरुक्रमः ।। ३४ ।।[०७]

कालचक्रं नयाम्येको ब्रह्मन्नहमरूपकम्।**
शमनं सर्वभूतानां सर्वलोककृतोद्यमम् ।। ३५ ।।[०८]

---

(०१) (१) देवान् (for देव०) वै; तु (for च), सष्वासु च मनुष्यान्वै; सृ०षा देवमनुष्याणां, (३) सर्वाणि (for भूतानि), (४) काम्यया (for मायया);

(०२)(१) कामं(for कर्म०),कर्मकालेषु निर्देहम्, (२) अनुसृत्य; अचिन्वन्त्य; अविचित्य,व्रजाम्यहं; (३) आविश्य (for प्रं), लोकं (for देहं);

(०३)(१) ब्रह्मन् (for वर्णः); (२) रक्तम्; श्यामस् (for पीतस्); तथा; (ऽ)भवत् (for मम); (३) पीतो; श्यामो; श्यामं (for रक्तो); (४) सदा; (ऽ)भवत्; ह्यहं; मम (for तथा);

(०४) (१) अधर्मस्य; च धर्मस्य (for ह्यं); (२) हि; च (for (उ)त);

(०५)(३) आप्तकाले, तु; (ऽ)पि (for च)

(०६)(४) भूताति०; भूत्वा सु,० काले भूते च दां (५/६) ( ए)ष; (ए)तत् (for (ए)कः); संहरामि जगत्सर्वं (त्त्सत्रं) कल्पादौ विसृजाम्यहं;

(०७) (१) त्रिकर्मा; तु धर्मः; त्रिवर्ष्म विश्वात्मा (for सर्वा); अहं त्रिवर्गविश्वात्मा; (२) सर्वभूतं; हृषीकेशस्त्रिविक्रमः; सर्वलोकशु० भावहः (३) अविभूः; अजितः (for अभिभूः) (४) उरुक्रमं; नरोत्तमः,

(०८)(१) काले चक्रं; अहं ब्रह्मन्, (ए)तत् (for (ए)को); (२) अरूपिण; अरूपकं (for अरूपि वै); ब्रह्मादं बहुरूपधृक्; ब्रह्मन्नहरहः सदा; कालचकमरूपकं; (३) शमनी; समनं; शयनं, सर्वलोकानां, (४)

एवं प्रणिहितः सम्यङ्गमात्मा मुनिसत्तम।**
सर्वभूतेषु विप्रेन्द्र न च मां वेत्ति कश्चन।
सर्वलोके च मां भक्ताः पूजयन्ति च सर्वशः ॥ ३६ ॥(०१)

यच्च किञ्चित्त्वया प्राप्तं मयि क्लेशात्मकं द्विज ।**
सुखोदयाय तत्सर्वं श्रेयसे च तवानघ ॥ ३७ ॥(०२)

यच्च किञ्चित्त्वया लोके दृष्टं स्थावरजङ्गमम्।**
विहितः सर्वथैवासौ ममात्मा भूतभावनः ॥ ३८ ॥(०३)

अर्धं मम शरीरस्य सर्वलोकपितामहः ।**
अहं नारायणो नाम शङ्खचक्रगदाधरः ॥ ३९ ॥(०४)

यावद्युगानां विप्रर्षे सहस्रपरिवर्तनात्।**
तावत्स्वपिमि विश्वात्मा सर्वभूतानि मोहयन् ॥ ४० ॥(०५)

एवं सर्वमहं कालमिहास्से मुनिसत्तम।**
अशिशुः शिशुरूपेण यावद्ब्रह्मा न बुध्यते ॥ ४१ ॥(०६)

मया च दत्तो विप्राग्र्य वरस्ते ब्रह्मरूपिणा।**

---

सर्व०लोककृतोद्यमः; ०भूतकृतो यमः; सर्वकर्मकृतोद्यमं; सर्वभूतकं; सर्वकालकं;
(०१)(लोकेषु (for लोके च); भक्त्या (for भक्ताः) सनातनं (for च सर्वशः)। (१) समं (for सम्यङ्), (२) ममात्मा; मायया, द्विजसत्तम; (३) सर्व० भूतानि,विप्रर्षे;
(०२)(१) इह; त्वयि (for त्वया); प्रोक्तं (for प्राप्तं); (२) क-मयीशे हिद्विजोत्तम; घ-मयि क्लेषाद् द्विजोत्तम ।, अपि (for मयि); क्लेशात्मजं; त्मका, सुखं (for द्विज); मयि क्लेशा द्विजोत्तम; (३) फलों० (for सुखों), (४) च तव, तथां, तदां; यदां (for तवां);
(०३)(१) किञ्चिद्धि (for च किञ्चित्); (३) विहितं, सर्व एवासौ; सर्वदैवासौ; सर्वथा वै ते; सर्वथैवाहं; सर्वथैवात्मा, (४) मयात्मा; ममासौ, कुरुनन्दन; भूतभावनः; द्विजसत्तम, मया भूतभवेन च;
(०४)(१) अहं धर्मशरीरश्च (स्य); (३),देवः (for नाम);
(०५)(१) एतद् (for यावद्); युगान्तं (for युगानां); (२) सहस्रपरिवर्तनात्; सहस्रं परिवर्तनं, (३) स्वपिति; स्वपामि, धर्मात्मा (for विश्वां), (४) सर्वभूतानि ( न्वि०) मोहयन्;
(०६) (१) इमं (for अहं); (२) इहासि; इहास्ते; (सं); द्विजसत्तम; मुनिपुङ्गव;

असकृत्परितुष्टेन विप्रर्षिगणपूजित ।। ४२ ।।(०१)

सर्वमेकार्णवं दृष्ट्वा नष्टं स्थावरजङ्गमम् ।
विक्लवोऽसि मया ज्ञातस्ततस्ते दर्शितं जगत् ।। ४३ ।।(०२)

अभ्यन्तरं शरीरस्य प्रविष्टोऽसि यदा मम।**
दृष्ट्वा लोकं समस्तं च विस्मितो नावबुध्यसे ।। ४४ ।।(०३)

ततोऽसि वक्त्राद्विप्रर्षे द्रुतं निःसारितो मया।**
आख्यातस्ते मया चात्मा दुर्ज्ञेयो हि सुरासुरैः ।। ४५ ।।(०४)

यावत्स भगवान्ब्रह्मा न बुध्येत महातपाः ।**
तावत्त्वमिह विप्रर्षे विश्रब्धश्चर वै सुखम् ।। ४६ ।।(०५)

ततो विबुद्धे तस्मिंस्तु सर्वलोकपितामहे।**
एकीभूतो हि स्रक्ष्यामि शरीराणि द्विजोत्तम ।। ४७ ।।(०६)

आकाशं पृथिवीं ज्योतिर्वायुं सलिलमेव च ।**
लोके यच्च भवेच्छेषमिह स्थावरजङ्गमम् ।। ४८ ।।(०७)

## मार्कण्डेयः

---

(०१)(१) ब्रह्म (for विप्र); मया च दत्तो विप्राग्र्य (य); (२) ब्रह्मचारिणे; विप्ररूपिणा (णे); (३) परि०हृष्टेन, (४) पूजितः; पूजिते; ब्रह्मर्षिगणपूजितः;

(०२) (१) लोकार्णवं (for एकां); (२) नष्टस्थावरजङ्गमं; (४) विकृतोसि; विक्लवोपि,विक्लवो मयि यज्ज्ञातः;

(०३)(३) दत्वा (for दृष्ट्वा), (४) विस्मृतो;

(०४)(१) तेनासि (for ततों); वर्षाद् (for वक्राद्),ततो वक्याद्धि ( तु) विप्रर्षे, (२) दूरं (for द्रुतं); (३) च (for ते),मयात्मा च (४) दुर्विज्ञेयः; दुर्विज्ञानः (for दवर्ज्ञेयोऽपि),हि (for ऽपि),सुरादिभिः; चराचरै;

(०५)(२) न बुध्येत (नाबुध्यत) (for न बुध्यति); पितामहः (३) त्वपि ह; त्वमपि (for त्वमिह); (४) विस्रब्धश्रू; विश्रब्धं;

(०६)(२) सुखावहे; (३) एकीभूतं, (ऽ)स्मि स्रक्ष्यामि; (ऽ)स्मि द्रक्ष्यामि; प्रवें; विस्रं; विसृं; प्रसूं (for हि स्वं), (४) शरीरं; शरीरान् ,शरीराणि द्विजोत्तम;

(०७)(१) पृथिवी, (२) वायुः; वपुः (for वायुं); वा; तु (for च), (३) (अ)भवत् (for भवेत्); (४) अहं (for इह);

इत्युक्त्वान्तर्हितस्तात स देवः परमाद्भुतः ।
प्रजाश्चेमाः प्रपश्यामि विचित्रा विविधाः कृताः ॥ ४९ ॥(०१)

एवं दृष्टं मया राजंस्तस्मिन्प्राप्ते युगक्षये।**
आश्चर्यं भरतश्रेष्ठ सर्वधर्मभृतां वर ॥ ५० ॥(०२)

९४३*अधिकपाठः

सूतात्मानं समाहृत चतुर्दशविधानतः ।

परमात्मानमाविश्य सुपित्यमित्तधी

यः स देवो मया दृष्टः पुरा पद्मायतेक्षणः ।**
स एष पुरुषव्याघ्र सम्बन्धी ते जनार्दनः ॥ ५१ ॥(०३)

अस्त्यै(स्यै)व वरदानाद्धि स्मृतिर्न प्रजहाति माम्।**
दीर्घमायुश्च कौन्तेय स्वच्छन्दमरणं मम ॥ ५२ ॥(०४)

स एष कृष्णो वार्ष्णेयः पुराणपुरुषो विभुः ।
आस्ते हरिरचिन्त्यात्मा क्रीडन्निव महाभुजः ॥ ५३ ॥(०५)

एष धाता विधाता च संहर्ता चैव शाश्वतः ।**
श्रीवत्सवक्षा गोविन्दः प्रजापतिपतिः प्रभुः ॥ ५४ ॥(०६)

दृष्ट्वेमं वृष्णिप्रवरं स्मृतिर्मामियमागता।**

---

(०१)(२) परमोद्भुतः (४) विविधा; बहुलाः (for बहुधा०);
(०२)(१) एवं (for एतद्),दृष्टो (for दृष्टं), महाराजन्; मया तात (for मया राजन्), (३) पुरुषं (for भरतं);
(०३)(१) यश्च; येन; यो वै (for यः स); (२) पद्मायतेक्षणः (३) एव (for एष), व्याघ्रः;
(०४)(१) वरदानेन, (२) हि (for न), (४) च वै; मम (for तथा);
(०५)(१) अ-सएषकृष्णो वाष्णो वार्ष्णोयः एव (for एष),एष कृष्णो हि दाशार्हः; (२) पुराणः (ण) पुरुषो०त्तमः; पुराणः पुरुषो विभुः; पुराणः परमो विभुः (४) महाप्रभुः; नराकृतिः;
(०६)(२) शाश्वतः(for सां);

आदिदेवमयं जिष्णुं पुरुषं पीतवाससम् ।। ५५ ।।(०१)

सर्वेषामेव भूतानां पिता माता च माधवः ।**
गच्छध्वमेनं शरणं शरण्यं कौरवर्षभाः ।। ५६ ।।(०२)

अस्मिन् पर्वणि १६१ अध्याये ५६ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि एकषष्ट्यधिकशततमोऽध्यायः ।। १६१ ।।

(मार्कण्डेयसमस्यापर्वणि २ अध्यायः)

## 03- 06- 162 Adhyaya

# १६२. द्विषष्ट्यधिकशततमो अध्यायः ।।

१६२. पाण्डवैः श्रीकृष्णस्य शरणवरणम् ।।१।। श्रीकृष्णेन पाण्डवानां सान्त्वनम् ।।२।। मार्कण्डेयेन युधिष्ठिरं प्रति कलौ भविष्यल्लोकवृत्तान्तकथनम् ।।३।। कलियुगान्ते कल्कित्वेनावतरिष्यता हरिणा दुष्टजनसंहारः ।।४।।

**वैशम्पायनः**

एवमुक्ताश्च ते पार्था यमौ च पुरुषर्षभौ ।**
द्रौपद्या सहिताः सर्वे नमश्चक्रुर्जनार्दनम् ।। १ ।।(०३)

स चैतान्पुरुषव्याघ्र साम्ना परमवल्गुना।**
सान्त्वयामास मानार्हो मन्यमानो यथाविधि ।। २ ।।(०४)

---

(०१)(१) (ए)नं; (ए)वं (ए)व (for (इ)मं),वृष्णिप्रवरं; राजप्रवरं, (२) मेयमिह (for मामियम्), (३) अयं०; दिव्यं (for अजं);नित्यं; दिव्यं; जिष्णुं; अजं (for विष्णुं),आदिदेवं सुप्रतिष्टं;

(०२) (१) अपि (for एव); (२) केशवः (for माधवः); (३) गच्छ त्वम् (for ध्वम्),एव; एतं (for एनं); (४) कौरवर्षभ; पुरुषर्षभ;

(०३)(१) च (for तु); पार्थास्ते; (२) भरतर्षभौ; (३) द्या सहिताः सर्वे;

(०४)(१) चैनान्; चैषां; च तान् व्याघ्रः; व्याघ्रान्; (३)मानार्हो; दाशार्हो, (४) मन्य

युधिष्ठिरस्तु कौन्तेयो मार्कण्डेयं महामुनिम्।**
पुनः पप्रच्छ साम्राज्ये भविष्यां जगतो गतिम् ॥ ३ ॥(०१)

**युधिष्ठिरः**

आश्चर्यभूतं भवतः श्रुतं नो वदतां वर ।
मुने भार्गव यद्वृत्तं युगादौ प्रभवात्ययम् ॥ ४ ॥(०२)

अस्मिन्कलियुगे त्वस्ति पुनः कौतूहलं मम।**
समाकुलेषु धर्मेषु किं नु शेषं भविष्यति ॥ ५ ॥(०३)

किंवीर्या मानवास्तत्र किमाहारविहारिणः ।**
किमायुषः किंवसना भविष्यन्ति युगक्षये ॥ ६ ॥(०४)

कां च काष्ठां समासाद्य पुनः सम्पत्स्यते कृतम्।**
विस्तरेण मुने ब्रूहि विचित्राणीह भाषसे ॥ ७ ॥(०५)

**वैशम्पायनः**

इत्युक्तः स मुनिश्रेष्ठः पुनरेवाभ्यभाषत।**
रमयन्वृष्णिशार्दूलं पाण्डवांश्च महानृषिः ॥ ८ ॥(०६)

**मार्कण्डेयः**

---

माना; मान्यमानो ( ना; नौ);
(०१)(२)वैशं उं; मार्काण्डेयं, तपोनिधिं (for महां); (३)धर्मात्मा; सामात्यो; सम्भाष्य (for साम्राज्ये); (४) भविष्यजू;
(०२)(१) युधिष्ठिर उ० (युधिं), सुमहत् (for भवतः), (२) वदः (गद०; भव); तस्तत्र; भरतर्षभ (for वदतां वर); (३)मुने भगवतो वृत्तं, (४) युगानां (for दौ); प्रभ प्रभवाप्ययं (ये); व्ययं (व्यये); त्यपि; त्ययं;
(०३) (१) चैव; त्वस्ति (for (ऽ)प्यस्ति); (३) भूतेषु (for धर्मेषु); (४) किं तु (for किं नु), शेषो; शिष्टं (for शेषं);
(०४)(१) किङ्कार्या; (२) किमाचारं; (३) किमाहाराः (for युषः); (४) किंवसानाः (४) कलौ युगे(for युगं);
(०५) (२) ध्रुवं (for कृतं); प्रपत्स्यन्ति (वेश्यामि) कृतं युगं; (४) हि (for (इ)ह);
(०६)(४)वैशं उं (वैशं); महर्षिभिः; महानृषिः; सहद्विजैः;

भविष्यं सर्वलोकस्य वृत्तान्तं भरतर्षभ।**
कलुषं कालमासाद्य कथ्यमानं निबोध मे ॥ ९ ॥

९४४*अधिकपाठः

शृणु राजन्मया दृष्टं यत्पुरा श्रुतमेव च ।
अनुभूतं च राजेन्द्र देवदेवप्रसादजम्।(०१)

कृते चतुष्पात्सकलो निर्व्याजोपाधिवर्जितः ।**
वृषः प्रतिष्ठितो धर्मो मनुष्ये भरतर्षभ ॥ १० ॥(०२)

अधर्मपादविद्धस्तु त्रिभिरंशैः प्रतिष्ठितः ।**
त्रेतायां द्वापरेऽर्धेन व्यामिश्रो धर्म उच्यते ॥ ११ ॥(०३)

त्रिभिरंशैरधर्मस्तु लोकानाक्रम्य तिष्ठति।**
चतुर्थांशेन धर्मस्तु मनुष्यानुपतिष्ठति ॥ १२ ॥(०४)

तामसं युगमासाद्य तदा भरतसत्तम।(०५)

आयुर्वीर्यमथो बुद्धिर्बलं तेजश्च पाण्डव ।**
मनुष्याणामनुयुगं ह्रसतीति निबोध मे ॥ १३ ॥(०६)

राजानो ब्राह्मणा वैश्याः शूद्राश्चैव युधिष्ठिर ।

---

(०१)(१) ख-शृणु राजन्मया दृष्टं यत् पुरा श्रुतनेव च ।,भविष्यत्, सर्वलोकेषु; (३)प्रलयं कालम्; कालं कलुषम्;

(०२)(२)निर्व्याजोपधि (रि)वर्जितः; (३)नृप०; पृष्टः (for वृष); (४) मानुषेषु; तदा (for पुरा); मनुष्ये भरतर्षभ;

(०३)(१) घ-अधर्मपादविद्धस्तु, अधर्मः पादविद्धस्तु)ध्वस्तः); स धर्मपादविद्धस्तु; धर्मः पादविरुद्धश्च; अधर्मपादविध्वस्तः (द्धश्च); धर्मः पादविहीनस्तु (श्च); (३)द्वापरेणेति; रार्धेन; रे चैव; रोर्धेन;

(०४) (१)अङ्गैर्) (for अंशैर्); मनुष्यान् (for अधर्मस्); (२)लोकं (for लोकान्); मनुष्या०नुपतिष्ठति;

(०५)(४)अधर्मः (for मनुष्यान्); उपसेवते; उपतिष्ठते;

(०६)(१)यशो बु (वृ) द्धिर्; मनो बुद्धिर् (for अथो बुद्धिर्); (५)कलियुगे (for अनुयुगं); हसन्तीति; हृष्यतीति;

व्याजैर्धर्मं चरिष्यन्ति धर्मवैतंसिका नराः ॥ १४ ॥(०१)

सत्यं सङ्क्षेप्स्यते लोके नरैः पण्डितमानिभिः ।**
सत्यहान्या ततस्तेषामायुरल्पं भविष्यति।(०२)
आयुषः प्रक्षयाद्विद्यां न शक्ष्यन्त्युपजीवितुम् ॥ १५ ॥

लक्षालङ्कारः- धर्मवैतंसिका जना इत्यत्र 'वैतंसिकः कौटिकश्च' इति वचनात् वैतंसिकाः कुटिलाः ।

विद्याहीनानविज्ञानाल्लोभोऽप्यभिभविष्यति ॥ १६ ॥(०३)

लोभक्रोधपरा मूढाः कामासक्ताश्च मानवाः ।**
वैरबद्धा भविष्यन्ति परस्परवधैषिणः ॥ १७ ॥(०४)

ब्राह्मणाः क्षत्रिया वैश्याः सङ्कीर्यन्तः परस्परम्।**
शूद्रतुल्या भविष्यन्ति तपः सत्यविवर्जिताः ।(०५)
अन्त्या मध्या भविष्यन्ति मध्याश्चान्त्या न संशयः ॥ १८ ॥(०६)

लक्षालङ्कारः- अन्त्या मध्या भविष्यन्ति इत्यत्र अन्त्याः मध्यस्य उभयभागे विद्यमाना उत्तमाधमाश्च एकवारं मध्या एव भवन्ति । अन्ततः मध्याः मध्यवदाचरमाणास्ते सर्वेऽपि अन्त्याः नाचा भविष्यन्ति ।

---

(०१)(१)ब्राह्मणाः क्षत्रिया वैश्याः; (२)शुद्धां (for शूद्रां); (३)व्याजाद् (for व्याजैर्), (४)जनाः; नृपाः (for नरा); धर्मवैतंसिकैर्वृताः; धर्मवीतं सुसंवृताः;

(०२) (१)सत्यः सङ्क्षिप्यते, धर्मो (for लोके); (३) सत्यं हन्यात्; सत्यहानिसू, (४)आयुर् अल्पं;(१)सङ्क्ष्याद्, विद्या; (२)शिक्षन्ति,(उ)पजीवितुं; (उ)पसेवितुं, न शक्यमुपजीवति;

(०३)(३) क-ल्लोभक्रोधोऽभि; ख-विद्याहीनानभिज्ञाना, ख-घ-ल्लोभक्रोधौ भविष्यतः, अबुद्धींस्तान्; अवज्ञानालू; अभिज्ञानाल्; विद्याहीनास्थिरज्ञानालू विद्या०नामनभिज्ञानालू, (४)हि (for ऽपि); )लोभोत्पत्तिर्भविष्यति; लोभक्रोधौ भविष्यतः,

(०४) (१)क्रोधलोभं लोभमोहं; (२)कामा०सक्तां; कामेसक्तां, (५)वैरवृद्धा; बुध्या; सक्ता वधैषिणः;

(०५)(१)ब्राह्मणक्षत्रियविशः (२)सङ्किरन्तः; सङ्कीर्यते; संसरन्तः;

(०६)(१)अन्तमध्या; अन्ता मध्या; आद्या मध्या; (२) मध्याश्चान्त्या न संशयः; मध्याश्चान्तेवसायिनः,

ईदृशो भविता लोको युगान्ते पर्युपस्थिते ।। १९ ।।(०१)

वस्त्राणां प्रवरा शाणी धान्यानां कोरदूषकाः ।**
भार्यामित्राश्च पुरुषा भविष्यन्ति युगक्षये ।। २० ।।(०२)

मत्स्यामिषेण जीवन्तो दुहन्तश्चाप्यजैडकम्।**
गोषु नष्टासु पुरुषा येऽपि नित्यं धृतव्रताः ।
तेऽपि लोभसमायुक्ता भविष्यन्ति युगक्षये ।। २१ ।।(०३)

लक्षालङ्कारः- धान्यानां कोरदूषका इत्यत्र 'कोरदूषस्तु कोद्रव' इत्यभिदानात् । कोरदूषकाः कोद्रवाख्यधान्यानि । 'हारक' इत्यपभ्रंशभाषा । भार्यैव मित्रं येषां ते भार्यामित्राः ।

९४६*अधिकपाठः

येऽपि नित्यं धृतव्रता! तेऽपि लोभसमायुक्ता,

अन्योन्यं परिमुष्णन्तो हिंसयन्तश्च मानवाः ।**
अजपा नास्तिकाः स्तेना भविष्यन्ति युगक्षये ।। २२ ।।(०४)

सरित्तीरेषु कुद्दालैर्वापयिष्यन्ति चौषधीः ।**
ताश्चाप्यल्पफलास्तेषां भविष्यन्ति युगक्षये ।। २३ ।।(०५)

श्राद्धे दैवे च पुरुषा येऽपि नित्यं धृतव्रताः ।**
तेऽपि लोभसमायुक्ता भोक्ष्यन्तीह परस्परम् ।। २४ ।।(०६)

---

(०१)(१)लोके, ईदृशाश्च भविष्यन्ति; (२) प्रत्युपस्थिते; पर्यवं; समुपं;,
(०२)(१)प्रवरा (राः; रः) शाटी; प्रवरा शाणा, (२)वासनां (for धान्यानां); दूषकः;
(०३)(१) अ-दशार्धानि न सन्ति; जीवन्ति; भुञ्जतो (for जीवन्तो); (२) वहन्तं (for दुहन्तं); (अ)जैडिकं; (अ) जैडकां; (अ)जैडकान्; (अ)जाविकान्; (अ)जैळकाः (कान्);
(०४)(१)परिमुष्यन्ते; (२)मानवान्; समन्ताच्चैव मानवाः; (३) सुरापा ये नरा (for अजपा); सुरापानरतास्त्वेते;
(०५) लकासू (for अल्पफलासू);
(०६)(१)देवेषु; दैवेषु; दाने च; देव्ये च; देवे च, (२) (ऽ)पि;ये (for च),यतं; दृढं(for धृतं); (३) समाविष्टा, (४)दास्यन्तीह; भोक्ष्यन्ति हि; भक्षन्तीह भक्ष्यन्ति; योक्ष्यन्तिह; यक्ष्यन्ति ह; भविष्यन्ति कलौ युगे;,

पिता पुत्रस्य भोक्ता च पितुः पुत्रस्तथैव च ।**
अतिक्रान्तानि भोज्यानि भविष्यन्ति युगक्षये ।। २५ ।।(०१)

९४७*अधिकपाठः

रात्रौ भोक्ष्यन्ति व्रतिनो गृहिणोऽपि युगक्षये ।

एवंविधं करिष्यन्ति कलौ शास्त्रविमोहिताः ।

न व्रतानि चरिष्यन्ति ब्राह्मणा वेदनिन्दकाः ।**
न यक्ष्यन्ति न होष्यन्ति हेतुवादविमोहिताः ।। २६ ।।(०२)

९४८*अधिकपाठः

निम्नेष्वीहां करिष्यन्ति हेतुवादविमोहिताः ।

निम्ने कृषिं करिष्यन्ति योक्ष्यन्ति धुरि धेनुकाः ।**
एकहायनवत्सांश्च योजयिष्यन्ति मानवाः ।। २७ ।।(०३)

पुत्रः पितृवधं कृत्वा पिता पुत्रवधं तथा।,
स्त्रियोऽपि पतिपुत्रादि वधिष्यन्ति युगक्षये।**
निरुद्वेगो बृहद्वादी न निन्दामुपलप्स्यते ।। २८ ।।(०४)

लक्षालङ्कारः- निरुद्वेगो बृहद्वादी इत्यत्र उद्वेगो भयं तद्रहितो निरूद्वेगः बृहत् स्वशौर्यं वदतीति बृहद्वादी ।

म्लेच्छभूतं जगत्सर्वं निष्क्रियं यज्ञवर्जितम्।**
भविष्यति निरानन्दमनुत्सवमथो तथा ।। २९ ।।(०५)

---

(०१)(३)अनिष्टान्तानि; अनिष्टा (ष्का)नि च; अनिष्क्रान्तानि; अनिष्कां,
(०२)(१)म्लेच्छभूतं जगत्सर्व; (३) यक्ष्यन्ते, (४)विमो०हिता (विलोडिताः); विलोपिताः,
(०३)(१)निम्नेष्टीहां; नि (न) भ्रेष्वीहां; नित्यं कृषिं, निम्ने चापि कृषिष्यन्ति; न चेष्टि) ष्टीः); कारयिष्यन्ति,
(२)धुरि धेनुकां; धुरि )सुर०) धेनवः (४) योजं (for वाहं);
(०४) (३)ब्रह्मवादे; बृहद्वाची; (४) उपलिप्सते; लिप्सति; यास्यते; ,
(०५) (१)म्लेशीं; म्लेच्छीं; म्लेश्छं; म्लेश्छीं; (२) धर्मं; ज्ञानं (for यज्ञं); (३)भविष्यन्ति; (४)निरुत्सवमू

प्रायशः कृपणानां हि तथाबन्धुमतामपि।**
विधवानां च वित्तानि हरिष्यन्तीह मानवाः ॥ ३० ॥(०१)

स्वल्पवीर्यबलाः स्तब्धा लोभमोहपरायणाः ।
तत्कथादानसन्तुष्टा शिष्टानामपि वान्धवाः ॥ ३१ ॥ (०२)

लक्षालङ्कारः- तत्कथादानसन्तुष्टा इत्यत्र तेषां कामक्रोधादीनां कथया अदानेन च सन्तुष्टाः ।

परिग्रहं करिष्यन्ति मायाचारपरिग्रहाः । (03)
सङ्घातयन्तः कौन्तेय राजानः पापबुद्धयः ॥ ३२ ॥(०४)

लक्षालङ्कारः- सङ्घातयन्त इत्यत्र सङ्घातं समुदायं सम्पादयन्तः सङ्घातयन्तः ।

परस्परवधोद्युक्ता मूर्खाः पण्डितमानिनः ।**
भविष्यन्ति युगस्यान्ते क्षत्रिया लोककण्टकाः ॥ ३३ ॥(०५)

अरक्षितारो लुब्धाश्च मानाहङ्कारदर्पिताः ।**
केवलं दण्डरुचयो भविष्यन्ति युगक्षये ॥ ३४ ॥

आक्रम्याक्रम्य साधूनां दारांश्चापि धनानि च ।**
भोक्ष्यन्ते निरनुक्रोशा रुदतामपि भारत ॥ ३५ ॥(०६)

---

निरुत्साहम् (for अनुत्सवसू); अथापि वा; अथो तदा; अमङ्गलं (for अथो तथा); अनुत्सवमखं तदा; अनु०वत्स्वमतो यथा;,

(०१) (१)प्रायश्च (for प्रायशः) च; तु (for हि) प्रायश्च कृपणान्धानां; (३) विधवानाथ०; विविधान्यथ; विधवायाश्च; (४),भविं (for हरिं); हि (for (इ)इ); ,

(०२) (१)स्वल्प (for अल्प);, (३)तस्करा दानसन्तुष्टाः; सन्तुष्टास्तत्कथादानाः (४)दानवाः; बान्धवाः(for मानवाः); दुष्टानां मानवास्तदा; शिष्टा०नामपि बान्ध (पाण्ड)वा,

(०३)(२)मायाचारं; पापाचारविवर्जिताः; परायणाः;

(०४)(१)सम्पादयत;समादाय तु; समाह्वयन्त; सम्पातं; सङ्घातवन्तः तस्मिन्युगे कुरुश्रेष्ठ;,

(०५)(१)वधे युक्ता, (२)पण्डिता (for क्षत्रिया) क्षत्रियान्या प्रदीयते;

(०६) (२)चापि (for चैव); (३)भोक्ष्यन्ति क्रोशं; (४) इव ) क्यअपि);

न कन्यां याचते कश्चिन्नापि कन्या प्रदीयते।**
स्वयङ्ग्राहा भविष्यन्ति युगान्ते समुपस्थिते ।। ३६ ।।(०१)

राजानश्चाप्यसन्तुष्टाः परार्थान्मूढचेतसः ।**
सर्वोपायैर्हरिष्यन्ति युगान्ते पर्युपस्थिते ।। ३७ ।।(०२)

म्लेच्छीभूतं जगत्सर्वं भविष्यति न संशयः ।**
हस्तो हस्तं परिमुषेद्युगान्ते समुपस्थिते ।। ३८ ।।(०३)

लक्षालङ्कारः- हस्ताद्धस्तं परिमुषेत् इयत्र स्वहस्ताच्चोर्यं कृत्वा परहस्तं प्रापयित्वा परिमषेत् परितो मुष्णीयात् ।

सत्यं सङ्क्षिप्यते लोके नरैः पण्डितमानिभिः ।**
स्थविरा बालमतयो बालाः स्थविरबुद्धयः ।। ३९ ।।(०४)

भीरुस्तथा शूरमानी शूरा भीरुविवा(षा)दिनः ।**
न विश्वसन्ति चान्योन्यं युगान्ते पर्युपस्थिते ।। ४० ।।(०५)

एकाहार्यं युगं सर्वं लोभमोहव्यवस्थितम्।**
अधर्मो वर्द्धते तत्र न तु धर्मः प्रवर्तते ।। ४१ ।।(०६)

लक्षालङ्कारः- एकहार्यं जगत् इत्यत्र एकम् एकप्रकारं पार्यम् आहार्यम् अन्नादिकं यस्य तत् ।

---

(०१)(३)स्वयङ्ग्रहा; (४)प्रत्युपस्थिते; समुपं;
(०२) (२)परार्थाः (४)प्रत्युपस्थिते; समुपं;
(०३)(१)चौरभूतं;म्लेञ्छीं;वैरं; (२) जनार्दन; न संशयः) (for च भारत); (३) हस्ताद्; हस्ते(for हस्तो); पर्यमुषद्; परिमुषन्; पर्यमुष्णाद्, न कन्यां याचते कश्चित्; (४) प्रत्युपस्थिते; समुपं,
(०४)(१)सङ्क्षेप्स्यते; सङ्क्षिप्स्यते; (३)बालबुद्ध्याढया;
(०५)(१)शूरमतयः; शूरवन्मान्या; शूरमानिन्यः भीरुस्तथा शूरमानी; (२) क्रूरा (for शूरा); (३) विषहान्ति (for विश्वं); (४)प्रत्युपस्थिते; समुपं (पर्यवं);
(०६)(१)एककार्यं; एकभार्यं; एकातापं; एकहार्यं; एको नवं; नैकभार्यं,युगं (for जगत्); (२)भविष्यति युगक्षये लोभमोहविवर्जितं; (३)वर्धते; वर्तते,तदा (नित्यं);तत्र; तस्मिन् (for महान्); (४)तु; (अ)त्र (for च) प्रवर्धते; विवर्धते,दानं धर्मश्च हीयते;

ब्राह्मणाः क्षत्रिया वैश्या न शिष्यन्ति जनाधिप।**
एकवर्णस्तदा लोको भविष्यति युगक्षये ॥ ४२ ॥(०१)

न क्षंस्यति पिता पुत्रं पुत्रश्च पितरं तथा।**
भार्याश्च पतिशुश्रूषां न करिष्यन्ति सङ्क्षये ॥ ४३ ॥(०२)

ये यवान्ना जनपदा गोधूमान्नास्तथैव च ।**
तान्देशान्संश्रयिष्यन्ति युगान्ते पर्युपस्थिते ॥ ४४ ॥(०३)

स्वैराचाराश्च पुरुषा योषितश्च विशाम्पते।**
अन्योन्यं न सहिष्यन्ति युगान्ते पर्युपस्थिते ॥ ४५ ॥(०४)

म्लेच्छभूतं जगत्सर्वं भविष्यति युधिष्ठिर ।
न श्राद्धैस्तर्पयिष्यन्ति दैवतानीह मानवाः ॥ ४६ ॥(०५)

न कश्चित्कस्यचिच्छ्रोता न कश्चित्कस्यचिद्गुरुः ।**
तमोग्रस्तस्तदा लोको भविष्यति जनाधिप ॥ ४७ ॥(०६)

परमायुश्च भविता तदा वर्षाणि षोडश।**
ततः प्राणान्विमोक्ष्यन्ति युगान्ते समुपस्थिते ॥ ४८ ॥(०७)

---

(०१)(१) ब्र्ह्मणक्षत्रियविशः, /*(२) विनक्ष्यन्ति; विनश्यन्ति (for न शिष्यन्ति०), नराधिप; युगक्षये; तथैव च, (३) तथा (for तदा),एकवर्णा भविष्यन्ति; एकवर्णास्तदा लोके, (४) भविष्यन्ति; तदा लोका,
(०२) (१) ये (for न), क्षम्यति; रक्षति; नङ्क्ष्यति, (२) प्रति(for तथा), (३) भार्याः न ) (for च), (४) न करिष्यन्ति काश्चन कश्चन; किंश्चन; सङ्क्ष्ये; करिष्यन्ति न काश्चन ( ति ०कदाचन),
(०३)(१) यवार्था; यवानां, (२) गोधूमानां त, (४) प्रत्युपस्थिते; समुप०; पर्यव० नीलीभृग्यश्च सर्वदा,
(०४)(१) स्वैराचाराः (३) नोत क्षंस्यन्ति; न क्षमि० ष्यन्ति; न च क्षंस्यन्ति (for न सहिष्यन्ति), (४) प्रत्युपस्थिते; समुप०,
(०५) (१) म्लेछी( म्लेञ्छ; म्लञ्छी०)भूतं, (२) युगक्षये; च भारत(for युधि०),युगान्ते पर्युपस्थिते, (३) श्राद्धैश्च; श्राद्धेन, न श्राद्धै० देवताश्चापि; न श्राद्धैस्तर्पयिष्यन्ति; श्राद्धेन (०द्धैर्न) देवान्न पितृन्; श्राद्धैर्न च पितृन्देवान्; श्राद्धैर्देवान्न च पितृन्, (४) दैवतानीह (०नि च) मानवाः,
(०६) (१) शिष्यो(for श्रोता), (३/४) जना०(for नरा०),तमोग्रस्तास्तदा लोका भविष्यन्ति नरा,
(०७) (१) भवति (for भविता), भवितायुश्च परमसू, (२) नव० (for तदा), (३) विमोक्ष्यन्ते (४)

पञ्चमे वाथ षष्ठे वा वर्षे कन्या प्रसूयते।**
सप्तवर्षाष्टवर्षाश्च प्रजास्यन्ति नरास्तदा ।। ४९ ।।[०१]

पत्यौ स्त्री तु तदा राजन्पुरुषो वा स्त्रियं प्रति।**
युगान्ते राजशार्दूल न तोषमुपयास्यति ।। ५० ।।[०२]

अल्पद्रव्या वृथालिङ्गा हिंसा च प्रभविष्यति।**
न कश्चित्कस्यचिद्दाता भविष्यति युगक्षये ।। ५१ ।।[०३]

अट्टशूला जनपदाः शिवशूलाश्चतुष्पथाः ।**
केशशूलाः स्त्रियश्चापि भविष्यन्ति युगक्षये ।। ५२ ।।[०४]

म्लेच्छाचाराः सर्वभक्षा दारुणाः सर्वकर्मसु।**
भाविनः पश्चिमे काले मनुष्या नात्र संशयः ।। ५३ ।।[०५]

क्रयविक्रयकाले च सर्वः सर्वस्य वञ्चनम्।**
युगान्ते भरतश्रेष्ठ वित्तलोभात्करिष्यति ।। ५४ ।।[०६]

ज्ञानानि चाप्यविज्ञाय करिष्यन्ति क्रियास्तथा।**

---

प्रत्युपस्थिते; समुप०; पर्यव०,

(०१) (१) पञ्चमेप्यथ वा (मे वाथ वा; ०मे वा तथा) षष्ठे, (२) प्रजास्यते; प्रजायते; प्रयास्यति, (४) तथा (for तदा), प्रजनि (यि)ष्यन्ति वै नराः,

(०२)(१) पत्यौ (० तौ) पत्री (for पत्यौ स्त्री तु), न(for तु), (३) पुरुषव्याघ्र; नरशार्दूल, (४) सतोषं; न दोषं (for न तोषं), उपगच्छति,

(०३) (१) अद्रव्या च (for अल्पद्रव्या), अल्पद्रव्यो वृथालिङ्गः, (२) हिंसां, प्रचरिष्यति,

(०४)(१) अदृशीला, (२) शवशीलाशू, चतुष्पदाः (३) भविष्यन्ति (for स्त्रियं),चैव (for चापि), योषितः केशशीलाश्च; प्रमदाः केशशूलाश्च (०शीलाश्च; शूलिन्यः), (४) युगे युगे (for युगक्षये), स्त्रिय० श्चानागते युगे,

(०५) (१) क-ख-घ-ःक्रूराः, म्लेच्छाः शूराःम्ले (म्लें)च्छाचाराः; म्लेश्छाः क्रराः, सर्वभक्ष्या, (४) मानवा (for मनुजा),मनुजा मनुजर्षभ (जधिप),

(०६)(२) काश्चनं; वञ्चनां, (४) वित्तलोभात, हरिष्यति; भविष्यति,

आत्मच्छन्देन वर्तन्ते युगान्ते समुपस्थिते ।। ५५ ।।(०१)

स्वभावात्क्रूरकर्माणश्चान्योन्यमभिशंसिनः ।**
भवितारो जनाः सर्वे सम्प्राप्ते तु युगक्षये ।। ५६ ।।(०२)

आरामांश्चैव वृक्षांश्च नाशयिष्यन्ति निर्व्यथाः ।**
भविता संशयो लोके जीवितस्य हि देहिनाम् ।। ५७ ।।(०३)

तथा लोभाभिभूताश्च भविष्यन्ति नरा नृप।**
ब्राह्मणांश्च हनिष्यन्ति ब्राह्मणस्वोपभोगिनः ।। ५८ ।।(०४)

हाहाकृता द्विजाश्चैव भयार्ता वृषलार्दिताः ।**
त्रातारमलभन्तो वै भ्रमिष्यन्ति महीमिमाम् ।। ५९ ।।(०५)

जीवितान्तकराः क्रूरा रौद्राः प्राणिविहिंसकाः ।**
यदा भविष्यन्ति नरास्तदा सङ्क्षेप्स्यते युगम् ।। ६० ।।(०६)

आश्रयिष्यन्ति च नदीः पर्वतान्विषमाणि च ।**
प्रधावमाना वित्रस्ता द्विजाः कुरुकुलोद्वह ।। ६१ ।।(०७)

---

(०१) (१) विज्ञाय ) (for (अ) विज्ञाय), (२) कारयन्ति; करिष्यति, तदा क्रियाः; क्रियास्तदा, (३) कुर्वीति; वर्ततो; वधन्ते, (४) पर्यवस्थिते; प्रत्युपं; समुपं,

(०२)(१) स्वभावक्रर०, (२) अभिशंसिनः; अभिशङ्किताः (३) भावितारो, नरा राजन् (for जनाः सर्वे), (४) प्राप्ते च (for सम्प्राप्ते०), सम्प्राप्ते तु (वै; सं०)युगक्षये,

(०३)(१) आरामाशू चैत्य (for ०चैव), चैत्यन् (for वृक्षान्), (२) नाशयिष्यति सर्वथा, (३) संशयो (for सङ्क्षयो), (४) हि (for च),

(०४)(१) यथा (for तथा), (२) भविं (for चरिं), भविष्यन्ति नरा नृप) नराधिप), (३) क-ब्रह्मणश्च भविष्यन्ति - भोक्ष्यते; ख - ब्रह्मणाश्चोरयिष्यन्ति, घ- ब्राह्मणांश्च वधिष्यन्ति, ब्राह्मणांश्च, हनिष्यन्ति; क्षयि; वधिं, (४) (अ)पि (for च,) भोक्ष्यते(for भुञ्जते), ब्राह्मणस्ये।(श्वो) पजीविनः; ब्राह्मणस्वो (०श्चो) पभोगिनः; ब्राह्मणान्नानि भुञ्जते,

(०५)(१) हाहाभूता; हाहा कृत्वा, (४) भविं (for भ्रमि),विद्रविष्यन्ति गामिमां (भविष्यन्ति महीसुराः),

(०६)(१/२) रौद्राः क्रूरा, क्षुद्राः (for क्रूराः), प्राणविहिंसकाः; प्राणिविहिंसि (०हंस) काः; प्राण्युपहिङ्कका: प्राणिनां हिंसकास्तथा; प्राणिनां च विहिंसकाः, सङ्क्षिम्भते; (४) सम्पत्स्यते, सुखं; कलिः; जगत् (for युगम्),

(०७)(१) ख-अर्धपश्चकं नास्ति तत्स्थाने-द्विजा भृत्यत्वमापन्ना दारूणा युगसंक्षये। इदमर्धं वर्तते । नदीं,आश्रयन्ति

दस्युभिः पीडिता राजन्काका इव द्विजोत्तमाः ।**
कुराजभिश्च सततं करभारप्रपीडिताः ।। ६२ ।।(०१)

धैर्यं त्यक्त्वा महीपाल दारुणे युगसङ्क्षये।**
विकर्माणि करिष्यन्ति शूद्राणां परिचारकाः ।। ६३ ।।(०२)

शूद्रा धर्मं प्रवक्ष्यन्ति ब्राह्मणाः पर्युपासकाः ।**
श्रोतारश्च भविष्यन्ति प्रामाण्येन व्यवस्थिताः ।। ६४ ।।(०३)

विपरीतश्च लोकोऽयं भविष्यत्यधरोत्तरः ।
एडूकान्पूजयिष्यन्ति वर्जयिष्यन्ति देवताः ।। ६५ ।। (०४)

शूद्राः परिचरिष्यन्ति न द्विजान्युगसङ्क्षये ।। ६६ ।।

(९४९) अधिकपाठः ापर्माचारपरिभ्रष्टा लोभमोहसमन्विताः ।
(भ्रष्टो लोभाचारसमन्वितः,) (05)

आश्रमेषु महर्षीणां ब्राह्मणावसथेषु च ।**
देवस्थानेषु चैत्येषु नागानामालयेषु च ।। ६७ ।।(०६)

---

नदीश्चैव, (२) विषमानपि (for विषमाणि च), (३) प्रबाध्यमाना; वृथा (प्रिया) वमाना, (४) प्रजाः(for द्विजाः),
(०१)(१) दस्युप्रपीडनाद्राजन् (द्राज्ञः); दस्युभिः पीडिता (दण्डप्रपीडिता) राजन्, (२) द्विजातयः; तदा द्विजाः (for द्विजो० ), करभारावपीडिताः; करहारप्रपी०,
(०२)(१) वैरं (for धैर्यं), कृत्वा (for त्यक्त्वा), (३) चर्रिं (for करिं०), (४) अ-अयं पादोऽनन्तरश्च स स्तः, शूद्रान्न,
(०३)(१) धर्मान् (for धर्मं),करिष्यन्ति; प्रचक्ष्यन्ति; प्रवक्ष्यन्ते, (२) ब्राह्मणाः परि०चारकाः; णा पर्युपासते; न द्विजा युगसङ्क्षये, (४) प्रमाणेन,
(०४)(१) क-घ- श्व प्रभविष्यन्ति, ख-इदमर्धद्वयं नास्ति, कालों (for लोकों०), (२) (अ)धरोत्तरं; नरोत्तम, (३) ऐडूकान्; एडं०; गोखलान्; जालूकान्; जालूं; जालयं; जद्धं पूरयिष्यन्ति, (४) नार्च०(for वर्जं०),
(०५)(१) शूद्रान्,शूद्रानभिभवि, (०वदि०)ष्यन्ति; शूद्राश्च प्रभविष्यन्ति, (२) ते (for न), द्विजाः, उप० (for युग०),
(०६) (२) द्विजानामालयेषु च,

एडूकचिह्ना पृथिवी न देवगृहभूषिता।**
भविष्यति युगे क्षीणे तद्युगान्तस्य लक्षणम् ।। ६८ ।।(०१)

लक्षालङ्कारः- जालूकचिह्ना पृथिवी इत्यत्र वनजलूकानां समूहो जालूकं तस् चिह्नं यस्याः सा ।

यदा रौद्रा धर्महीना मांसादाः पानपास्तथा।**
भविष्यन्ति नरा नित्यं तदा सङ्क्षेप्स्यते युगम् ।। ६९ ।।(०२)

पुष्पं पुष्पे यदा राजन्फले वा फलमाश्रितम्।**
प्रजास्यति महाराज तदा सङ्क्षेप्स्यये युगम् ।(०३)
अकालवर्षी पर्जन्यो भविष्यति गते युगे ।। ७० ।।(०४)

अक्रमेण मनुष्याणां भविष्यन्ति तदा क्रियाः ।
विरोधमथ यास्यन्ति वृषला ब्राह्मणैः सह ।। ७१ ।।(०५)

मही म्लेच्छजनाकीर्णा भविष्यति ततोऽचिरात् ।। ७२ ।।

करभारभयाद्विप्रा भजिष्यन्ति दिशो दश।(०६)
अन्यायवर्त्तिनश्चापि भविष्यन्ति नराधिपाः ।। ७३ ।।(०७)

---

(०१) (१) ऐडूक०; जालूक०, (२) ०भूषणा; ०भूमिका (for ०भूषिता), (३) भविष्यन्ति,
(०२)(१) यथा (for यदा), कर्महीना; गुणैर्हीना, (२) मत्स्यादाः; मांसाशाः पशव० (for पानपा), (३) पापासु (for नित्यं), (४) सम्पत्स्यते (for सङ्क्षे०), सुखं; कलिः; जगत् (for युगम्),
(०३) (१) पुष्पे पुष्पं, महाराज (for यदा राजन्), (२) फले वा फलमाश्रितं, (३) जनिष्यते; जनिष्येत; जनिष्यति (for प्रजा०), नरश्रेष्ठ(for महा), प्रजायते नरश्रेष्ठ, (४) सम्पत्स्यते (for सङ्क्षेप्स्यते), कलिः; जगत्; कृतं (for युगम्),
(०४) (२) युगक्षये; युगे गते; युगे युगे,
(०५) (२) भविष्यन्ति तदा क्रियाः (क्षयाः), (३) क्रियाविरोधं यास्यन्ति, (४) ब्राह्मणा वृषलैः सह,
(०६)(१) म्ले (म्लें) छजनाकीर्णा; म्लेछगणां; म्लेछकुलां, (२) तदाचिरात्; युगक्षये, (४) गमि०; नशि; वसि०; व्रजि० द्रवि० (for भजि०),
(०७) (२) तदा विष्टिः (०विद्धि; वृष्टि) करार्दिताः; तथा वि(वृ) ष्टिकरा०; यदा विष्टिकरा०; अनावृष्टिभिर (०भया)र्दिताः

निर्विशेषा जनपदास्तथा विष्टिकरार्दिताः ।**
आश्रमानुपलप्स्यन्ति फलमूलोपजीविनः ।[०१]
एवं पर्याकुले लोके मर्यादा न भविष्यति ॥ ७४ ॥

न स्थास्यन्त्युपदेशे च शिष्या विप्रियकारिणः ॥ ७५ ॥

(९५१) अधिकपाठः

ब्राह्मणाः क्षत्रियाः वैश्याः परित्यक्ष्यन्ति सत्क्रियाम्॥ १३५ ॥[०२]

आचार्योऽपनिधिश्चैव भत्स्यर्ते तदनन्तरम् ॥ ७६ ॥[०३]

अर्थयुक्त्या प्रवत्स्यन्ति मित्रसम्बन्धिबान्धवाः ।**
अभावः सर्वभूतानां युगान्ते सम्भविष्यति ॥ ७७ ॥ [04]

लक्षालङ्कारः- आचार्योपनिधि इत्यत्र आचार्यस्य उपनिधिः प्रतिनिधीः समान इत्यर्थः ।

दिशः प्रज्वलिताः सर्वा नक्षत्राण्यप्रभाणि च
ज्योतींषि प्रतिकूलानि वाताः पर्याकुलास्तथा ॥ ७८ ॥[०५]

उल्कापाताश्च बहवो महाभयनिदर्शकाः ।
षड्भिरन्यैश्च सहितो भास्करः प्रतपिष्यति।
तुमुलाश्चापि निर्ह्रादा दिग्दाहाश्चापि सर्वशः ॥ ७९ ॥[०६]

---

(०१)(३) उपलप्स्यन्ति; अभिपश्यन्ति; नाभिपत्स्यन्ति; अभिवत्सन्ति, (४) वृषला ब्राह्मणैः सह,
(०२)(३) ०देशे तु; ० देशेन (for ०देशे च),
(०३)(१) आचार्योपाधिन (०पचिति) श्चैव, (२) भत्स्यर्ते; वत्स्यर्ते; वत्स्यन्ते;विद्यते,
(०४)(१) अर्थयुक्ताः; ०युक्तान्,भविष्यन्ति; प्रपत्स्यन्ति, (४) अभावः सर्वभावानां; स्वभावः सर्वभूतानां, (६) सं(for च),
(०५) (२) ख-ताश्वपिवाताः पर्याकुलास्तथा, (अ)प्रभापि च (चराणि च); दिशो दश; जलानि च) (for चलानि च), (३) ज्योतींषि प्रतिलो०मानि; प्रधूपितानि ज्योतींषि,
(०६) (२) निदर्शना, *(२) प्रत० पिष्यति भास्करः (३) उल्काश्चापि सनिर्ह्रादा, (४) निर्दाहा०; दीनाभा० ) (for दिग्दाहा०),

कबन्धान्तर्हितो भानुरुदयास्तमने तदा।[०१]
अकालवर्षी भगवान्भविष्यति सहस्रदृक् ।। ८० ।।

लक्षालङ्कारः- कबन्धान्तर्हित इत्यत्र कं जलं बध्नातीति कबन्धो मेघः तेनतर्हितः आच्छादितः ।

सस्यानि च न रोक्ष्यन्ति युगान्ते पर्युपस्थिते ।। ८१ ।।[०२]

अभीक्ष्णं क्रूरवादिन्यः परुषा रुदितप्रियाः ।**
भर्तृणां वचने चैव न स्थास्यन्ति ततः स्त्रियः ।। ८२ ।।[०३]

पुत्राश्च मातापितरौ हनिष्यन्ति युगक्षये।**
सूदयिष्यन्ति च पतीन्स्त्रियः पुत्रानपाश्रिताः ।। ८३ ।।[०४]

अपर्वणि महाराज सूर्यं राहुरुपैष्यति।**
युगान्ते हुतभुक्चापि सर्वतः प्रज्वलिष्यति ।। ८४।।[०५]

पानीयं भोजनं चापि याचमानास्तदाध्वगाः ।**
न लप्स्यन्ते निवासं च निरस्ताः पथि शेरते ।। ८५ ।।[०६]

निर्घातवायसा नागाः शकुनाः समृगद्विजाः ।**

---

(०१)(१) कबन्धान्तरितो, (२) ०स्तमने; ०स्तमयौ, यथा; तथा; सदा (for तदा),
(०२)(१) भगवान्(पर्जन्यः)(for च तदा), (२) क-घ-युगक्षये, युगक्षये (for सहस्र ०), (३) रोहन्ति, (४) प्रत्यु०; समु) (for पर्यु ०), सम्प्राप्ते च युगक्षये,
(०३)(१) अभीक्ष्ण, कर्म ०(for क्रूर ०), (२) पुरुषा (for प), ०प्रियः; ०प्रिया, (४) स्थास्यन्ते, स्त्रियस्तदा; ततः स्त्रियः; स्त्रियस्तथा,
(०४) (२) हरिष्यन्ति; भवि; न रक्षन्ति, (३) नादरिष्यन्ति (for सूदयि ), पशून्; पतिं, (४) उपाश्रिताः; उपासिताः,
(०५) (१) उपेष्यति; ग्रसि, (३) क्षयान्ते (for युगान्ते), वापि(for चापि), (४) प्रभविष्यति,
(०६) (१) चापि) (for चैव), (२) तथा (for तदा), नराः (for (अ)र्ध्वगाः), याचमानस्तथाध्वगः (३) लप्स्यन्ति, लप्स्यति; लप्स्यते, निवासांश्च, (४) निरस्तः शेष्यते,

रूक्षा वाचो विमोक्ष्यन्ति युगान्ते पर्युपस्थिते ।(०१)
मित्रसम्बन्धिनश्चापि सन्त्यक्ष्यन्ति नरास्तदा ॥ ८६ ॥
जनं परिजनं चापि युगान्ते पर्युपस्थिते॥(०२)

अथ देशान्दिशश्चापि पत्तनानि पुराणि च ।**
क्रमशः संश्रयिष्यन्ति युगान्ते पर्युपस्थिते ॥ ८७ ॥(०३)

हा तात हा सुतेत्येवं तदा वाचः सुदारुणाः ।**
विक्रोशमानश्चान्योन्यं जनो गां पर्यटिष्यति ॥ ८८ ॥(०४)

भोवादिनस्तथा शूद्राः ब्राह्मणा प्राकृतप्रिया।
पाषण्डजनसंङ्कीर्णा भविष्यन्ति युगक्षये ॥ ८९ ॥

ततस्तुमुलसङ्घाते वर्तमाने युगक्षये ।
द्विजातिपूर्वको लोकः क्रमेण प्रभविष्यति ॥ ९० ॥(०५)

ततः कालान्तरेऽन्यस्मिन्पुनर्लोकविवृद्धये।**
भविष्यति पुनर्दैवमनुकूलं यदृच्छया ॥ ९१ ॥(०६)

---

(०१)(१) निर्घाता (for निर्घात), निरस्ता वायुना गावः, (२) शकुन्ताः (for शकुनाः), (४) प्रत्यु०; समु०(for पर्यु०),
(०२) (१) मित्रान्) (for मित्र), सर्वान् (for चापि), (२) नराः सन्त्यज्य शेरते; सन्त्यजति नरास्तथा (०दा), (३) दारान्; खेदात्; जनः(for जनं), परिजनश्, चैव(for चापि), (४) प्रत्यु०; समु० (for पर्यु०), सत्यं च युगसङ्क्षये; सन्त्यजन्ति युगक्षये,
(०३)(१)ख- श्लोकस्थाने जनं परिजनं चैव सत्यं च युगसंक्षये इत्यर्धं अधिकतया ख- कोशे वर्तते, देशा, चैव (for चापि), (२) वनानि च (for पत्तनानि), वनानि; (आ)पणानि) (for पुराणि), (३) संल० (for संश्र०), (४) प्रत्यु०; समु०(for पर्यु०),
(०४) (१) सुतेत्येव; भ्रातरिति, (३) विक्रोशमाना०, (४) जनौघः(for जनो गां), जनोयं प्रव०दिष्यति; परितप्स्यन्ति भारत,
(०५)(१) लोके (for ततस्), तुमल; तुमलसंयुक्ते, (२) जनं (for युग), (३) विजातिपूर्वको लोकं, (४) सम्भविष्यति; न भविं; प्रपतिं, विक्रमेण भविष्यति; क्रमशः प्रपतिष्यति,
(०६)(१) तस्मिन् (for ऽन्यस्मिन्), (२) लोकः प्रसिध्यति; लोकप्रसिद्धये, (३) पुनर्देवम्, भविष्यन्ति पुनः सर्वे, (४) नरा दैवं(for अनुकूलं),

यदा सूर्यश्च चन्द्रश्च तथा तिष्यबृहस्पती।**
एकराशौ समेष्यन्ति प्रपत्स्यति तदा कृतम्  ।। ९२ ।।(०१)

लक्षालङ्कारः- तथा तिष्यबृहस्पती इत्यत्र तिष्यं पुष्यनक्षत्रम् ।

कालवर्षी च पर्जन्यो नक्षत्राणि शुभानि च
प्रदक्षिणा ग्रहाश्चापि भविष्यन्त्यनुलोमगाः  ।। ९३ ।। (02)

क्षेमं सुभिक्षमारोग्यं भविष्यति निरामयम्  ।। ९४ ।। (03)

(९८३) अधिकपाठः

दक्षिणानि भविष्यन्ति ग्रहाश्चाप्यनुलोमगाः ।

प्रदक्षिणा भविष्यन्ति पूजयन्तः परस्परम् ।(०४)

कल्की विष्णुयशा नाम द्विजः कालप्रचोदितः ।**
उत्पत्स्यते महावीर्यो महाबुद्धिपराक्रमः  ।। ९५ ।।(०५)

सम्भूतः सम्भलग्रामे ब्राह्मणावसथे शुभे।
महात्मा वृत्तसंम्पन्नः प्रजानां हितकृन्नृप  ।। ९६ ।।

मनसा तस्य सर्वाणि वाहनान्यायुधानि च ।**
उपस्थास्यन्ति योधाश्च शस्त्राणि कवचानि च  ।। ९७ ।।(०६)

---

(०१)(१) यावच्; यथा (for यदा), चन्द्रः सूर्यः (२) तदा; यदा; यथा (for तथा), तिष्यं बृहस्पतिः; शुक्रबृहस्पती; तिष्ये बृह; शुक्रो बृहस्पतिः, (३) एकरात्रे (त्रौ); एकराशीं, न्ति भविष्य, (४) प्रपश्यन्ति; प्रपत्स्यन्ति; प्रवत्स्यति; भविष्यति; सम्पत्स्य (त्स्यं )ति,तदा सम्पत्स्यते कृतं,

(०२) ख-प्रदक्षिणानि गच्छन्ति ग्रहश्चापि परस्परम् । भविष्य (३/४) चैव (for चापि), च लोमशः; सुखावहाः (for (अ)नुलोमगाः),

(०३) दक्षिणानि भविष्यन्ति पूज (प्रजा) यन्तः परस्परं,

(०४) (६) भविष्यन्ति, न संशयः; तदा कृतं (for निरामयम्),

(०५)(१) कल्की, विष्णुयशो, (२) ०प्रयों०; ०प्रंणों० (for ०प्रचो० ), (३) उत्पत्स्यति, महाबाहुर्, (४) बल,

(०६)(१) सम्भृतः शम्भलग्रामे; संवलं; शम्बलं; सङ्गलं; शम्भलं,(३) क-ख-घ-योगैश्च, (४) सुबहून्यायुधानि

स धर्मविजयी राजा चक्रवर्ती भविष्यति।**
स चेमं सङ्कुलं लोकं प्रसादमुपनेष्यति || ९८ ||(०१)

लक्षालङ्कारः- प्रसादमुपेनष्यति इत्यत्र प्रकर्षेण सादम् अवसादनम् ।

उत्थितो ब्राह्मणो दीप्तः क्षयान्तकृदुदारधीः ।**
सङ्क्षेपको हि सर्वस्य युगस्य परिवर्तकः || ९९ ||(०२)

स सर्वत्र गतान्क्षुद्रान्ब्राह्मणैः परिवारितः ।**
उत्सादयिष्यति तदा सर्वम्लेच्छगणान्द्विजः || १०० ||(०३)

अस्मिन् पर्वणि १६२ अध्याये १००श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि
मार्कण्डेयसमास्यापर्वणि भविष्यकथने द्विषष्ट्यधिकशततमोऽध्यायः || १६२ ||

(मार्कण्डेयसमस्यापर्वणि २ अध्यायः)

## 03- 06- 163 Adhyaya

# १६३. त्रिषष्ट्यधिकशततमोऽध्यायः

१६३. मार्कण्डेयेन युधिष्ठिरं प्रति कृतयुगवृत्तान्तकथनपूर्वकं धर्माचरणचोदना ||

भगवता कल्किना कृतयुगसंस्थापनं युधिष्ठिरं प्रति मार्कण्डेयस्य धर्मोपदेशश्च

---

च; बहुनानायुधानि च, (५) भूताश्च; योधांश्च; योगं च; योगैश्च; योगाश्च,
(०१) (१) स सर्व०; स्वधर्म०, राजन्(for राजा), (२) महायशाः (for भवि०), (३) सकलं (for सङ्कुलं), एवेदं कुलं सर्वं; स चेदं सङ्कुलं सर्वं,
(०२) (१) उच्छ्रितो; उत्स्थितो, (२) कालान्त०; क्षत्रान्त०; युगान्त० (for क्षयान्त०), (३) सङ्क्षेपो (सङ्क्षेपे; सङ्क्षये; सङ्क्षेप्ता) हि स सर्वस्य; सङ्क्षेपको हि सर्वस्य; समक्षाय हि सर्वस्य; सङ्क्षेपे स हि सर्वस्य, (४) परिवर्तते,
(०३) (१) गतः (०तैः) क्षुद्रान्, (३) उद्घात०; उद्भूत) (for उत्साद०), (४) सर्व (for सर्वान्),

**मार्कण्डेयः**

**ततश्चोरक्षयं कृत्वा द्विजेभ्यः पृथिवीमिमाम्।****
**वाजिमेधे महायज्ञे विधिवत्कल्पयिष्यति ।। १ ।।**[०१]

**स्थापयित्वा च मर्यादाः स्वयम्भुविहिताः शुभाः ।****
**वनं पुण्ययशःकर्मा जरया संश्रयिष्यति ।**[०२]
**तच्छीलमनुवर्त्स्यन्ति मनुष्या लोकवासिनः ।। २ ।।**[०३]

लक्षालङ्कारः- वनं पुण्ययशःकर्म इत्यत्र जरया वनं संश्रयिष्यति । जनाभावात् प्राकू सर्वत्र पूर्णं वनं ब्राह्मणग्रमैः सम्पूर्य नाशायिष्यतीति भावः ।

**विप्रैश्चोरक्षये चैव कृते क्षेमं भविष्यति ।। ३ ।।**[०४]

**कृष्णाजिनानि शक्तीश्च त्रिशूलान्यायुधानि च ।****
**स्थापयन् विप्रशार्दूलो देशेषु विजितेषु च ।। ४ ।।**[०५]

लक्षालङ्कारः- कृष्णाजिनानि शक्तीश्च इत्यत्र विजितेषु देशेषु विप्रशार्दूलान् याज्ञिकान् ब्राह्मणान् तेषां कृष्णाजिनानि च शक्तीः त्रिशूलान्यायुधानि च स्थापयन् । यथा आयुधादिभ्यः चोरा भीता भवन्ति, तथा कल्क्याज्ञया याज्ञिकान् ब्रह्मणान् तेषां कृष्णानानि च दृष्ट्वा भीता भवन्तीति भावः ।

**संस्तूयमानो विप्रेन्द्रैर्मानयानो द्विजोत्तमान्।****
**कल्की चरिष्यति महीं सदा दस्युवधे रतः ।। ५ ।।**[०६]

(०१)(१) चौरक्षयं; (२) मेध०; मेघो; मधैर्; मेधं(for मेधे), यज्ञैद्; यज्ञं(for यज्ञे) (४) कालयिष्यति;
(०२)(१) च (for स); (२) स्वयम्भूः, तदा; प्रभुः (for शुभाः); (३)ख-वनं, पुनः (for वनं), पुनः(वनं) पुण्ययशः कर्म; (४) जरायां; जरया; विधिवत् (for जरावान्); रमणीयं प्रवेक्ष्यति;
(०३)(१) अनुवत्स्यन्ते; वत्स्यन्ति; वर्त्स्यति; वर्तते; पत्स्यन्ते (for वत्स्यन्ते); (२) लोकभाविनः; लोक (धर्म) चारिणः,
(०४)(३) विप्रां (for विप्रैं), चौरक्षयैशू; चोरक्षयं; एवं चौ(चो)रक्षये जाते; (४) महत्; महा०(for कृते);
(०५)(१) शक्ति च; शत्त्यश्च (for शक्तीं); (२) द्विजं(for विप्रं); (३) (ह)व जितेषु; विहितेषु; विपिनेषु; विविधेषु (for विजितेषु);
(०६)(१) विप्रेन्द्रो; (२) मानयंश्च)(for यानो); (३) कार्किशू; कल्की)(for कल्किशू); चरिष्यति महाबाहुः

हा मातस्तात पुत्रेति तास्ता वाचः सुदारुणाः ।**
विक्रोशमानान्सुभृशं दस्यून्नेष्यति सङ्क्षयम् ।। ६ ।।(०१)

ततोऽधर्मविनाशो वै धर्मवृद्धिश्च भारत।**
भविष्यति कृते प्राप्ते क्रियावांश्च जनस्तथा ।। ७ ।।(०२)

आरामाश्चैव चैत्याश्च तटाकावसथास्तथा।**
यज्ञक्रियाश्च विविधा भविष्यन्ति कृते युगे।(०३)

९५५*अधिकपाठः पुष्करिण्यश्च विविधा देवतायतनानि च ।

ब्राह्मणाः साधवश्चैव मुनयश्च तपस्विनः ।। ८ ।। (०४)

आश्रमाश्चाविपाषण्डाः स्थिताः सत्ये जनास्तदा ।
जायन्तिसर्वभूतानि शुध्यमानानि चैव हि ।। ९ ।।(०५)

लक्षालङ्कारः- आश्रमाश्चाविपाषण्डा इत्यत्र विशेषेण पाषण्डरहिता अविपाषण्डाः ।

सर्वेष्वृतुषु राजेन्द्र सर्वं सस्यं भविष्यति ।। १० ।।(०६)

---

(४) तदा (for सदा);
(०१)(१) (ए)तत् (for (ए)वं); हा तात हा च पुत्रेति; हा मात०स्तात पुत्रेति; हा तात हा भ्रातरिति; (२) तदा (for तास्ता); सुदारुणं; च दारुणाः (for सुदां), (३) विक्रोशमानाः सुबहून्(for सुभृशं); (४) देशान्; शत्रुर्)(for दस्यून्); स क्षयं; संयुगे) (for सङ्क्षयम्);
(०२)(१) तदा(for ततो); विनाशं (ऽ)यं(for वै); (३) युगे (for कृते); (४) तदा; सदा (for तथा);
(०३) (१) आरामांश्चैव; आश्रमां; आश्रमं (for आरामां), चैत्यांश्च, (२) तडाकान्यवटस्तथा; तडाकान्यवटांस्तथा; तडाकानि वटांस्तथा; तडागान्यवटास्तथा; तटागावसथा तथा; तडागावसथास्तथा०; तडागाश्च वटास्तथा;(४) करिं) (for भविं);
(०४) (१) ब्राह्मणाः क्षत्रिया वैश्या; ,
(०५) (१) हत पाखण्डाः; हत (सह)पाषण्डाः, (२) सत्ये तथा; सत्यजनाः; सत्यप्रियाः; सत्यव्रताः; सत्यरताः (for सत्ये जनाः); महाप्रज्ञाः सहप्रजाः (for जनाः प्रजाः); तथा; तदा (for प्रजाः);
(०६)(१) प्रय) जं) ति; जायन्ति (for जास्यन्ति), चैव बीजानि; सर्वभूतानि, जनिष्यन्ते (ति) च बीजानि; जनयिष्यन्ति बीजानि, (२) तप्यं; रोप्यमाणानि; शुध्यं) वर्धं) )(for उप्यं), भारत; सर्वशः; वै तदा; वै सह(for चैव ह); (४) सर्व० सर्वशः सम्भविष्यति;

नरा दानेषु निरता व्रतेषु नियमेषु च ।
जपयज्ञपरा विप्रा धर्मकामा मुदा युताः ।**
पालयिष्यन्ति राजानो धर्मेणेमां वसुन्धराम् ॥ ११ ॥[०१]

व्यवहाररता वैश्या भविष्यन्ति कृते युगे।**
षट्कर्मनिरता विप्राः क्षत्रिया विक्रमे रताः ॥ १२ ॥[०२]

शुश्रूषायां रताः शूद्रास्तथा वर्णत्रयस्य च ॥ १३ ॥

एष धर्मः कृतयुगे त्रेतायां द्वापरे तथा।**
पश्चिमे युगकाले च यः स ते सम्प्रकीर्तितः ।[०३]
सर्वलोकस्य विदिता युगसङ्ख्या च पाण्डव ॥ १४ ॥[०४]

एतत्ते सर्वमाख्यातमतीतानागतं तथा।**
वायुप्रोक्तमनुस्मृत्य पुराणमृषिसंस्तुतम् ॥ १५ ॥[०५]

एवं संसारमार्गा मे बहुशश्चिरजीविना।**
दृष्टाश्चैवानुभूताश्च तांस्ते कथितवानहम् ॥ १६ ॥[०६]

इदं चैवापरं भूयः सह भ्रातृभिरच्युत।**
धर्मसंशयमोक्षार्थं निबोध वचनं मम ॥ १७ ॥

---

(०१)(१) नियता; (अ)भिरता(for निरता); शुभेषु; वृत्तेषु (for व्रतेषु); (३) जप्यं; जाप्यं )(for जपं); (४) कामा मुदान्विताः; काम०मुदा युताः; कामसमायुताः (५), धर्मेण पृथिवीमिमां;

(०२)(१) परा (for रता); (४) विक्रमे (for रक्षणे);

(०३)(१) शुश्रूषण०(for शुश्रूषायां); (४) (ऽ)पि च (for तथा); (५) तु; यः (for च), (६) यश्च ते; यच्च ते; य (त) था ते; यः सत्ये; स तेयं; सततं; स च ते (for यः स ते); परिकीर्तितः; सुप्रकीर्तितं;

(०४) (१) सर्वलोकाश्च, विहिता; कथिता (for विदिता); (२) भारत (for पाण्डव);

(०५)(४) तथा (for मया); (५) ऋषिसंमतं; भि स्तुतं; संस्कृतं;

(०६) (१) समागमे चैव; संसारमार्गोयं (र्गो मे); (२) बहवं) (for बहुशं), चिरजीविनः, (३) दृष्ट्वा )(for दृष्टाश्)्; (४) यान् (for तान्); किं भूयः श्रोतुमिच्छसि;

९५६*अधिकपाठः सर्वमेतद्यथातत्त्वं कथितं तव पार्थिव ।[०१]

धर्मे त्वयाऽऽत्मा संयोज्यो नित्यं धर्मभृतां वर ।

धर्मात्मा हि सुखं राजन्प्रेत्य चेह च नन्दति।[०२]

निबोध च शुभां वाणीं यां प्रवक्ष्यामि तेऽनघ ॥ १८ ॥[०३]

न ब्राह्मणे परिभवः कर्तव्यस्ते कदाचन।**
ब्राह्मणः कुपितो हन्यादपि लोकान्प्रतिज्ञया ॥ १९ ॥[०४]

**वैशम्पायनः**

मार्कण्डेयवचः श्रुत्वा कुरूणां प्रवरो नृपः ।**
उवाच वचनं धीमान्परमं परमद्युतिः ॥ २० ॥[०५]

अधिक -पाठ

कस्मिन्धर्मे मया स्थेयं प्रजाः संरक्षता मुने।

कथं च वर्तमानो वै न च्यवेयं स्वधर्मतः ।[०६]

**युधिष्ठिरः**

एतत्श्रुत्वा मया किं स्यात्कर्त्तव्यं मुनिसत्तम।**
कथं चायं जितो लोको रक्षितव्यो भविष्यति ॥ २१ ॥

---

(०१)(३) धर्मसश्च) क्ष; श्र) यं; धर्मसंशय०बोधार्थं; धनसङ्क्षयमोक्षार्थं; धर्मसंशयहेतोश्च;

(०२)(१) संस्थाप्यो; योक्तव्यो; संस्थेयं (for संयोज्यो); न तेन्यथात्र (था च; थात्मा; था स) विज्ञेयो; (२) धर्मो) (for नित्यं), (३) (अ)भि०मुखं (for हि सुखं); नित्यं; राजन्) (for राजा); धर्म्यादनु हि सुखं राज्यात्; (४) विन्दति (for नन्दति);

(०३) (१) निबोधैतां; धय; धत (for ध च); सुखां (for शुभां); (२) प्रवक्ष्यामि च) (for यां प्रवं); नृप) (for ऽनघ); ,

(०४)(१) ब्राह्मणे न; (२) कथं (for कदां), (३/४) कुपितो; (ऽ)पि रुषा (for रुषितो);

(०५) (२) कुरुराजो युधिष्ठिरः, (३) श्रीमान् (for धीमान्); (४) परमच्युतं; द्युतिमान्नप;,

(०६) (१) कथं (for कस्मिन्); (२) प्रजा; प्रजां (for प्रजाः), मया (for मुने); प्रजानां रक्षणे मुने; (३) (ऽ)हं (for वै); (४) अच्यवेहं (for न च्यवेयं);

**मार्कण्डेयः**

**दयावान्सर्वभूतेषु हितो रक्तोऽनसूयकः ।**
**सत्यवादी मृदुर्दान्तः प्रजानां रक्षणे रतः ।। २२ ।।**

चर धर्मं त्यजाधर्मं पितन्देवांश्च पूजय।(०१)
**प्रमादाद्यत्कृतं तेऽभूत्सम्यग्दानेन तज्जय ।। २३ ।।** (02)

अलं ते मानमाश्रित्य सततं परवान्भव ।(०३)
**विजित्य पृथिवीं सर्वां मोदमानः सुखी भव ।। २४ ।।**

एष भूतो भविष्यश्च धर्मस्ते समुदीरितः ।(०४)
**न तेऽस्त्यविदितं किञ्चिदतीतानागतं भुवि ।। २५ ।।**

तस्मादिमं परिक्लेशं त्वं तात हृदि मा कृथाः ।(०५)
**प्राज्ञास्तात न मुह्यन्ति कालेनापि प्रपीडिताः ।। २६ ।।**(०६)

एष कालो महाबाहो अपि सर्वदिवौकसाम्।**
**मुह्यन्ति हि प्रजास्तात कालेनापि प्रचोदिताः ।। २७ ।।**(०७)

**लक्षालङ्कारः- अपि सर्वदिवौकसाम् इत्यत्र सर्वदिवौकसां प्रजा अपि मुह्यन्ते इति**

---

(०१)(१) यदा च (for दयावान्); (२) हिते(for हितो); युक्तो; रक्षा (for रक्तो); (३) सदा; स्नेहात् (for स्वेषां); सत्यवादी मृदुर्दान्तः; (५) कुरु (for चर); (६) पूजयन्, पितृन्पूर्वाननुस्मर,

(०२) (१) प्रमादो यत्कृतस्; प्रमादं यत्कृते; प्रमादा यत्कृतं, (२) ते(for तज्) तु;

(०३) (३) तु (for ते); दानम् )(for मानम्);
(४) यतवान्; प्रियवाग् )(for परवान्), सततं वै पराजय;

(०४) (३) लोको (for भूतो); भविष्यच्च; भविष्यंश्च,
(४) धर्मं वै; लोकस्ते; लोकस्य (for धर्मस्ते); समुदाहृतः;

(०५) (१)अ-क-घ- नास्त्ययं श्लोकः, मे (for ते), (२) विभो; युधि (for भुवि);
त्रिषु लोकेषु मानद (भारत); प्रत्यक्षं यच्छ नागतं,
(३) इदं (for इमं), इमं च सुपरिं; (४) वृथा तं (for त्वं तात);

(०६) (नाभिप्रचोदिताः; नापि प्रपीडिताः)

(०७) (१) एकः (for एष), महान्नेता; महान्नाजन्; महातेज; महाबाहुर्;

सम्बन्धः ।

मा च तत्र विशङ्काभूद्यन्मयोक्तं तवानघ ।**
आशङ्क्य मद्वचो ह्येतद्धर्मलोपो भवेत्तव ।। २८ ।।(०१)

जातोऽपि(सि) प्रथिते वंशे कुरूणां भरतर्षभ।**
कर्मणा मनसा वाचा सर्वमेतत्समाचर ।। २९ ।।(०२)

लक्षालङ्कारः- जातोऽसि पश्चिमे वंश इत्यत्र पश्चिमे चरमे ।

युधिष्ठिरः

यत्त्वयोक्तं द्विजश्रेष्ठ वाक्यं श्रुतिमनोहरम्।**
तथा करिष्ये यत्नेन भवतः शासनं विभो ।। ३० ।।(०३)

न मे लोभोऽस्ति विप्रेन्द्र न भयं न च मत्सरः ।**
करिष्यामि हि तत्सर्वमुक्तं यत्ते मयि प्रभो ।। ३१ ।।(०४)

वैशम्पायनः

श्रुत्वा तु वचनं तस्य मार्कण्डेयस्य धीमतः ।**
संहृष्टाः पाण्डवा राजन्सहिताः शार्ङ्गधन्वना ।। ३२ ।।(०५)

---

(२) अति सर्व दिवौ; अति सर्वान्दिवौकसः; सर्वेषां त्रिदिवौकसां,
(३) मुहूर्ते; मुह्यन्ते; स्नक्षन्ति; उह्यन्ते (for मुह्यन्ति); तत्र; सर्वाः (for तात);
(४) (अ)भिप्रपीडिताः; (अ)पि प्रचोदिताः; (अ)भिप्रणों,

(०१) (१) स (for मा), ते वै; तत्र (for तेऽत्र); विचारोस्तु; विशङ्का भूद्;
(३) अशङ्क्यं मद्; अशक्यं मद्०; आशङ्क्य मद् (for अतिशङ्क्थ);
(०२)(१) पश्चिमे(for प्रथिते); काले; देशे (for वंशे); (२) कुरुसत्तम (for भरतं );
(०३)(१) मुनिश्रेष्ठ; (४) तथा; यथा; प्रभो; मुने (for विभो);
(०४) (१) ते (for मे), विप्रर्षे (for विप्रेन्द्र), (२) सम्भ्रमः (for मत्सरः), (३) (इ)ह; च(for हि), (४) यत्वयोक्तं (for उक्तं यत्ते), हितं वचः; प्रियं मुने; प्रियं प्रभो(विभो) (for मयि प्रभो);
(०५)(१) च (for तु); (२) भार्गवस्य (for पाण्डं); यशस्विनः (for महां), मार्कडेयस्य धीमतः; धर्मराजस्य धीमतः; (३) संहृष्टाः (for प्रं), ब्राह्मणा (for पाण्डवा);, संहृष्टो हृष्टरोमाभूत्; (४) सहितः (for ता); धन्विना;

**९५९*अधिकपाठः विप्रर्षभाश्च ते सर्वे ये तत्रासन्समागताः ।**

**तथा कथां शुभां श्रुत्वा मार्कण्डेयस्य धीमतः ।****
**विस्मिताः समपद्यन्त पुराणस्य निवेदनात् ।। ३३ ।।**(०१)

आरण्यः ०मार्कण्डेयसमा०(म) स्या भविष्य मार्कडेयसंहिता भविष्य ष्यत् भविष्य ष्यत्, समाप्त युगधर्मकथनं;

अस्मिन् पर्वणि १६३ अध्याये ३३श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि युधिष्ठिरानुशासने त्रिषष्ट्यधिकशततमोऽध्यायः ।। १६३ ।।**

**(मार्कण्डेयसमस्यापर्वणि ऽ अध्यायः)**

## 03- 06- 164 Adhyaya

# १६४. चतुष्षष्ट्यधिकशततमो अध्यायः ।।

**१६४. मार्कण्डेयेन युधिष्टिरं प्रति ब्राह्मणमाहात्म्यप्रतिपादकमण्डूकोपाख्यान कथनारम्भः ।।१।। इक्ष्वाकुवंशजेन परीक्षिन्नामकेन राज्ञा मृगयार्थ वनंप्रविष्टेन उदकादर्शनरूपसमयकरणेन मण्डूककन्यायाः परिणयः ।।२।। राज्ञा समयातिलङ्यतया जले निमज्जनम् ।।३।। तदन्वेषणाय राज्ञा मण्डूकहनने तापसरूपिणा मण्डूकराजेन तन्निवारणेन तस्याः स्वपुत्रीत्वकथनादिपूर्वकं पुनस्तस्मै तस्याः प्रदानम् ।।४।। मार्कण्डेयेन मण्डूकपुत्र्याः पुत्रयोः शलदलयोर्वृत्तकथनपूर्वकं वामदेवमुनिमाहात्म्यकथनम् ।।**

**वैशम्पायनः**

**भूय एव ब्राह्मणमहाभाग्यं वक्तुमर्हसीत्यब्रवीत्**

---

(०१) (१) कथां शुभां, प्राज्ञः प्राज्ञा; प्रज्ञां(for कथां); वचः(for शुभां); स तथा तां कथां श्रुत्वा, (३) सम्प्रपद्यन्त, (४) निबोधनात्; निबोधने )(for निवें);

पाण्डवेयो मार्कण्डेयम् ।। १ ।।

जनमेजय उवाच ।

भूय एव ब्राह्मणानां माहात्म्यं वक्तुमर्हसि ।

पाण्डवानां यथाचष्ट मार्कण्डेयो महातपाः ।[०१]

अथाचष्ट मार्कण्डेयोऽपूर्वमिदं श्रूयतां ब्राह्मणानां चरितम् ।। २ ।।(०२)

अधिकपाठः अपूर्वमिदं श्रूयतां ब्राह्मणानां चरितम् ।;

०श्रूयतां कथयामीदं ब्रह्मर्षीणां पूर्वचरितम् ।*[०३]

**मार्कण्डेयः**

अयोध्यायामिक्ष्वाकुकुलोद्वहः पार्थिवः

परिक्षिन्नाम मृगयामगमत् ।। ३ ।।[०४]

तमेकाश्वेन मृगमनुसरन्तं मृगो दूरमपाहरत् ।। ४ ।।[०५]

अध्वनि जातश्रमः क्षुत्तृष्णाभिभूतश्चैकस्मिन्देशे

नीलं गहनं वनखण्डमपश्यत् ।। ५ ।।[०६]

---

(०१) भूय;एवं (for एव);ब्राह्मणानां माहात्म्यं; ब्राह्मणमाहाम्यं; ब्राह्म०णस्य माहात्म्यं; महाभाग; च माहात्म्यं (for ब्राह्मणम०हाभाग्यं);वक्तम्, भगवान्; भवान्; भगवन्; मम भगवन्०, अर्हति (for अर्हसि), (इ)त्यथ; (अ)थ (for (इ)ति); (इ)त्येर्व ब्रुवतः पाण्डवान्; (इ)त्यनुव (वद)न्पाण्ड०वेयाः; (ए)वं बुवन्पाण्डवान्, पाण्डवो (for पाण्डवेयो),मार्कण्डेयम्;

(०२)अथ, मार्कण्डेयः

(०३) ( अपूर्व इदं; ब्राहाणानां (for ब्राह्मं); पूर्व०,)

(०४) मार्कण्डेय उ (उं); अयोध्याधिपतिर् (for अयोध्यायाम्); कुल उत्पन्नः;कुलोद्वहः (for कुलोत्पन्नः);पार्थिवः;पार्थिवः परिक्षिन्नाम, परीक्षिन् पारीक्षिन्नाम पार्थिवः (for पार्थिवः परिक्षिन्नाम);

(०५) स एको (का)श्वेन, मृगयाम्(for मृगम्); अनुसरन्; अन्वसरत्; अन्वचरत् (for अनुसरन्तं); मृगो, स; तं, दूरतरम् (for दूरम्);उपाहरत्; अन्वहरत्; अथाहरत्; अपासरत्;

(०६) अथ, च, कस्मिंश्चिद्, एक०स्मिन् (for कस्मिंश्चिद्); देशे; दूरे (for उद्देशे); नीलं, नीलं, गहनं वनखण्डम्, नीलं वनं गहनखण्डमपश्यत, तच्चाविवेश; तच्चापि विवेश; तं चाविवेश; राजा विवेश; तद्विवेश; तस्याविशेषतः (for तच्च विवेश);

तच्च विवेश ततस्तस्य वनखण्डस्य मध्येऽतीव

रमणीयं सरो दृष्ट्वा साश्व एव व्यगाहत ॥ ६ ॥[०१]

अथाश्वस्तः स बिसमृणालमश्वायाग्रतो

निक्षिप्य पुष्करिणीतीरे संविवेश।[०२]

ततः शयानो मधुरं गीतमशृणोत् ॥ ७ ॥[०३]

स श्रुत्वाचिन्तयन्नेह मनुष्यगतिं पश्यामि

कस्य खल्वयं गीतशब्द इति ॥ ९ ॥[०४]

अथापश्यत्कन्यां परमरूपदर्शनीयां

पुष्पाण्यवचिन्वन्तीं गायन्तीं च ।[०५]

अथ सा राज्ञः समीपे पर्यक्रामत् ॥ ९ ॥[०६]

---

(०१)ततस्, तस्याविशेषतो; स प्रविश्य (for ततस्तस्य); वनषण्डस्य; वनखण्डस्य; (अ)वगाहत (for व्यगां), सोऽश्वादवारोहत (for साश्व एव व्यगाहत);

(०२) (१)क-तथाऽश्वस्थस्सहतृणान्यश्वस्य दत्वा स्वयमाविशत्।

ख- स स्नातस्सन् तृणान्यश्वस्य दत्त्वा सुखमाविशत् ।

ततश्शयानः- घ- तथाऽश्वस्थसक्स तृणान्यश्वस्य दत्त्वा स्यमाविशत्,

तथाश्वस्तः सन् (for स), अथाश्वं तस्मिन्सरसि बध्वा (for अथाश्वस्तः स), बिसमृणालानि (for मृणालम्); बिसमृणालान्यश्वस्याग्रतो, अश्वायाग्रे; अश्वाया (श्वस्या)ग्रतो (for अश्वस्याग्रे), निक्षिप्तं; दृष्ट्वा; तीरं, उपाविशत्; संविवेश; शयनमाविशत्; शयनमभजत (for समाविशत्), बिसतृणान्यश्वस्य दत्वा स्वयमाविशत्;

(०३) तत्र (for ततः),शयानो, स, गतिम् (for गतिशब्दम्);

(०४) स, तत्, श्रुत्वा च (for स श्रुत्वा);मानुषगतिं; मनुष्यभूमिं, प्रपश्यामि (for पश्यामि); कस्य, तत्; नु, इति,

(०५) यथा (for अथ), कन्यां, परमरूप, परां, परमं दर्शनीयां; परमं रूपं दर्शयन्तीति; परमरूपं दर्शयन्ती; परमरूपसम्पन्नां दर्शनीयां, विचिन्वं (०न्व)तीं; (अ)वचिन्वन्तीं;, (ए)व विचिन्वन्ती; (अ)पचिन्व(०न्वं)तीं; (अ)पि विचिन्वन्तीं, गायन्तीं गायन्तीं, नृत्यन्ती, च,

(०६)अथ, सा च; साथ, पर्याक्रमत्; पर्यक्रमात्; पर्याक्रामत्, अथ राज्ञः समीपे सापा(सा पर्या) क्रामत्; अथ तस्य राज्ञः समीपे सा पर्याक्रमत् ,

तामब्रवीद्राजा कस्यासि भद्रे का वा त्वमिति ।। १० ।।[०१]

सा प्रत्युवाच कन्या स्मीति ।। ११ ।।[०२]
तां राजोवाचार्थी त्वयाहमिति ।। १२ ।।[०३]

अथोवाच कन्या समयेनाहं शक्या त्वया लब्धुं नान्यथेति ।। १३ ।।[०४]
राजा तां समयमपृच्छत् । कः समय इति ।। १४ ।। [०५]
कन्योवाच नोदकं मे दर्शयितव्यमिति ।। १५ ।।[०६]
स राजा तां बाढमित्युक्त्वा तामुपयेमे
कृतोद्वाहश्च राजा परिक्षित्क्रीडमानो
मुदा परमया युक्तस्तूष्णीं सङ्गम्य तया सहास्ते ।। १६ ।।[०७]

ततस्तत्रैवासीने राजनि सेनान्वगच्छत्।
सा सेनोपविष्टं राजानं परिवार्यातिष्ठत् ।। १७ ।।[०८]

पर्याश्वस्तश्च राजा तयैव सह शिबिकया

प्रायादवघोटितया स स्वं नगरमनुप्राप्य

---

(०१)(१) (१० तमवाक्ये कसक्यत्वमिति जपत्रयंघकोशे न),अपृच्छत् (for अब्रवीत्) ;राजा, स, कासि(for कस्यासि), सुभगे, भद्रे(for सुभगे), त्वम्, का; का वा; कस्य, त्वम्, सुता(for इति),
(०२) सा, सा तं; ततस्तं(for सा), इति, राजानं
(०३) तां, अब्रवीत्(for उवाच), सम्बन्धी(for अर्थी)
(०४)समये उवाच शक्या त्वया, त्वया लब्धुं शक्या
(०५) तां राजा सविस्मयम् (for समयम्), अपृच्छत्, कः समय इति
(०६) उवाच, ततः, इदम्, अब्रवीत् (for उवाच), नोदकं मे; उदकं मा (for उदकं मे न),
(०७) राजा, राजा, तां, बाढम्, इत्युदकं न दर्शयामि, तां०, उपयेमे । कृतोद्वाहश्च परीक्षित्कीडमानो मुदा परमया युक्तस्तूष्णीं(तूष्णीं), समागम्य, सङ्गम्य (for समागम्य), तया सह, तत्रैव, तया सह, तत्र(तत्र), तस्थौ(for (आ)स्ते),
(०८) तत्र, ततम्, तत्रैव, (ए)व, (आ)सीने, च, राजनि, सा, सेना अनुप्रा, अभ्य (for अन्व), सा सेनोपविष्टं; पदेन पदं; पदं पदेन; पदेनानुपदं समासेनोपविष्टं(for पदेनानुपदं), दृष्ट्वा, दृष्ट्वा, गत्वा(for दृष्ट्वा), दृष्ट्वा, च ,राजानं परिवार्य, अवतिष्ठत्; उपतिष्ठत्; अतिष्ठत; अवातिष्ठत; अवतिष्ठत; उपातिष्ठत(for अतिष्ठत्),

रहसि तयासहास्ते ।। १८ ।।(०१)

तत्राभ्याशस्थोऽपि कश्चिन्नापश्यदथ

प्रधानामात्योऽभ्याशचरास्तस्य स्त्रियोऽपृच्छत्।

किमत्र प्रयोजनं वर्तते इत्यथाब्रुवंस्ताः स्त्रियः ।। १९ ।।(०२)

अपूर्वमिव पश्याम उदकं नात्र नीयत ।। २० ।।(०३)

इत्यथामात्योऽनुदकं वनं कारयित्वोदारवृक्षं

बहुपुष्पफलमूलं तस्य मध्ये मुक्ताजालमयीं पार्श्वे

वापीं गूढां सुधासलिललिप्तां स

रहस्युपगम्य राजानमब्रवीत्।।

वनमिदमुदारकं साध्वत्र रम्यतामिति ।। २१ ।।(०४)

---

(०१)(१)ख-तयैव सब शिबिकया स्वनगरं प्राप्य तया सह रममाणो न कांचिदन्यां स्त्रियमपश्यत् । अथामात्यस्तस्याभ्याशचराः स्त्रियोऽपृच्छ्। किमत्र प्रयोजनं वर्तत इति । अथातोऽब्रुवन् अजूर्वंस्त्रिया सममाणमिव पश्यामः। उदकं नात्र नेतव्यमिति अथामात्योऽनुदकं वनं कीरयित्वा रह उपलभ्य राजानमिदमब्रवीत् । अनुप्रा, पर्या, अथ, पर्याश्वस्तश्च, राजा, स, तथैव, शिबिकायां, साविघाटितया; अवघो(वधा०; विध)टि; अविषादस्तया(तयो); हर्षाविष्टस्तया (for अवि० घाटितया), शश्वन्; स(स) स्वं (for स्व०),अभि (for अनु), तया सह रहसि, सह, रमन्, रमयन्; रममाण; वसन् (for रमन्), (तमन्वा)स्ते (for रमन्नास्ते), किंचिद् (for किश्चन), तत्राभ्याश (स)स्थोपि कश्चि (०श्चित्त) न्नापश्यत्; नान्यां काश्चनापश्यत्; न कदाचिदपश्यत्; स नान्यं कश्चनापश्यत्; न कांश्चिदपश्यत्(for नान्यत्किश्चनापश्यत्),

(०२)(१) अ-शरद्युपागम्य राजानमब्रवीत् । प्रधानो नामामात्यसू; प्रधानोमात्यसू (नो नान्यसू), तस्य, तस्य अभ्याश, अभ्यन्तरः; अभ्याशपराः, (ऽ)न्वपृच्छत् (for ऽपृच्छत्),

(०३) स्त्रियम्, अपूर्वा०मिह पश्यामस्तां च राजा समयो नायं (मयेनो) भुङ्क्ते यथोदकं न दर्शयितव्यमिति(for अपूर्वमिव०नीयत इति), नात्रानीयत (for नात्र नीयत), इति,

(०४) अथ, स तथा वचनं श्रुत्वा (for अथामात्योऽनुदकं), सदनं; नाम(for वनं), बहुमूलपुष्पफलं, (उ)दारवृक्षबहुमूलपुष्पफलं; वृक्षं (वृक्ष०) बहुपुष्पस्तफलं; चारुवृक्षम्बहुमूल० फलं; ०वृक्षं बहुपुष्पफलं; वृक्षं बहुपुष्प (ष्पं)फलमूल; (उ)दारपुष्पबहुफ मूलं; वृक्षफलमूलफलं, पुष्पं; वृक्षबहुमूलफलपुष्पफलं; वृक्षबहुमूलफलं, फलं तस्य मध्ये मुक्ताजालमयीं पार्श्वे वापीं सुगूढां सुधोपलिप्तागः;

तस्य भुवनमध्ये मुक्तजालमयीं सुधोपलिप्तां वापीं कारयित्वा;

स तस्य वचनात्तयैव सह देव्या तद्वनं प्राविशत् ।। २२ ।।

स कदाचित्तस्मिन्कानने रम्ये तयैव सह व्यवाहरदथ क्षुत्तृष्णार्दितः

श्रान्तोऽतिमुक्तकागारमपश्यत् ।। १३ ।।(०१)

तत्प्रविश्य राजा सह प्रियया सुधाकृतां विमलां सलिलपूर्णां वापीमपश्यत् ।। १४ ।।(०२)

दृष्ट्वैव च तां तस्याश्च तीरे सहैव तया देव्यावातिष्ठत् ।। १५ ।।(०३)

अथ तां देवीं स राजाब्रवीत्साध्ववतर वापीसलिलमिति ।। २६ ।।(०४)

सा तद्वचः श्रुत्वावतीर्य वापीं न्यमज्जन्न पुनरुदमज्जत्।। २७ ।।(०५)

तां स मृगयमाणो राजा नापश्यद्वापीम् अपि निःस्राव्य

---

तस्या मध्येतिमुक्तजालमयीं पार्श्वे वापीं सुगूढां सुधोपलिप्तां स;

तस्य मध्ये मुक्ताजालमयीं पार्श्वे वापीं गूढां सुधा सलिल (सुधोप) लिप्तां स;

तस्य वनमध्ये मुक्ताकार० मयीं सुधोपलिप्तां वापीं कारयित्वा, सरसि; शरदि; सपदि; रह (for रहसि), (उ)पागम्य; उपलभ्य, अब्रवीत्, इदम् ०इदम् (उ)दारम्, अचौरम् (for उदारम्), अनूदकं ० साधु, त्वया; सह तया (for साध्वत्र), (अ)त्र, गम्यताम्; (आ)गम्यताम् (for रम्यताम्),

(०१)तस्यैव (for तस्य), (ए)व, तद्, तस्मिन्, कानने; रम्ये (for वने), रम्ये, कानने(for रम्ये), सह, व्यहरत्; विहरन्; व्यवाहरत्; व्यहरन्, अतिमात्रम्, अतिमुक्त०कागार(अतिमुक्तकगृह); मणिमुक्तागार (for अतिमुक्तागार)

(०२) तत्, स, तं(for तत्), प्रविश्य च (for तत्प्रविश्य), राजा, राजा, स सह, प्रियया सह, सुधाकृतां; सुधातलां सुकृतां; वसुधातले सुकृतां; सुधाधवलितां; सुसंस्कृतो (वसुधातल० कृतां); साधुसरसि, विमलां सलिलपूर्णां; विमलसलिलसम्पूर्णां, सुधातल० कृतविमलसलिलपूर्णां(०विमलसम्पूर्णां),

(०३)(ए)व, च, तां, वापीं; तु, एव च(for एव), एव, तु, तयैव सह(for सहैव तया), देव्या चातिष्ठत्; व्यतिष्ठत; (अ)तिष्ठत; (अ)वतिष्ठत्; (अ)वा०तिष्ठत्; (अ)वतिष्ठत; (अ)तिष्ठत,*/

(०४)कान्तां(for तां), देवी, स राजा देवीम्; स राजा तां देवीम्; राजा तां देवीम्(for तां देवीं रा राजा), अपृच्छत् (for (अ)ब्रवीत्), साधु, प्रिये, साध्व्यवतर,

(०५)(१) घ- ( न पुनरुदकादुदमज्जत् इति वाक्यं घकोशे न), सा, च तस्य(for तद्०), वचनं(for वचः), वाप्यां(for वापीं), न्यमज्जत; तां मज्जत् (for न्यमज्जत्), न पुनरुदमज्जत, न, सा(for न), न, च, पुनद्, उदकाद्, उन्मज्जत्; उन्ममज्ज (for उदमज्जत्),

मण्डूकं श्वभ्रमुखे दृष्ट्वा क्रुद्ध आज्ञापयामास स राजा ।
सर्वत्र मण्डूकवधः क्रियतामिति यो मयार्थी
स मां मृतमण्डूकोपायनमादायोपतिष्ठेदिति ।। २८ ।।(०१)

लक्षालङ्कारः- वापीमपि निस्स्राव्य इत्यत्र निस्स्राव्य उदकस्रवणं कारयित्वा ।

अथ मण्डूकवधे घोरे क्रियमाणे दिक्षु
सर्वासु मण्डूकान्भयमाविवेश।।
ते भीता मण्डूकराज्ञे यथावृत्तं न्यवेदयन् ।। २९ ।।(०२)
ततो मण्डूकराट्तापसवेषधारी
राजानमभ्यगच्छदुपेत्य चैनमुवाच ।। ३० ।।(०३)

**उपेत्यचैनमुवाच**

मा राजन्क्रोधवशं गमः प्रसादं कुरु नार्हसि
मण्डूकानामनपराधिनां वधं कर्तुमिति ।। ३१ ।। (04)

श्लोकौ चात्र भवतः

मा मण्डूकान्जिघांस त्वं कोपं सन्धारयाच्युत।**

(०१) तां, तां, स, राजा, अथ राजा तां देवीं मृगीयमाणः(for तां मृगयमाणो राजा), न, ताम्; च, अथ (for अपि), निश्राव्य, निःश्राव्य, निस्राव्य, मण्डूकाज्; मण्डूकांश्च; मण्डूकं च (for मण्डूकं), भ्रमरमुखं; भ्रममुखे; भ्रमन्मुखे; सेतुमुखे; भ्रमुखे; भूमद्रेखे; भूमामुखेन(for श्वभ्र), क्रुद्ध, अथ; अथ राजा, क्रुद्ध(), परितोवलोक्य परिचरन्, आज्ञापय० मास, स(स) राजा, सर्व०, सर्वत्र (for सर्व०), भो वीराः सर्वत्र मण्डूकवधं क्रि०, ममार्थाः (अ)र्थी, अ०(for स), स, मां, मृतकैद्, मण्डूकैर्, मण्डूकैर्, उपायनैर्, मण्डूको०पायनैद्; मण्डूकवधार्थैरुपायैद् (for मण्डूकैरुपा), मृतमण्डूकोपायनमादाय (० पायनैद् आदाय) (for मृतकैर्म० र्माम्),
(०२)एवं(for अथ), घोरे, मण्डूकान्, वधाद्, आविवेश(for आविशत्), अथ (for ते), मण्डूकाः स्वां (स्व) राज्ञे; मण्डूक० राजाय (for मण्डूकराज्ञे), यथा०; यथावृत्तं, निवेदयन्; प्रत्यभ्यवेदयन् (for न्यवेदयन्),
(०३)अथ(for ततो), मडूकराजा मण्डूकराट्, तेषां वचःश्रुत्वा, अभ्यगच्छत; अध्यगच्छत्; अगच्छत्,
(०४)(१) घ-घउपेत्य चैनमुवाच, इति वाक्यं धकोशे न, उत्पत्य(for उपेत्य), चोवाच (for उवाच), मा, मा वशं, नः प्रसादं, नार्हसि कर्तुं, अर्हति(for इति),

प्रक्षीयते धनोर्द्रेको जनानामविजानताम् ।। ३२।।[०१]

प्रतिजानीहि नैतांस्त्वं प्राप्य क्रोधं विमोक्ष्यसि।**
अलं कृत्वा तवाधर्मं मण्डूकैः किं हतैर्हि ते ।। ३३ ।।[०२]

लक्षालङ्कारः- प्रतिजानीहि नैतान् इत्यत्र एतान् मण्डूकान् प्रतिहन्मीति न प्रतिजानीहि । प्राप्य तव प्रियामेव प्राप्य वृथा प्राणिहिंसाजनितं तव वधम् अलं कृत्वा भूषणं कृत्वा ।

तमेवंवादिनमिष्टजनशोकपरीतात्मा राजाथोवाच ।**
न हि क्षम्यते तन्मया हनिष्याम्येतानेतैर्दुरात्मभिः प्रिया मे भक्षिता सर्वथैव मे वध्या मण्डूका नार्हसि विद्वन्मामुपरोद्धुमिति ।। ३४ ।।[०३]

स तद्वाक्यमुपलभ्य व्यथितेन्द्रियमनाः प्रोवाच

प्रसीद राजन्नहमायुर्नाम मण्डूकराजो

मम सा दुहिता सुशोभना नाम।।

तस्या हि दौः शील्यमेतद्बहवस्तया

राजानो विप्रलब्धाः पूर्वा इति ।। ३५ ।।[०४]

---

(०१)(१)जिघांसीसू् (for जिघांस);(२) क्रोधं (for कोपं);(३) प्रक्षीयन्ति; प्रक्षिपन्ति; प्रक्षीयति, च धर्माम्यो; वधाद्रेका (को); धनाग्रे को;(४) परि(प्रति०) (for अवि),

(०२)(१) क-ख-घ-नैवान्तं, नैवान्तं; नैनांस्त्वं, तत्वत० स्तान्परीक्ष्याथ;(२) ततः (for प्राप्य);क्रोधाद्; कोपं (for क्रोधं);विमोक्ष्यसि;(३) (अ)थ वा धर्मं; वधं घोरं (for तवाधर्मं);(४) किं हितैर्; हिंसितैद्; किं हता, हि तैः(for हि ते), इति,

(०३) (१) ख-एतैर्हि दुरात्मभिः प्रिया मे भक्षिता, तस्मान्नार्हरि विद्वन्मामुपरोद्दमित् ।। तमेवं ० तात्मा, इष्टजनावियोगशोकपरीता(तान्तरा)त्मा; शोकपरी० तान्तरात्मा०, राजा, स, प्रत्युवाच; (अ)थोवाच; (उ)वाच (for प्रोवाच), न हि क्षाम्ये । न हि क्षाम्ये (for न हि ज्ञयते), क्षा(क्ष)म्यमेतन्; क्षाम्यते तन् (for क्षम्यते तन्), तत् मया, एतैट्, हि, स्त्री (for प्रिया मे), मं, स्त्री, भक्षिता, इति, सर्वथैव, अतः (ए)व, वध्या मे,

(०४)(१)ख-स चोवाचाहमायुर्नाम मण्डूकराजः। मम सा दुहिता शोभना। तस्या दौश्शील्यमेतत् । बहवो हि तया विप्रलब्धपूर्वा इति, प्रत्युवाच (for प्रोवाच), नाम, सा मम, शोभना; साधु शोभना(for सुशो), तस्या, हि, एतत्, महत्, हि तया (राजानम्), पि (for हि), हि, राजा० नम्, राजानः पूर्वा, राजानः तया, विप्रलब्धाः पूर्वम्(लब्धपूर्वा); लब्धाः पूर्वा (पूर्वा); प्रलब्धपूर्वा

तमब्रवीद्राजा तया समर्थी सा मे दीयतामिति ।। ३६ ।।(०१)

अथैनां राज्ञे पितादादब्रवीच्चैनामेनं राजानं शुश्रूषस्वेति ।। ३७ ।।(०२)

स एवमुक्त्वा दुहितरं क्रुद्धः शशाप यस्मात्त्वया

राजानो विप्रलब्धा बहवस्तस्मादब्रह्मण्यानि तवापत्यानि

भविष्यन्त्यानृतिकत्वात्तवेति ।। ३८ ।।(०३)

स च राजा तामुपलभ्य तस्यां सुरतगुण-

निबद्धहृदयो लोकत्रयैश्वर्य-मिवोपलभ्य हर्षेण

बाष्पकलया वाचा प्रणिपत्याभिपूज्य

मण्डूकराजमब्रवीदनुगृहीतोऽस्मीति ।। ३९ ।।(०४)

स च मण्डूकराजो दुहितरमनुज्ञाप्य यथागतमगच्छत् ।। ४० ।।(०५)

अथ कस्यचित्कालस्य तस्यां कुमारास्त्रयस्तस्य

---

(०१)राजा, या सा तव दुहिता; सा ते सुता; या सा, तयास्कयहमर्थी; तया० हमर्थी; तयाप्यर्थी; तया ममार्थी, प्रदीयताम् (for दीयताम्),

(०२) तथा (for अथ), अथ, राज्ञो वाक्यं मण्डूकराजा श्रुत्वा हृष्टोपि, एनाम्, अर्थिने राज्ञे, सुताम् (for पिता), ह्यदात्; दद्यात्; अदत्; अन्वददा(द)त्; ददौ; अददात् (for अदात्), अब्रवीचू, इदं; वाचं, चैनाम्, चैताम्(for चैनाम्),एनं, सुशोभने, एनं, एतं (for एनं), राजानं,

(०३) स, ताम्, एवमुक्त्वा (for उवाच), सम०न्युश्चोवाच (for स उवाच), दुहितरं, क्रुद्धः शशाप; सुशोभने, राजानो बहवस्त्वया (for त्वया राजानो), बहवः त्वया, विप्रलब्धाः राजानो, अब्राह्म, ष्यन्ति, इति, (आ)((अ))नृतिकत्वात्; (अ)नृत वादिनम्; (आ)नृत, च (for तव),

(०४) (१) ख-तामुपलभ्य तस्यां निबद्धहृदयो लोकत्रयैश्वर्यमुपलभ्येव प्रहॉष्टः यथार्हं संपूज्य मण्डूकराजानमब्र०ीदनुगृहोतोऽस्मि ।। च, राजा, उपा० लभ्य, तस्यां लभ्य, तस्याः सुतगुणबद्धहृदयः; सुतगुणनिब; सुरत०निब, सा च राजानमुपलभ्य सुतशतनिबद्धहृदया, इव, उपलब्ध इव (for इवोपलभ्य), हर्ष पत्य, हर्षेण बाष्प०; हर्षा०ष्पाकुलया; हर्षाद्बाष्प; हर्षबाष्पसन्दिग्धया, (अ)भिपूज्य, (अ)भिसम्पूज्य; यथार्हं सम्पूज्य; सुपूज्य च (for (अ)भिपूज्य), मण्डूकं, च, मण्डूक०राजम्; तम् (for मशडूकराजानम्), इदम् अब्रवीत, मण्डूकराज भवता अनुगृही, इति,

(०५) च, मण्डूकराजा, दुहितरम् (for जामा), अनुज्ञाप्य, राजानं च, अपृच्छत्

राज्ञः सम्बभूवुः शलो दलो बलश्चेति ।। ४१ ।।[०१]

ततस्तेषां ज्येष्ठं शलं समये पिता राज्येऽभिषिच्य

तपसिधृतात्मा वनं जगाम ।। ४२ ।।[०२]

अथ कदाचिच्छलो मृगयामनुचरन्

मृगमासाद्य रथेनान्वधावत् ।। ४३ ।।[०३]

स तथोक्तः सूतो राजानमब्रवीत्।

मा क्रियतामनुबन्धो नैष शक्यस्त्वया मृगोऽयं ग्रहीतुं

यद्यपि ते रथे युक्तौ वाम्यौ स्यातामिति ।। ४४ ।।[०४]

ततोऽब्रवीद्राजा सूतमाचक्ष्व मे वाम्यौ हन्मि च त्वामिति।। ४५ ।।[०५]

लक्षालङ्कारः- युक्तौ वाम्यौ स्याताम् इत्यत्र वामदेवऋषिसम्बन्धिनौ अश्वौ । मा क्रियतामनुबन्ध इत्यत्र अनुबन्धः निर्बन्धः ।

स एवमुक्तो राजभयभीतः सूतो

---

(०१) गतस्य (for कालस्य), तस्यां, तस्यां (for तस्यां), राज्ञस्त्रयः कुमाराः; राज्ञः कुमारास्त्रयः (for कुमारास्त्रयस्तस्य राज्ञः), ते; तस्यां(for तस्य), बभूवुः(for सम्बभूवुः), दलो मल; दलो वल; लवो दल (for दलो बल),

(०२) श्रेष्ठं (for ज्येष्ठं), शलं, वलं(for शलं), समये, समाहूय (for समये), पिता राज्ये, तदा(for पिता), तपसे (for तपसि), यतात्मा(for धृ),

(०३)अनुचरन्; अगमत् (for अचरत्), च, (अ)नासाद्य (for (आ)साद्य), (अ)धावत् (for (अ)न्वधा), सूतं चोवाच शीघ्रं मां वहस्वेति च, प्रोवाच (for चोवाच), शीघ्रं अब्रवीत, शीघ्रं मां वहस्वेति, मां, आवहस्व; वाहयस्व; संवहस्व; वाहय (for वहस्व),

(०४)(१)ख- नैषशक्यस्त्वया मृगो गॉहीतुं यति रथे युक्तौ वाम्यौ स्याताम् । ततोऽब्रवीद्राजा क्व सूताचाक्ष्व वाम्यौ सएनमु - श्चोपाचस्यौ ।, अब्रवीत्; स; स तथोक्तः, स, हि, एवं; यथा (for तथा), सूतो, स, न (for मा), स न; न स (for नैष), मृगो, मृगो ग्रहीतुं, मृगो, ० यं०, प्रग्रहीतुं (for ग्रहीतुं), यदि०(अ)पि, न (for (अ) पि), रथ० (for रथे), वाम्यौ, शीघ्रौ वेगेन गतुमशक्तौ (for स्यातामिति),

(०५) शलः पुनःसूतमुवाच (for ततोऽब्रवीद्राजा), सूत(for सूतम्), मे वेगवन्तौ (for मे), वाजिनौ (for वाम्यौ), च (for वा), हन्मि च त्वा पृच्छामीति; त्वा पृच्छामि; कमिह पृच्छामीति (for हन्मि वा त्वामिति), इति, कस्य तौ वाम्यौ,

वामदेवशापभीतश्च सन्नाचख्यौ राज्ञे।
वामदेवस्याश्वौ वाम्यौ मनोजवाविति ।। ४६।।(०१)

अधिकपाठः(९६३)*

ततः पुनः स राजा खड्गमुद्यम्य शीघ्रं कथयस्वेति
तमाह हनिष्ये त्वामिति।। स तदाह राजभयभीतः सूतः ।

अथैनमेवं ब्रुवाणमब्रवीद्राजा वामदेवाश्रमं प्रयाहीति ।। ४७ ।।(०२)

स गत्वा वामदेवाश्रमं तमृषिमब्रवीत्।
भगवन्मृगो मे विद्धः पलायते सम्भावयितुम्
अर्हसि वाम्यौ दातुमिति।। ४८ ।।(०३)

तमब्रवीदृषिर्ददानि ते वाम्यौ कृतकार्येण भवता।।
ममैव वाम्यौ निर्यात्यौ क्षिप्रमिति ।। ४९ ।।(०४)

स च तावश्वौ प्रतिगृह्यानुज्ञाप्य ऋषिं प्रायाद्वामी-
प्रयुक्तेन रथेन मृगं प्रतिगच्छंश्चाब्रवीत्सूतम्
अश्वरत्नाविमावयोग्यौ ब्राह्मणानां नैतौ प्रतिदेयौ

---

(०१) स, राज्ञो; राज्ञा (for राज०), ०भीतः, सूतो, शापभयभीतः (for शापभीतः), च, सन्, (आ)सन्नवचख्यौ; (अ)स्योपाचख्यौ, (एर)वमब्रवीत; साचख्यौ (for सन्ना० चख्यौ), राज्ञे०, राज्ञे (राज्ञे) आचख्यौ,
(०२) अथैन अब्रवीद्, एवं ब्रुवाणमू, अब्रवीद्राजा; राजा, वामदेवाश्रमाय, प्रयाहि (for याहि),
(०३) सङ्गतं(for स गत्वा), वामदेवाश्रमं पलायते । तं, वामदेवाश्रमं, तम्, तम् ऋषिं, तमृषिम्; ऋषिम्, मृगो, मृगो मया, मे(for मया), मया विद्धो मृगः मृगोयमाविद्धः(for मृगो मया विद्धः), तं स गतं (for तं), सम्भावयितुम् (for सम्भावयेयम्), अर्हसि, त्वम्, अर्हसि इति, मे०, चाश्वौ (for वाम्यौ),
(०४) अब्रवीत् ऋषिः ददामि (for ददानि), ते मे (for ते), कृतकार्येण भवता ममैव, कृत्वा (for कृत०), कार्येण, त्वया, पुनः; तु पुनः(for भवता) निर्यात्यौ, वाम्यौ शीघ्रम् (for क्षिप्रम्), निर्यातयितव्याविति (०वश्वौ); निर्यातव्याविति; निर्यातयितव्यौ; निर्यातितव्यौ; निर्यात्याविति (for निर्यात्यौ क्षिप्रमिति), पुनरिमौ प्रत्यानयितव्याविति (for कृत ०क्षिप्रमिति),

वामदेवायेत्युक्त्वा[०१]मृगमवाप्य स्वनगरमेत्याश्वा-

वन्तःपुरेऽस्थापयत् ।। ५० ।।[०२]

अथर्षिश्चिन्तयामास तरुणो राजपुत्रः कल्याणं

पत्रमासाद्य रमते न प्रतिनिर्यातयत्यहो कष्टमिति ।। ५१ ।।[०३]

स मनसा विचिन्त्य मासि पूर्णे शिष्यमब्रवीत्।

गच्छात्रेय राजानं ब्रूहि यदि

पर्याप्तं निर्यातयोपाध्यायवाम्याविति ।। ५२ ।।[०४]

स गत्वैवं तं राजानमब्रवीत्तं ।। ५३ ।।[०५]

राजा प्रत्युवाच राज्ञामेतद्वाहनमनर्हा

ब्राह्मणा रत्नानामेवंविधानां किं ब्राह्मणानाम्

अश्वैः कार्यं साधु गम्यताम् ।। ५४ ।।[०६]

---

(०१)(१) ख-यमिहावयो - प्रदेयौ वामदेवायेति तं मृगमवाप्य नगरमेत्या - त्, तथा (for स च), च, तदा (for च), तावश्वौ, त्वश्वौ (for तावश्वौ), प्रगृह्यापि (for प्रतिगृह्य), (अ)नुज्ञाप्य चर्षि, च, (ऋ)षि, प्रायाद्, राजा, वाम्ययुक्तेन (वामीसंयुक्तेन); वामी(०म्य०; मि)०प्रयुक्तेन; वाजि(वामी०; वामि)युक्तेन, रथेन, इति, यत्र स मृगः (मृगं प्रति), तं च (तत्र) प्राप्य (for गच्छंश्च), सूत(for सूतम्), अश्वरत्नद्वयमिहावयोर्यो॑ यम् । ब्राह्मणाय (for अश्वरत्ना ०ब्राह्मणानाम्) ब्राह्मणानाम्, इति, प्रदेयौ (for प्रतिदेयौ), (इ)ति,

(०२) एवम्; एवमुक्त्वा, मृगम्, तं, मृगमवाप्य, स्व०अभ्येत्य(for एत्य), अश्वौ, स्थापयामास(for स्थाप),

(०३) (१) क-ख-घ- अश्वरत्रमासाद्य, अथर्षिश्चिन्तयामास । ० स तरुणो(for तरुणो), राजपुत्रकाः कल्याणं पुत्र; कल्याणं यान; कल्याणं वाहन; कल्याणरत्नं पुत्र; कल्याणमश्वरत्न; कल्याणपात्र, न, वाम्यौ, मे, मे, वाम्यौ, वाम्यौ दातुमिति । तमब्रवीदृषिर्ददामि ते वाम्यौ, प्रति०प्रतियातयति; निर्यातयेदिति (for प्रतिनिर्यातयति), यति, अश्वौ,

(०४) मनसा, म्र, विचित्य; विनिश्चित्य (for निश्चित्य), मासे (for मासि), पर्याप्तिर्, पर्याप्तं, तदा; कायं तर्हि, निर्यातनीयौ (for निर्यातय); (उ)पाध्यायाय वाम्यौ(य आचष्ट) (for (उ)पाध्यायवाम्यौ), (इ)ति,

(०५) स, (ए)नं; (ए)व (for (ए)वं), तं, तं राजानम्,

(०६)तं राजानं; स राजा तं (for तं राजा), (उ)वाच (for प्रत्यु०), वाहनम्, अर्हं, अनहा राजानमू, विधानामू, इति, किं च न; न(न) किञ्चिदू (for किं च)। च कार्यमश्वैः प्रति, इति,

स गत्वैतदुपाध्यायायाचष्ट ।। ५५ ।।(०१)

तच्छ्रुत्वा वचनमप्रियं वामदेवः क्रोधपरीतात्मा स्वयमेव राजानमभिगम्याश्वा र्थमचोदयन्न चाददद्राजा ।। ५६ ।।(०२)

**वामदेवः**

प्रयच्छ वाम्यौ मम पार्थिव त्वं कृतं हि ते कार्यमन्यैर(माभ्याम)शक्यम्।
मा त्वा वधीद्वरुणो घोरपाशैर्ब्रह्मक्षत्रस्यान्तरे वर्तमानम् ।। ५७ ।।(०३)

लक्षालङ्कारः- ब्रह्मक्षत्रस्यान्तरे वर्तमानः इत्यत्र ब्रह्मक्षत्रस्येति द्वन्द्वैकवद्भावः । ब्रह्मक्षत्रयोः अन्तरे भेदे विरोध इति यावत् ।

**राजा**

अनड्वाहौ सुव्रतौ साधु दान्ता-
वेतद्विप्राणां वाहनं वामदेव ।
ताभ्यां याहि त्वं तत्र कामो महर्षे
छन्दांसि वै त्वादृशं संवहन्ति ।। ५८ ।।(०४)

लक्षालङ्कारः- छन्दांसि वै त्वादृशं संवहन्ति इतस्ततश्च प्रापयन्ति । दैवबलादेव भवतां सञ्चारः न तु यानबलादिति भावः ।

**वामदेवः**

छन्दांसि वै मादृशं संवहन्ति लोकेऽमुष्मिन्पार्थिव यानि सन्ति।

---

(०१)एतद् (for एवम्), (आ)चचक्षे (for (आ)चष्ट),
(०२) तच्छ्रुत्वा, तदा, भूयो(for अप्रियं), वामदेवश्च, कोप०; क्रोधपरीतान्तरात्मा० अभिचोदयन्नुवाच (for अभ्यचोदयत्), न चादाद्राजा, अचोदयत् (for अभ्यचो०), (अ)ददद्; अददाद् (for (अ)दाद्),
(०३) (२) कार्य०मनन्यशक्यं; कार्यमाभ्यामशक्यं; कार्यमन्यैर्न शक्यं;(३) त्वां; त्वं (for त्वा), हिंसेद्; हिंसीद् (for वधीद्);(४) स तु; प्राहुः (for ब्रह्म०), वर्तमानं,
(०४)(१)सुश्रुतौ, (२) तद्; (ए)तौ (for (ए)तद्);(३) ब्राह्मणम् (for ताभ्यां याहि), पितृ )(for यत्र),

अस्मिंस्तु लोके मम यानमेतदस्मद्विधानामपरेषां च राजन्।। ५९ ।।(०१)

राजा

चत्वारस्त्वां वा गर्दभाः संवहन्तु श्रेष्ठाश्वतर्यो हरयो वातरंहाः ।
तैस्त्वं याहि क्षत्रियस्यैष वाहो ममैव वाम्यौ न तवैतौ हि विद्धि ।। ६०
।।(०२)

वामदेवः

घोरं व्रतं ब्राह्मणस्यैतदाहुरेतद्राजन्यदिहाजीवमानः ।
अयस्मयाघोररूपा महान्तश्चत्वारो वा यातुधानाः सुरौद्राः ।
मया प्रयुक्तास्त्वद्वधमीप्समाना
वहन्तु त्वां शितशूलाश्चतुर्धा ।। ६१ ।।(०३)

*अधिकपाठः ९६४*

चत्वारो वा यातुधानाः सुरौद्राः मया प्रयुक्तास्त्वद्वधमीप्समाना,(०४)

राजा

ये त्वां विदुर्ब्राह्मणं वामदेव वाचा हन्तुं मनसा कर्मणा वा।**
ते त्वां सशिष्यमिह पातयन्तु मद्वाक्यनुन्नाः शितशूलासिहस्ताः ।। ६२ ।।(०५)

---

(०१) (२) एतम् (for एतद्);(४) अपरेषु (for अपरेषां च),

(०२) (१) त्वा(for त्वां);चत्वारस्त्वां वा (for वा) गर्दभाः संवहन्तु;(२) वा, वातरंहसः; वातरंहा (for वा तुरङ्गाः);तु मेर्हाः (for तुरङ्गाः);(३) (ए)व (for (ए)ष);वाहौ;(४) मम, (ए)व, तावद् (for न तव);(अ)श्वौ (for (ए)तौ),

(०३)(१)नैतद्; नैवं; न वै (for घोरं);(२) यदिह सञ्जीवयामि; यदिहाजीवयामि; यद्वभाषे वचो मां, (३) अयोमया,

(०४)(४)निघ्नन्तु; हरन्तु (for य वहन्तु);त्वा (for त्वां);शितरूपा; शतशूला; शरशूला, शितशूलाग्रहस्ताः,

(०५)(१) क- तवासहिष्यामिह, घ-न त्वा सहिष्यामिह, ख-न त्वा हिंसामीह विप्राग्र्यदेव नराक्ष्व मे शितशूलाग्रहस्ताः ।, ते (for ये), ये, हि, त्वां (for त्वा), विद्युद् (for विदुर्), ब्राह्मणा( ण);वामदेवं;(२) हन्त; हन्त्वा (for हन्तुं);(३) ते त्वा; स त्वा, सहिष्यामि ह (for सशिष्यमिह);(२) शितशूलहस्ताः; शितशूलग्रहस्ताः

*अधिकपाठः (९६५)* वामदेव उवाच ।
ममैतौ वाम्यौ प्रतिगृह्य राज
न्पुनर्ददानीति प्रपद्य मे त्वम् ।
प्रयच्छ शीघ्रं मम वाम्यौ त्वमश्वौ
यद्यात्मानं जीवितुं ते क्षमं स्यात् । राजोवाच ।
न ब्राह्मणेभ्यो मृगया प्रसूता ( )
न त्वानुशास्म्यद्य प्रभृति ह्यसत्यम् ।
तवैवाज्ञां सम्प्रणिधाय सर्वां
तथा ब्रह्मन्पुपयलोकं लभेयम् ।(०१)

### वामदेवः

नानुयोगा ब्राह्मणानां भवन्ति
वाचाराजन्मनसा कर्मणा वा।
यस्त्वेवं ब्रह्म तपसान्वेति विद्वां-
स्तेन श्रेष्ठो भवति हि जीवमानः ।। ६३ ।।(०२)

लक्षालङ्कारः- यस्त्वेतद्ब्रह्म इत्यत्र ब्रह्म ब्राह्मणकुलं तपसा अत्येति सर्वेभ्योऽप्यतिशायितं वर्तते । एवं विद्वानिति सम्बन्धः ।

### मार्कण्डेयः

एवमुक्ते वामदेवेन राजन्

---

(०१) (ददामीति, प्रपद्यते (for द्य मे), यथात्मानं; यद्यात्मनो, जीवितं, प्रशस्ता (for प्रसूता), ह्यसन्तम् (for ह्यसत्यम्),)
(०२) (१)नानुयोग्या; नानुद्योगा; नानुयोगाद्;(२) हन्तुं (for राजन्);(३) यस्त्वेष; यस्त्वेव; यस्त्वैवं, धर्म०; ब्रह्मन्; ब्राह्म० णम्; ब्राह्म०; वै(for ब्रह्म), वेत्ति; (अ)त्येति; (अ)भ्येति; (अ)ध्येति (for (अ)न्वेति);(४) हि, (इ)ह (for हि),

समुत्तस्थू राक्षसा घोररूपाः ।**
तै शूलहस्तैर्वध्यमानः स राजा
प्रोवाचेदं वाक्यमुच्चैस्तदानीम् ।। ६४।।[०१]

राजा-

ऐक्ष्वाकवो यदि ब्रह्मन्दलो वा(वा मां त्यजेयु) र्विधेया मे यदि चेमे विशोऽपि।
नोत्स्रक्ष्येऽहं वामदेवस्य वाम्यौ नैवंविधा धर्मशीला भवन्ति।। ६५ ।।[०२]

लक्षालङ्कारः- ऐक्ष्वाकवे यदि ब्रह्मन् इत्यत्र हे ब्रह्मन् ते त्वया दलः अनुजः ऐक्ष्वाकवः इक्ष्वाकुराज्याधिपतिः विधेयः कार्यः । अन्ये विशोऽपि ऐक्ष्वाकवाः विधेयाः ।

एवं ब्रुवन्नेव स यातुधानैर्हतो जगामाशु महीं क्षितीशः ।**
ततो विदित्वा नृपतिं निपातितमिक्ष्वाकवो वै दलमभ्यषिश्चन् ।। ६६ ।।[०३]

राज्ये तदा तत्र गत्वा स विप्रः प्रोवाचेदं वचनं वामदेवः ।**
दलं राजानं ब्राह्मणानां हि देयमेवं राजन्सर्वधर्मेषु दृष्टम् ।। ६७ ।।[०४]

बिभेषि चेत्त्वमधर्मान्नरेन्द्र प्रयच्छ मे शीघ्रमेवाद्य वाम्यौ।**
एतच्छ्रुत्वा वामदेवस्य वाक्यं स पार्थिवः सूतमुवाच रोषात्।। ६८ ।।[०५]

दलः

एकं हि सायकं चित्ररूपं दिग्धं विषेणाहर सङ्गृहीतम्।**

---

(०१)(१)वैशं० (for मार्क० ); चोक्ते (for उक्ते),
(०२)(१)प्रह्वा दलो (for ब्रह्मन्दलो), इक्ष्वाकवो यदि वा ब्रह्मदग्धा; ० वो वा यदि वा मां त्यजेयुर्; (२) ते (for मे);चेमे (for वान्ये); ये ते विधेया भुवि चान्ये महीपाः;(३) नोत्सृजेहं; नैतत्स्रक्ष्ये, वामदेवाद्य (for देवस्य);(४) कर्म (for धर्म),
(०३)(१) तु (for स);(२) जगामाथस्तीति, महीशः (for क्षितीशः);(३) दलमेव (for वै दलम्),
(०४)(३) राजन् (for राजानं);(४) जुष्टं; दिष्टं; दृष्टाः ,
(०५)(१) तु (for त्वम्);(४) स चापपाणिः; मोहान्वितः (for स पार्थिवः), राजा (for रोषात्),

येन विद्धो वामदेवः शयीत सन्दृश्यमानः श्वभिरार्तरूपः ।। ६९ ।।(०१)

**वामदेवः**

जानामि पुत्रं दशवर्षं तवाहं जातं महिष्यां श्येनजितं नरेन्द्र।
तं जहि त्वं मद्वचनात्प्रणुन्नस्तूर्णं प्रियैः(यं) सायकैर्घोररूपैः ।। ७० ।।(०२)

**मार्कण्डेयः**

एवमुक्तो वामदेवेन राजन्

अन्तःपुरे राजपुत्रं जघान ।**
स सायकस्तिग्मतेजा विसृष्टः
श्रुत्वा दलस्तत्र वाक्यं बभाषे।। ७१ ।।(०३)

**राजा**

इक्ष्वाकवो हन्त चरामि वः प्रियं निहन्मीमं विप्रमद्य प्रमथ्य।
आनीयतामपरस्तिग्मतेजाः पश्यध्वं मे वीर्यमद्य क्षितीशाः ।। ७२ ।।(04)

**वामदेवः**

यत्त्वमेनं सायकं घोररूपं विषेण दिग्धं मम सन्दधासि।**
न त्वेतं त्वं शरवर्षं विमोक्तुं सन्धातुं वा शक्यसे मानवेन्द्र।। ७३ ।।(०५)

**राजा**

---

(०१) (१) एनं, घोर (for चित्र);(३) येनैष (for येन);(४) सम्भक्ष्य० माण; सन्दह्य

(०२)(२) शूरं (for जातं), सैन्य०(न)जितं; सेन; एव जातं; स्वेन जितं; एव शूरं, नरेन्द्रं;(३) स० तं; तं वै; एतं (for तं); नरेद्र (for प्रणुन्नम्);(४) तूर्णं प्रियैः; कुलप्रियं; पुत्रं प्रियं,

(०३) (१) एवमुक्ते;(४) तत्र; तस्य (for तच्च),

(०४) (१) (ऽ)हं वितरामि (for हन्त चरामि);चराम विप्रियं (for चरामि वः प्रियं); (२) निहन्म्यहं;(३) तिग्मवेगः

(०५)(१) यत्त्वमेनं (वं); यं त्वमेकं; यस्त्वमेकं;(२) सन्ददासि;(३) न त्वेतं त्वं; स त्वमेनं; न त्वमेवं,शरवर्षं;(४) न सन्धातु; न सन्दधातुं (for सन्धातुं वा), शक्यसि; शक्यसे, हे नरेद्र; मां नरेद्र; वा नरेद्र

इक्ष्वाकवः पश्यत मां गृहीतं
न वै शक्नोम्येष शरं विमोक्तुम्।
न चास्य कर्तुं नाशमभ्युत्सहामि
आयुष्मान् वै जीवतु वामदेवः ।। ७४ ।।(०१)

**वामदेवः**

**संस्पृश्यैनां महिषीं सायकेन ततस्तस्मादेनसो मोक्ष्यसे त्वम् ।। ७४ ।।(०२)**

**मार्कण्डेयः**

ततस्तथा कृतवान्पार्थिवस्तु ततो मुनिं राजपुत्री बभाषे ।। ७५ ।।

**राजपुत्री-**

राजपुत्र्युवाच -
यथा युक्ता वामदेवाहमेनं दिने दिने सन्दिशन्ती नृशंसम् ।।
ब्राह्मणेभ्यो मृगयती सूनृतानि तथा ब्रह्मन्पुण्यलोकं लभेयम्।। ७६ ।।(०३)

**वामदेवः**

त्वया त्रातं राजकुलं शुभेक्षणे वरं वृणीष्वाप्रतिमं ददानि ते।
प्रशाधीमं स्वजनं राजपुत्रि इक्ष्वाकुराज्यं सुमहच्चाप्यनिन्द्ये।। ७७ ।।(०४)

---

(०१)(१) पश्यतां; पश्यतु; पश्यतो, मा; मे (for मां),ग्रहीतुं;(२) नैनं; न चैव (०ष) (for न वै), (ए)ष, (अ)द्य (for (ए)ष), शत्रुं (for शरं), प्रमोक्तं;(३) अभ्युत्सहेहं; अप्युत्सहामि न चास्य नाशमहमप्युत्सहामि;(४) जीवितुं,

(०२)(१) संस्पृश्यैनां; ०शेमां;(२) तत एतस्माद्; तदेतस्माद्

(०३) (१) ख- यथायुक्तं वामदेवार्हसि त्वं दिने दिने कुर्मि विप्रप्रशंसाम् । ब्राह्मणेभ्यः प्रणममि नित्यं यथा ब्रह्मन् पुण्यलोकाँल्लभेयम् ।।, तथा ततः; ततस्तत्; ततश्च तत् (for ततस्तथा), स (for तु), राहेयुवाच; राजपुत्र्युवाच; देव्युवाच;(३) युक्ता, एव (for एनं);(४) सदिशन्ती; वसन्ती; ०विशन्ति, विशंसम्; नृशंसम्; ह्यशंसम्; प्रशंसम्; प्रवृद्धम्; अभ्याशम्;(५) मृगयन्; मृगयती; गायन्ती, (६) तथा सती; तथा वै ब्रह्मन्; तथाहं वै (for तथा ब्रह्मन्), पुण्यलोकान्; ब्रह्मलोकं, व्रजेयं (for लभे),

(०४) (१) त्विदं शुभे (for शुभे);(२) वृणीथां, ददामि, ते;(३) प्रशासि त्वं (for धीमं), त्वं जनं; जनकं; च जनं (for स्वजनं),

*अधिकपाठः (९६६)*

साध्वि स्थिरं चेयमदुष्टचित्ता धर्मे मतिस्ते सततं प्रयातु ।
वरं च मत्तः प्रतिकाङ्क्स्व सुभ्रु त्वया वृषः पालनीयो हि नित्यम् ।

**राजपुत्री**

वरं वृणे भगवंस्त्वेवमेष विमुच्यतां किल्बिषादद्य भर्ता।**
शिवेन चाध्याहि सपुत्रबान्धवं वरो वृतो ह्येष मया द्विजाग्र्य।। ७८ ।।(०१)

*अधिकपाठः (९६७)*

वृत्तेन बुद्ध्या च विवृद्धिमेतु
जीवेदसौ मम पुत्रोऽद्य विप्र ।।(०२)

**मार्कण्डेयः**

श्रुत्वा वचः स मुनी राजपुत्र्याः
तथास्त्विति प्राह कुरुप्रवीर ।
ततः स राजा मुदितो बभूव
वाम्यौ चास्मै प्रददौ सम्प्रणम्य ।। ७९ ।।(०३)

अस्मिन् पर्वणि १६४ अध्याये ७९ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि
मार्कण्डेयसमास्यापर्वणि चतुषष्ट्यधिकशततमोऽध्यायः ।। १६४ ।।

(मार्कण्डेयसमस्यापर्वणि अध्यायः)

## 03- 06- 168 Adhyaya

---

(०१) (१) राज्ञवाच; राजपतयुवाच, एवमेष; त्वेवमेष; एवमेवं (for एकमेव); (२) मेद्य (for अद्य),
(०२) (३) मां ध्याहि; चा०ध्याय; च ध्याहि; जीवामि; चाख्याहि; बान्धवा; (४) द्विजेन्द्र,
(०३) (२) त्वाह;(इ)त्याह (for प्राह); (४) तस्मै (for चास्मै),प्रददौ (for सम्प्र),प्रददौ सम्प्रणम्य,

# १६८. अष्टषष्ट्यधिकशततमो अध्यायः ।।

१६८. मधुकैटभपुत्रेण धुन्धुना तपस्तोषितात् विरिञ्चादवध्यत्वादिवरग्रहणेन देवानां पीडनम् ।।१।। उदङ्कचोदितेन कुवलाश्वेन समुद्रमध्यमधिवसतस्तस्य ब्रह्मास्त्रेण दहनम् ।।२।। तदा देवादिभिः कुवलाश्वस्य धुन्धुमार इति नामकरणेन तस्मै वरदान पूर्वकं स्वस्वस्थानं प्रति गमनम् ।।३।। मार्कण्डेयेन युधिष्टिरं प्रति तत्पुत्राणां नामकथनपूर्वकं धुन्धुमारोपाख्यानस्तवनम् ।।४।।

मार्कण्डेयः

**धुन्धुर्नाम महाराज तयोः पुत्रो महाद्युतिः ।****
**स तपोऽतप्यत महन्महावीर्यपराक्रमः ।(०१)**
**अतिष्ठदेकपादेन कृशो धमनिसन्ततः ** ।। १ ।।**

**तस्मै ब्रह्मा ददौ प्रीतो वरं वव्रे स च प्रभुम् ।। २ ।।(०२)**

**धुन्धुः**

**देवदानवयक्षाणां सर्पगन्धर्वरक्षसाम्।****
**अवध्योऽहं भवेयं वै वर एष वृतो मया ।। ३ ।।(०३)**

**मार्कण्डेयः**

**एवं भवतु गच्छेति तमुवाच पितामहः ।****
**स एवमुक्तस्तत्पादौ मूर्ध्ना स्पृश्य जगाम ह ।। ४ ।।(०४)**

---

(०१)(१)राज्ञ (for तेज्ञास् ). (२) द्युन्ते; बंल (for द्युन्तिः). (३/४). महान् (for महन् ). स तपोतप्यत्सुमहन्(४);.
(०२)(२) वर्षाणामयुतं नृप (पुरा) (३) वरं प्रादाद्; (अ)ददत्प्रीतो; महा० प्रीतो. (४) स च प्रभोः; प्रभुं; प्रभुः वरं प्रोवाच ( प्राह चः) स प्रभुः.
(०३) (१) धुन्धुरुवाच. संर्पाणां (for यक्ष्गाणां ) (२) यक्ष०; सर्व० (for सर्प०). गन्धर्वोरगरक्षसां;.
(०४)(३/४).मार्कण्डेय उं. (३) एवमुक्त स (४) स्पृष्ट्वा (for स्पृश्य).

स तु धुन्धुर्वरं लब्ध्वा महावीर्यपराक्रमः ।**
अनुस्मरन्पितृवधं द्रुतं विष्णुमुपागमत् ॥ ५ ॥(०१)

स तु देवान्सगन्धर्वान्जित्वा धुन्धुरमर्षणः ।**
बबाध सर्वानसकृद्विष्णुं देवांश्च वै भृशम्।(०२)
समुद्रे बालुकापूर्णे उज्जालक इति स्मृते ॥ ६ ॥

आगम्य च स दुष्टात्मा तं देशं भरतर्षभ।**
बाधते स्म परं शक्त्या तमुत्तङ्काश्रमं विभो ॥ ७ ॥(०३)

अन्तर्भूमिगतस्तत्र बाहुकान्तर्हितस्तथा ॥ ८ ॥

मधुकैटभयोः पुत्रो धुन्धुर्भीमपराक्रमः ।(०४)

शेते लोकविनाशाय तपोबलमुपाश्रितः ।**
उत्तङ्कस्याश्रमाभ्याशे निःश्वसन्पावकार्चिषः ॥ ९ ॥(०५)

एतस्मिन्नेव काले तु राजा सबलवाहनः ।**
कुवलाश्वो नरपतिरन्वितो बलशालिनाम् ॥ १० ॥(०६)

(९८५) अधिकपाठः ० कपाठे

उत्तङ्कविप्रसहितः कुवलाश्वो महीपतिः ।

---

(०१)(१) च (for तु ). (२) बलं (for महां ). (३) पितुर्वैरं (for पितृवधं). (४) द्रुतं (for ततो ). गंमत् (for द्रंवत्). विष्णुमेव ह्युपां; पश्चाद्देवसुपां.

(०२) (१) च; हि (for तु). देवांश्च (३).(for असकृद्). (४) विष्णुं देवांश्च गन्धर्वांश्चैव; विष्णुं सर्वांश्च. सर्वतः (for वै भृशम्);.

(०३)(१) समुद्रे वालुकापूर्णे (र्णं) समुद्र बालुकापूर्णं (पूंर्ण). (२) तज्जानक; उज्जालक; उज्जानुक (for उज्जानक). स्मृते; श्रुतः स्मृतिः (forस्मृतः). आगत्य. दुरात्मा वै; सुदुष्टात्मा. (३) बाधति. पुरा (for परं).बाधते सर्वभूतानि०. विभो; प्रति (forप्रभो).ख-वालुकान्दर्हितसक्तदा;,

(०४) (२) तथा; स च (for तदा ) (३) तत्र (for पुत्रो). (४) पुत्रो धुन्धु० रिती श्रुतः.

(०५)(१) ततो (for शेते). (२) तपोबलसम० न्वितः; तपोवनसमाशिः; बंलमुपां (३) भ्यांसे (for भ्यांशे). निश्वसन (४).

(०६) (१) अथ (for एव). (२) राजा स० ;स राजा (for सभृत्य).(३) ख-इदमर्धद्वयं नास्ति,

पुत्रैः सह महीपालः प्रययौ भरतर्षभ।;

(९८६) अधिकपाठः ० कपाठे

कुवलाश्वो नरपतिः पुत्रैश्च सहितः प्रभुः ।(०१)

सहस्रैरेकविंशत्या पुत्राणामरिमर्दनः ।
क्यप्रायादुदङ्कसहितो धुन्धोस्तस्य वधाय धै ॥ ११ ॥(०२)

तमाविशत्ततो विष्णुर्भगवांस्तेजसा प्रभुः ।**
उत्तङ्कस्य नियोगेन लोकानां हितकाम्यया ॥ १२ ॥(०३)

तस्मिन्प्रयाते दुर्धर्षे दिवि शब्दो महानभूत्।**
एष श्रीमानवध्योऽद्य धुन्धुमारो भविष्यति ॥ १३ ॥(०४)

दिव्यैश्च पुष्पैस्तं देवाः समन्तात्पर्यवारयन्।**
देवदुन्दुभयश्चापि नेदुः स्वयमनीरिताः ॥ १४ ॥ (05)

शीतश्च वायुः प्रववौ प्रयाणे तस्य धीमतः ॥ १५ ॥(०६)

विपांसुलां महीं कुर्वन्ववर्ष च सुरेश्वरः । (07)
प्रदक्षिणाश्चप्यभवन्वन्यस्तं समृगद्विजाः ॥ १६ ॥(०८)

---

(०१) (३) क्षितिं (for नरं);
(०२)(१) विंशद्भिः (for विंशत्या). (२) सून्दन(for मर्दनः). (३/४) निवेशने; (४) विनाशनः;वधाय वै.
(०३) (१) समां (for तमां). (२). सहसा; तेजसां (for तेजसा). स्वयं ) (for प्रभुः); (४) च हितेप्सया (forहितकां).
(०४) (२) दिव्य० (for दिवि). हर्षो (for शब्दो). (३) वृषपतिर्; नृपपते; नृपो ह्यद्य; अवध्योद्य (यं); नृपवरो (for नृपसुतो);.
(०५)(१) वैशं०. पुष्पैश्च तान् (for तं). दिव्यैश्च पुष्पवर्षैस्तं. (२) वारयन् (for वाकिरन्)। (३) चापि; नेदुर् (for चैव). (४) दिवि (for नेदुः).अनीरि (षिं) ताः;अताडिताः (for उदीरिताः);.
(०६) (१) शिवं; दिव (for शीतं).
(०७) (१) विपांशुलां; निष्पांसुलां ब्रह्मन् सर्वा (for कुर्वन्). (२) प्रववर्ष (for ववर्ष च).
(०८) (१) क-ख-घ-नास्तिदमर्धम्,

अन्तरिक्षे विमानादि देवतानां युधिष्ठि।**
तत्रैव समदृश्यन्त धुन्धुर्यत्र महासुरः ॥ १७ ॥[०१]

कुवलाश्वस्य धुन्धोश्च युद्धकौतूहलान्विताः ।**
देवगन्धर्वसहिताः समवैक्षन्महर्षयः ॥ १८ ॥[०२]

नारायणेन कौरव्य तेजसाऽऽप्यायितस्तदा।**
स गतो नृपतिः क्षिप्रं पुत्रैस्तैः सर्वतो दिशम् ॥ १९ ॥[०३]

अर्णवं खानयामास कुवलाश्वो महीपतिः ।**
हितार्थं सर्वलोकानमुदङ्कस्य वसेस्थितः ॥ २० ॥ [०४]

कुवलाश्वस्य पुत्रैश्च तस्मिन्वै बालुकार्णवे।[०५]
सप्तभिर्दिवसैः खात्वा दृष्टो धुन्धुर्महाबलः ॥ २१ ॥[०६]

आसीद्घोरं वपुस्तस्य बालुकान्तर्हितं महत्।**
दीप्यमानं यथा सूर्यस्तेजसा भरतर्षभ ॥ २२ ॥[०७]

युगान्ते सर्वभूतानि पावकस्येव धक्ष्यतः ।[०८]
दीप्यमानस्ततो धुन्धुस्तेजसा च नरेश्वर ।

ततो धुन्धुर्महाराज दिशमावृत्य पश्चिमाम्।**

---

(०१)(१) अन्तरीक्षे! (२) देवानां च (for देवतानां). (३) तत्रैवं; तत्र वै. (४) (अ)सुरेश्वरः;महारथाः.महासुराः.

(०२)(१) युधः;युद्ध; युद्धे (for युद्ध०).(३) देवदानवगन्धर्वाः. (४) समवेक्षन्; चाभ्याजग्मुर्; समपश्यन्;.

(०३)(२) तथा (for तदा).

(०४) (३) गत्वा (for गतो). (४) पुत्रास् (for पुत्रैस् ).ते; तं(for तै); दिंशः (for दिंशम्);.

(०५) (१) खनयामास. (३) च (for तु). तस्य पुत्रैः खनद्भिस्तु. (४) सर्वतो (for तस्मिन्वै);.

(०६) (२) ०सुरः (for०बलः).

(०७) (१) तत्र (for तस्य). (२) तदा (for महत्). ०र्हितस्य वै (च) (for हिन्तं महत्);,

(०८)पावकस्य दिधक्षतः मानो (for मानं ); सूर्यः (आ)दित्यं (for सूर्यस् ); युगान्ते (for तेजसा ). तेजस्यन्तर्हितं महु .,

सुप्तोऽभूद्राजशार्दूल कालानलसमद्युतिः || २३ ||[०१]

कुवलाश्वस्य पुत्रैस्तु सर्वतः परिवारितः
अभिद्रुतः शरैस्तीक्ष्णैर्गदाभिर्मुसलैरपि || २४ ||

पट्टिशैः परिघैः प्रासैः खड्गैश्च विमलैः शितैः ।[०२]
स वध्यमानः सङ्क्रुद्धः समुत्तस्थौ महाबलः || २५ ||[०३]

क्रुद्धश्चाभक्षयत्तेषां शस्त्राणि विविधानि च ।[०४]
आस्याद्वमन्पावकं स संवर्तकसमं तदा || २६ ||

तान्सर्वान्नृपतेः पुत्रानदहत्स्वेन तेजसा।[०५]
मुखजेनाग्निना क्रुद्धो लोकानुद्वर्तयन्निऽ. || २७ ||[०६]

क्षणेन राजशार्दूल पुरेव कपिलः प्रभुः ।**
सगरस्यात्मजान्क्रुद्धस्तदद्भुतमिवाभवत् || २८ ||

तेषु क्रोधाग्निदग्धेषु तदा भरतसत्तम
तं प्रबुद्धं महात्मानं कुम्भकर्णमिवापरम्।**
आससाद महातेजाः कुवलाश्वो महीपतिः || २९ ||[०७]

---

(०१) (१) धुन्धुर्नाम महातेजा. (२) आवृत्य (for आश्रिय). कालान्तक० (forकालानल,).०महाद्युतिः; ०समप्रभः (for ०समद्युतिः).
(०२) (१) च; स (for तु). (२) समन्तात्; परितः (for सर्वतः); (३) अभिद्रुतैः. (४) गदासि (for गदाभिर्). मुसुलैर् मुसुलैर् मुषलैर्. तथा (for अपि ); (५) पट्टसैः विविधैः (for परिघैः ); पाशैः; पाशैः; शूलै (for प्रासैः ). (६) विमलैश्च परश्च (स्व) धै.
(०३) (१) वध्यमानः स विवाद्य मानः; अवध्यं. सङ्ग्रामे (for सङ्क्रुद्धः). (२) समुत्तस्थुर् ,
(०४) (३) चापि चैषां (for तेषां). (४) सः (forच).
(०५)(१) तु; च (for स). (२) संमर्दकं संवर्ताग्नि.˙ (३) भूपते;आपतत्; अदहत् (forनृपतेः). (४) नृपतेः (for अदहत्). तेन (for स्वेन). कर्मणा (for तेजसा).
(०६) (१) कोधाल् (for क्रोद्धो). (२) लोभाद् (for लोकान्). (३) नरं (for राजं).
(०७)(१) तं प्रवृद्धं; सुप्रबुद्धं. महाबाहुं (for त्मानं);,

तस्य वारि महाराज सुस्राव बहु देहतः ।
तदापीय ततस्तेजो राजा वारिमयं नृप। ॥ ३० ॥ (01)

योगी योगेन वह्निं च शमयामास वारिणा। (02)
ब्रह्मास्त्रेण च राजेन्द्र दैत्यं क्रूरपराक्रमम्।** ॥ ३१ ॥(०३)

ददाह भरतश्रेष्ठ सर्वलोकभवाय वै ॥ ३२ ॥ (04)

सोऽस्त्रेण दग्ध्वा राजर्षिः कुवलाश्वो महासुरम्
सुरशत्रुममित्रघ्नं त्रैलोक्येश इवापरः ।**
धुन्धोर्वधात्तदा राजा कुवलाश्वो महामनाः ॥ ३३ ॥(०५)

(९९१) अधिकपाठः ० कपाठे धुन्धुमार इति ख्यातो नाम्नाप्रतिरथोऽभवत्।( महाराज (for तदा राजा ). महीपतिः (for महां );,*/

कुवलाश्वो महाबाहुर्धुन्धुं हत्वा जहर्ष च ।(०६)

प्रीतैश्च त्रिदशैः सर्वैर्महर्षिसहितैस्तदा
वरं वृणीष्वेत्युक्तः स प्राञ्जलिः प्रणतस्तदा ॥ ३४ ॥(०७)

अतीव मुदितो राजन्निदं वचनमब्रवीत् ॥ ३५ ॥

## धुन्धुमारः

---

(०१)(१) ०तेजाः (for०राज ). (३) तदाप्यायत तत्तेजो; तदापीय ततस्तेजो; तत्तदा पी (ह्री) यते तेजो.,
(०२)(१) राज्ञा (for राजा); वारि वमन् (for वारिमयं).न्रूप.( (२) वह्नि तं;तद्धष्टि वृष्टि स; वह्नि स (for वह्निं च); शः (ग)मयित्वा च वारिणा ( विचारिणा),
(०३) (१) च राजेन्द्र; ततो राजा,
(०४)(१) पुरुषश्रेष्ठ. (२) सर्वलोकहिताय; ०लोकभवाय.
(०५) (१) सास्त्रेण; शस्त्रैः स (for सोस्त्रेण). दग्धा; दग्धो (for दग्ध्वा). (२) मही० पतिः; महासुरः. (३) अमित्रघ्नं. (४) त्रिदिवेश; त्रैलोक्येश; स्वर्गलोकेश त्रिदशेश (for त्रिलों).
(०६) तदा (for ततः); नाम्नाप्रतिरथोभवत् (रथो महान् )
(०७)(१) त्रिदिवैः (for त्रिदशैः). (३) (ए)वमुक्तः (for (इ)त्युक्तः स). सन् (for स). (४) स्थितः (for तदा).

दद्यां वित्तं द्विजाग्र्येभ्यः शत्रूणां चापि दुर्जयः ।
सख्यं च विष्णुना मे स्याद्भूतेष्वद्रोह एव च ।**
धर्मे रतिश्च सततं स्वर्गे वासस्तथाक्षयः ॥ ३६ ॥(०१)

**मार्कण्डेयः**

तथास्त्विति ततो देवैः प्रीतैरुक्तः स पार्थिवः ।**
ऋषिभिश्च सगन्धर्वैरुत्तङ्केन च धीमता ॥ ३७ ॥(०२)

सम्भाष्य चैनं विविधैराशीर्वादैस्ततो नृप।**
देवा महर्षयश्चापि स्वानि स्थानानि भेजिरे ॥ ३८ ॥(०३)

तस्य पुत्रास्त्रयः शिष्टा युधिष्ठिर तदाभवन्
दृढाश्वः कपिलाश्वश्च चन्द्राश्वश्चैव भारत ॥ ३९ ॥(०४)

तेभ्यः परम्परा राजन्निक्ष्वाकूणां महात्मनाम् ॥ ४० ॥(०५)
वंशस्य सुमहाभाग राज्ञाममिततेजसाम्।

एवं स निहतस्तेन कुवलाश्वेन सत्तम।**
धुन्धुर्नाम महादैत्यो मधुकैटभयोः सुतः ॥ ४१ ॥(०६)

कुवलाश्वश्च नृपतिर्धुन्धुमार इति स्मृतः ।**

---

(०१)(१) विद्यां; दत्तं (for दद्यां). द्विजाग्रेभ्यः. दद्यां च वित्तं विप्रेभ्यः. (२) अपि; स्यां च; चैव (for चापि).स्यां शत्रच्छणां च दुर्जयः (६) स्वर्गवासस् ) तथैव च; तदाक्षयः.

(०२)(१/२) तदस्त्विति. तदा (for ततो). देवैस्तथास्त्वित्युक्ते च स राजा पृथिवीपते. प्रीत्युक्तः स च पार्थिवः (for) (२). (४)तुष्टैः सम्पूजितस्तथा.

(०३)(१) सम्भाष्य; सम्भाव्य; प्रपूज्य (for सभाज्य). सभाज्यमानो विविधैर्. (२) ० तदा; तथा; (for ततो). नृप; नृपः; नृपैः. (३) ०देवर्षयं (for महर्षयं). चापि (for चैव). (४) जग्मिरे (for भेजिरे).

(०४)(१) तदा (for त्रयः). चैव (for शिष्टा). (२) त्रयों (for तदां). (३) कुवलां; कलिलां (for कपिलां),

(०५) (१) भद्रां (for चन्द्रां). (५) परस्परं (रों) (for परम्परा),

(०६) (१) संनिहतस् ) (२) भारत; धीमता (for सत्तम). (३) नाम (for दैत्यो). राज्ञ; दैन्त्यो (for वीर्यो);,

**नाम्ना च गुणसंयुक्तस्तदाप्रभृति सोऽभवत्** ।। ४२ ।। (०१)

**एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि।****
**धौन्धुमारमुपाख्यानं प्रथितं यस्य कर्मणा** ।। ४३ ।।(०२)

**इदं तु पुण्यमाख्यानं विष्णोः समनुकीर्तनम्।****
**शृणुयाद्यः स धर्मात्मा पुत्रवांश्च भवेन्नरः** ।। ४४ ।।(०३)

**आयुष्मान्भूतिमांश्चैव श्रुत्वा भवति पर्वसु।****
**न च व्याधिभयं किञ्चित्प्राप्नोति विगतज्वरः** ।। ४५ ।।(०४)

अस्मिन् पर्वणि १६८अध्याये ४५श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमस्यापर्वणि अष्टषष्ट्यधिकशततमोऽध्यायः ।। १६८ ।।**

**(मार्कण्डेयसमस्यापर्वणि २ अध्यायः)**

# 03- 06- 169 Adhyaya

# १६९.एकोनसप्तत्यधिकशततमो अध्यायः ।।

**१६९. मार्कण्डेयेन युधिष्ठिरं प्रति पतिव्रतामहात्म्यकथनारम्भः ।।**

**वैशम्पायनः**

**ततो युधिष्ठिरो राजा मार्कण्डेयं महाद्युतिम्।****

---

(०१)(१) च (for तु). (२) श्रुतः (for स्मृतः). (३) (अ)थ; स (for च). गुरुणा युक्तः; गुणयुक्तश्च; गुणसम्पन्नः (for गुणसंयुक्तः). नाम तद्गुणसथुक्तं (४) ततः प्रभृति, तस्य राज्ञो महात्मनः.

(०२) (२) यन्मां पृच्छसि सत्तम भारत; (पार्थिव). (३) धुधु (for धौन्धु); (४) तस्य (for यस्य).

(०३)(१) वै (for तु). (२) विष्णुः (for विष्णो ). कीर्तितं; वंर्तनं (for कीर्तनम्). (३) च (for स ). (४) स (for च). नृप (for नरः).

(०४) (१) भूतिं; कीर्तिं; प्रीतिं (for धृतिं). चापि (for चैव). (२) सर्वशः (forपर्वसु). (३) न व्याधिर्नो भयं; न च ख्याति० भयं. (४) भरतर्षभ (for विगतं).आरण्य; वन मार्कण्डेयसम०( मां)स्या ( धुन्धुमारोपाख्यान).धुन्धुमारोपाख्यान समाप्त धुन्धुवधं; धुन्धुमारकथाकथनं

पप्रच्छ भरतश्रेष्ठ धर्मप्रश्नं सुदुर्विदम् ॥ १ ॥(०१)

श्रोतुमिच्छामि भगवन्स्त्रीणां माहात्म्यमुत्तमम्।**
कथ्यमानं त्वया विप्र सूक्ष्मं धर्म्यं च तत्त्वतः ॥ २ ॥(०२)

प्रत्यक्षमिह विप्रर्षे देवा दृश्यन्ति सत्तम।**
सूर्याचन्द्रमसौ वायुः पृथिवी वह्निरेव च ॥ ३ ॥(०३)

पिता माता च भगवन्गुरुरेव च सत्तम।**
यच्चान्यद्देवविहितं तच्चापि भृगुनन्दन।(०४)
मान्या हि गुरवः सर्वे एकपत्न्यस्तथा स्त्रियः ॥ ४ ॥(०५)

पतिव्रतानां शुश्रूषा दुष्करा प्रतिभाति मे। (06)
पतिव्रतानां माहात्म्यं वक्तुमर्हसि नः प्रभो ॥ ५ ॥

निरुद्ध्य चेन्द्रियग्रामं मनः संरुध्य चानघ।**
पतिं दैवतवच्चापि चिन्तयन्त्यः स्थिता हि याः ॥ ६ ॥(०७)

(९९४) अधिकपाठः

---

(०१)(३) श्रेंष्ठ (for श्रेंष्ठो). (४) धर्म्यं प्रश्नं. सुदुर्विदं; स दुर्विदं; सुदुर्लभं; स दुर्वचं; सुदुस्तरं.
(०२)(३) युधिष्ठिरः मया (for त्वया). (४) सूक्ष्मधर्मं; धर्मछमं; सूक्ष्मं धर्म्यं.धर्मस्य (for धर्मं च). तत० स्ततः (for च तत्त्वतः),
(०३)(१) प्रत्यक्षमिह (वं). च; (इ)ह (forहि). दृश्यन्ते; दृष्टा हि (for विप्रर्षे). (२) विप्रर्षि०; ब्रह्मर्षि०(for दृश्यन्ति). सर्वशः (for सत्तम). दृश्यन्ते देवसत्तमाः(मं),
(०४)(१) ततो माता; माता पिता. भगवौन्. (२) गुरुरेव; भाव एव (for गाव एव). गावश्च द्विजसत्तमाः. (३) देव; वेद०; दैव०; एवं (for एव). अभितः; महितं; महति (for विहितं). यच्चापि विहितं तासां. (४) यच्चापि गुरुं (for भृगुं),
(०५) (१) मान्या हि; मन्ये च (for मन्येऽहं). गुणतः सर्वा (०व); गुणवत्सर्वं; गुरवः सर्वे; गुरवः (गुरुवत्)सर्वान्,
(०६) (२) तथा श्रियः; तथैकतः.
(०७)(१) महात्म्यं; शुश्रूषां. (२) मे० प्रभो; सत्तम,(४) क-घ-स्थिरास्स्त्रिय :,

नान्यद्दैवतमित्येव स्त्रीणां भर्तुर्द्विजोत्तम ।। (०१)

भगवन्दुष्करं त्वेतत्प्रतिभाति मम प्रभो।**
मातापित्रोश्च शुश्रूषा स्त्रीणां भर्तरि च द्विज ।। ७ ।।(०२)

स्त्रीणां धर्मात्सुघोराद्धि नान्यं पश्यामि दुष्करम्
साध्वाचाराः स्त्रियो ब्रह्मन्यत्कुर्वन्ति सदाऽऽदृताः ।। ८ ।।(०३)

दुष्करं खलु कुर्वन्ति पितरं मातरं च वै। (04)
एकपन्त्यश्च या नार्यो याश्च सत्यं वदन्त्युत ।। ९ ।।

कुक्षिणा दश मासांश्च गर्भं सन्धारयन्ति याः ।**
नार्यः कालेन सम्भूय किमद्भुततरं ततः ।। १० ।।(०५)

संशयं परमं प्राप्य वेदनामतुलामपि
प्रजायन्ते सुतान्नार्यो दुःखेन महता विभो ।। ११ ।।(०६)

पुष्णन्ति चापि महता स्नेहेन द्विजपुङ्ग०। (07)
चिन्तयन्ति ततश्चापि किं शीलोऽयं भविष्यति ।। १२।।

याश्च क्रूरेषु सत्त्वेषु वर्तमाना जुगुप्सिताः ।**

---

(०१) (३) संनिरुध्य (for निरुध्य च). (४) संयम्य; ०पूज्य (for रुध्य). चितयन्ति; यन्तं. तथा; हिताः; स्थिराः (for स्थिताः). स्त्रियः (for हि याः).
(०२) (१) त्वेतत् (चापि) (for ह्येतत्). (२) पिन्त्रोश्च; ०पितृणां (for०पितृषु).(४) भर्तरि (for भर्तृषु),
(०३)(२) नान्यत् (for नान्यं). (३) सदाचाराः विप्र; राजन्; धर्मं (for ब्रह्मन्),
(०४) (१) याः कुर्वन्ति; यं कुं; कुर्वन्तीह; कुर्वन्ति हि; कुर्वन्ति ह (for यत्कुर्वन्ति). बत; रताः (for (आ) हृताः). (२) खलु; कर्म (for बत). (३) मातरः पितरम्; पितरो मातरं; पितरं मातरश; पितरं मातरं (for पितरो मातरशू);,
(०५)(१) एकपत्निश्च; पन्त्यश्च. नार्यो या. (२) ब्रुवन्ति (for वदन्ति). दुःखेन महता वृताः (३) दक्षिणा; कुक्षिणा; कुक्षिषु. तु (for च). (४) वै०(for याः). (५) सम्भूताः (for यं);.
(०६) (१) सयमं (for संशयं). (२) परमां वेद० नामपि. (३) सुता नार्यो. (४) वृताः (for विभो).
(०७)(१) प्रपश्यन्ति; पुष्यन्ति; पोषन्ति (for पुष्णन्ति). चैव; वापि (for चापि). (२) क्लेशेन (for स्नेहेन). पुङ्गव (for सन्तम).

स्वकर्म कुर्वन्ति सदा दुष्करं तच्च मे मतम् ॥ १३ ॥(०१)

क्षत्रधर्मसमाचारतत्त्वं व्याख्याहि मे द्विज ।**
धर्मः सुदुर्लभो विप्र नृशंसेन महात्मनाम् ॥ १४ ॥(०२)

एतदिच्छामि भगवन्प्रश्नं प्रश्नविदां व।**
श्रोतुं भृगुकुलश्रेष्ठ शुश्रूषे तव सुव्रत ॥ १५ ॥(०३)

**मार्कण्डेयः**

हन्त तेऽहं समाख्यास्ये प्रश्नमेतं सुदुर्वचम्।**
तत्त्वेन भरतश्रेष्ठ गदतस्तन्निबोध मे ॥ १६ ॥(०४)

मातृस्तु गौरवादन्ये पितनन्ये तु मेनिरे।**
दुष्करं कुरुते माता विवर्धयति या प्रजाः ॥ १७॥(०५)

तपसा देवतेज्याभिवन्दनेन तितिक्षया।**
सुप्रशस्तैरुपायैश्चापीहन्ते पितरः सुतान् ॥ १८ ॥(०६)

एवं कृच्छ्रेण महता पुत्रं प्राप्य सुदुर्लभम्।**

---

(०१) (१) येषु; याश्च (for ये च ).क-घ-सत्वेषु; धर्मे (for सर्वे). (२) जुगप्सया. (३) तदा (for सदा). कर्म कुर्वन्ति च तदा. (४) त्विति (for तच्च).

(०२)(१) त्वधर्म०; तत्वधर्मं; क्षात्रधर्म. (२) तत्वं (for तथ्यं). आख्याहि; त्वाख्याहि.० (४) महात्मना (नां).

(०३)(१) एतम् (for एतद्). (३) कुंले श्रेष्ठ. (४) बुव्रतसू; शुभूपुसू; इच्छामि (for शुश्रूषे). सुप्रभ (for सुव्रत);.

(०४) (१) एतत् (for हन्त). (ऽ)हं समाख्यास्ये; कथयिष्यामि (for सर्वमां) (२) एतत्; एनं (for एतं). सुदुर्लभं; सुदुर्विदं; सुदुर्वचः; सुसर्वशः (३) तथ्येन (for तत्त्वेन). (४) तु (for तन्);.

(०५) (१) पितरं; गौरवात्; महतीं; श्रेयसीं (for सदृशीं). अन्ये; मन्ये; तातात् (for तात). मातृस्तु (मातरं) गौरवादन्ये. (२) तु मेनिरे; च मन्वते (for च मन्यते). मन्यन्ते चापरे पितृन्. (३) दुष्करं कुर्वते तात. (४) निवर्तयति; संवर्ध (for विवर्धं). सा; याः (for या ). सुतान्; प्रजां (for प्रजाः). वर्धयन्ति हि यत्प्रजाः.

(०६) (१) दैवतें (for देवतें). (२) वचनेन (for वन्दनेन). (३) अभिप्रायैर्; सु०(सं) प्रशस्तैर् (for अभिचारैर्). (४) (अ)पीहन्ते. लभन्ते (for ईहन्ते). मातरः (for पितरः). सुतं (for सुतान्).

चिन्तयन्ति सदा वीर कीदृशोऽयं भविष्यति ॥ १९ ॥[०१]

ये चक्रुरेषु सर्वेषु वर्तमानजुगुप्सया ।

आशंसते हि पुत्रेषु पिता माता च भारत।**
यशः कीर्तिमथैश्वर्यं प्रजा धर्मं तथैव च ॥ २० ॥[०२]

मातुः पितुश्च राजेन्द्र सततं हितकारिणोः ।
तयोराशां तु सफलां यः करोति स धर्मवित् ॥ २१ ॥

पिता माता च राजेन्द्र तुष्यतो यस्य नित्यशः ।**
इह प्रेत्य च तस्याथ कीर्तिर्धर्मश्च शाश्वतः ॥ २२ ॥[०३]

नैव यज्ञक्रियाः काश्चिन्न श्राद्धं नोपवासकम्।**
या तु भर्तरि शुश्रूषा तया स्वर्गं जयत्युत ॥ २३ ॥[०४]

एतत्प्रकरणं राजन्नधिकृत्य युधिष्ठर ।**
पतिव्रतानां नियतं धर्मं चावहितः शृणु ॥ २४ ॥[०५]

**अस्मिन् पर्वणि १६९अध्याये २४श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि
मार्कण्डेयसमास्यापर्वणि एकोनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥

**(मार्कण्डेयसमस्यापर्वणि २ अध्यायः)**

---

(०१) (२) (अ)पत्यं; सुतं (for पुत्रं). (३) चिन्तयन्तः. (४) किंशीलो (for कीदृशो).

(०२) (१) आशंसते च; सन्तेषु; सें तेषु; ०साते च; सें ते च (for सन्ते च). हि (for च). पुत्रस्य; पुत्रे च (for पुत्रेषु). (३) अथो; उत (for अथ). धैर्यं (for (ऐ) श्वर्यं ). (४) प्रजां; तेजो (for प्रजा). धर्मम्; धर्मान् (for धर्म).

(०३)(१) आशासू (for आशां). च (for तु). सफला. (४) यत्र तुष्यति; तुष्येते यस्य; तुष्यते यस्य. नित्यशः(for ०दा). (५) तस्यार्थं (for तस्याथ). (६) कीर्तिधर्मश्च. भारत (for शाश्वतः).

(०४) (१) यज्ञस्त्रियः; यज्ञक्रियाः; यज्ञः स्त्रियाः; यज्ञं स्त्रियः काश्चिन्. (२) नोपवासकं; नोपि पावकं; नोपवासकः. (४) तेन (for तया). धर्मम् (for स्वर्गम्). जय(०यं)त्युत; उपासते (for उपाश्नुते).

(०५)(१) एतं (for एतत्). (२) नियमं (for तं). (४) धर्म्यः धर्मान् (for धर्म). च. धर्म शृणु युधिष्ठिर;.

# 03- 06- 170 Adhyaya

## १७०.सप्तत्यधिकशततमो अध्यायः ।।

१७०. तरुतले तपस्यता कौशिकेनात्मोपरि पुरीषोत्सृष्ट्या बलाकायाः सक्रोधनिरीक्षणेन दहनम् ।।१।। तथा भिक्षार्थं परिर्वतायाः कस्याश्चिद् गृहं प्रविष्टं भिक्षादाने चिरीकरणे रुष्टं च कौशिकं प्रति तया स्वस्या बलाकावृत्तान्तावगतिसूचनेन स्वशक्तिप्रकाशनपूर्वकं धर्मावगतये धर्मव्याधसमीपगमनयोदना ।।२।।

**मार्कण्डेयः**

**कश्चिद्द्विजातिप्रवरो वेदाध्यायी तपोधनः ।****
**तपस्वी धर्मशीलश्च कौशिको नाम भारत ।। १ ।।**[०१]

साङ्गोपनिषदो वेदानधीते द्विजसत्तमः ।**
स वृक्षमूले कस्मिंश्चिद्वेदानुच्चारयन्स्थितः ।। २ ।।[०२]

उपरिष्टाच्च वृक्षस्य बलाका सन्यलीयत।**
तया पुरीषमुत्सृष्टं ब्राह्मणस्य तदोपरि ।। ३ ।।[०३]

तामवेक्ष्य ततः क्रुद्धः समपध्यायत द्विजः ।**
तां बलाकां महाराज निलीनां नगमूर्धनि ।। ४ ।।[०४]

भृशं क्रोधाभिभूतेन बलाका सा निरीक्षिता।

---

(०१)(२) द्विजोत्तमः;तपोनिधिः (forधंनः). वेदाख्यायी द्विजोत्तमः (३) ख-तपस्वीधर्म क-घ-तपस्वी धर्मशीनात्मा शान्तोऽपि विनयोज्वनः।, धर्मशीलात्मा. (४) नामतः(for भारत).शान्तोपि विनयोज्वलः.
(०२)(१) निंषदो (forनिंषदान्). सर्वान् (for वेदान्). (२) स द्विजोत्तमः(३).वृक्षमूले तु (forस वृक्ष० मूले).कस्मिंस्तु (for श्चिद्). (४)क-ख-घ- द्विजः(for स्थितः).
(०३)(१) विप्रस्य (for वृक्षस्य). तस्य वृक्षस्योपरि० ष्टाद्. (४) तदोरसि; ततोपरि) (forतदोपरि).
(०४) (१) तां नु वीक्ष्य; समवेक्ष्य (forतामं). तदा (forततः). (२) समध्यापयत; समपाध्यायत; समपध्याय स; समपश्यत वै; समवध्यायत.

This Stanga is Interchanged in TRK after 2[(01)]

अपध्याता च विप्रेण न्यपतद्धरणीतले ॥ ५ ॥

बलाकां पतितां दृष्ट्वा गतसत्त्वामचेतनाम्।**
कारुण्यादभिसन्तप्तः पर्यशोचत तां द्विजः ।[(०२)]

मार्कण्डेयः

अकार्यं कृतवानस्मि रोषरागबलात्कृतः ** ॥ ६ ॥ [(०३)]

मार्कण्डेयः

इत्युक्त्वा बहुशो विद्वान्ग्रामं भैक्ष्याय संश्रितः ॥ ७ ॥[(०४)]

ग्रामे शुचीनि प्रचरन्कुलानि भरतर्षभ।**
प्रविष्टस्तत्कुलं यत्र पूर्वं चरितवांस्तु सः ॥ ८ ॥[(०५)]

देहीति याचमानोऽसौ तिष्ठेत्युक्तः स्त्रिया ततः ।**
शौचं तु यावत्कुरुते भाजनस्य कुटुम्बिनी ॥ ९ ॥[(०६)]

एतस्मिन्नन्तरे राजन्क्षुधासम्पीडितो भृशम्।
भर्ता प्रविष्टः सहसा तस्या भरतसत्तम ॥ १० ॥

' सा तु दृष्ट्वा पतिं साध्वी ब्राह्मणं व्यवहाय तम्।**

---

(०१) ( तरु० (for नग०).) (३) कोपा० (forक्रोधा०). (४) संनिरीक्षता; सा निरीक्षता.

(०२)(१) अपशप्ता; अवध्याता; अवध्यत (for अपध्याता). हि (for च ). (२) पपात (for न्यपतद्). धरणीतले. (३) अचेतसं; विचेतना, (५) कार्पण्याद्; कार्पण्यम् (for कारुण्याद् ). अधि०; अपि सन्तप्तः; अभिसन्तप्तां; अथ सन्तप्तः०(६) पर्यशोचत्ततो; ०देवत तां; ०शोचदथ; ०शो (०वो)चत्तदा.

(०३)(२) रागदोष०; रोष० राग०; रोषवेग०.मार्कण्डेय उ०.राजन् (for विद्वान् ).

(०४)(४) भैक्ष्याय. संस्थितः; संस्मृतः.

(०५)(१) ग्रामी (forग्रामे). वि० (forप्र०).कुलानि भरतश्रेष्ठ. (२) शुचीनि प्रवराणि च; कुले भैक्षानि.भारत. (३) तज्जलं; स कुलं (for तत्कुलं).तत्र (४).द्विजः; प्रभो; ततः; तुतं (forतु सः);.

(०६)(१) देहीहि; देहेति (for देहीति).याचमाने.(ऽ)सौ (forवै). (२) ततः (तदा) स्त्रिया; स्त्रिया च ( तु) सः; तथा तु सः (३) कुरुते यावद्; तावत्कुरुते. भोजनस्य; (४) भोजनानां; (for भाज०).

पाद्यमाचमनीयं वै ददौ भर्तुस्तथासनम् ।। ११ ।।(०१)

प्रह्वा पर्यचरच्चापि भर्तारमसितेक्षणा।**
आहारेणाथ भक्ष्यैश्च भोज्यैः सुमधुरैस्तथा ।। १२ ।।(०२)

उच्छिष्टं भाविता भर्तुर्भुङ्क्ते नित्यं युधिष्ठि ।**
दैवतं च पतिं मेने भर्तुश्चित्तानुसारिणी ।। १३ ।।(०३)

कर्मणा मनसा वाचा नान्यचित्ताभ्यगात्पतिम्।**
तं सर्वभावोपगता पतिशुश्रूषणे रता ।। १४ ।।(०४)

साध्वाचारा शुचिर्दक्षा कुटुम्बस्य हितैषिणी।**
भर्तुश्चापि हितं यत्तत्सततं सानुवर्तते ।। १५ ।।(०५)

देवतातिथिभृत्यानां श्वश्रूश्वशुरयोस्तथा।**
शुश्रूषणपरा नित्यं सततं संयतेन्द्रिया ।। १६ ।।(०६)

सा ब्राह्मणं तदा दृष्ट्वा संस्थितं भैक्ष्यकाङ्क्षिणम्।**
कुर्वती पतिशुश्रूषां सस्माराथ शुभेक्षणा ।। १७ ।।(०७)

---

(०१) (१) तु दृष्ट्. (२) व्यवं (forव्यपं). (३) तु वै (forच).भर्तुसू (for भर्त्रे).तदां (forतथां);,
(०२)(१) क-ख-घ- प्रीत्या, श्रद्धा; प्रीत्या (for प्रह्वा).चाथ (for चापि). (३) (अ)पि; च (for(अ) थ.).भक्षैश्च; भक्त्या च; भक्ष्येण. (४) भोज्यैः (for वाक्यैः).स च (forसु०).मधुरैः पायसैस्तथा,
(०३)(१) भाविता; सततं (for भुञ्जते).तत्र (for भर्तुः).(२) नित्यं; भुङ्क्ते; सा च; साधु (for सा तु).भुङ्क्ते (for नित्यं).
(०४) (१) कर्मणा मनसा वाचा; सा कर्मणा वा मनसा. (२) नाभ्यश्नान्नापि सापिबत्; नात्यश्नात्यति चापिबेत्; नान्यचित्ताभ्य० गात्पतिं; नात्यश्नात्यति न चापिबत्; नात्यश्नान्नाति चा लक्षालङ्कारः- पिबत्; नातिक्रामति वा गिरा; नात्यश्नात्य० पि चापिबत्. (३) तत् (for तं). सर्वं (forसर्व०);.
(०५) (१) प्रियं; हिते (forहितं).यत्ता; युक्ता (for यत्तत्).भर्तुश्च विहितं यद्यत. (४) साधु वर्तते; चानुं; सान्ववर्तत;सा तु वर्तते.
(०६) (२) अपि (forतथा). (३) शुश्रूषणे रता नित्यं.सञ्जितेन्द्रिया.
(०७) (१) तथा;ततो (forय तदा).द्वारि (forदृष्ट्). (२) सततं (forसंस्थितं).भैक्ष्यं कुर्वती, (४) संस्माराथ. शुचिस्मिता (forशुभें);.

व्रीडिता साभवत्साध्वी तदा भरतसत्तम।**
भिक्षामादाय विप्राय निर्जगाम यशस्विनी ।। १८ ।।(०१)

**ब्राह्मणः**

किमिदं भवति त्वं मां तिष्ठेत्युक्त्वा वराङ्गने।**
उपरोधं कृतवती न विसर्जितवत्यसि ।। १९ ।।(०२)

**मार्कण्डेयः**

ब्राह्मणं क्रोधसन्तप्तं ज्वलन्तमिव तेजसा।**
दृष्ट्वा साध्वी मनुष्येन्द्र सान्त्वपूर्वं वचोऽब्रवीत् ।। २० ।।(०३)

**साध्वी**

' क्षन्तुमर्हसि मे विद्वन्भर्ता मे दैवतं महत्।**
स चापि क्षुधितः श्रान्तः प्राप्तः शुश्रूषितो मया ।। २१ ।।(०४)

**ब्राह्मणः**

ब्राह्मणा न गरीयांसो गरीयांस्ते पतिः कृतः ।**
गृहस्थधर्मे वर्तन्ती ब्राह्मणानवमन्यसे ।। २२ ।।(०५)

इन्द्रोऽप्येषां प्रणमते किं पुनर्मानवो भुवि।
अवलिप्ते न जानीषे वृद्धानां न श्रुतं त्वया ।। २३ ।। (०६)

---

(०१)(१) चाभवत्; सा भवेत्; चापि सा; सा तदा (forसाभवत्). (२) मनस्विनी.
(०२)(१) मा (forमां). (२) वराननॆ. (४) (अ)पि (for०(अ)सि).
(०३)(१) क्रोधसन्दीप्तैः कोपसन्तप्तं. (३) सा स्त्ती. (forसाध्वी).मानुषेन्द्रं;मानुषेन्द्रं.(४)ततो(forवचो).
(०४) (१) स्यु० वाच ( स्त्ती). ख-क्षमस्व विप्रप्रवर क्षमस्व स्त्रीजडात्मताम् ।, प्रसीद भगवन् मह्यं कृपां कुरु मयि द्विज ।। ,मे विद्वन्; मे ब्रहान् (forमे विप्रै). (२) परं (forमहत्). (३) क्षुस्म (forक्षुधितः) श्रान्त प्राप्त.
(०५)(१) ब्राह्मणा न. ब्राह्मणो न गरीयांस्ते. (२) गरीयांस्तु; तथैव (३) च.गृहस्थधर्मी.
(०६)(१) एतान् (forएषां), प्रणमती. (२) मानुषो मानवो मानवा (for मानुषा).

ब्राह्मणा ह्यग्निसदृशा दहेयुः पृथिवीमपि।[०१]
सपर्वतवनद्वीपं क्षिप्रमेवावमानिताः ॥ २४ ॥

### साध्वी

ब्राह्मण्युवाच(स्त्र्युवाच)।**
नावजानाम्यहं विप्रान्देवैस्तुल्यान्मनस्विनः ।
अपराधमिमं विप्र क्षन्तुमर्हसि मेऽनघ ॥ २५ ॥[०२]

(१००१) अधिकपाठः
नाहं बलाका विप्रर्षे त्यज क्रोधं तपोधन।**
अनया क्रुद्धया दृष्ट्या क्रुद्धः किं मां करिष्यसि।[०३]

जानामि तेजो विप्राणां महाभाग्यं च धीमताम्।**
अपेयः सागरः क्रोधात्कृतो हि लवणोदकः ॥ २६ ॥[०४]

तथैव दीप्ततपसां मुनीनां भावितात्मनाम्।**
येषां क्रोधाग्निरद्यापि दण्डके नोपशाम्यति।[०५]
कस्तान्परिभवेन्मूढो ब्राह्मणानमितौजसः ॥ २७ ॥[०६]

ब्राह्मणानां परिभवाद्वातापिः सुदुरात्मवान्।**
अगस्त्यमृषिमासाद्य जीर्णः क्रूरो महासुरः ॥ २८ ॥ [07]

बहुप्रभावाः श्रूयन्ते ब्राह्मणानां महात्मनाम्।**

---

(०१) (१) विप्राणां (forवृद्धानां) (२).चाग्नि (forग्नि) (३) दहन्ति(forदहेयु).इमां(forअपि).
(०२) पतिव्रतोवाच; ब्राह्मणी (for स्त्र्युवाच).
(०३) (१) नावमन्यामि; मंन्ये हि (forजांनामि).विप्रं; विप्र (for विप्रान्). (२) देव०(for देवैस्).महामते; मनस्विनं. (४) ते (forमे).
(०४) (२)माहात्म्यं चैव धीं. (४) यैर् (वै).(forहि).
(०५)(३) एषां (forयेषां).शापाग्निर् (forक्रोधाग्निर्). (४) समुद्रे (forदण्डके).न प्रशां (forनोपशां).
(०६)(२)सु०; स (forच). (३) अगस्तिम. मुनिम्) (forऋषिम्).
(०७) (१) ऋद्धो (forक्रूरो). ०बलः (for०सुरः);.

क्रोधः सुविपुलो ब्रह्मन्प्रसादश्च महात्मनाम् ॥ २९ ॥(०१)

अस्मिंस्त्वतिक्रमे ब्रह्मन्क्षन्तुमर्हसि मेऽनघ ॥ ३० ॥

पतिशुश्रूषया धर्मो यः स मे रोचते द्विज ।(०२)
दैवतेष्वपि सर्वेषु भर्ता मे दैवतं परम् ॥ ३१ ॥ (03)

अविशेषेण तस्याहं कुर्यां धर्मं द्विजोत्तम।(०४)
शुश्रूषायाः फलं पश्य पत्युर्ब्राह्मण यादृशम् ॥ ३२ ॥ (०५)

बलाका हि त्वया दग्धा रोषात्तद्विदितं मया।(०६)
क्रोधः शत्रुः शरीरस्थो मनुष्याणां द्विजोत्तम।**
यः क्रोधमोहौ त्यजति तं देवा ब्राह्मणं विदुः ॥ ३३ ॥(०७)

(१००३) अधिकपाठः

मा स्म क्रुद्धो बलाकेव न वध्यास्मि पतिव्रता ।(०८)

यो वदेदिह सत्यानि गुरुं सन्तोषयिष्यति(येत च)।**
हिंसितश्च न हिंसेत तं देवा ब्राह्मणं विदुः ॥ ३४ ॥(०९)

---

(०१)(१/२) बहुप्रभावाः श्रूयन्ते ब्राह्मणानां महात्मनां. (३) क्रोधाः; क्रोधात्. स; च (forसु०).विपुला. प्रसादाश्च. देव० मानुषसंशिाः.

(०२)(१) तु.व्याति०; स्वस्तिकरं (forत्वति०).पश्य (for ब्रह्मन्). (२) श्रोतुम् (forक्षन्तुम्).यथा (forयःस).सूत (ऽ) नघ; द्विजः.

(०३)(१) धर्मेषु (forसर्वेषु). (२) महत् (forपरम्),

(०४)अ(१)तिदेशेन (forअविशेषेण). (२) भक्ति; कुर्याद् (forकुर्यां);.

(०५) (१) शुश्रूषया; शुश्रूषायां तस्य (for पश्य).

(०६) (३/४) बलाको हि.रोषाद्दग्धा; दग्धो रोषात्; दग्धाद्रोषात् तु (forतद्). मया (for मम).

(०७) (१) ख-मा स्म क्रुध्यो बलाकेव न वध्याऽस्मि पतिव्रता ।, क्रोधः सुदुर्जयः शत्रुर्. (२) मानुषाणां.

(०८) (३) यत् (forयः).०लोभौ; ०मोहान् (for०मोहौ).जयति; जयते (for त्यजति) (४). तान् (forतं). देवान्; देवं (forदेवा).ब्राह्मणा; स्थविरं (forब्राह्मणं).द्विजः (forविदुः).

(०९)(१) वदेत हि; वै ददाति(for वदेदिह). (२) गुरून् (forगुरुं). सन्तोषयति च; यन्ति च; येन्दपि; यिं० ष्यति. (३) हिंसति (for हिंसेत).हिंसा च हिंसिता येन. (४) देवान्; देवं (for देवा). स्थविरं; ब्राह्मणा (forब्राह्मणं).

जितेन्द्रियो धर्मपरः स्वाध्यायनिरतः शुचिः ।**
कामक्रोधौ वशौ यस्य तं देवा ब्राह्मणं विदुः ।। ३५ ।।[०१]

योध्यापयेदधीयेद्वा याजयेत यजेत वा।
दद्याद्वापि यथाशक्ति तं देवा ब्राह्मणं विदुः ।। ३६ ।।[०२]

ब्रह्मचारी वदान्यो योऽधीयीत द्विजपुङ्गवः ।**
सर्वधर्मेषु च रतस्तं देवा ब्राह्मणं विदुः ।। ३७ ।।[०३]

यस्य चात्मसमो लोको धर्मज्ञस्य मनस्विनः ।** [०४]
योऽध्यापयेदधीयीत यजेद्वा याजयीत वा।**
स्वाध्ययवानमत्तो वै तं देवा ब्राह्मणं विदुः ।

यद्ब्राह्मणानां कुशलं तदेषां परिकीर्तयेत्।**
सत्यं तथा व्याहरतां नानृते रमते मनः ।। ३८ ।।[०५]

धर्मं तु ब्राह्मणस्याहुः स्वाध्यायं दममार्जवम्
इन्द्रियाणां निग्रहं च शाश्वतं द्विजसत्तम ।। ३९ ।।[०६]

सत्यार्जवे धर्ममाहुः परं धर्मविदो जनाः ।[०७]

---

(०१)(१) धर्मरतः; निन्त्यः (forपरंः).
(०२)(१) अधीयेद्वा (for अधीयीत). (२) याजतेपि; याजयेत. (३) अपि; चापि (forवापि);.
(०३)(१) धर्मचारी.वेदान्यो हि; वदान्यो यो; वदान्यो हि;भवेद्दान्तो; तु यो वेदान्; च यो वेदान्. (२) अधीयाद् द्विजसत्तमः; सर्वभूतेषु चात्मवत्;(ऽ)प्य (ह्य)धीयाद् द्विज०पुङ्गवः; ह्यधीयाद् द्विजसत्तम; ह्यधीयेत द्विजोत्तम; ह्यधीयानो द्विजोत्तम. (३) यस् (for वै).स्वा०ध्यायवानमत्तो वै; यंवानप्रमत्तस् )
(०४) (१) चात्मा समो; चात्मसमा. लोके. (२) ब्राह्मणस्य. यशस्विनः; (३)मनीषिणः सर्वधर्मेण. निरतम्; च रतिस् ) (४) स्थविरं(forब्राह्मणं).
(०५) (२) तदेव; न तेषां (for तदेषां). कीर्तयन्. (३) पथ्यं तथ्यं (for सत्यं तथा). व्यवहरन्; व्याहरन्तं; व्याहरते. (४) कुरुते योजयेन्; रमतां (for रमते). मतिः (forमनः);.
(०६) (१) धर्मं; स्वयं (forधनं). स्यात् (for (आ)हुः). (२) स्वाध्यायो; येंं (forयं). तप; दम (for दमम्). आर्जवः (३) निग्र० हश्च; निरोधश्च; निग्रहणं. (४) शाश्वतो. द्विजलक्षणं,
(०७)(५)०सत्यमार्जवं; सत्यार्जवं; श्रंयं;.

दुर्ज्ञेयः शाश्वतो धर्मः स च सत्ये प्रतिष्ठितः ॥ ४० ॥[०१]

श्रुतिप्रमाणो धर्मः स्यादिति वृद्धानुशासनम्। [02]
बहुधा दृश्यते धर्मः सूक्ष्म एव द्विजोत्तम ॥ ४१ ॥[०३]

भवानपि च धर्मज्ञः स्वाध्यायनिरतः शुचिः ।**
न तु तत्त्वेन भगवन्धर्मं वेत्सीति मे मतिः ॥ ४२ ॥ [04]

(१००४) अधिकपाठः

यदि विप्र न जानीषे धर्मं परमकं द्विज।

धर्मव्याधं ततः पृच्छ गत्वा तु मिथिलां पुरीम्।[०५]

मातापितृभ्यां शुश्रूषुः सत्यवादी जितेन्द्रियः
मिथिलायां वसेद्व्याधः स ते धर्मान्प्रवक्ष्यति ॥ ४३ ॥

तत्र गच्छस्व भद्रं ते यथाकामं द्विजोत्तम।[०६]

(१००५) अधिकपाठः

व्याधः परमधर्मात्मा स ते च्छेत्स्यति संशयान् ॥ ४४ ॥

अत्युक्तमपि मे सर्वं क्षन्तुमर्हस्यनिन्दित।**
स्त्रियो ह्यवध्याः सर्वेषां ये च धर्मविदो जनाः ॥ ४५ ॥[०७]

---

(०१)(१) विज्ञेयः(forदुर्ज्ञेयः). (२) स च (सत्यं).(forस तु).
(०२) (३) श्रुतिः प्रमाणो; श्रुतिःप्रमाणं; प्रंमाणे; प्रंमाणं धर्माणां (forधर्मः स्याद्).वेदानुं; सिद्धानुं.
(०३) (२) एष (forएव).
(०४) (३) भगवानपि (forभवानपि च). (४) स्वाध्यायाभिरतः. (५) सत्वेन (forतत्त्वेन).भगवान्; विभवन्(६) वेदान्; धर्मं (forधर्मान्).वेत्तीति.
(०५) (धर्म (forविप्र).परं धर्मं सनातनं)
(०६) (३) स्थितो; स ते; वसेद् (forवसन्). (४) (ऽ)खिलान्; स तु (forस ते). प्रवेक्ष्यति; वदिष्यति. (५) गच्छ सु(forगच्छस्व). (५) यथाकालं.
(०७) (१) इत्युक्तम्; दुरुक्तम् (forअत्युक्तम् ). इति (for अपि).तत् (forमे). (२) मानद; भो द्विज; (अ)रिन्दम (for(अ)नि०न्दित). (४) धर्मकुशला (forविदुषो).नराः (forजनाः).ये धर्ममभिविदते (०विन्दति;०नदति);

**ब्राह्मणः**

**प्रीतोऽस्मि तव भद्र ते गतः क्रोधश्च शोभने।**
**उपालम्भस्त्वयात्युक्तो मम निःश्रेयसं परम् ॥ ४६ ॥**

**स्वस्ति तेऽस्तु गमिष्यामि साधयिष्यामि शोभने।**
**धन्या त्वमसि कल्याणि यस्यास्ते वृत्तमीदृशम् ॥ ४७ ॥**(०१)

**मार्कण्डेयः**

**तया विसृष्टो निर्गम्य स्वमेव भवन ययौ।****
**विनिन्दन्स स्वमात्मानं कौशिको द्विजसत्तमः ॥ ४८ ॥**

**(१००६) अधिकपाठः**

**(धन्या त्वमसि कल्याणि यस्यास्ते वृत्तमीदृशम्।)**(०२)

अस्मिन् पर्वणि १७०अध्याये ४८श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि पतिव्रतोपाख्याने सप्तत्यधिकशततमोऽध्यायः ॥ १७०॥**

**(मार्कण्डेयसमस्यापर्वणि २ अध्यायः)**

# 03- 06- 171 Adhyaya

171 Aadyaya File (204 to 225 New 22-5-2015) Complete Dan, (103 Shlo-

---

स्वधर्मविदुषो जनाः; ये च धर्मविदो जनाः,
(०१)(२) सु०(forच) (३).उपलम्भस् )प्रेन्ते; (अ)प्युक्तो; (अ)त्युक्तो (अ)भ्युक्तो.) (४).स मे(forमम).नैश्रेयस; निश्रेयसं. पदं; परः; प्रति (forपरम्) (६).क्षमं भवतु; यत्रादिशसि (forसाध०).भामिनि; यत्क्षमं (forशोभने),
(०२)(ते (forस्याद्).) /*(१) तथा (forतया).निसृष्टो (forविं).निर्गत्य. (२) तमेव (forस्वं).(आ)वसथं (for भवनं). स्वयमेव वनं ययौ. (३) स स्वमात्मानं; स्वसमा० स्वयमा० (for स द्विजो०) (४).द्विजसत्तमः (०म); मुनिसत्तम. आगस्कृत इवाबभौ.

kas). and Continue 183 Aadyayas

# १७१. एकसप्तत्यधिकशततमोध्यायः

१७१. कौशिकनामकेन द्विजवरेण पतिव्रतावजनाद्धर्मावगतये धर्मव्याधं प्रति गमनम् ।।१।। व्याधेन तस्मै नानाधर्मोपदेशः ।।२।। जनकराज्यप्रशस्तिः । कौशिकं प्रति धर्मव्याधेन शिष्टलक्षणादिकथनम् ।।३।।

मार्कण्डेयः

चिन्तयित्वा तदाश्चर्यं स्त्रिया प्रोक्तमशेषतः ।**
विनिन्दन्स स्वमात्मानमागस्कृत इवाबभौ।(०१)
चिन्तयानः स्वधर्मस्य सूक्ष्मं गतिमवाप्नुयात् ।। १ ।।

कौशिकः

श्रद्दधानेन वै भाव्यं गच्छामि मिथिलामहम् ।। २ ।।(०२)

कृतात्मा धर्मवित्तस्यां व्याधो निवसते किल ।**
तं गच्छाम्यहमद्यैव धर्मं प्रष्टुं तपोधनम् ।। ३ ।।(०३)

मार्कण्डेयः

इति सञ्चित्य मनसा श्रद्दधानः स्त्रिया वचः ।
बलाकाप्रत्ययेनासौ धर्म्यैश्च वचनैः शुभैः ।**
सम्प्रतस्थे स मिथिलां कौतूहलसमन्वितः ।। ४ ।।(०४)

---

(०१) (१) त्वा तदा प्रोक्तं. (२) चोक्तम् (for प्रोक्तम्). तदाश्चर्यं विशेषतः (३) स स्वां (त्व) मात्मानं; स्वयमा (for स द्विजो०).(४) आगस्कृत्यम्; स्कृतम, स्थित (for (आ)बभौ). असकृत्तत्वचितकः; मनस्कृत इवाभवत.

(०२)(१) च; स्व० (for स). (२) अवामयात्; अवाप्तवान् (for अथाब्रवीत् ). (३) भाव्यं हि (भावेन); वै भाव्यं; मे भाव्यं (४) मिथिलान् ह्यहं (for अहम्).

(०३) (१) सर्ववित्तस्यां; सर्ववित्तस्या०(२) निविशते; वै वसते, (३) तद्; तां (forतं);.

(०४)(१) तपसा; वचनं (for मनसा). इति सञ्चितयामास. (२) सन्दधानः स्त्रियो (for स्त्रिया );(३) सौम्यै० (forधःजै०);स सम्प्रतस्थे; स तु प्रतस्थे; ततः प्रतस्थे;.

(१००७) अधिकपाठः

जनकेनाभिपालिताम् । पथि पश्यन्नदी रम्याः

अतिक्रामन्नरण्यानि ग्रामांश्च नगराणि च ।**

ततो जगाम मिथिलां जनकेन सुरक्षिताम् ॥ ५ ॥[०१]

धर्मसेतुसमाकीर्णां यज्ञोत्सववतीं शुभाम्।**
गोपुराट्टालकवतीं हर्म्यप्राकारशोभनाम् ॥ ६ ॥[०२]

प्रविश्य नगरीं रम्यां विमानैर्बहुभिर्युताम्।**
पुष्पैश्च(पण्यैश्च) बहुभिर्युक्तां सुविभक्तमहापथाम् ॥ ७ ॥[०३]

अश्वै रथैस्तथा यानै(नागै)र्योधैश्च बहुभिर्युताम्।**
हृष्टपुष्टजनाकीर्णां नित्योत्सवसमाकुलाम्॥ ८ ॥[०४]

सोऽपश्यद्बहुवृत्तान्तां ब्राह्मणः समतिक्रमन्॥ ९ ॥ [०५]

धर्मव्याधमपृच्छच्च स चास्य कथितो द्विजैः ।[०६]
अपश्यत्तत्र गत्वा तं सूनामध्ये व्यवस्थितम् ॥ १० ॥[०७]

लक्षालङ्कारः- सूनामध्ये व्यवस्थितम् इत्यत्र परेण हिंसितमहिषादिमांसानां विक्रयाय शस्त्रेण च्छेदः सूना तस्याः मध्ये ।

---

(०१)(१) अतिक्रमन्नं (४) (अ)भिपालितां; (अ)भिरक्षितां.
(०२)(१) धर्मकेतु; धर्मज्ञैस्तु; धर्मस्तुति०. (४) हर्म्यप्राकारं; हर्म्यप्राकारतोरणां; हर्म्यप्राकार०शोभनां; वृहत्प्राकारशोभितां; गृहप्राकारशोभिनीं; गृहप्रासादशोभितां;.
(०३)(१) नगरीं (forस पुरीं).(२) युतां (forवृताम्) (३). पुण्ये (forपण्यै०);.विविधैर् (forबहुभिर्);
(०४)(२) योधैं (for यानैं). बहुधा (forभिंर्).युतां (forवृताम्). (४) उद्यानशत० सङ्कुलां; नित्योत्सवविभूषितां.
(०५)(१) सोपश्यन्; स पश्यन् (for सोपश्यद्). बहुवृत्तानां (२) क्रंमान्; क्रंमं; क्रमत् अपृच्छन्त; अपृच्छंश्च;०अपृच्छत्स.
(०६) (४) (अ)पि (for(अ)स्य).
(०७)(१) सोपश्यत् (forअपश्यत्). (२) सूना मध्ये; शु (शू) नां (forसूनां).

मार्गमाहिषमांसानि विक्रीणन्तं तपस्विनम्।**
आकुलत्वाच्च सेतणामेकान्ते संस्थितो द्विजः ॥ ११ ॥(०१)

लक्षालङ्कारः- आकुलत्वात्तु सेतूनाम् इत्यत्र सेतूनां धर्मसेतुनां ज्ञाने आकुलत्वात् व्याकुलचित्तत्वात् ।

स तु ज्ञात्वा द्विजं प्राप्तं सहसा सम्भ्रमोत्थितः ।**
आजगाम यतो विप्रः स्थित एकान्तदर्शने ॥ १२ ॥(०२)

**व्याधः**

**अभिवादये त्वा भगवन्स्वागत ते द्विजोत्तम।**
**अहं व्याधो हि भद्रं ते किं करोमि प्रशाधि माम् ॥ १३ ॥(०३)**

एकपत्न्या यदुक्तोऽसि गच्छ त्वं मिथिलामिति।**
जानाम्येतदहं सर्वं यदर्थं त्वमिहागतः ॥ १४ ॥(०४)

**मार्कण्डेयः**

श्रुत्वा च तस्य तद्वाक्यं स विप्रो भृशविस्मितः ।**
द्वितीयमिदमाश्चर्यमित्यचिन्तयत द्विजः ॥ १५ ॥(०५)

अदेशस्थं हि ते स्थानमिति व्याधोऽब्रवीदिदम्।**
गृहं गच्छाव भगवन्यदि ते रोचतेऽनघ । (०६)

---

(०१) (१) मृग० ;मार्गे (forमार्ग०). माहिषं मार्गमासं च. (२) मनस्विनं; जितेन्द्रियः (forतपं) (३). विक
तृणाम्; हि कें; च कें; घृणां चक्रे; तु क्रेत्राणाम. (४) ह्येकान्ते ( एकान्ते );
(०२)(१) श्रुत्वा; दृष्ट्वा (for ज्ञात्वा). (२) सम्भ्रमान्वितः. अकस्मात्सम्भ्रमान्वितः (कुंलः) (३) ततो (forयतो). अभ्याजगाम तं विप्रं. (४) स्थितम्. एकान्तमानसं (सें); एकान्तदर्शने (मांसने); एकाग्रमानसं;.
(०३) धर्मव्याधः (forव्याध उं). /*(१) त्वां (forत्वा). (३) हि (forतु).भगवन् (forभद्रं ते).
(०४)(१) पतिव्रता यदुं (२) प्रति (forइति). (४)आगते (forआगतः);.
(०५) (१) च तस्य; तस्य तु. (२) भृशवि० स्मितः हर्षपूरितः. (४) (अ)मन्त्रयत (for(अ)चिन्तं);.
(०६) (१) अयुक्तं तु; आदेशस्थं; अदेशस्थो. च; न (forहि) मे (for ते). (२) च तं; इदम् (for द्विजम्).
(३) गृहान् (for गृहं); आगच्छ ( क्य गच्छाव ). (४) ते रोचते ( क्य रोचयसे);.

मार्कण्डेय उवच

बाढमित्येव तं विप्रो हृष्टो वचनमब्रवीत् ।। १६ ।।(०१)
अग्रतस्तु द्विजं कृत्वा स जगाम गृहं प्रति ।। १७ ।। (02)

प्रविश्य च गृहं रम्यमासनेनाभिपूजितः ।**
पाद्यमाचमनीयश्च प्रतिगृह्य द्विजोत्तमः ।। १८ ।।(०३)

अर्घ्येण च स वै तेन व्याधेन द्विजसत्तमः ।(०४)
ततः सुखोपविष्टस्तं व्याधं वचनमब्रवीत् ।। १९ ।।(०५)

**कौशिकः**

कर्मैतद्वै न सदृशं भवतः प्रतिभाति मे।**
अनुतप्ये भृशं तात तव घोरेण कर्मणा ।। २० ।।(०६)

**व्याधः**

कुलोचितमिदं कर्म पितृपैतामहं परम्।**
वर्तमानस्य मे धर्मे स्वे मन्युं मा कृथा द्विज ।। २१ ।।(०७)

विधात्रा विहितं पूर्वं कर्म स्वमनुपालयन्।**
प्रयत्नाच्च गुरू वृद्धौ शुश्रूषेऽहं द्विजोत्तम ।। २२ ।।(०८)

---

(०१) (१) तं हृष्टो; तं विप्रो; सन्तुष्टो (forसंहृष्टो); (२) हृष्टो (for विप्रो).
(०२)(१) अग्रस्थं (forअग्रतस्); तं; च (for तु). (२) स जगाम. गृहं (for गृहान्). जगाम स्वगृहं प्रति.
(०३) (१) स्व०; तद्० (forच); (२) (अ)भ्य० पूज्य तं; च पूजितः (for(अ)भिपूजितः);.
(०४) (१)अर्घ्येण पाद्येन च वै) वै (for च). ०मनीयार्घ्यं (२) परिं (forप्रति०).
(०५)(१) सुखोपविष्टस्तं व्याधं. (२) वचनं चेद० मब्रवीत्; इदं वचनमब्रवीत्
(०६)(३) कर्म तद्वै; किमेतद्वै.
(०७)(१)मृगव्याधः; धर्मव्याधः (for व्याध उ०); कुलोचितं इदं. (२) क-घ-महत्, पदं महत् (forमम). (३) स्वे धर्मे वर्तमानस्य. (४) मा मन्युं; मन्युं मे (forस्वे मन्युं).

(०८)(१) धात्रा हि; विधात्रा; धात्रा वै (forधात्रा तु). कर्म (पूर्वं). (२) पूर्वं (कर्म). कर्म स्वां (स धर्म) मनुपालये (यंन्). (३) हि; तु (forच). (४) शुश्रूषे च; षांमि; षेंये (forषेंऽहं). परन्तप (forद्विजों);.

सत्यं वदे नाभ्यसूये यथाशक्ति ददामि च ।**
देवतातिथिभृत्यानामवशिष्टेन वर्तये ॥ २३ ॥[०१]

न कुत्सयाम्यहं किञ्चिन्न गर्हे बलवत्तरम्।**
कृतमन्वेति कर्तारं पुरा कर्म द्विजोत्तम ॥ २४ ॥[०२]

कृषिगोरक्ष्यवाणिज्यमिह लोकस्य जीवनम्।**
दण्डनीतिस्त्रयी विद्या तेन लोको भवत्युत ॥ २५ ॥[०३]

कर्म शूद्रे कृषिर्वैश्ये सङ्ग्रामः क्षत्रिये स्मृतः ।**
ब्रह्मचर्यं तपो मन्त्राः सत्यं च ब्राह्मणे सदा ॥ २६॥[०४]

राजा प्रशास्ति धर्मेण स्वकर्मनिरताः प्रजाः ।**
विकर्माणश्च ये केचित्तान्युनक्ति स्वकर्मसु ॥ २७ ॥[०५]

भेतव्यं हि सदा राज्ञः प्रजानामधिपा हि ते।**
वारयन्ति विकर्मस्थं नृपा मृगमिवेषुभिः ॥ २८ ॥[०६]

जनकस्येह विप्रर्षे विकर्मस्थो न विद्यते।**

---

(०१)(१) सतां हि नाभ्यसूयेहं. (२) ददानि (forमिं). (अ)हं (forच). (३) देवतानितिथिभृत्यौ (४) अविशेषेण (forअवशिष्टेन). वर्तयन् (for यें);.

(०२)(१) भर्त्स; कोप (for कुत्सं). कश्चिन् (२) दुर्बलं (for न गर्हे). बलवत्तरान्.

(०३)(१) ०गोरक्षवाणिज्यं (२) एतल्; बहु; आहुर् (forइह). जीवितं (forजीवनम्). (४) ताभ्यां (for तेन). लोको भवत्युत.

(०४) (१) कर्मणां तु (for कर्म शूद्रे). (२) क्षत्रियः. मतः (for स्मृतः). (३) चंर्यन् (forचंर्यं). मन्त्रः. (४) सत्यं चैव द्विजे तथा सत्यं च ब्राह्मणैः सह.

(०५)(१) राजा प्रशास्ति (अ)नुं (forप्रं). (२) स्वधर्मनिरताः (तं). (३) विकर्मणशू; ०र्मिणशू; मंणा (for०र्माणशू). कश्चित् (for केचित्);.

(०६) (१) भवितव्यं; हन्तव्यं हि; जेतव्यं हि (for भेतव्यं हि). तदा. राज्ञः; ज्ञां (forज्ञां). (२) अभिपालने (for अधिपा हि ते). प्रजापालनकर्मणि. (३) वारयति; घातं; पातं. विकर्मस्थान(४) नृपा; लुब्धो (forलुब्धा). लुब्धामिव मृगेषुभिः.

स्वकर्मनिरता वर्णाश्चत्वारोऽपि द्विजोत्तम ॥ २९ ॥(०१)

स एष जनको राजा दुर्वृत्तमपि चेत्सुतम्।**
दण्ड्यं दण्डे निक्षिपति तथा न ग्लाति धार्मिकम् ॥ ३० ॥(०२)

सुयुक्तचारो नृपतिः सर्वं धर्मेण पश्यति।**
श्रीश्च राज्यं च दण्डश्च क्षत्रियाणां द्विजोत्तम ॥ ३१ ॥(०३)

राजानो हि स्वधर्मेण श्रियमिच्छन्ति भूयसीम्।**
सर्वेषामेव वर्णानां त्राता राजा भवत्युत ॥ ३२ ॥(०४)

परेण हि हतान्ब्रह्मन्वराहमहिषानहम्।**
न स्वयं हन्मि विप्रर्षे विक्रीणामि सदा त्वहम् ॥ ३३ ॥(०५)

न भक्षयामि मांसानि ऋतुगामी तथा ह्यहम्।**
सदोपवासी च तथा नक्तभोजी सदा द्विज ॥ ३४ ॥(०६)

अशीलश्चापि पुरुषो भूत्वा भवति शीलवान्।**
प्राणिहिंसारतश्चापि भवते धार्मिकः पुनः ॥ ३५ ॥(०७)

---

(०१)(१) जनकस्य हि; श्रेंह (forस्येह). राजर्षे (र्षिर्). (२) दृश्यते (forविद्यते). (४) चत्वारो द्विजसत्तम.
(०२)(१) एव (forएष). (२) दुर्बुद्धि (for दुर्वृत्तं). तत्० (for चेत्). स्वयं (for सुतम्). (३) दण्डेन दण्ड्यान्क्षिपति; दण्डेन दैव्यं (डं) क्षिं; दण्ड्ये दण्डं निक्षिं; दण्डं (०ड्यं) दड्येषु निक्षिप्य० (४) तथा नष्टानधार्मिकान्; तथा न ग्लान्ति धार्मिकाः; तथा पुष्णाति धार्मिकान् (कं) न ग्लापयति धार्मिकं (कः; कान्).
(०३)(१) संयुक्तं (प्रयुक्तं); स ( सु०) युक्तां; स युक्त; युक्ताचारोपि (रों हि); युक्तदारोपि. (२) सर्वान्धर्मेण; सर्वकर्माणि. (३) दण्डं च.
(०४)(१) (ऽ)पि (for हि). च (for स्व०).(३) अपि (forएव). धर्माणां (forवर्णानां).
(०५)(१) (अ)पि; (अ)भि० ;नि० (for हि). राजन् (forब्रह्मन्). (२) वराहान् (for वराह०).(३) न स्वयं विप्रेद्र (for विप्रर्षे). (४) स्वयं त्वहं; च तानहं (forसदा त्वहम्);.
(०६)(१) भक्षयामि च मांसानि. (२) जन्तुकामी (forऋतुं). सदा (forतथा). तु; नु; (अ)पि (for हि). (३) व्रतोपवासी; सदोपवासश्. तदा (for तथा). (४) नक्तं (for नक्त०). सदा; तदा (forतथा);.
(०७)(१) दुःशाल०; सुशीलं (for अशीलं); (३) प्राणिहिंसापरश्; प्राणहिंसारतश्; ०हिंसारतिश् चैव चासि (for चापि); (४) जायते; भविता० (forभवते). पुनर्भवति धार्मिक;.

व्यभिचारान्नरेन्द्राणां धर्मः सङ्कीर्यते महान्।**
अधर्मो वर्धते चापि सङ्कीर्यन्ते ततः प्रजाः ।। ३६ ।।(०१)

कुरुण्डा वामनाः कुब्जाः स्थूलशीर्षास्तथैवच ।
क्लीबाश्चान्धाश्च बधिरा जायन्ते लम्बचूचुकाः ।
पार्थिवानामधर्मत्वात्प्रजानामभवः सदा ।। ३७ ।।(०२)

लक्षालङ्कारः- कुरुण्डा वामना इत्यत्र कुरुण्डाः कुत्सितमस्तकाः । लम्बचूचुका इत्यत्र ‘ चूचुकं तु कुचाग्रं स्यान्न ना क्रोढं भुजान्तरम्’इत्यभिधानात् लम्बमानं चूचुकं येषां ते तथोक्ताः ।

स एष राजा जनकः प्रजा धर्मेण पश्यति** ।। ३८ ।। (०३)

अनुगृह्णन्प्रजाः सर्वा स्वधर्मनिरताः सदा। (04)
पात्येव राजा जनकः पितृवज्जनसत्तम ।। ३९ ।। (05)

ये चैव मां प्रशंसन्ति ये च निन्दन्ति मानवाः ।
सर्वान्सुपरिणीतेन कर्मणा तोषयाम्यहम् ।। ४० ।।(06)

लक्षालङ्कारः- सर्वासु परिणीतेन इत्यत्र सर्वासु अवस्थासु परितः नीतेन नीतियुक्तेन ।

ये जीवन्ति स्वधर्मेण संयुञ्जन्ते च पार्थिवाः ।**

---

(०१) (१) अभिं (for व्यभिं). (२) सङ्कीयते (forसङ्की०).ततः (for महान्). (३) वर्त (for वर्ध). (४) सङ्कीर्यति (तं). ततः (forतथा);.

(०२) (१) ख-उरुण्डा, तरुण्डा; वरुण्डा; कुद्धा, भेरुण्डा; कुभोण्डा; पङ्गवो (for उरुण्डा ). मुडा वामनकाः कुब्जाः (२) द्विज ( क्य (ए)व च). (३/४) क्षीबां (for क्लीबां). जायन्ते बधिरा. लुब्धप्स्यपाः मन्दन्त्युकाः लुब्धरूचुयाः; लुब्धलोलुपाः;स्तब्धलोचनाः; अर्थलोलुपाः; (अ)त्युच्चलोचनाः; लुब्धपिगलाः; लुप्तप्स्यका (forलम्बचूचुका). (५) अधर्मित्वात् अधर्मेण. (५) अभवन्; अभवत् (forअभवः); किल० (forसदा);.

(०३) (१) एव ( क्य एष); राजा जनकः (२) प्रजा; सर्वान् ( क्य सर्वं ); पश्यते.

(०४) (१) अनुगृह्णान्; ०गृह्य. (२) सद्धर्म; स्वधर्मनिरतः. तदा (for सदा);.

(०५)(१)( सदा पात्येष (for पात्येष राजा ) प्रपश्यति (for प्रशं); (२) केचिन् (forये च). पार्थिवाः;वा नराः (for मानवाः).

(०६) (१) सर्वान्स्वयं परीतेन. (२) योज (forतोषं);तान् (for(अ)हम्).

न किञ्चिदुपजीवन्ति दान्ता उत्थानशीलिनः ॥ ४१ ॥(०१)

शक्त्यान्नदानं सततं तितिक्षा धर्मनित्यता
यथार्हं प्रति पूजा च सर्वभूतेषु वै सदा** ॥ ४२ ॥(०२)

त्यागान्नान्यत्र मर्त्यानां गुणास्तिष्ठन्ति पूरुषे (03)
मृषा वादं परिहरेत्कुर्यात्प्रियमयाचितः ॥ ४३ ॥(०४)

न च कामान्न संरम्भान्न द्वेषाद्धर्ममुत्सृजेत्।
प्रिये नातिभृशं हृष्येदप्रिये न च सञ्ज्वरेत्** ॥ ४४ ॥(०५)

न मुह्येदर्थकृच्छ्रेषु न च धर्मं परित्यजेत्।(०६)
कर्म चेत्किञ्चिदन्यत्स्यादितरन्न तदाचरेत् ॥ ४५ ॥(०७)

लक्षालङ्कारः- कर्म चेत्किञ्चित् इत्यत्र अन्यदपि कर्म पुण्यं कर्म, चेत् अस्ति चेत्, स्यात् तदापि स्यात् । इतरत् पुण्यादिरत् ।

यत्कल्याणमभिध्यायेत्तत्रात्मानं नियोजयेत्। (08)

---

(०१) (१) जीवन्ति स्वधर्मेण. (२) सभुजेते; भूञ्जन्ति; ०युजन्ति; ०यजन्ति; भजन्ते; भुज्यते; ०पूज्यन्ते; भूयते ह ( क्य च ); मानवाः ( क्य पार्थिवाः ); तान्सभुञ्जति पार्थिवान् (३) कश्चिद्. (४) दान्ता (forदक्षा). ०शालिनः जीविनः; ०शायिनः सुशीला यान्ति ते दिवं. (१०१०) अधिकपाठः ० कपाठे किञ्चित्फलमाप्नोति स्वधर्मस्य च लोपनात् ।

(०२) (१) भक्त्या०; दया दानं च; शक्त्या तु दानं; शक्त्या च दानं (२) धर्मनित्यदा. (३) यथार्ह०; यथार्थं. ०गृह्या (forपूज्ञा).

(०३)(१) कार्या भूतेषु. सदा०; तदा (forदया). सर्वभूतेषु नित्यदा; धर्मनित्येषु धर्मिता (धर्मतः;नित्यदा). (२) योगान् (for त्यागान्). अत्यन्त० (for अन्यत्र). (३) पौरुषे (forपूं).

(०४)(१) परिहरन. (२) अयाचते०; अथोचितं अनिन्दितः; अतन्द्रितः(forअयाचितः);.

(०५)(१) प्रियेण; प्रिये तु (for प्रिये न). हि भृशं; नाभृशं (अ)पि भृशु; (अ)तिशयं (for(अ)तिभृशं); हर्षेद् (for हृष्येद्). (२) अप्रियेण (for अप्रिये न). (अ)ति; तु ( क्य च).

(०६) (१) मुह्याद् सकृच्छ्रे ( क्य कृच्छ्रेषु). (४) धर्मान. न च रौद्रं समाचरेत.

(०७)(१) कर्मकृत्; कर्म यत (for कर्म चेत्). अस्यापि (for अन्यत्स्याद्). (२) इतरन्यत्; तरसा न (for इतरन्न). तदां (forसमा०);.

(०८) (३) यः; स (forयत्). इह (for अभि०).(४) निवेशं; निबोधं (for नियोजं);.

न पापे प्रतिपापः स्यात्साधुरेव सदा भवेत् ** ।। ४६ ।।(०१)

आत्मनैव हतः पापो यः पापं कर्तुमिच्छति। (02)
कर्म चैतदसाधूनां वृजिनानामसाधुवत् ।। ४७ ।।(०३)

लक्षालङ्कारः- कर्म चैतदसाधूनाम् इत्यत्र असाधूनां वृजिनं नाम यत्कर्म एतदपि साधुवदेव सत्कर्मवदेव ।

न धर्मोऽस्तीति मन्वानाः शुचीनवहसन्ति ये।**
अश्रद्दधान्तो धर्मस्य ते नश्यन्ति न संशयः ।। ४८ ।।(04)

लक्षालङ्कारः- श्रद्दधन्तो धर्मस्य इत्यत्र ' धर्मस्य' इति पाठे धर्मस्य अश्रद्धां कुर्वन्तः ।

महादृतिरिवाध्मातः पापो भवति नित्यदा।
साधुः सन्नतिमानेव सर्वत्र द्विजसत्तम ।। ४९ ।।

लक्षालङ्कारः- महाधृतिरिवाध्मातुः इत्यत्र आध्मातुः युद्धे शङ्खनिनादं कुर्वतः वीरभटस्य महाधृतिर्यथा वर्धते, तथा पापः पापिष्ठोऽपि स्वकृतकर्मश्लाघया नित्यदा भवति अभिवृद्धो भवति, अहङ्करी भवतीत्यर्थः । सन्नतिः अवमानः मानः सन्मानः, तत्र सर्वत्र भवति समो भवति ।

मूढानामवलिप्तानामसारं भाषितं भवेत्।**
दर्शयत्यन्तरात्मा तं दिवा रूपमिवांशुमान् ।। ५० ।।

लक्षालङ्कारः- दर्शयन्त्यन्तरात्मानम् इत्यत्र अन्तरात्मानम् अन्तस्स्थितस्वदुस्स्वभावम् ।

---

(०१)(१) पापे (for पापं). पापी; पापं (for पापः). (२) स्वादुर् (forसाधुर्). तदा (forसदा,).
(०२)(१) गतः (for हतः). (२) स्वः (forयः). पापो भवति नित्यदा.,
(०३)(१) धर्म्यं (for कर्म). वै तद् चेत्तद् ( क्य चैतद् ). (२) वृजिनं (नां) नाम साधुवत्; वृजिनं तच्च साधुवत्; वृजिनानां हि ( ह्य० ) साधकं
(०४) (१) अपहसन्ति. वै (for ये). (२) न श्रद्दधाना; न श्रद्दधन्तो. धर्मज्ञाम् (for०स्य); (३) तेन (ते तु; ते च) नश्यं त्यसशय;,

## (१०११) अधिकपाठः

This Stanga in Tnterchenged in TRK after48.[01]

न लोके राजते मूर्खः केवलात्मप्रशंसया।**
अपि चेह प्रजाहीनः कृतविद्यः प्रकाशते ।। ५१ ।।[02]

लक्षालङ्कारः- अपि चेह प्रजाहीन इत्यत्र प्रजाहीनः स्तोतृजनहीनोऽपि ।

अब्रुवन्कस्यचिन्निन्दामात्मपूजामवर्णयन्।**
न कश्चिद्गुणसम्पन्नः प्रकाशो भुवि दृश्यते ।। ५२ ।।[03]

विकर्मणा तप्यमानः पापाद्विपरिमुच्यते।**
न तत्कुर्यां पुनरिति द्वितीयात्परिमुच्यते।।[04]
करिष्ये धर्ममेवेति तृतीयात्परिमुच्यते ।। ५३ ।।[05]

लक्षालङ्कारः- विकर्मण इत्यत्र विकर्मणा कृतेन तप्यमानः पश्चात्तापं कुर्वाणः । द्वितीयात्परिमुच्यत इत्यत्र द्वितीयात् उपरि क्रियमाणपापात् ।

कर्मणा येन तेनेह पापात्मा द्विजसत्तम।**
एवं श्रुतिरियं ब्रह्मन्धर्मेषु प्रतिदृश्यते ।। ५४ ।।

लक्षालङ्कारः- कर्मणा येन केन इत्यत्र कर्मणा दुष्कर्मणा ।

---

(०१)(४) न सारं (forअसारं). भावितं; जीवितं ( क्यभाषितं). बहु (for भवेत्). (५) दर्शयन्ति; यंन्; यांमि (for यन्ति). (अं)तरात्मा तं (व्मन्त्वं) (६) दिव्यं (forदिवा);,

(०२) (१) लोकः; मूढं (for मूर्खः). (२) केव० लात्मा प्रशंसकः (३) चेन्न (forचेह). श्रिया; मृषा (forमृजा). अपि देहमृ (प्रं) जा हीन;,

(०३) (१) अबुवः; विषवत्; अभवत्; अब्रवत् (forअब्रुवन्);.कस्य च (forकस्यचिन्). (२) च निन्दयन् (forअवर्णं). (३) किश्चिद् (for कश्चिद्). गुणहीनस्तु; कुलसम्पन्नः(४) प्रायशो (forप्रकाशो);. न च (for भुवि). विद्यं (for दृश्यं);.

(०४) (२) पापार्धात्प्रतिं; ०र्धात्परिं;त्स परिं; प्रथमात्परिं द्वि परिं (forद्विपरि); (३) तत् (for(ए)तत्). कुर्यात् (for कुर्यां ); न कुर्यां पुनरे० वेति (४)० द्वितीयं अपि०; प्रति (forपरि०);.

(०५) (१) केन ( क्य तेन );(अ)हं; (अ)पि ( क्य (इ)ह ). (२) पापात्मा द्विजसत्तम. (३) श्रुतमिदं (for श्रुतिं); विद्वन् ( क्य ब्रह्मन् ); (४) परिपृच्छति; प्रतिदृश्यते; परिशस्यते; परिदिश्यते.

पापान्यबुद्ध्वेह पुरा कृतानि प्राग्धर्मशीलोऽपि विहन्ति पश्चात्।**
धर्मो राजन्नुदते पूरुषाणां यत्कुर्वते पापमिह प्रमादात्।। ५५ ।।(०१)

पापं कृत्वा हि मन्येत नाहमस्मीति पूरुषः ।**
चिकीर्षेदेव कल्याणं श्रद्दधानोऽनसूयकः ।। ५६ ।।(०२)

(१०१३) अधिकपाठः

तं तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः ।(०३)

वसनस्येव छिद्राणि साधूनां विवृणोति यः ।(०४)

(१०१४) अधिकपाठः

अपश्यन्नात्मनो दोषान्स पापः प्रेत्य नश्यति ।। ५७ ।।(०५)

पापं चेत्पुरुषः कृत्वा कल्याणमभिपद्यते।
मुच्यते सर्वपापेभ्यो महाभ्रेणेव चन्द्रमाः ।। ५८ ।।

लक्षालङ्कारः- पापं चेत्पुरुष इत्यत्र कल्याणं पुण्यम् ।

यथाऽऽदित्यः समुद्यन्वै तमः पूर्वं व्यपोहति।**
एवं कल्याणमातिष्ठन्सर्वपापैः प्रमुच्यते ।। ५९ ।।(०६)

पापानां विद्ध्यधिष्ठानं लोभमेव द्विजोत्तम।

---

(०१)(१) (अ)कृत्वेह; ०कृत्वेह; (अ)बुध्वा च०; बुध्वेह (for (अ)बुद्धेह). (२) स धर्मशीलो; सद्धर्मं; स्वधर्मं (ऽ)पि निहन्ति; (ऽ) क-घ-पापम्, पि विहन्ति; हि विहाति; (ऽ)भिवहन्ति (forविनिं). पश्यन् (for पश्चात् ). (३) ब्रह्मो; धर्मे (forधर्मो). धर्मन्; राजन् ( क्य ब्रह्मन्) अदति (forनुदते). ब्राह्मणानां; पौरुषाणां. धर्मान्नुदन्ते पौरुषाणां समस्तं. शुभेन पापं न विचार्यमस्ति.
(०२) (१) (अ)भिमन्येत; योभिमन्येत (forहि मन्येत).
(०३) (४) (ऽ)नसूयया.
(०४)(२) संवृं (forविवृं). सः(forयः).
(०५)(४) उपपद्यते. (६) ०भ्रेणैव; भ्रान्दिव (forभ्रैंरिव).
(०६) (१) स उद्यन् (for समुद्यन्). (२) पूर्वं (forसर्वं). सर्वं पापं व्यपोहति.

**तस्मात्तौ विदुषा विप्र वर्जनीयौ विशेषतः ।। ६० ।।**[०१]

**लुब्धाः पापं व्यवस्यन्ति नरा नातिबहुश्रुताः ।**
**अधर्मा धर्मरूपेण तृणैः कूपा इवावृताः ।। ६१ ।।**[०२]

**(१०१५) अधिकपाठः**

This Stanga is Ingerchanged in TRK after 60

**येषां पञ्च पवित्राणि प्रलापा धर्मसंश्रिताः ।****
**सर्वं हि विद्यते तेषु शिष्टाचारः सुदुर्लभः ।। ६२ ।।**[०३]

लक्षालङ्कारः- येषां पञ्च पवित्राणि इत्यत्र पञ्च, यज्ञो दानं तपो वेदाः सत्यं चेति पञ्च धर्मसंश्रिताः पवित्राणि पविभीभूताः । प्रलापाः 'प्रलापोऽनर्थकं वच' इत्यभिधानात् सदसि (ड) दम्भार्थं वचनानि । तेषु सर्वं जनवञ्चनात्प्राप्तं धनकनकादिकम् ।

**मार्कण्डेयः**

**स तु विप्रो महाप्राज्ञो धर्मव्याधमपृच्छत।****
**शिष्टाचारं कथमहं विद्यामिति नरोत्तम ।। ६३ ।।**[०४]

**(१०१६) अधिकपाठः**

**एतदिच्छामि भद्रं ते श्रोतुं धर्मभृतां वर ।**

**(१०१७) अधिकपाठः**

**कौशिकः**

---

(०१) (३) पापान. वि० पश्यन्ति (forव्यवं); (४) अधर्म्या; धंर्म्य०;धंर्मो (forधंर्मा). (५) पापा; कूप (forकूपा). आवृत;.

(०२) (२) मोहमेव; लोभमेष; लोभमोहौ (forमेव);.

(०३) (१) एषां; येषां (forतेषां). धर्माः;पञ्च (forदमः). (२) धर्मसंसृताः; संस्थिताः; संयुताः. शिष्टाचारेषु नित्यदा. (३) सर्वो; वै (forर्व). (४) शिष्टाचाराः. सुदुर्लभाः.

(०४)(१) च (forतु). महाप्राज्ञ; प्रज्ञो; प्राज्ञं; राज्ञ. (३) शिष्टाचारः.इह(for अहं०).(४) विद्यामीति;.

पञ्च कानि पवित्राणि शिष्टाचारेषु नित्यदा।(०१)
त्वत्तो महामते व्याध तद्ब्रवीहि यथातथम् ।। ६४ ।।

**व्याधः**

यज्ञो दानं तपो वेदाः सत्यं च द्विजसत्तम।**
पञ्चैतानि पवित्राणि शिष्टाचारेषु सर्वदा ।। ६५ ।।(०२)

कामक्रोधौ वशे कृत्वा दम्भं लोभमनार्जवम्।**
धर्ममित्येव सन्तुष्टास्ते शिष्टाः शिष्टसम्मताः ।। ६६ ।।(०३)

न तेषां विद्यतेऽवृत्तं यज्ञस्वाध्यायशीलिनाम्।**
आचारपालनं चैव द्वितीयं शिष्टलक्षणम् ।। ६७ ।।(०४)

गुरुशुश्रूषणं सत्यमक्रोधो दानमेव च ।**
एतच्चतुष्टयं ब्रह्मन्शिष्टाचारेषु नित्यदा ।। ६८ ।।(०५)

शिष्टाचारे मनः कृत्वा प्रतिष्ठाप्य च सर्वशः ।**
यामयं लभते वृत्तिं सा न शक्या ह्यतोऽन्यथा ।। ६९ ।।(०६)

वेदस्योपनिषत्सत्यं सत्यस्योपनिषद्दमः ।**
दमस्योपनिषत्त्यागः शिष्टाचारेषु नित्यदा ।। ७० ।।

लक्षालङ्कारः- वेदस्योपनिषत् इत्यत्र उपनिषत् रहस्यम् ।

---

(०१) (५) त्वत्तो (forएतन्०).(६) तद्ब्रवीषि; तद्ब्रवीहि; तन्मे ब्रूहि;.
(०२) (१/२) धर्मव्याधः (for व्याध उं). वेदाः सत्यं.वा (forच). पुङ्गव (forसन्तम).
(०३) (१) च मोहं च (forवशे कृत्वा).(२) मोहम् ( क्य लोभम्); दभमोहमना (दा)र्जव. (३) धर्मम् (forधर्म). संहृष्टाम् (forसतुष्टास् ). (४) ते शिष्टाः सन्तमाः (forसंमताः);.
(०४) (१) यद् (for न). येषां (forतेषां); भिद्यते (for विद्यते); वित्तं; पापं (for ऽवृत्तं). (२) धर्मस्वाध्याय.० शूंलिना; ०शिल्पना; शंलिता; वंर्तिना (३) आचाराचरण चापि ( क्य चैव);.
(०५)(१) धैर्यम्; नित्यम् ( क्य सत्यम्); (२) नित्यशः ( क्य नित्यदा );.
(०६)(१) मतिं (forमनः); (२) प्रतिश्रुत्य. च नित्यशः. (३) यामया; तं; लं (forयं). भजते ( क्य लभते); वृत्ति ( क्य तुष्टि); (४) शक्यान्तुम्; शत्त्यामतो; शक्या ततो; शक्या त्वतो; शक्यमतो ( क्य शक्या ह्यतो);

ये तु धर्मानसूयन्ते बुद्धिमोहान्विता नराः ।**
अपथा गच्छतां तेषामनुयाता च पीड्यते ॥ ७१ ॥[०१]

ये तु शिष्टाः सुनियताः श्रुतित्यागपरायणाः ।**
धर्मपन्थानमारूढाः सत्यधर्मपरायणाः ॥ ७२ ॥[०२]

(१०१८) अधिकपाठः

एतन्महामते व्याध प्रब्रवीहि यथातथम् ।

व्याधः ।

यज्ञो दानं तपो वेदाः सत्यं च द्विजसत्तम ।

पञ्चैतानि पवित्राणि शिष्टाचारेषु नित्यदा ।[०३]

नियच्छन्ति परां बुद्धिं शिष्टाचारान्विता जनाः ।**
उपाध्यायमते युक्ताः स्थित्या धर्मार्थदर्शिनः ॥ ७३ ॥[०४]

नास्तिकान्भिन्नमर्यादान्क्रूरान्पापमतौ स्थितान् ।**
त्यज तान्ज्ञानमाश्रित्य धार्मिकानुपसेव्य च ॥ ७४ ॥[०५]

कामलोभग्रहाकीर्णां पञ्चेन्द्रियजलां नदीम् ।**
नावं धृतिमयीं कृत्वा जन्मदुर्गाणि सन्तर ॥ ७५ ॥[०६]

क्रमेण सञ्चितो धर्मो बुद्धियोगमयो महान् ।**

---

(०१) (१) च ( क्य तु); धर्ममसूयति (तं); धर्मानसुयतेअपथे (३); अन्यथा (forअपथा). चरतां (for गच्छतां); अनुतापोपि; यान्तों; गन्तां (forयान्तापि).च (for(अ)पि,). नश्यति (forपीड्यते);.
(०२)(१) कौशिकः तु (for सु०). (२) श्रुतत्यागं; श्रुत्यायासं; श्रुतियोगं; शुचित्यागं.
(०३) धर्म०; धर्मं (for धर्म्यं). आश्रिय (forआरूढाः). (२) सत्यव्रत०; सत्यान्धर्म०. स्वधर्मपरमैषिणः.
(०४)(१) प्रयच्छेति. तु यां; तं ये (forपरां). (२) चांररता. चांरतया. जनाः;तु मे (forनराः). स्थिता; स्थित्यां;सत्य० (forस्थित्या).
(०५)(१) नास्तिका भिन्नमर्यादा. (२) नराः नरान्; पापान्; घोरान् (forक्रूरान्). पापमतः; न्यायमते; पापमते. स्थिताः; नरान्; स्मृतान्; (forस्थितान्). (४) उपसेव च; उपसेवया;.
(०६) (१) कामक्रोध०.ग्राहवतीं.० (३) धृतिमतीं (तिं). (४) जन्म० दुःखानि; तानि दुर्गाणि.

शिष्टाचारे भवेत्साधू रागः शुक्लेव वाससि ।। ७६ ।।(०१)

अहिंसा सत्यवचनं सर्वभूतहितं परम्।
अहिंसा परमो धर्मः स च सत्ये प्रतिष्ठितः ।। ७७ ।।(०२)

सत्ये कृत्वा प्रतिष्ठां तु प्रवर्तन्ते प्रवृत्तयः ।(०३)

लक्षालङ्कारः- अहिंसा परमो धर्म इत्यत्र उक्तत्रयाणां मध्ये अहिंसा परमो धर्मः ।

सत्यमेव गरीयस्तु शिष्टाचारनिषेवितम्।**
आचारश्च सतां धर्मः सन्तश्चाचारलक्षणाः ।। ७८ ।।(०४)

लक्षालङ्कारः- आचार एव लक्षणं येषां ते आचारलक्षणाः ।

यो यथाप्रकृतिर्जन्तुः स स्वां प्रकृतिमश्नुते।**
पापात्मा क्रोधकामादीन् दोषानाप्नोत्यनात्मवान् ।। ७९ ।।(०५)

लक्षालङ्कारः- यो यथाप्रकृतिः इत्यत्र प्रकृतिः उत्तमा मध्यमा अधमा चेति त्रिविधा ।

आरम्भो न्याययुक्तो यः स हि धर्म इति स्मृतः ।**
अनाचारस्त्वधर्मेति एतच्छिष्टानुशासनम् ।। ८० ।।(०६)

अक्रुद्ध्यन्तोऽनसूयन्तो निरहङ्कारमत्सराः ।**
ऋजवः शमसम्पन्नाः शिष्टाचारा भवन्ति ते ।। ८१ ।।(०७)

---

(०१)(१) चरतो (forसञ्चितो).(३) शिष्टाचारो. (४) रागः शुक्ल इवाम्बरे.,
(०२) (१/२) (२) दमः; पदं (forपरम्). ०स्थितं दमः; ०हितप्लुतः. (४) धर्मे (forसत्ये).
(०३) (१) सत्यं (forसत्ये). प्रतिष्ठानं; प्रतिष्ठानि; प्रतिष्ठां तं;.
(०४)(२) ०निषेवणं; ०निषेविणं. (४) सन्तो ह्या (प्या) ०चारं;.
(०५)(२) स स्वां; स तां; तां स्वां ( क्य स्वां स्वां). (३) मोंहा० दोन् (for कामादीन्). (४) प्राप्नोति. नात्मवान्; (अ)र्गुनुत्तमान् (for(अ)नात्मं);.
(०६)(१) अदम्भो (forआरम्भो). त्यागयुक्तो. (२) स तु; सर्वो; सर्व०; वै (for स हि). स्थितः; स्मृतं; श्रुतः ( क्य स्मृतः). (३) अनाचारास् ) त्वधर्मः स्थात्; त्वधर्मेषु; त्वधर्मश्च (for त्वधर्मेति). (४) इति (forएतत्);.
(०७) (१) न मृष्यन्ते (forऽनस्). (३) जन्तवः; आर्जवः (for ऋजवः). कामं; शिष्टं; शम० मापन्नाः;

त्रैविद्यवृद्धाः शुचयो वृत्तवन्तो मनस्विनः ।**
गुरुशुश्रूषवो दान्ताः शिष्टाचारा भवन्त्युत ।। ८२ ।।(०१)

तेषामहीनसत्त्वानां दुष्कराचारकर्मणाम्।**
स्वैः कर्मभिः सत्कृतानां घोरत्वं सम्प्रणश्यति ।। ८३ ।।(०२)

तं सदाचारमाश्चर्यं पुराणं शाश्वतं ध्रुवम्।**
धर्मं धर्मेण पश्यन्तः स्वर्गं यान्ति मनीषिणः ।। ८४ ।।(०३)

आस्तिका मानहीनाश्च द्विजातिजनपूजकाः ।**
श्रुतवृत्तोपसम्पन्नाः सन्तः स्वर्गनिवासिनः ।। ८५ ।।(०४)

वेदोक्तः परमो धर्मो धर्मशास्त्रेषु चापरः ।**
शिष्टाचारश्च शिष्टानां त्रिविधं धर्मलक्षणम् ।। ८६ ।।(०५)

पा(धा)रणं चापि विद्यानां तीर्थानामवगाहनम्।**
क्षमा सत्यार्जवं शौचं सतामाचारदर्शनम् ।। ८७ ।।(०६)

सर्वभूतदयावन्तो अहिंसानिरताः सदा।**
परुषं च न भाषन्ते सदा सन्तो द्विजप्रियाः ।। ८८ ।।(०७)

---

सर्वसम्पन्नाः; साधुं (४) प्रशास्तारो; शिष्टाचारे.(उ)त;हि (forते);.
(०१) (२) शुचिमन्तो. यशस्विनः, (३) ०शुश्रवे; शुंश्रूषया.० (४) ते;ये; (अ)ति (for (उ)त);
(०२) (१) अहीनसत्वानां (२) धंर्मिणां (३) संवृं; संस्कृं (for सत्कृं). (४) त्रिविधं कर्मलक्षणं.
(०३)(१) तत्; ते (forतं). समाचारम्; सदापरम्; सदाचार्यम्. आचार्यं; आश्यि;अत्यर्थं; (for आश्चर्यं). सदाचारं समास्थाय. (३) धर्म्यं.
(०४) (१) कामं; नामं ( क्य मानं). (३) श्रुतवतो जितक्रोधाः; श्रुतिवित्तोपसम्पन्नाः; श्रुतित्यागोपं. (४) ते नराः; ते वृद्धाः; ते सर्वे; सन्तो वै (for ते सन्तः). स्वर्गवासिनः सन्तः स्वर्गनिवासिनः.
(०५) (१) प्रथमो (forपरमो). (२) धर्मशास्त्रगतोपरः. (३) शिष्टाशीलाश्च; शिष्टाचारश्च; चीर्णं च; शीलं चीर्णं च.
(०६)(१) धारणं; पारगं. वेदानां (forविद्यां). (२) तीर्थानां चावं. सदाचारस्य दर्शनं; सतामाचारदर्शनं (लक्ष्णं).
(०७) (२) ह्यहिंसा (forअहिसां). (३) न प्रभा० षन्ति; च न भाषति, पुरुषाश्च प्रभावन्तः. (४)०जनप्रियाः; द्विजप्रियः; द्विजातयः,

शुभानामशुभानां च कर्मणां फलसश्चये।**
**विपाकमभिजानन्ति ते शिष्टाः शिष्टसम्मताः** ॥ ८९ ॥[०१]

न्यायोपेता गुणोपेताः सर्वलोकहितैषिणः ।**
**सन्तः स्वर्गजितः शुक्लाः सन्निविष्टाश्च सत्पथे** ॥ ९० ॥[०२]

दातारः संविभक्तारो दीनानुग्रहकारिणः ।** [०३]
**सर्वभूतदयावन्तस्ते शिष्टाः शिष्टसम्मताः ।**** ॥ ९१ ॥

सर्वपूज्याः श्रुतधनास्तथैव च तपस्विनः ।
दानशिष्टाः सुखाँल्लोकानाप्नुवन्तीह च श्रियम् ॥ ९२ ॥[०४]

पीडया च कलत्रस्य भृत्यानां च समाहिताः ।**
**अतिशक्त्या प्रयच्छन्ति सन्तः सद्भिः समागताः** ॥ ९३ ॥[०५]
**एवं सन्तो वर्तमानास्त्वेधन्ते शाश्वतीः समाः** ॥ ९४ ॥[०६]

अहिंसा सत्यवचनमानृशंस्यमथार्जवम्।**
**अद्रोहो नाभिमानश्च ह्रीस्तितिक्षा दमः शमः** ॥ ९५ ॥[०७]

---

(०१)(१)अ-पीडया जकलत्रस्य भृत्यानां च समाहिताः ।, (२)क-ख-घ-वै फलाश्रयम्, फलसश्चयं; सफ० लाश्रय; फलसंश्रयं; फलसङ्गिनां (३) अवजानं० तसू (४) ये (forते),
(०२) (१) त्यागों (for न्यायों). (२) सर्वभूतं; सर्वलोकहिते रताः; स्वर्गमार्गाभिकां० क्षिणः (३) जिन्ताः. शुक्राः; शुद्धस्; शक्त्याः; शक्याः (forशुक्लाः); सर्वजिताकाङ्क्षाः (४) सनि० कृष्टां;,
(०३) (१) दातारः सङ्ग्रहीतारो. (२) ०काङ्क्षिणः.
(०४)(१) सर्वे प्रज्ञाः शास्त्रवन्तसू; सर्वे पूज्याः श्रुतवत, श्रुतवतः सर्वपूज्यासू; सतं (सद्भिः) पूज्याः श्रद्दधानास् ) (३) दाननिष्ठाः, (शिष्टाः) शुभील्लोकान्; स्वकाँल्लो कान्; शुभान्याशु. (४) प्रामु ( क्य आप्नु). च प्रियं; शाश्वतं; चाश्रयान्;.
(०५) (१) (अ)पि ( क्य च); (२) भृत्यानार्थसमां. (३) अपि (forअति०).(४) सन्तः सद्भिः
लोकयात्रां च पश्यन्तो धर्ममात्महितानि च ।.
(०६) (१) प्र न (forच). (२) धर्माधर्मं; धर्मात्मात्मं. (४) त्वेधन्ते (forएं),
(०७) (२) तथां (forअथां). (३/४) (ऽ)नभिमानश्च; नाभिमानश्च. अद्रोहो गुरुभूतेषु तितिक्षा च दमः शमः,

धीमन्तो धृतिमन्तश्च भूतानामनुकम्पकाः ।**
अकामद्वेषसंयुक्तास्ते सन्तो लोकसाक्षिणः ।। ९६ ।।(०१)
न चैव द्रुह्येद्दद्याच्च सत्यं चैव सदा वदेत् ।। ९७ ।।(०२)

सर्वत्र च दयावन्तः सन्तः करुणवेदिनः
गच्छन्तीह सुसन्तुष्टा धर्मपन्थानमुत्तमम् ।। ९८ ।।(०३)
शिष्टाचारा महात्मानो येषां धर्मः सुनिश्चितः ।। ९९ ।। (04)

कामक्रोधपरित्यागः शिष्टाचारनिषेवणम् ।। १०० ।।(०५)

कर्म च श्रुतसम्पन्नं सतां मार्गमनुत्तमम्।**
शिष्टाचारं निषेवन्ते नित्यं धर्ममनुव्रताः ।। १०१।।(०६)

लक्षालङ्कारः- अतिपुण्यान्नदानानि तानि इत्यत्र तानि पूर्वोक्तपुण्यानि अतिपुण्यान्नदानानि अतिपुण्यमन्नदानं येषां तानि भवेयुरिति सम्बन्धः ।

प्रज्ञाप्रासादमारुह्य मुच्यन्ते महतो भयात्।
प्रेक्षन्तो लोकवृत्तानि विविधानि द्विजोत्तम।**

---

(०१)(१) ह्रीमतो (for धी०). बुद्धि (forधृतिं). (३) अकामदोषं. (४) लोकसंमताः; साङ्क्षिणः
त्रीण्येव तु पदान्याहुः सतां व्रतमनुत्तमम्।.

(०२)(१) च;(अ)त्र (forतु). सतामाहुः; पराण्याहु (२) सतां व्रतम्; सन्तः पदम्. अनुस्मरन् (forअनुत्तमम्) (३) द्रुह्येत् चैव.

(०३) (१) हि (forच). (२) करुणावेदिनस्तथा. (३) हि (for(इ)ह). ससन्तुष्टा; सुखं तुष्टा.

(०४)(१) धर्म०; सत्यं (for धर्म्यं). (२) सुनिश्चितं; सनातनः; सुनिष्ठितः येषां धर्माः सुनिश्चिताः
अनसूया क्षमा शान्तिः सन्तोषः प्रियवादिता।.

(०५) (४)०निषे० विणः; ०निषेवितः; निंषेवितं.

(०६) (१) कर्मिणः ( ०र्मणा; ० ०र्मण्याः) श्रुतसम्पन्नाः; कर्म च (वा; चा) श्रुतसपन्न कर्मणेति गौडपाठे कर्मणा श्रुतेन च सम्पश्य मित्यर्थः(२) धर्मम् (for मार्गम्); अनुव्रतं ( क्य अनुत्तमम्). सतां मार्गगता० स्तथा. (३) निषेवतो(४) नित्यं धर्ममनुव्रताः

(१) प्रज्ञाप्रसादम् आश्रिय (forआरुह्य); (२)शोभते०; मुच्यन्ते; ( क्य मुह्यन्तो ); मुह्यतो जनाः; भयात् (३) प्रेक्षते; प्रेक्ष्यते प्रेक्षति, (४) द्विजोत्तमाः. दानानि (for पापानि). (६) द्विजवरात्मज.

अतिपुण्यान्नदानानि तानि द्विजवरोत्तम।। १०२ ।।

एतत्ते सर्वमाख्यातं यथाप्रज्ञं यथाश्रुतम्।**
शिष्टाचारगुणं ब्रह्मन्पुरस्कृत्य द्विजर्षभ।। १०३ ।।(०१)

अस्मिन् पर्वणि १७१अध्याये १०३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि पतिव्रतोपाख्याने एकसप्तत्यधिकशततमोऽध्यायः ।। १७१ ।।

(मार्कण्डेयसमस्यापर्वणि २ अध्यायः)

## 03- 06- 172 Adhyaya

# १७२. द्विसप्तत्यधिकशततमो अध्यायः ।

कौशिकं प्रति धर्मव्याधेन सर्वैहिंसाया दुस्यजत्वोपपादनपूर्वकं सर्ववर्णाना स्वस्वधर्मानुष्ठानस्य श्रेयस्साधनत्वादिकथनम् ।।

मार्कण्डेयः

स तु विप्रमथोवाच धर्मव्याधो युधिष्ठिर ।**
यदहमाचरे कर्म घोरमेतदसंशयम् ।। १ ।।(०२)

विधिस्तु बलवान्ब्रह्मन्दुस्तरं हि पुरा कृतम्।
पुरा कृतस्य पापस्य कर्मदोषो भवत्ययम् ।। २ ।। (०३)

---

(०१) (२) यथाश्रुति. (३)चारंगुणं; चारं महद्; चारंक्रमान्. (४)० द्विजोत्तम.
(०२)(३) यदह ह्या०. अहं यदा(for ह्या).; ह्याचरं; समाचरे; (आ)चरं; आचरे; ह्यचरं(for ह्याचरे).; (४) घोररूपम् (for मेतद्).; अनावृतं (for असंशयम्),
(०३)(१) विप्र (for ब्रह्मन्).; (२) पुरातनं (for पुरा कृतम्).;(३) क-राज्ञो महानसे पुर्व नृपसक्य द्विजसत्तम

दोषस्यैतस्य वै ब्रह्मन्विघाते यत्नवानहम्। [01]
**विधिना हि हते पूर्वं निमित्तं घातको भवेत्।****
**निमित्तभूता हि वयं कर्मणोऽस्य द्विजोत्तम ।। ३ ।।**[०२]

लक्षालङ्कारः- विधिना विहितं पूर्वम् इत्यत्रख पूर्वं विहितं, यन्निमित्तं हीनयोनिप्राप्तो कारणम्, तस्य घातकः हीनयोनावपि पुनः पुनः पुण्यकरणेन नासखः भवेत् ।

येषां हतानां मांसानि विक्रीणामीह वै द्विज
**तेषामपि भवेद्धर्म उपयोगे न भक्षणात् ।। ४ ।।**[०३]

देवतातिथिभृत्यानां पितणां चापि पूजनम् ।। ५ ।।[०४]

लक्षालङ्कारः- तेषामपि भवेत्कर्म इत्यत्र देवतातिथिभृत्यानां पितृणां प्रतिपूजनात्, अनन्तरं तेषां विक्रीतमांसानां स्वयं भक्षणात्, उपभोगेन उप समीपस्थानां भार्यादीनां भोगेन च कर्म स्तकर्म भवेत् ।

ओषध्यो वीरुधश्चैव पशवो मृगपक्षिणः ।**
**अनादिभूता भूतानामित्यपि श्रूयते श्रुतिः ।। ६ ।।**[०५]

आत्ममांसप्रसादेन शिबिरौशीनरो नृपः ।**
**स्वर्गं सुदुर्गमं प्राप्तः क्षमावान्द्विजसत्तम ।। ७।।**[०६]

राज्ञो महानसे पूर्वं रन्तिदेवस्य वै द्विज ।**

---

।,
(०१) (१) दोषस्य (for पापस्य).; (२) शिरसा (for दोषस्य).; तस्य (for (ए)तस्य).; वा; च (for वै).; (३) निर्घाते ह; निघाते; विदित्वा; निपाते; निष्कृतौ (for विघाते).; भवेत् (for अहम्),
(०२) (१) हि हते; (अ)भिहते; विहितं.; (२) पातको.; महान् (for भवेत्).
(०३)(१) तेषां; एषां.; मांसानां.; (२) विक्रीणीमो; णीम; णाम.; विक्रीणामीह वै द्विज; विक्रीणीमो द्विजोत्तम.; (३) कर्म (for धर्म).; (४) उपयोगेन.; रक्षणात्; भक्षणम्; भक्षणे; कर्मणा.;.
(०४)(१) भूतानां.; (२) चापि पूजनम्; (नात्); प्रतिपूजनम् (ने).
(०५)(१) चैव (for चापि).; अनादिभूता.; भूतस्य; भूतानाम्; (for लोकस्य).
(०६)(१) प्रसादेन.; सुदुर्गमं; दुर्गमनं.

द्वे सहस्रे तु वध्येते पशूनामन्वहं तदा ॥ ८ ॥(०१)

*अधिकपाठः

(१०१९) अहन्यहनि वध्येते द्वे सहस्रे गवां तथा।*(०२)

स मांसं ददतो ह्यन्तं रन्तिदेवस्य नित्यशः
अतुला कीर्तिरभवन्नृपस्य द्विजसत्तम ॥ ९ ॥(०३)

चातुर्मास्ये च पशवो वध्यन्त इति नित्यशः । (04)
अग्नयो मांसकामाश्च इत्यपि श्रूयते श्रुतिः ॥ १० ॥

यज्ञेषु पशवो ब्रह्मन्वध्यन्ते सततं द्विजैः ।**
संस्कृताः किल मन्त्रैश्च तेऽपि स्वर्गमवाप्नुवन् ॥ ११ ॥(०५)

यदि नैवाग्नयी ब्रह्मन्मांसकामा भवन्पुरा।**
भक्ष्यं नैवाभवन्मांसं कस्यचिद्विजसत्तम।(०६)
अत्रापि विधिरुक्तश्च मुनिभिर्मांसभक्षणे ॥ १२ ॥(०७)

देवतानां पितणां च भुङ्क्ते दत्त्वापि यस्सदा।**
यथाविधि यथाश्राद्धं न प्रदुष्यति भक्षणात् ॥ १३ ॥(०८)

---

(०१)(१) महाध्वरे.; (३) द्वि (for द्वे).; वध्यन्ते.; (४) प्रत्यहं (for अन्वहं).; सदा(for तदा).
(०२) वध्यन्ते; पच्यन्ते; पच्येते; वर्धते.; सहस्रे द्वे.; गवां तदा; तु वै गवां.
(०३)(१)क-राज्ञो महानसे पूर्व नृपस्य द्विजसत्तम ।,(२) वै तदा; नित्यदा; धीमतः(for नित्यशः).; (३) प्रीतिर् (for कीर्तिर्).;
(०४)(१) मृगस्य; नृपतेद् (for नृपस्य).; (२) ०स्थे च (for स्वेषु).; (३) श्रुतिः; चोच्यते (for नित्यशः).
(०५)(२) इति च (for इत्यपि).; (४) वध्यन्ते श्रूयते श्रुतिः; ते द्विजसत्तम.; (५) सत्कृताः विप्रै (for मन्त्रै).; (६) आप्नुयुः; आप्नुयात्.
(०६)(१) वै ना; चैवा (for नैवा).; मांसकामा नाभविष्यन्.; (२) ब्रह्मन्यग्नयः पुरा; मांसकामाः पुराभवन्. (३) न वै० (for नैव).; (अ)भवन् (for भवेन्).
(०७)(१) अथा (for अत्रा).; स; तु (for च).; (२) मुने मांसस्य भक्षणे.; .
(०८)(१) च; (अ)पि (for तु).; (२) यथाशास्त्रं; यथाश्राद्धं.; (४) प्र० (for स).; दूष्येत (for दुष्यति).

अमां राशीं भवत्येवमित्यपि श्रूयते श्रुतिः ।। १४ ।।

भार्यां गच्छन्ब्रह्मचारी ऋतौ भवति ब्राह्मणः ।(०१)

**सत्यनृते विनिश्चिते अत्रापि विधिरुच्यते।। १५ ।।**

लक्षालङ्कारः- अमांसाशी भवेदेवमित्यपि श्रुयते श्रुतिः । भार्यां गच्छन् ब्रह्मचारि ऋतौ भवति ब्रह्मण इत्यत्र यथा ऋतौ ऋतावेव भार्यां गंच्छन् ब्राह्मणः ब्रह्मचारी भवति, एवम् अमांसाशी अविहितमांसभक्षणादन्यत्र मांसं भक्षयन् अमांसाशीत्यपि श्रुतिः श्रूयते ।

सौदासेन तदा राज्ञा मानुषा भक्षिता द्विजः ।**

शापाभिभूतेन भृशमत्र किं प्रतिभाति मे ।। १६ ।।(०२)

स्वधर्म इति कृत्वा तु न त्यजामि द्विजोत्तम।**

पुरा कृतमिति ज्ञात्वा जीवाम्येतेन कर्मणा ।। १७ ।।(०३)

स्वकर्म त्यजतो ब्रह्मन्नधर्म इह दृश्यते।**

स्वकर्मनिरतो यस्तु धर्मः स इति निश्चयः ।। १८ ।।(०४)

पूर्वं हि विहितं कर्म देहिनं न विमुञ्चति।**

धात्रा विधिरयं दृष्टो बहुधा कर्मनिर्णये ।। १९ ।।(०५)

द्रष्टव्या तु भवेत्प्रज्ञा क्रूरे कर्मणि वर्तता।

कथं कर्म शुभं कुर्यां कथं मुच्ये पराभवात् ।। २० ।। (०६)

---

(०१) (१) भवेदेवम्.; (२) इत्येषा वैदिकी श्रुतिः .

(०२)(२) तत्रापि (for अ).; (३) तदा (for पुरा).; (४) ब्राह्मणा (for मानुषा).; (६) ०इति (for अत्र).; मे (for ते).

(०३)(१) स्वकर्म.; स्वकर्म इति; (मेंति च); तत्कृत्वा.; (२) नित्यदापि (for न त्यजामि).

(०४)(१) अधर्मस्; स्वधर्मं.; (२) स्वधर्मम्; स्वकर्म (for अधर्म).; इति (for इह).; चोच्यते; विश्रुतः (for दृश्यते).; (३) स्वधर्मनिरतो.; च (for तु).; स्वकर्मणि रतिर्या च.; (४) स्वधर्म; धर्मः स.

(०५)(१) यत्पूर्वं व; कुले हि (for पूर्व हि).; (२) देही तन् (for देहिनं).; नावमुचति; न विमुच्यते.; (३) चायं विधिर् (for विधिरयं).; (४) कर्मसिद्धये; निश्चये.

(०६)(१) प्रष्टव्यं; द्रष्टव्या; द्रष्टव्यस.; प्रज्ञा; ब्रह्मन.; (२) वर्तते; वर्ततां.; धर्मो धर्मविनिश्च(र्ण)ये.; (३) कुर्यात.;,

कर्मणस्तस्य घोरस्य बहुधा निर्णयो भवेत्। (01)
दाने च सत्यवाक्ये च गुरुशुश्रूषणे तथा ।। २१।।(०२)

द्विजातिपूजने चाहं धर्मे च निरतः सदा।**
अभिमानातिवादाभ्यां निवृत्तोऽस्मि द्विजोत्तम।(०३)
कृषिं साध्विति मन्यन्ते तत्र हिंसापरास्मृता ।। २२ ।।(०४)

कर्षन्तो लाङ्गलैः पुंसो घ्नन्ति भूमिशयान्बहून्।**
जीवानन्यांश्च बहुशस्तत्र किं प्रतिभाति ते ।। २३ ।।(०५)

धान्यबीजानि यान्याहुर्व्रीह्यादीनि द्विजोत्तम।**
सर्वाण्येतानि जीवानि तत्र किं प्रतिभाति ते ।। २४ ।।(०६)

लक्षालङ्कारः- सर्वाण्येतानि बीजानि इत्यत्र बीजानि भाव्यङ्कुरकारणानि ।

अध्याक्रम्य पशूंश्चापि घ्नन्ति वै भक्षयन्ति च ।**
वृक्षांस्तथौषधीश्चापि छिन्दन्ति पुरुषा द्विजा ।। २५ ।।(०७)

जीवा हि बहवो ब्रह्मन्वृक्षेषु च फलेषु च ।**

---

(०१) (४) मुच्येत.; कथं मुक्तिः परा स्मृता.; (५) ह्यस्य (for तस्य).
(०२)(११/२) दानेन वाक्येन ०षया तथा (षणेन च).;,
(०३) (१३) ०पूज० नाच्चाहं; ०पूजा लभते; ०पूजनेनाहं.; (१४) चात्र रतः (for च निरतः).; (१५) अभिवादाति०; अतिवाचभि०; अतिवाचत; अभि०मानातिवादाभ्यां; अतिवादाभिमानाभ्यां. (१६) निवृत्तो द्विजसत्तम.,
(०४) (१) साध्वीति.; (३) कृष्यन्तो,; मर्त्या; विप्र (for पुंसो).;.
(०५)कृषन्तो लाङ्गलैर्मर्त्या (०लैरुव; लैर्विप्र).; (५) सु०(for च).; बीजान्यन्यानि ब.; (६) मे (for ते).,
(०६) (१) अ-अष्टर्धानि न सन्ति, अ-अष्टार्धानि न सन्ति, धान्यजीवानि.; (२) तृणा (for व्रीह्या).; (३) भूतानि; जीवा हि; बीजानि (for जीवानि).; (४) मे (for ते).,
(०७) (१) अपाक्रम्य; अप्या; अथ वान्य०;, आध्याक्रम्य; अध्यारुह्य; अभ्या० क्रम्य; बुध्या.; चैव (for चापि).; (२) वै (for च).; (३) वृक्षांस्तथौषधीश्चापि (श्चैव); वृक्षान्महौषधीश्चैव.; (४) गच्छन्ति (for छिन्दन्ति).; छिदन्तो भक्षयन्ति च.,

उदके बहवश्चापि तत्र किं प्रतिभाति ते ।। २६ ।।(०१)

सर्वं व्याप्तमिदं ब्रह्मन्प्राणिभिः प्राणिजीवनैः ।**
मत्स्यान्ग्रसन्ते मत्स्याश्च तत्र किं प्रतिभाति ते ।। २७ ।।(०२)

सत्त्वैः सत्त्वानि जीवन्ति बहुधा द्विजसत्तम।**
प्राणिनोऽन्योन्यभक्षाश्च तत्र किं प्रतिभाति ते ।। २८ ।।(०३)

चङ्क्रम्यमाणा जीवांश्च धरणीसंश्रितान्बहून्।**
पद्भ्यां घ्नन्ति नरा विप्र तत्र किं प्रतिभाति ते ।। २९।।(०४)

लक्षालङ्कारः- चङ्क्रम्यमाणा जीवांश्च इत्यत्र अतिशयेन पादक्रमं पादविक्षेपं कुर्वन्तः चङ्क्रम्यमाणाः ।

उपविष्टाः शयानाश्च घ्नन्ति जीवाननेकशः ।**
ज्ञानविज्ञानवन्तश्च तत्र किं प्रतिभाति ते।(०५)

जीवैर्ग्रस्तमिदं सर्वमाकाशं पृथिवी तथा।**
अविज्ञानाच्च हिंसन्ति तत्र किं प्रतिभाति ते ।। ३० ।।(०६)

अहिंसेति यदुक्तं हि पुरुषैर्विस्मितैः पुराः ।

---

(०१) (१) जीवाश्च; पि; नि(for जीवा हि).; वहुशो (for बहवो).; राजन्; विप्र (for ब्रह्मन्).; (४) मे (for ते).,
(०२) (११) जगदिदं (for इदं ब्रह्मन्).; (१२) प्राणजविनैः; (१३) मत्स्याः; मत्स्यान्.; ग्रसन्ति.; (१४) मे (for ते).,
(०३)(१) जीवैर्जीवा हि जीवन्ति.; (४) मे (for ते).
(०४)(१) चक्रम्यमाणाब्द्. जीवाश्च.; (२) धरणी.; अपि (for बहून्).; धरणीं संश्रि द्विज; धरणीसम्भृतान्बहून्.; (३) तांस्तु; ब्रह्मन् (for विप्र).; (४) मे(for ते).
(०५)(१) उप विष्टाञ्छयानांश्च.; (२) चैतान् (for जीवान्).; अशेषतः; अचेतसः; असंशयं (for अनेकशः).; (३) विज्ञानतस्तथाज्ञानं; अज्ञानादथ वा ज्ञानात्; विजानन्तस्तथाज्ञानात.; (४) मे (for ते).
(०६)(१) जनैर् (for जीवैर्).; व्याप्तम् (for ग्रस्तम्).; (३) ज्ञानाश्च.; एकैकं च विहिंसन्ति.; (४) मे (for ते).

के न हिंसन्ति जीवान्वै लोकेऽस्मिन्द्विजसत्तम। ।। ३१ ।।[०१]

बहु सञ्चित्य इति वै नास्ति कश्चिदहिंसकः ।। ३२ ।।[०२]

लक्षालङ्कारः- पुरुषैर्विस्मृतैः पुरा इत्यत्र विगतं स्मृतम् उक्ततत्वस्मरणं येषां तैः ।

अहिंसायां तु निरता यतयो द्विजसत्तम।**
कुर्वन्त्येव हि हिंसां ते यत्नादल्पतरा भवेत् ।। ३३।।[०३]

आलक्ष्याश्चैव पुरुषाः कुले जाता महागुणाः ।**
महाघोराणि कर्माणि कृत्वा लज्जन्ति वै द्विज ।। ३४ ।।[०४]

सुहृदः सुहृदोऽन्यांश्च सुहृदश्चापि दुहृदः ।**
सम्यक्प्रवृत्तान्पुरुषान्न सम्यगनुपश्यतिः ।। ३५ ।।[०५]

लक्षालङ्कारः- सुहृदश्चापि दुर्हृद इत्यत्र अन्ये केचित् सुहृदः शोभनहृदययुक्तान् ।

समृद्धैर्न न नन्दन्ति बान्धवा बान्धवैरपि।**
गुरूंश्चैव विनिन्दन्ति मूढाः निश्चितमानिनः ।। ३६ ।।[०६]

लक्षालङ्कारः- सुसमृद्धैः इत्यत्र सुसमृद्धैः बान्धवैर्निमित्तैः बान्धवा अपि न नन्दन्ति ।

---

(०१)(१) हिंसतीति (for अक्लिंहसेति).; (२) च स्मृतैः; विस्तृतैः; विस्मृतैः (for विस्मितैः).; (३) को; ते (for के).; नु (for न).; हिंसति.; जीवांश्च.;

(०२)(१) इह; इति (for बहु).; सञ्चिन्त्यम.; इति; बहु (for इह).; इह सञ्चित्यमानोपि.

(०३) (१) अहिंसाधर्मनिरता.; (३) कुर्वतेव; ते न (for न्त्येव).; कुर्वतामपि हिंसा च; तेषामपि हि सा ब्रह्मन्.; (४) अल्पतरो; ०परा (अ)भवत् (for भवेत्).

(०४)(१)क-ख-घ-आलक्षिता हि, आलक्षाश्चैव; अलक्ष्म्या; अलक्ष्या (०क्षा); आलक्ष्याश्चापि; अलक्षितोपि (ता हि); आलक्षिता हि (नापि).; पुरुषः. (२) कुले जातो गुणः. (३) कार्याणि; सर्वा (for कर्मा).; (४) नैव च; चैव ह; वै द्विज; वै० नृपाः; वै नृप (for वै न च).

(०५) (१) दुर्हृदो (for सुहृदो).; सुहृदोसुहृदोन्यांश्च.; (२) सुहृदश्चापि (for दुर्हृद).; (३) सम्यक्प्रवृत्ताः; पुरुषा.; (४) अनुपश्यत (ते).; असम्यगनुपश्यतः (श्य च; इयंति); स सम्यगनु०दृश्य च; सम्यगर्थं न पश्यतः; सम्यगेवानुपश्यतः; सम्यगेव न पश्यति.

(०६) (१) सु(अ)समृद्धैर्न; स समृद्धैश्च.; निर्वृति; निन्यते.; सम्यश्वैश्च न लज्जति; खस्थानात्प्रच्याविताः; स्युर्.; (३) अपि; चापि (for चैव).; गुरूंश्चैव विनिघ्नन्ति; श्च नापि नन्दन्ति; श्चैवाभिनन्दन्ति.; (४)

बहु लोके विपर्यस्तं दृश्यते द्विजसत्तम।**
धर्मयुक्तमधर्मं च तत्र किं प्रतिभाति ते ।। ३७ ।।(०१)

वक्तुं बहुविधं शक्यं धर्माधर्मेषु कर्मसु।**
स्वकर्मनिरतो यो हि स यशः प्राप्नुयान्महत् ।। ३८ ।।(०२)

वेदधर्माविरुद्धं यत्प्रमाणैः प्रतितं शुभम् ।।*(०३)

अस्मिन् पर्वणि १७२अध्याये ३८श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि पतिव्रतोपाख्याने ब्राह्मणव्याधसंवादे द्विसप्तत्यधिकशततमोऽध्यायः ।। १७२ ।।

(मार्कण्डेयसमस्यापर्वणि २ अध्यायः)

## 03- 06- 173 Adhyaya

# १७३. त्रिसप्तत्यधिकशततमोऽध्यायः

१७३. धर्मव्याधेन कौशिकं प्रति पौरुणनिन्दनेन दैवप्रशंसनपूर्वकं सुकृतदुष्कृतयोः सुख दुःखहेतुताप्रतिपादनम् ।।

मार्कण्डेयः

धर्मव्याधस्तु निपुणं पुनरेव युधिष्ठिर **
विप्रर्षभमुवाचेदं सर्वधर्मभृतां वरः ।। १ ।।(०४)

---

शीघ्रं; मूर्खाः. मूढा निश्चितमानिनः (०निनं; नसाः).

(०१)(१) लोकं.; (ऽ)पि (for वि०).; (२) चेह; चैव (for द्विज०).; (३) अयुक्तं; अधर्म्यं; अधर्मश्.; (४) मे (for ते).

(०२) (१) वक्तं शक्यं.; धर्म्याभिर्म्ये(र्मे)षु.

(०३) (३) स्वधर्म.; (४) संशमं (for स यशः).; नरः (for महत्).

(०४) (१);निपुणः (२);सर्वधर्म (for विदां); सर्वं धर्मभृतां; धर्म्य धर्मं वर; सर्वभूतहिते रतः;

**व्याधः**

श्रुतिप्रमाणो धर्मोऽयमिति वृद्धानुशासनम्।**
सूक्ष्मा गतिर्हि धर्मस्य बहुशाखा ह्यनन्तिका।(01)
प्राणान्तिके विवाहे च वक्तव्यमनृतं भवेत् ॥ २ ॥(०२)

अनृतेन भवेत्सत्यं सत्येनैवानृतं भवेत्।(०३)
यद्भूतहितमत्यन्तं तत्सत्यमिति धारणा ॥ ३ ॥(०४)
विपर्ययकृतोऽधर्मः पश्य धर्मस्य सूक्ष्मताम् ॥ ४ ॥ (05)

१०२१*अधिकपाठः

यत्करोत्यशुभं कर्म पश्य धर्मस्य सूक्ष्मताम् ।

यत्करोत्यशुभं कर्म शुभं वा यदि सत्तम।**
अवश्यं तत्समाप्नोति पुरुषो नात्र संशयः ॥ ५ ॥(०६)

अस्य कर्तुर्गतिं सर्वां वक्ष्यामि द्विजसत्तम ।(०७)

विषमां च दशां प्राप्तो देवान्गर्हति वै भृशम्।**
आत्मनः कर्मदोषाणि न विजानात्यपण्डितः ॥ ६ ॥(०८)

---

(०१)(१);यं; (ऽ)च (for हि); श्रुतिः प्रमाणं धर्मस्य; (२);इह; अभि (for इति); शासनं (for भाषितम्); इति वृद्धानुशासनं; (४);ह्यनन्त्यका; ह्यनन्तका (ता); ह्यनिन्दिता.,
(०२) (१);प्राणान्तिके; प्राणव्यये विवादे; (२);कर्तव्यम् (for वक्तव्यम्); चरेत् (for भवेत्);
(०३) (१);अनृतेन; अनृतं वै वदेत् (for भवेत्); (२);सत्ये चैव; सत्येनैव (for सत्यं चैव); वदेत् (for भवेत्);
(०४)(१);अत्यर्थं; (२); धर्मिणां; धारणात्; सत्तम;
(०५)(१); विपर्यासं;
(०६)(१);यः (for यत्); (अ)र्गुशुचिं (for (अ)शुभं); (२);यदि (for द्विज); शुभं वापि द्विजोत्तम;
(०७)(३);भक्षयन् (for अवश्यं); फलमाप्नोति; तमवां;
(०८) (१);हि; तु (for तु); प्राप्तो (for प्राप्य); (२);देवं; देशान् गर्हति वै; गर्हयते; अर्हति वै; (३); कर्मणः (for आत्मनः); दोषैर्हि; दोषं हि; दोषान्वै; दोषांश्च; दोषं तु; दोषं वै; दोषत्वं; दोषेण; दोषाणां; (४);च जानाति (for विजां); न वि, (for नैव); जानन्त्यपण्डिताः;

मूढो नैकृतिकश्चापि चपलश्च द्विजोत्तम।
न शुभं कर्म बध्नाति पुरुषं पापनिश्चयम्।[०१]
शुभं भध्नावि वै कर्म पुरूषः पापनिश्वयः ।। ७ ।।[०२]

सुखदुःखविपर्यासो यदा समुपपद्यते।**
नैनं प्रज्ञा सुनीतं वा त्रायते नैव पौरुषम् ।। ८ ।।[०३]

लक्षालङ्कारः- नैनं प्रज्ञा इत्यत्र सुनीतं सुशिक्षितम् एनं प्रज्ञा न त्रातीति न इति उत्तरनञावृत्त्या योजना ।

योऽयमिच्छेद्यथा कामं तं तं कामं स आप्नुयात्।**
यदि स्यादपराधीनं पौरुषस्य क्रियाफलम् ।। ९ ।।[०४]

संयताश्चापि दक्षाश्च मतिमन्तश्च मानवाः ।**
दृश्यन्ते निष्क(ष्फ)लाः सन्तः प्रहीणाः सर्वकर्मभिः ।। १० ।।[०५]

भूतानामपरः कश्चिद्धिंसायां सततोत्थितः ।**
वञ्चनायां च लोकस्य सुखेनैव युज्यते ।। ११ ।।[०६]

लक्षालङ्कारः- हिंसायां सततोत्थित इत्यत्र हिंसायां वञ्चनायां च यः पुरुषः सततोत्थितः सर्वदा उन्मुक्तः ।

अचेष्टमपि चासीनं श्रीः कश्चिदुपतिष्ठति।**

---

(०१) नैष्कृतिकं मूढा नैकृतिकाश्चापि (श्चैव); (२);चपलाश्च त्तमः चपला द्विजसत्तम.
(०२)(आशु (for शुभं); अशुभं कर्म वै कर्म (र्म बध्नाति);)
(०३)(३);विपर्ययैर; सैर्; से; सान्; सं; साद्; (४); सदा (for यदा); समभिपद्यते; (५); दैवं; नैतं; एनं; प्रजा; सुनितिर्; (६); न च (नैव); त्राति नैव च पौरूषं;
(०४)(१);यं (for यो); (२);तं० ते; ततः; तथा; स तं (for तं तं); उपाश्नयात्; अवाप्नुयात्; स आग्नयात्; समाप्नुं; उपाश्नुते; समश्नुते (for यात्); (३); यदि स्यान्न (न्ना); परां; (४); पौरुषं;
(०५)(३);निष्कुला; निःफलाः (४);प्रहीना कर्मसु;
(०६) (२);सततोद्यतः; अपरोद्यतः (४);सुखेनैव (न हि); जीर्यते; युज्यते (for जीवति); स सुखी जीवते सदा (सुखेनैवेह जीवति);

कश्चित्कर्माणि कुर्वन्हि न प्राप्यमधिगच्छति ।। १२ ।।(०१)

देवानिष्ट्वा तपस्तप्त्वा कृपणैः पुत्रगृद्धिभिः ।**
दशमासधृता गर्भे जायन्ते कुलपांसनाः ।। १३ ।।(०२)

अपरे धनधान्यैश्च भोगैश्च पितृसञ्चितैः ।**
विपुलैरभिजायन्ते लब्धास्तैरेव मङ्गलैः ।। १४ ।।(०३)

लक्षालङ्कारः- देवानिष्ट्वा इत्यत्र कृपणैः निर्भाग्यैः पुत्रगृध्रुभिः केवलं पुत्रेच्छुभिः, न तु देवताभक्तैः । तैरेव मङ्गलैः स्वमातापितृकृतदेवयागादिमङ्गलैः कारणैः लब्धाः, अपरे सभाग्यैः देवताभक्तैः दशमासधृता गर्भाः पितृसञ्चितैर्धनधान्यैर्भोगैश्च सह अभिजायन्ते । 'न देहजा मनुष्यानाम्' इति पाठे केवलदेहजा न, किन्तु कर्मजा एवेत्यर्थः ।

न देहजा मनुष्याणां व्याधयो द्विजसत्तम।
कर्मजा हि मनुष्याणां रोगा नास्त्यत्र संशयः ** ।। १५ ।। (०४)

आधिभिश्चैव बाध्यन्ते व्याधैः क्षुद्रमृगा इव। (05)
ते चापि कुशलैर्वैद्यैर्निपुणैः सम्भृतौषधैः ।**
व्याधयो विनिवार्यन्ते मृगा व्याधैरिव द्विज ।। १६ ।।(०६)

लक्षालङ्कारः- ते चापि कुशलैः इत्यत्र भोक्तव्यं प्रारब्धं कर्म, ते च व्याधयोऽपि ।

येषामस्ति च भोक्तव्यं ग्रहणीदोषपीडिताः ।**

---

(०१)(१);अचेष्टमपि चासीनः (२);तिष्ठते; सर्पति; गच्छति; (३); कुर्वाणो; गच्छन्ति (for कुर्वन्हि); कस्यचित्कुर्वतः कर्म, (४);न प्राश्यम्; नाप्राप्यम्; न चार्थम् (for न प्राप्यम्);
(०२) (२);कर्मभिः; गृद्धिभिः; गृघ्नुभिः (३);दश मासान्; मासं (for मास); गर्भा;
(०३) (२);कोपैश्च; भोज्यैश्च; (३);अपि; चापि; अधि; अथ (for अभि); (४);लब्धा; बद्धाश्च इव (for एव);
(०४) (१);कर्मजो; कर्मात्मा; (२); भोगा; रोगो (for रोगा);
(०५)(१);व्याधिभिश् व्याधयो विनिवार्यते; (२);व्यालैः .
(०६) (१);वैद्ये; वेद्यैद्; वन्द्यैर्; (२);विपुलैः (for निपुणैः); विनिवर्तते; (४); मृगव्याधैर् (लैर्); द्विपाः (for द्रिज);

न शक्नुवन्ति ते भोक्तुंचेष्टितं पूर्वकर्मया ।। १७ ।।(०१)

लक्षालङ्कारः- ग्रहणीरेगपीडिता इत्यत्र ग्रहणीरोगः सङ्ग्रहण्याख्यारोगः । भोक्तुं भोजनं कर्तुम् ।

अपरे बाहुबलिनः क्लिश्यन्ते बहवो जनाः ।**
दुःखेन चाधिगच्छन्ति भोजनं द्विजसत्तम ।। १८ ।।(०२)

इति लोकमनाक्रन्दं देहशङ्कापरिप्लुतम्।**
स्रोतसाऽसकृदाक्षिप्तं ह्रियमाणं बलीयसा ।। १९ ।।(०३)

लक्षालङ्कारः- इति लोकमनाक्रन्दम् इत्यत्र अनाक्रन्दं आक्रन्दनेऽप्यशक्तम् । स्रोतसा कर्माख्यनदीप्रवाहेन ।

न म्रियेयुर्न जीर्येयुः सर्वे स्युः स(सा)र्वकामिकाः ।**
नाप्रियं प्रतिपश्येयुर्वशित्वं यदि वै भवेत् ।। २० ।।(०४)

लक्षालङ्कारः- वशं च यदि वै भवत इत्यत्र यदि यद्यपि वशं परिहर्तुं शक्यं भवेत् । तथापि जलान्तस्स्थितशिंशुमारमिव, विषदिग्धदुग्धमिव, अन्धःकूपमिव च तदप्रियं न प्रतिपश्येयुर्वै ।

उपर्युपरि लोकस्य सर्वो गन्तुं समीहते।**
यतते च यथाशक्ति न च तद्वर्तते तथा ।। २१ ।।(०५)

बहवः सम्प्रदृश्यन्ते तुल्यनक्षत्रमङ्गलाः ।**

---

(०१) (१);एषाम्; तेषाम्; (२); रोगं (for दोषं); (३);ते दोषं; भोक्तव्यं; भोक्तुं च (for ते भोक्तुं); (४);चेष्टितुं पूर्वकर्मणा (तुं पुण्यकर्मणः; तं पश्य कर्मणः);

(०२)(१);वह्नि (for बाहुं); (२);क्लिश्यति; दृश्यन्ते; तुष्यन्ति;

(०३)(१); अ-क-क्रान्तं देहशङ्कापरिप्लुतम्, क्रान्तं (for क्रन्दं); (२);मोहशोक परायणं; देहः (मोह; देव); शङ्कापरि प्लुतं; (३); कालेन; श्रोतसा, आसक्तं; आकृष्टं; (४);ह्नियमानं; प्रीयमाणं विलोकय (for बलीं);

(०४)(१);जीवेयुर् सर्व कामिकाः; स्वर्गं; (४); वश्यं च; स्वयशो; विधिश्च; स्ववशो; वशं च (for वशित्वं); नो (for वै);

(०५)(१);लोकोयं (for लोकस्य); (२);अभीप्सते (for समीहते); (४);यथा न तथा वर्तते च तत्;

महच्च फलवैषम्यं दृश्यते कर्मसन्धिषु ।। २२ ।।(०१)

(१०२५) अधिकपाठः ० कपाठे;

वहन्ति शिबिकामन्ये यान्त्यन्ये शिबिकागता,:

न केचिदीशते ब्रह्मन्स्वयङ्ग्राहस्य सत्तम।**
कर्मणां प्राकृतानां वै इह सिद्धिः प्रदृश्यते ।। २३ ।।(०२)

लक्षालङ्कारः- स्वयं ग्राह्यस्य सत्तम इत्यत्र ग्राह्यस्य ग्रहीतं योग्यस्य फलस्य स्वयं स्वयमेव न दृश्यते शक्तो न दृश्यते । प्रकृतानां प्रकर्षेण कृतानामत्युत्कटानामित्यर्थः ।

यथाश्रुतिरियं नित्या जीवः किल सनातनः ।**
शरीरमध्रुवं लोके सर्वेषां प्राणिनामिह ।। २४ ।।(०३)

लक्षालङ्कारः-यथा श्रुतिरियम् इत्यत्र इयं श्रुतिर्यथा नित्या आद्यन्तरहिता तथा ।

वध्यमाने शरीरे तु देहनाशो भवत्युत।**
जीवः सङ्क्रमतेऽन्यत्र कर्मबन्धनिबन्धनः ।। २५ ।।(०४)

**ब्राह्मणः**

कथं धर्मविदां श्रेष्ठ जीवो भवति शाश्वतः ।**
एतदिच्छाम्यहं ज्ञातुं तत्त्वेन वदतां वर ।। २६ ।।(०५)

**व्याधः**

---

(०१) (१);वइस्तवः (for बहवः); (३);तु (for च); फलवैफल्यं (४);सर्वस्त्वंसु; कर्मसिद्धिषु

(०२) (१);केचिद् (for कश्चिद्); दृश्यते; गीयते; ईहते (for ईशते); (२); ग्राह्यस्य; ग्राहश्च सङ्ग्रहे (for सत्तम); (३);कर्मणा प्रकृं हि (for वै); (४);देहसिद्धिः; इह सन्धिः;,

(०३)(१);तथा.,

(०४)(१)वधं (for वध्यं); च देहे (for शरीरे); च (वै); (for तु); (३)नित्यं (for ऽन्यत्र); (४)कर्मबधन (धानु); बन्धनः; कर्मसङ्गिनं; वश्यश्च शाश्वतः; बधनबन्धितः,

(०५)(१)कौशिकः (for ब्राह्मण उं); धर्म (ब्रह्म) विदां; कर्मविदां (भृतां); (३) श्रोतुं (for ज्ञातुं); (४)तत्वतो वरदां (for वदतां);

**न जीवनाशोऽस्ति हि देहभेदे मिथ्यैतदाहुर्म्रियतीति मूढाः ।****
**जीवस्तु देहान्तरितः प्रयाति दशार्धतस्तस्य शरीरभेदः ।। २७ ।।**(०१)

लक्षालङ्कारः- दर्शार्धतस्तस्य शरीरभेद इत्यत्र दश दशेन्द्रियाणि, ततः अर्धं पञ्चमहाभूतानि, ततः जीवस्य शरीरभेदः पूर्वशरीरादागामिशरीरस्य भेदः । इन्द्रियवैलक्षण्यात् भूतपञ्चकवैलक्षण्याच्च नानादेहानां भेद इत्यर्थः ।

अन्यो हि नाश्नाति कृतं हि कर्म
मनुष्यलोके मनुजस्य कश्चित्।
**यत्तेन किञ्चिद्धि कृतं हि कर्म**
**तदश्नुते नास्ति कृतस्य नाशः ।। २८।।**(०२)

लक्षालङ्कारः- तदश्नुते नात्र कृतस्य नाश इत्यत्र अत्रैव नाश्नुते, किन्तु परत्र । अतः कृतस्य कर्मणः नाशो नेति नञावृत्त्या योजना ।

सुपुण्यशीला हि भवन्ति पुण्या
नराधमाः पापकृतो भवन्ति।
**नरोऽनुयातस्त्विह कर्मभिः स्वै-**
**स्ततः समुत्पद्यति भावितस्तैः ।। २९ ।।**(०३)

लक्षालङ्कारः- अपुण्यशीला इत्यत्र नराधमा इति वक्ष्यमाणत्वात् अत्र नरेत्तमा इति लभ्यते

---

(०१) (१)धर्मव्याधः (for व्याधः); देहनाशो त्विह (for (अ)स्ति हि); शरीरभेदे (for हि देहं); (२)म्रियते प्रमूढाः; म्रियतीति मूढाः; म्रियते किलेति; प्रवदन्त्यमूढाः (४)दशार्धता तस्य; आदृश्यते वापि; दशापरस्तस्य (for दशार्धतैवास्य);

(०२)(११)अन्यच्च; अन्यश्च; अन्यस्य (त्रं); अन्यैश्च; (१/२)स वै कर्ता सुखदुःखस्य भागी।

चैव (for एव); भोगी (for भागी); मनुष्यलोके मनुजस्य कश्चित्; स वै कर्ता सुखदुःखस्य (दुःखसुखस्य); भाः (भो); गी (३१)यत्नेन (for यत्तेन); सुकृतं; च कृतं (for हि कृतं); कृतं च (for हि कर्म); (४१)नात्र (for नास्ति);

(०३)(१)सुपुण्य (for अपुण्यं); हि (तु); (for च); (अ)पुण्या (for पुण्या); (२)नरा धमाः (for नरों); पुण्यकृतो; पापकृता; (३) नरस्तु जातस्त्विह; नरास्तु (रों हि; राथ); गच्छन्ति हि; नरोनुगम्येत हि; अधो नरो गच्छति; (४)वृतैः; कृतैः (for ततः); समुत्पत्स्यति, भावितैसू

। ते अजामिलादयः स्वप्रारब्धकर्मणा किञ्चित्कालमपुण्यशीला अपि अन्ततः पुण्याः पुण्यकृत एव भवन्ति । नराधमाः कदाचित् संसर्गवशात् पुण्यशीला अपि जटासुरादिवत् अन्ततः पापकृत एव भवन्ति । नरोऽनुयात इत्यत्र नरः मध्यामजीवः ततः देहनाशानन्तरं स्वैः कर्मभिः पुण्यैः पापैर्वा अनु अनुसृत्य यातः स्वर्गं नरकं वा प्राप्तः तैः कर्मभिर्भावितः समुत्पत्स्यति पुनर्भूलोक एव जननं प्राप्नोति ।

**ब्राह्मणः**

कथं सम्भवते योनौ कथं व पुण्यपापयोः ।**
जातीः पुण्या ह्यपुण्याश्च कथं गच्छति सत्तम ।। ३० ।।(०१)

लक्षालङ्कारः- कथं सम्भवत इत्यत्र पुण्यपापयोः सम्बन्धी मध्यमजीवः ।

**व्याधः**

**गर्भाधानसमायुक्त कर्मेद सम्प्रदृश्यते।****
**समासेन तु ते क्षिप्रं प्रवक्ष्यामि द्विजोत्तम ।। ३१ ।।(०२)**

यथा सम्भृतसम्भारः पुनरेव प्रजायते।**
शुभकृच्छुभयोनीषु पापकृत्पापयोनिषु ।। ३२ ।।(०३)

शुभैः प्रयोगैर्देवत्वं व्यामिश्रैर्मानुषो भवेत्।**
मोहनीयैर्वियोनीषु त्वधोगामी च किल्बिषैः ।। ३३ ।।(०४)

लक्षालङ्कारः- मोहनीयैर्वियोनीषु इत्यत्र अधोगामी अन्धतमोयोग्यः अधमजीवः मोहनीयैः मिथ्याज्ञानयोग्यैः प्रयोगैः मनःप्रयोगैः वियोनीषु हरिविरुद्धदैत्यादियोनिषु भवेत् । कदाचिद्बह

(०१)(१)कौशिकः (for ब्राह्मणः); स (for सं); (३)जाती; जातिः; जाताः; जात्या तु (for हि); जात्या पुण्यामपुण्यां च; (४) गर्भं (for कथं); गच्छन्ति जन्तवः (for सत्तम);
(०२)(१)धर्मव्याधः (for व्याध उं); गर्भाधाने; (२) सम्प्रपद्यते; वर्तते; पश्यते; (३)तत्सर्वं; तान्सर्वान् (for ते क्षिप्रं); (४)प्रवक्ष्येहं (for क्ष्यामि); वक्ष्यामि द्विजसत्तम;
(०३)(३)शुभमाप्नोति; शुभयोनौ तु (for योनीषु!);
(०४)(३)वियोनी च; विमोहत्वं; च तिर्यक्त्वं; अमानीषु (for वियों); (४)यथाकामी च; अधर्मैरेति; अधोगामी च; अधोगामिषु किल्बिषी;

।क्षत्रादियोनावुत्पत्तावपिदीर्घकालं विरुद्धयोनिरेवेति सूचनाय वियोनीष्विति दीर्घप्रयोगः । अधमे अधोगामित्वस्योक्तत्वात् मध्यमे मध्यमगतिः, उत्तमे ऊर्ध्वगातिश्चेति गतिभेदोऽपि द्रष्टव्यः । किल्बिषीत्युक्तत्वात् मध्यमे पुण्यपापे, उत्तमे केवलपुण्यं चेति साधनभेदोऽपि सूचितः ।

जातिमृत्युजरादुःखैः सततं समभिद्रुतः ।**
संसारे पच्यमानश्च दौषैरात्मकृतैर्नरः ।। ३४ ।।(०१)

तिर्यग्योनिसहस्राणि गत्वा नरकमेव च ।**
जीवाः सम्परिवर्तन्ते कर्मबन्धनिबन्धनाः ।। ३५ ।।(०२)

जन्तुस्तु कर्मभिस्तैस्तैः स्वकृतैः प्रेत्य दुःखितः ।**
तद्दुःखप्रतिघातार्थमपुण्यां योनिमाप्नुते ।। ३६ ।।(०३)

ततः कर्म समादत्ते पुनरन्यं नवं बहु ।**
पच्यते तु पुनस्तेन भुक्त्वापथ्यमिवातुरः ।। ३७ ।।
अजस्रमेव दुःखार्तोऽदुःखितः सुखसञ्ज्ञितः ।। ३८ ।।(०४)

ततोऽनिवृत्तबन्धत्वात्कर्मणामुदयादपि।** (०५)

लक्षालङ्कारः- दुःखितः सुखसञ्ज्ञित इत्यत्र दुःखितोऽपि बहुदुःखभरितोऽपि सुखसञ्ज्ञितः

---

(०१)(१)जन्मं; व्याधिं (२)द्रुताः; द्रुतं; (३) सश्चरे सश्चारे (for संसारे); पच्यमाना (नै)ङ०। (४)नराः .
(०२)(३)सम्प्रतिवर्तन्ते; (४) कर्मबन्धनबधनाः (संयुताः; बन्धिताः); कामबन्धनसंयताः;
(०३)(१)जन्तवः; जेतुः स्व; जन्तुश्च; जन्तुषु स्वैः स्वैः (for तैस्तैः); (२)सु (for स्व); दुःखिताः (४) अश्रुयुः; आप्नुते; ऋच्छति; पुण्यां योनिम वाप्नते०; पुण्यां योनिं समश्नुते; अपुण्या याति योनयः
लक्षालङ्कारः- तद्दुःखप्रतिघातार्थम् इत्यत्र तद्दुःखप्रतिघातो भवेदिति मनसोद्दिशन्नपि अपुण्य इति कृत्वा योनयः तादृशयोनीः प्राप्नोति ।
(१)समाधत्ते; (२) न तु (for बहु); पुनरन्यत्र सद्धहु; (३) पश्यते; मुच्यते; पच्यन्ते; (४) (अ)भक्ष्यम् (for (अ)पथ्यम्) इवात्मनः;
(०४) (१)इव; इह (for एव); (२)सुखसञ्ज्ञकः; सुखसञ्ज्ञितं भ्रमत्यसुखपीडितः; दुःखितोदुःखसञ्ज्ञितः
(०५)(१)अतो निमित्तबन्धं०; निर्वृत्तबन्ध०; निवृत्तबन्धुं; (२)क-ख-घ-संसारै - वेदने, परिभ्रमति संसारं; सश्चारे; (३)बहुवेदने (नं); परिवेष्टनं;

कदाचित्सुखवानिति सञ्ज्ञितः दुःखव्यामिश्रसुखभोक्तेत्यर्थः । ततोऽनिवृत्तबन्धत्वात् इत्यत्र अनिवृत्तबन्धत्वात् केवलमिथ्याज्ञानिवत् केवलतत्त्वज्ञानिवच्च सर्वथा सुखदुःखात्मकसंस ।।रबन्धनिवृत्तिरहितत्वात् ।

परिक्रामति संसारे चक्रवद्बहुवेदनः ।
स चेन्निवृत्तबन्धस्तु विशुद्धश्चापि कर्मभिः ।। ३९ ।। (01)

लक्षालङ्कारः- स चेन्निवृत्तबन्घ इत्यत्र सः त्रिविधजीवानां मघ्ये विद्यमानः एको जीवः निवृत्तबन्धश्चेत् आत्यन्तिकबन्धनिवृत्तियोग्यश्चेत् । स चेन्निवृत्तबन्ध इति द्वितीयपद्यै सः उत्तमलोकानुभवी निवृत्तबन्धः चेत् नितरं वृत्तः वर्तितः हरौ स्नेहानुबन्धो यस्य चेत् भक्ति-परिपाकवांश्चेदित्यर्थः ।

१०२६*अधिकपाठः

This Stanga is Interchanged in TRK after 40

तपोयोगसमारम्भं कुरुते द्विजसत्तम ।। ४० ।।

कर्मभिर्बहुभिश्चापि लोकानश्नाति मानवः ।
प्राप्नोति सुकृताँल्लोकान्यत्र गत्वा न शोचति ।। ४१ ।।(०२)

पापकर्मा पापवृत्तः पापस्यान्तं न गच्छति।(०३)
पुण्यं कुर्वन्पुण्यव्रतः पुण्यस्यान्तं न गच्छति।**
तस्मात्पुण्यं यतेत्कर्तुं वर्जयीत च पापकम् ।। ४२ ।।(०४)

लक्षालङ्कारः- पापकर्मा पापवृत्त इत्यत्र पूर्वपूर्वपापकर्मवशात् उपर्युपरि पापेष्वेव प्रवृत्तः अधमजीवस्तु पापस्य पापफलस्य अन्तं न गच्छति । संसारबन्धच्छेदानन्तरमपि

---

(०१) (१)ते (for चेन्); (२)निवृत्तं (for विशुद्धं);

(०२) (४)प्राप्नते शोचते

(०३)(४)वर्जयेत्तच्च; वर्जयीत च; वर्जयित्वा तु पापकम्;,

(०४) (१)क-घ-पापात् कुपापवृत्तश्च, ख-पापं कुर्वन् पापवृत्तः, पास्मृत्तिः पापात्मा पापवृत्तिश्च; सततं पापवृत्तस्तु; (२)ख-पुण्यं कुर्वन् पुण्यवृत्तः पुण्यस्यान्तं न गच्छति, नियच्छति (for न गं);

केवलपापफलभूतं दुःखमेवान्धे तमसि भुङ्क्ते इत्यर्थः ।

तत्कर्म यदि चेत्कर्तुः इत्यत्र तत् तस्मात्कारणात् कर्तुः जीवस्य कर्म यदि न मुञ्चत्येव चेत्तथापि ।

अनसूयुः कृतज्ञश्च कल्याणानि च सेवते।**
सुखानि धर्ममर्थं च स्वर्गं च लभते नरः ॥ ४३॥[०१]

संस्कृतस्य च दान्तस्य नियतस्य यतात्मनः ।**
प्रज्ञस्यानन्तरा वृत्तिरिह लोके परत्र च ॥ ४४ ॥[०२]

लक्षालङ्कारः- प्राज्ञस्यानन्तरा वृत्तिः इत्यत्र अन्तरमवकाशावधीति वचनात् अनन्तरा निरवधिका ।

सतां धर्मेण वर्तेत क्रियां शिष्टवदाचरेत्।**
असङ्क्लेशेन लोकस्य वृत्तिं लिप्सेत वै द्विज ॥ ४५ ॥[०३]

सन्ति ह्यागमविज्ञानाः शिष्टाः शास्त्रे विचक्षणाः ।**
स्वधर्मेण क्रिया लोके कर्मणः सोऽप्यसङ्करः ।[०४]
प्राज्ञो धर्मेण रमते धर्मं चैवोपजीवति ॥ ४६ ॥[०५]
तस्माद्धर्मादवाप्तेन धनेन द्विजसत्तम।**
तस्यैव सिञ्चते मूलं गुणान्पश्यति तत्र वै ॥ ४७ ॥[०६]
धर्मेण वृत्तिं कुरुते धर्मं चैव प्रशंसति ।[०७]

---

(०१)(१)अनसूयः कृतप्रज्ञः (२)कल्याणानेव; णानि च; कश्म्लूनि च; (४)सुकृतैर्लभते महत्;
(०२) (१)सत्कृतस्य; च; तु; (इ)ह (for हि); (२)जितात्मनः, (३)नुत्तमा (for नन्तरा);
(०३)(२)क्रियाः (३)धर्मं (for लोकं); (४)लस्त्वेत, द्विजः;
(०४)(१)ह्यागमं (for ह्यागतं); आगतागमविज्ञानाः (२)शास्त्रे (for शास्त्र); (४)कर्मणः सोस्य सङ्करः; कर्मनाशोसि सं; कुर्वाणः सो ह्यसं; कुर्वाणास्ते ह्यसङ्करः (राः); कुर्वाणा ये ह्यसङ्कराः; कर्मणः स ह्यसङ्करः;
(०५)(१)प्रजा; राज (for प्राज्ञो);.
(०६) (१) धर्मे च (for धर्मेण); लभं (for रमं); (२)प्रजा चैं; धर्मेणैं (for धर्मं चैं);
(०७)(३)ततो धा (स्माद्ध) र्मादवाप्तेन; स तु धर्मादवाप्तौर्हि; (४) धनेन; धर्मेषु; नष्टेषु धनैर्ब्राह्मणसत्तम (५)

धर्मात्मा भवति ह्येवं चित्तं चास्य प्रसीदति।**
स मित्रजनसन्तुष्ट इह प्रेत्य च नन्दति ।। ४८ ।।[०१]

लक्षालङ्कारः- तस्यैव साश्चित इत्यत्र यत्र तस्यैव धनस्य सश्चिते सञ्चये आर्जने सति मूलगुणं मूलीभूतं न्यायार्जनरूपगुणम् ।

शब्दं स्पर्शं तथा रूपं गन्धानिष्टांश्च सत्तम।**
प्रभुत्वं लभते चापि धर्मस्यैतत्फलं विदुः ।। ४९ ।।[०२]

धर्मस्य च फलं लब्ध्वा न तृप्यति महाद्विज।**
अतृप्यमाणो निर्वेदमापेदे ज्ञानचक्षुषा ।। ५० ।।[०३]

प्रज्ञाचक्षुर्नर इह दोषं नैवानुरुध्यते।**
विरज्यति यथाकामं न च धर्मं विमुञ्चति ।। ५१ ।।[०४]

फलत्यागे च यतते दृष्ट्वा लोकं श्रियात्मकम्।**
ततो मोक्षे प्रयतते नानुपायादुपायतः ।। ५२ ।।[०५]

लक्षालङ्कारः- दृष्ट्वा लोकं श्रियात्मकम् इत्यत्र लोकं रहेर्वैकुण्ठलोकं श्रियात्मकं लक्ष्म्यात्मकं दृष्ट्वा नानोपायात् भक्तरक्षणाय दैत्यशिक्षणाय च वामनत्रिविक्रमत्वादिनानोपाया यस्य तस्मान्नारायणात् तत्प्रसादादिति यावत् । उपायतः श्रवणमननाद्युपायैः ।

एवं निर्वेदमादत्ते पापं कर्म जहाति च ।**

---

मुञ्चते; (आ)र्सिचते; (६) गुणं पश्यन्ति;

(०१)(१)भवते; वदति; (३) स मित्रं; (४) परत्रेह (for इह प्रेत्य); विन्दति; नश्यति (for नन्दति);

(०२) (१)शब्दस्पर्शं गन्धं (for रूपं); शब्दे (ब्द); स्पर्शे तथा रूपे; (२) रसे (स); गन्धे च; रूपमिष्टं च; रसं गन्धं च; गन्धेभीष्टे च (for गन्धानिष्टांश्च); भारत; सर्वशः (for सत्तम);

(०३) (१)अधर्मस्य (for धर्मस्य च); (२)तुष्यति; त्रक्ष्यति, महान्; सदा(for महा); (३)अतृप्यमानो; तृप्यमाणोपि; अतुष्यमाणो; न तृप्यमाणो; (४)आपेदे; नादत्ते (for आदत्ते);

(०४) (१)ज्ञानं (for प्रज्ञां); इति; इव (for इह); (२)चैव; एव (for नैव); (अ)नुरुध्यति; बुध्यते दोषैर्नैवावरुध्यते; (३) विरज्येत; विरज्यते; विरतिं च; विराजति; विरज्येति; तथा कामान्;

(०५)(१)फलं (forसर्वं); न (for च); (२)क्षयान्वितं; जयात्मकं; क्रिया त्मकं; (३) चिरं; मोक्षं; (४) नानुपायान्; यतते तान् अपायतः .

धार्मिकश्चापि भवति मोक्षं च लभते परम् ॥ ५३ ॥(०१)

तपो निःश्रेयसं जन्तोस्तस्य मूलं शमो दमः ।**
तेन सर्वानवाप्नोति कामान्यान्मनसेच्छति ॥ ५४ ॥(०२)

इन्द्रियाणां निरोधेन सत्येन च दमेन च ।**
ब्रह्मणः पदमाप्नोति यत्परं द्विजसत्तम ॥ ५५ ॥(०३)

**ब्राह्मणः**

इन्द्रियाणि तु यान्याहुः कानि तानि यतव्रत।**
निग्रहश्च कथं कार्यो निग्रहस्य च किं फलम् ॥ ५६ ॥(०४)

कथं च फलमाप्नोति तेषां धर्मभृतां वर ।**
एतदिच्छामि तत्त्वेन धर्मं ज्ञातुं निबोध मे ॥ ५७ ॥(०५)

अस्मिन् पर्वणि १७३अध्याये ५७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि ब्राह्मणव्याधसंवादे त्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥

(मार्कण्डेयसमस्यापर्वणि २ अध्यायः)

# 03- 06- 174 Adhyaya

---

(०१)(१)आदाय; आसन्ने; (२) पापकर्म; (३) चैव (for चापि); (४)नरः; वरं (for परम्);
(०२)(१)निश्रेयसं; (२) क-धर्मः; ख-तपो मूलं तपो; घ-तमो दमः, तपो मूलं (रूपं); तपो दमः (४) मनसेप्सितान्;
(०३)(२)शमेन (for सत्येन); (३)ब्रह्मणा; ब्राह्मणः समवां; सर्वमां (for पदमां);
(०४)(१)(अ)नु; (इ)ति (for तु); (२)कानि कानि; तानि तानि; (३/४) यथा (for कथं); यत् (for किं);
(०५) (१)कथं फलमवाप्नोति; आप्नोति तेषां धर्मात्मन्; (२) कथं (for तेषां); (३)(अ)हं ज्ञातुं (for तत्त्वेन); (४) सर्वं (for धर्मं); निबोध मे (for सुधार्मिक); धर्मतत्वेन सुव्रत!

# १७४. चतुस्सप्ततत्यधिकशततमोऽध्यायः

१७४. धर्मव्याधेन कौशिकं प्रति प्राणिभिर्दुष्कृतसुकृतकरणप्रकारादिकथनपूर्वकं ब्राह्मणमाहात्म्यादिकथनम् ।। विषयसेवनाद्धानिः सत्सङ्गाल्लाभः ब्राह्मीविद्यावर्णनम्

**मार्कण्डेयः**

एवमुक्तस्तु विप्रेण धर्मव्याधो युधिष्ठिर ।**
प्रत्युवाच यथा विप्रं तच्छृणुष्व नराधिप ।। १ ।।(०१)

**व्याधः**

**विज्ञानार्थं मनुष्याणा मनः पूर्वं प्रवर्तते।****
**तत्प्राप्य कामं भजते रोषं(क्रोधं) च द्विजसत्तम ।। २ ।।(०२)**

ततस्तदर्थं यतते कर्म चारभते महत्।**
इष्टानां रूपगन्धानामभ्यासं च निषेवते ।। ३ ।।(०३)

ततो रागः प्रभवति द्वेषश्च तदनन्तरम्।**
ततो लोभः प्रभवति मोहश्च तदनन्तरम् ।। ४ ।।(०४)

ततो लोभाभिभूतस्य रागद्वेषहतस्य च ।**
न धर्मे जायते बुद्धिर्व्याजाद्धर्मं करोति च ।(०५)
व्याजेन चरते धर्ममर्थं व्याजेन रोचते ।। ५ ।।(०६)

---

(०१)(१) च (for तु). (३) वृत्तं; प्रश्नं (for विप्रं);. प्रत्युवाचाथ यद्वृत्तं. (४) युधिष्ठिर नरा.
(०२) (१) हि विषये (for मनु). (२) मतिः (for मनः);. प्रपद्यते (for प्रवर्त). (३) तां; तं (for तत्);. भजति; जयति (for भजते);. ततः प्रजायते कामो; ततः कामं च भजते. (४) रोषं; रोषश् (for क्रोधं).
(०३) (१) स्वमर्थं (for तदर्थं);. महते (for यतते). (२) कर्ममारभते.(४) चेन् (for च).
(०४)(२) मोहश्च; विद्वेषसृ; रोषश्च (for द्वेष). (३) रोषः (for लोभः). (४) द्रोह (for मोह).
(०५) (१) ततो (for तस्य). (४) धर्म (for धर्मं);. वै (for च).
(०६) (१) चरितो; चरतो ( च ततो; रोचते) (for चरते). (२) सत्यं (for अर्थं);. चेच्छति (for रोचते);. अर्थ(०र्थे)व्याजोपि रोचते ( वर्तते); अर्थे व्याजे प्रवर्तते; व्याजेन च न रो; व्याजोपि न च रों; अव्याजेन च रो.

व्याजेन सिध्यमानेषु धनेषु द्विजसत्तम।**
तत्रैव रमते बुद्धिस्ततः पापं चिकीर्षति ॥ ६ ॥(०१)

सुहृद्भिर्वार्यमाणश्च पण्डितैश्च द्विजोत्तम।**
उत्तरं श्रुतिसम्बद्धं ब्रवीत्यश्रुतियोजितम् ॥ ७ ॥(०२)

अधर्मस्त्रिविधस्तस्य वर्तते रागदोषजः ।**
पापं चिन्तयते चापि ब्रवीति च करोति च ॥ ८ ॥(०३)

तस्याधर्मप्रवृत्तस्य गुणा नश्यन्ति साधवः ।**
एकशीलैश्च मित्रत्वं भजन्ते पापकर्मिणः ॥ ९ ॥(०४)

लक्षालङ्कारः- मतिः पूर्वं प्रवर्तत इत्यत्र मतिः मनोवृत्तिः । सा च द्विविधासुमतिः कुमतिश्चेति । तत्राद्यायाः फलमाह- तामिति । तां सुमतिम् । द्वितीयायाः फलमाह- तत इति । ततः कुमतेः तदर्थं कामार्थम् । कुमते फसमुत्त्वा फलं सङ्कोचेनाह- उत्तमेति । उत्तमेभ्यः द्रुतस्य शास्त्रस्य सम्बन्धो यस्य स तथोक्तः । ईदृशोऽपि जितः कामक्रोधाद्यैर्जितः श्रुतयः श्रुतीः ब्रवीति, न तु श्रुत्युक्तमर्थमाचरतीति भावः अधर्मस्त्रिविध इत्यत्रोक्तं त्रैविध्यं स्वयमेवाह- पापं चिन्तयते चापि इति ।

स तेन दुःखमाप्नोति परत्र च विपद्यते।**
पापात्मा भवति ह्येवं धर्मलाभं तु मे शृणु ॥ १० ॥(०५)

---

(०१) (१) व्याजेषु; कामेन (for स्त्यव्याजेन);. सेन्य०; रोचं०(for सिध्य). (२) धर्मेषु; एते (for धने). (३) अत्रैव (for त).

(०२) (१) वार्यमाणै०. तु (for च). (२) द्विजोत्तमैः; द्विजातिभिः, (३) उत्तरैः; उत्तमं (for उत्तरं);. प्रति; द्विज (for श्रुति);. सम्बन्धं (for सम्बद्धं). (४) प्रतियोजितं; (अ)श्रुतियो०; श्रुतिचोदितं.

(०३)(१) विविधस्; तु विधिम् (for त्रिविधस्);. तत्र (for तस्य). (२) जायते०; वर्त (for वर्ध००);. रागदोषजः; तव भेदतः. (३) चैव (for चापि). (४) प्र (for च).

(०४)(१) तथा; यस्या (for तस्या०);. (अ)धर्मप्रयुक्तस्य; (अ)धर्मे प्रवृत्तस्य. (३) ०शीलै०; शील (for ०शीला);. हि (for च);. मित्रघ्नं; मित्रार्थं (for मित्रत्वं). (४) भजते; व्रजन्तं; भजन्ति. सहकर्मिणः; पापकर्मभिः; कर्मणः; कारिणः.

(०५) (१) स नेह; सत्येन; एतेन (for स तेन);. सुखम्; दुःखम् (for (अ)सुखम्). (२) परत्रं तु. विपक्ष्यते ( निहन्यते). (३) भवते. होव. (४) लोकं (for लाभं). च (for तु).

यस्त्वेतान्प्रज्ञया दोषान्पूर्वमेवानुपश्यति
कुशलः सुखदुःखेषु साधूंश्चाप्युपसेवते ॥ ११ ॥(०१)

तस्य साधुसमारम्भाद्बुद्धिर्धर्मेषु राजते ॥ १२ ॥ (02)

**ब्राह्मणः**

**ब्रवीषि सूनृत धर्म्यं यस्य वक्ता न विद्यते।****
**दिव्यप्रभावः सुमहानृषिरेव समोऽसि मे ॥ १३ ॥(०३)**

**व्याधः**

**ब्राह्मणा वै महाभागाः पितरोऽग्रभुजः सदा।****
**तेषां सर्वात्मना कार्यं प्रियं लोके मनीषिणा ॥ १४ ॥(०४)**

यत्तेषां च प्रियं तत्ते वक्ष्यामि द्विजसत्तम।**
**नमस्कृत्वा ब्राह्मणेभ्यो ब्राह्मीं विद्यां निबोध मे ॥ १५ ॥(०५)**

इदं विश्वं जगत्सर्वमजय्यं चापि सर्वशः ।**
**महाभूतात्मकं ब्रह्म नातः परतरं भवेत् ॥ १६ ॥(०६)**

**महाभूतानि खं वायुरग्निरापस्तथा च भूः ।****

---

(०१) (१) प्रक्ष्याद् (for प्रज्ञया). (२) सर्वानेव; गुणान्वाचा (for पूर्वमेव).
(अ)त्र; प्र (for (अ)नु);. सर्वानुपरि पश्यति. (३) सुखदुःखेन; सर्वदुःखेषु.
(०२) (१) साधुं(for साधून्);. (अ)प्सु निषे (for (अ)प्युपसे). (२) चाराद्; चारो; चारा; चारे;
रम्भं (for रम्भाद्). (३) राजते (for जायते); बुद्धिर्धर्मे प्रजायते.
(०३) (१) धर्म्यं (for धर्मं). (२) वार्ता (for वक्ता).
(३) स्वभावः; स्वभावाद् (for प्रभावः);. भगवन्; तु महान् (for सुमहान्). (४) विभासि मे;,
(०४) (१) महाभाग. (२) न्नभुजः. मुदा; तथा; तदा (for सदा). (४) लोकैन् (for लोके);. मनीषिणां.
(०५) (१) तु (for च);. लोके; तं ते; धत्ते (for तत्ते). (२) तत्ते वक्ष्यामि सत्तम.
(३) नमस्कृत्य ब्राह्मणेभ्यो नमस्कृत्य. (४) ब्रह्मविद्यां; ब्राह्मीं वृत्ति.
(०६) (१) इह (for इदं);. विद्वन् (for विश्वं). (२) मायया; अजगचू (for अजय्यं); जगच्चापि च सर्वशः.
(३) ब्रह्म (for ब्रह्मन्). (४) ततः (for नातः). महत् (for भवेत्).

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद्गुणाः ॥ १७ ॥(०१)

*अधिकपाठः

वायुराकाशसंयुक्तः सर्वभूतेषु वर्तते ।(०२)

तेषामपि गुणाः सर्वे गुणवृत्तिः परस्परम्।**
पूर्वपूर्वगुणाः सर्वे क्रमशो गुणिषु त्रिषु ॥ १८ ॥(०३)

षष्ठस्तु चेतना नाम मन इत्यभिधीयते।**
सप्तमी तु भवेद्बुद्धिरहङ्कारस्ततः परम् ॥ १९ ॥(०४)

इन्द्रियाणि च पञ्चात्मा रजः सत्त्वं तमस्तथा।**
इत्येष सप्तदशको राशिरव्यक्तसञ्ज्ञकः ॥ २० ॥(०५)

लक्षालङ्कारः- इत्येष सप्तदशक इत्यत्र अव्यक्तेन मूलप्रकृत्या सञ्ज्ञितः सञ्ज्ञावान् तत्सञ्ज्ञया सहेत्यर्थः, सप्तदशको राशिः । रूपादिपञ्चकस्य गुणत्वान्न पृथग्गणना ।

सर्वैरिहेन्द्रियार्थैस्तु व्यक्ताव्यक्तैः सुसंवृतैः ।
चतुर्विंशक इत्येष व्यक्ताव्यक्तमयो गुणः ।**
एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि ॥ २१ ॥(०६)

लक्षालङ्कारः- सर्वैरिहेन्द्रियार्थैः इत्यत्र इन्द्रियार्थैः रूपरसादिभिः पञ्चभिः, व्यक्तेन ब्रह्माण्डेन,

---

(०१) (१) यान्याहुर् (for खं वायुर्). (२) मही तथा; तथैव च; तथा विभुः (for तथा च भूः).
(०२)(४) ते (for तद्).
(०३) (१) अर्थ (for अपि). (२) वृद्धिः; वृध्घा; वृद्धाः (for वृत्तिः);. परे परे; परे परा ( परस्परं).
(३) पूर्वं पूर्वं; पूर्वे पूर्वे (for पूर्वपूर्वं). (४) गुणितास्त्रिषु; गुणवृत्तिषु; गुणितास्त्विह; गुणता द्विज.
(०४) (१) षष्ठं; षष्ठी (for षष्ठस्);. च (for तु);. धातुर्; या तु; यातुर्; यां तु (for नाम).
(२) अपि (for अभि). (३) सप्तमा. (अ)भवद् (for भवेद्).
(४) त्वतः; तथा; च तत् (for ततः);. परः (for परम्).
(०५) (१) तु (for च);. पञ्चात्मा (for पञ्चैव). (२) रजः; तमः.
(३) इत्येतो; इत्येवं; इत्येषु. भूतदशको; सप्तदशतो; साप्तदशिको. (४) सञ्ज्ञितः.
(०६) तैः सर्वैर्; सर्वैश्च; सर्वैरेव (for सर्वैरिह);. (इं)द्रियार्थश्च; (इं)द्रियैस्तैस्तु; (इं)द्रियैरस्थैर्. च (for तु).

**अव्यक्तेन महत्तत्त्वेन । बहूवचनं बहूलोकभरितत्वात् महत्त्वाच्च ।**

अस्मिन् पर्वणि १७४अध्याये २१३लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि ब्राह्मणमाहात्म्ये चतुस्सप्तत्यधिकशततमोऽध्यायः ।। १७४ ।।**

**(मार्कण्डेयसमस्यापर्वणि २ अध्यायः)**

# 03- 06- 175 Adhyaya

## १७५. पञ्चसप्तत्यधिकशखततमोध्यायः

**१७५.कौशिकं प्रति धर्मव्याधेन भूतपञ्चकगुणनिरूपणपूर्वकम् इन्द्रियजयाजययोः सुख-दुःखासाधारणकारणताकथनम्।।**

**मार्कण्डेयः**

**एवमुक्तः स विप्रस्तु धर्मव्याधेन भारत।****
**कथामकथयद्भूयो मनसः प्रीतिवर्धनीम् ।। १ ।।(०१)**

**ब्राह्मणः**

**महाभूतानि यान्याहुः पञ्च धर्मभृता वर ।****
**एकैकस्य गुणान्सम्यक्पञ्चानामपि मे वद् ।। २ ।।(०२)**

**व्याधः**

**भूमिरापस्तथा ज्योतिर्वायुराकाशमेव च ।****

---

(२) व्यक्ताव्यक्तः; च; तु (for सु). संवृतैः; संस्कृतैः; सञ्ज्ञितः (for संवृतैः). (४) गणः (for गुणः). (५) इत्येतत् (for एतत्ते). (६) भूयः किं.

(०१)(१) विप्रर्षे; तु विप्रः स (तु).(३) अचोदयद्; अनोदयद् (for अकथयद्). प्रीतो (for भूयो). कथां पप्रच्छ भूयोपि. (४) प्रीति० वर्धिनीं; स्नेहवर्धनीं; परिव मनःप्रीतिविवींय (र्ध)नीं;

(०२)(२)धर्मविदो जनाः; भृतां वर. (३) गुणं (for गुणान्).सर्वान् (for सम्यक.)

गुणोत्तराणि सर्वाणि तेषां वक्ष्यामि ते गुणान्  ।। ३ ।।(०१)

भूमिः पञ्चगुणा ब्रह्मन्नुदकं च चतुर्गुणम्।**
गुणास्त्रयस्तेजसि च त्रयश्चाकाशवातयोः  ।। ४ ।।(०२)

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः ।**
एते गुणाः पञ्च भूमेः सर्वेभ्यो गुणवत्तरा  ।। ५ ।।(०३)

शब्दः स्पर्शश्च रूपं च रसश्चापि द्विजोत्तम।**
अपामेते गुणा ब्रह्मन्कीर्तितास्तव सुव्रत  ।। ६ ।।(०४)

शब्दः स्पर्शश्च रूपं च तेजसोऽथ गुणास्त्रयः ।**
शब्दः स्पर्शश्च वायौ तु शब्दश्चाकाश एव तु  ।। ७ ।।(०५)

एते पञ्चदश ब्रह्मन्गुणा भूतेषु पञ्चसु।
वर्तन्ते सर्वभूतेषु येषु लोकाः प्रतिष्ठिताः ।**
अन्योन्यं नातिवर्तन्ते सम्यक्च भवति द्विज  ।। ८ ।।(०६)

यदा तु विषमं भावमाचरन्ति चराचराः ।**

---

(०१)वह्निर् (for ज्योतिर्). ज्योतिर् वायुर्. आकाश एव. (४) तथा ) क्य तेषां). वक्ष्यन्ति (for वक्ष्यामि).
(०२)(१) भूमेः)क्य भूमिः). (२) तु (for च). तेजसम्) क्य तेजसि). वै; तु (for च). (४) तु (for च).
(०३) (२) चापि (for गन्धश्). द्विजोत्तमः च पञ्चधा; तथैव च (for च पञ्चमः). (३) गुणाः पञ्च. /*(१) ०त्तमाः (for त्तराः).
(०४)(२) अ-रसो वारिगुणास्स्मृता :, रसश्च द्विजसत्तम; रसश्चैव तथैव च. (३) चैते) क्य एते). विप्र )क्य ब्रह्मन्). (४) चत्वारः कीर्तितास्तव; कीर्ति० तास्ते द्विजोत्तम.
(०५)(२) च(for (अ)थ). (३) शब्दस्पर्शौ तु. वायोः) क्य वायौ). तौ; च (for तु). (४) चाकाश (for आकाश). तु) हि) (for च).
(०६)(३) उक्ता वै (for वर्तन्ते). लोकेषु (for भूतेषु). (४) येषां; एषां; एषु(for येषु). प्रकीर्तिताः (for प्रतिं). (५) ना (चा)भिव; तानि च (for वातिव०). (६) सम्पत्तिर्; सम्यक्च (for सम्पच्च). भवतो (for ति). सम्यक्तेषां भवेद् द्विज; सम्यग्वतति च द्विज; सम्यग(सम्पद्) भवति वै तदा) द्विज); सोम्यं तेषु भवेद् द्विज; समवच्चाभवद् द्विज. सम्यक् च भवति एकीभावेन प्रकाशन्ते । एकत्वमार्षं ।

तदा देही देहमन्यं व्यतिरोहति कालतः ।। ९ ।।(०१)

लक्षालङ्कारः- अन्योन्यम् इत्यत्र एकस्मिन् देहे यावद्यावत्पृथिव्यादिकम्, तावत्तावच्चेन्नातिवर्तन्ते, तदा सम्पच्च भवति । चराचराः चराचरसम्बन्धिनः पञ्चपदार्था यदा विषमं भावं स्वभावमाचरन्ति । पृथिव्याधिक्ये देहो भारयते, जलाधिक्ये महोदरं जायते, आकाशस्याधिक्ये बहुभोजनादिना अजीर्त्यादिकम् , एवमाकारिका विपद्भवतीति भावः । तेन च मरणं भवतीत्याह- तदा इति ।

प्रातिलोम्याद्विनश्यन्ति जायन्ते चानुपूर्वशः ।। १० ।। (०२)

तत्र तत्र हि दृश्यन्ते धातवः पाञ्चभौतिकाः ।**
यैरावृतमिदं सर्वं जगत्स्थावरजङ्गमम् ।। ११ ।।(०३)

इन्द्रियैः सृज्यते यद्यत्तत्तद्व्यक्तमिति स्मृतम्।**
तदव्यक्तमिति ज्ञेयं लिङ्गग्राह्यमतीन्द्रियम ् ।। १२ ।।(०४)

यथास्वं ग्राहकाण्येषां शब्दादीनामिमानि तु।**
इन्द्रियाणि यदा देही धारयन्निव तप्यते ।। १३ ।।(०५)

लोके विततमात्मानं लोकं चात्मनि पश्यति।**

---

(०१)(१) विषमं भावम्; विषयी मं भावम्; विशन्ति(मं)भावम्. (२) आचरन्ति) क्य आचरन्ति) चराचरं; परावरा, (३) अन्यद् (for अन्यं). (४) अधि; अति (for व्यति). चा (ना)नघ; कायतः(for कालतः).

(०२) (१) व्याधः.आनुपूर्व्यात्; ०पूर्व्यां; प्रातिलोम्यात्, च (for वि). (२)०पृष्ठशः (for

(०३)(३ र्वशः). यत्र यत्र , च)क्य हि). (४) पचभौ (० भू)तिकाः; सार्वभौ; च परन्तप. आततम् )क्य आवृतम्). एतैरापादितं सर्वं.

(०४)(१) गृ ) ग्रा)ह्यते; सज्ज; स्त; शक्य; व्यज्य )क्य सृज्य). (२) मूर्तम् (for व्यक्तम्). इदं)क्य इति). स्थितं; श्रुतिः(for स्मृतम्). (३) तद्व्यक्तमिति संस्मृतं. तज्ज्ञेयं. त(य)दव्यक्त०मिति ज्ञेयं. (४) ग्रामम् (for ग्राह्यम्).

(०५)(१) यदा; तथा (for यथा). ०स्वां; ०स्व०; सु०; ह्य(स्वं). ग्राहकाण्येषां०. (२) नि च; ०निति (for नि तु). (३) तथा; यथा; तदा; तु यं)क्य यदा). देहे०. न हि (for इह). दृश्यते )क्य तप्यते).

परावरज्ञो यः शक्तः स तु भूतानि पश्यति ॥ १४ ॥(०१)

लक्षालङ्कारः- लोके विततमात्मानम् इत्यत्र आत्मानं परमात्मानम् ।

पश्यतः सर्वभूतानि सर्वावस्थासु सर्वदा।**
ब्रह्मभूतेन संयोगो नाशुभेनोपपद्यते ॥ १५ ॥(०२)

लक्षालङ्कारः- ब्रह्मभूतेन इत्यत्र ब्रह्मणो वेदाद्भूतेन प्रतिपादितेन सद्धर्मेण ।

अज्ञानमूलत्मकं क्लेशमतिवृत्तस्य मोहजम्।**
लोकबुद्धिप्रकाशेन ज्ञेनमार्गेण गम्यते ॥ १६ ॥(०३)

लक्षालङ्कारः- ज्ञानमूलात्मकम् इत्यत्र ज्ञानं मूलयति निर्मूलयतीति ज्ञानमूलात्मकम् ।

अनादिनिधनं जन्तुमात्मयोनिं सदाव्ययम्।
अनौपम्यममूर्तं च भगवानाह बुद्धिमान् ॥ १७ ॥

लक्षालङ्कारः- भगवानाह बुद्धिमान् इत्यत्र पुर्वोक्तं वस्तु भगवानित्याह बुद्धिमान् जन्तुरिति सम्बन्धः ।

तपोमूलमिदं सर्वं यन्मां विप्रानुपृच्छसि।(०४)
तपसा हि समाप्नोति यद्यदेवाभिवाञ्छितम् ॥ १८ ॥(०५)

१०३१*अधिकपाठः

---

(०१) सततम्; विदितम् (for विततम्) (३) परापरज्ञः; ०वरेशः शक्तः सन्; सा (श)क्तः स; यः शक्तः; शक्तिः सन् (for सक्तः सन्). (४) भूतानि प्रति०; स तु भूतानि; स भूतानि प्र.

(०२) (१) पश्यतं) क्य पश्यतः). (२) सद्यो (for सर्वा). (३) भूतश्च; भूतेन. (४) नाशुभो नोप; नाश्नते नोप.

(०३)(१) ०पूर्वात्म (० दि) कं; मूलार्थकं; ० भूता०दिकं. अज्ञानस्तं तं क्लेशम्. (२) अनि०वृत्तस्य; इतिवृ; अतिवृद्धस्य. मोहनं) जं)लक्षणं; पौरुषं; मोहदं ० (३) लोक०; लोके; अहं०; लोकं (for लोको). लोकवृत्तिप्रकाशेन. (४) ज्ञेयं; ज्ञान०; जानन्(for ज्ञेय). गम्यते; पश्यति; इष्यते; रिष्यते (for दृश्यते ).

(०४)(२) सदासुखं. (३) अपूर्वं; अमर्त्यं; अमूर्तिं (for अमूर्तं). (४) वृद्धि (for बुद्धि). भगवन्निह विद्धि मां. (५) ततो मूलम्; तपो० कूलम्; तपोबलम्. मा (for मां). पश्यसि) क्य पृच्छसि).

(०५) तदा; तमा)क्य समा). वाञ्छति.

तदिन्द्रियाणि संयम्य तपो भवति नान्यथा ।(०१)

इन्द्रियाण्येव संयम्य तपो भवति नान्यथा

इन्द्रियाण्येव तत्सर्वं यत्स्वर्गनरकावुभौ।**
निगृहीतविसृष्टानि स्वर्गाय नरकाय च ।। १९ ।। (02)

लक्षालङ्कारः- इन्द्रियाण्येव इत्यत्र यौ स्वर्गनरकावुभौ,तत्सर्वं इन्द्रियाण्येव प्रापयन्तीति योग्यपदाध्याहारः तत्कथमित्यत आह- निगृहीतविसृष्टानि इति । निगृहीतानीन्द्रियाणि स्वर्गाय, विसृष्टानि नरकायेति वीभागः ।

तदिन्द्रियाणि संयम्य तपो भवति नान्यथा।
एष योगविधिः कृत्स्नो यावदिन्द्रियधारणम्।**
एतन्मूलं हि तपसः कृत्स्नस्य नरकस्य च ।। २० ।।(०३)

इन्द्रियाणां प्रसङ्गेन दोषमार्च्छन्त्यसंशयम्।**
संनियम्य तु तान्येव ततः सिद्धिं समाप्नुयात् ।। २१ ।।(०४)

लक्षालङ्कारः- इन्द्रियाणां प्ररङ्गेन इत्यत्र इन्द्रियाणां प्रसङ्गेन प्रकृष्टविषयसङ्गेन ।।

षण्णामात्मनि नित्यानामैश्वर्यं योऽधिगच्छति।**
न स पापैः कुतोऽनर्थैर्युज्यते विजितेन्द्रियः ।। २२ ।।(०५)

रथं शरीरं पुरुषस्य दृष्टमात्मा नियन्तेन्द्रियाण्याहुरश्वान्।

---

(०१) इद्रियाण्येव (for तदिन्द्रियाणि). तपोवन० मनास्तथा.
(०२) (१) इद्रियाणां च(for ण्येव). तत्स्वर्गं. (२) यौ )क्य यत्).
(०३)(४) स्वर्ग(for कृत्स्न). ते)क्य च).
(०४)(२) यच्छति; अर्छ०; इच्छ; अर्ह; अभ्यर्ति(for ऋच्छति). (३) तु तानेव; च तान्येव; कृतान्येव. (४) समाप्नुयात्; अवाप्तयात्; उपाश्नते)क्य अवाप्नते).
(०५) (१) निन्द्यानाम्; योज्यानाम्; योग्यानाम् (for नित्यानाम्). (२) अधिगच्छति )यः); योधि) वा) तिष्ठति. (३) च(for स). न चा (for कुतो०). (४) युज्यते द्विजसत्तम; संयुज्येत जितेन्द्रियः.

तैरप्रमत्तः कुशली सदश्वैर्दान्तैः सुखं याति रथीव धीरः ।। २३ ।।(०१)

लक्षालङ्कारः- रथं शरीरम् इत्यत्र आत्मा परमात्मा ।

षण्णामात्मनि युक्तानामिन्द्रियाणां प्रमाथिनाम्।**
यो धीरो धारयेद्रश्मीन्स स्यात्परमसारथिः ।। २४ ।।(०२)

इन्द्रियाणां प्रसृष्टानां हयानामिव वर्त्मसु।**
धृतिं कुर्वीत सारथ्ये धृत्या तानि जयेद्ध्रुवम् ।। २५ ।।(०३)

इन्द्रियाणां विचरतां यन्मनोऽनु विधीयते।**
तदस्य हरते बुद्धिं नावं वायुरिवाम्भसि ।। २६ ।।(०४)

येषु विप्रतिपद्यन्ते षट्स्वमोहात्फलागमम्।**
ज्ञात्वैष्वध्यवसिताध्यायी विन्दते ध्यानजं फलम् ।। २७ ।।(०५)

लक्षालङ्कारः- ज्ञात्वैष्वध्यासितो ध्यायी इत्यत्र अध्यासितः अधिकतया आसितः आसनवान् स्थित इत्यर्थः । ध्यायी परमात्मध्यानवान् ।

अस्मिन् पर्वणि १७५अध्याये २७श्लोकाः सन्ति

---

(०१) सृष्टम्; दृष्टो (for दृष्टम्). (२) ह्यात्मा (for आत्मा). च यर्ते; यते (for नियन्ते). षट् च तानि )क्य इन्द्रियाणि). (अ)स्य चाश्वाः (for(आ)हुरश्वान्). (३) अप्र०मत्तैः कुशलैः; कुशलो. यथाश्वैद्. पथीव; सदैव; वशीव (for रथीव).(४) क-वशीव; ख-रथीव,

(०२)(१) युक्ता; सृष्टा (for नित्या)., वीरो(for धीरो).

(०३) (१) प्रहृष्टानां. (२) वर्त्मनि (for सु ). (३) वृत्ति (for धृतिं). (४) बुधः(for धुवम्). धृत्या विजयते धुवं; धृत्वैतानि ध्रुवो जयः.

(०४)(१) तु; वि(for हि). (२) य (for नु). (३) हरति प्रज्ञां; बुद्धि हरति(० ते) (for हरते बुद्धिं). (४) वायुर्नावमिवाम्भसि.

(०५)(१) तेषां; येषां; ये तु; यो हि; एषु. पद्येत(for पद्यन्ते). ये ध्रुवं प्रतिपद्यन्ते. (२) षट्सु लोकात्; षट्सु लोभात्; षट्सु षोढा; षड्गुणोढा; षट्सु लोभ०; षट्स्वमोहात. (३) ज्ञाता )क्य तेषु). व्यवसितो (ता); वै वसितो; विव० सितां; व्यवस्थिता; (अ)ध्यवसितो; (अ)ध्यावसिता० (तो; ते)(for (अ)ध्य० वसिता०). (४) विन्दति; विन्देत (for विन्दते). बलं (for फलम).

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि ब्राह्मणव्याधसंवादे पञ्चसप्तत्यधिकशततमोऽध्यायः ।। १७५ ।।

(मार्कण्डेयसमस्यापर्वणि २ अध्यायः)

## 03- 06- 176 Adhyaya

# १७६. षट्सप्तत्यधिकशततमोध्यायः

१७६. धर्मव्याधेन कौशिकं प्रति सत्त्वादिगुणत्रयस्वरूपणपूर्वकमध्यात्मकथनम् ।।

मार्कण्डेयः

एव तु सूक्ष्मे कथिते धर्मव्याधेन भारत।**
ब्राह्मणः स पुनः सूक्ष्मं पप्रच्छ सुसमाहितः ।। १ ।।(०१)

ब्राह्मणः

सत्त्वस्य रजसश्चैव तमसश्च यथातथम्।**
गुणांस्तत्त्वेन मे ब्रूहि यथावदिह पृच्छतः ।। २ ।।(०२)

लक्षालङ्कारः- गुणांस्तत्वेन इत्यत्र गुणान् सत्त्वादिजन्यज्ञानादिगुणान् ।

व्याधः

हन्त ते कथयिष्यामि यन्मां त्वं परिपृच्छसि।**
एषां गुणान्पृथक्त्वेन निबोध गदतो मम ।। ३ ।।(०३)

मोहात्मकं तमस्तेषां रज एषां प्रवर्तकम्।**

(०१)(२) धर्मे (for धर्म). (३) परमः (for स पुनः);. पुनः सूक्ष्मतरं विप्रः (४) तु (for सु).
(०२)(१) चापि (for चैव). (३) गुणं; गुणास् (for गुणान्). (४) यथाप्रज्ञं हि पृ; यथावत्परिपृ.
(०३)(२) मा (for मां). (३) येषां; एतान् (for एषां);. गुणाः; गुण (for गुणान्). (४) वदतो )क्य ग).

प्रकाशबहुलत्वाच्च सत्त्वं ज्याय इहोच्यते ॥ ४ ॥[०१]

लक्षालङ्कारः- रज एषां प्रवर्तकम् इत्यत्र प्रवर्तकं विषयेषु प्रवर्तकम् ।

अविद्याबहुलो मूढः स्वप्नशीलो विचेतनः ।**
दुर्हृषीकस्तमोध्वस्तः सक्रोधस्तामसोऽलसः ॥ ५ ॥[०२]

प्रवृत्तवाक्यो मन्त्री च यो नराग्र्योऽनसूयकः ।**
विधित्समानो विप्रर्षे स्तब्धो मानी स राजसः ॥ ६ ॥[०३]

प्रकाशबहुलो धीरो निर्विधित्सोऽनसूयकः ।**
अक्रोधनो नरो धीमान्दान्तश्चैव स सात्त्विकः ॥ ७ ॥[०४]

लक्षालङ्कारः- निर्विवीत्सोऽनसूयक इत्यत्र निर्विवित्सः निस्संशयः ।

सात्त्विकस्त्वथ सम्बुद्धो लोकवृत्तेन क्लिश्यते।**
यदा बुध्यति बोद्धव्यं लोकवृत्तं जुगुप्सते ॥ ८ ॥[०५]

वैराग्यस्य च रूपं तु पूर्वमेव प्रवर्तते।**

---

(०१) (१) मोहमेकं (for मोहात्मकं);. तपस् )क्य तमस्);. त्वेषां (for तेषां). (२) तेषां; एव (for एषां);. प्रवर्तते. (३) तु (for च). (४) जातिर् (for ज्याय);. इवो० (for इहो).

(०२)(२) शोक (for ० शीलो);. विलोचनः (for विचेतनः). (३) दुर्हृषीकस् (दुर्धर्षाणस् ); दुःखशीलस्; दुर्दर्शनस्; दुर्दर्शि(र्श)कस्. तमोग्रस्तः; तपोध्वस्तः. (४) क्रोधन (for सक्रोध);. स्मृतः; मतः; जनः; नरः (for (अ)लसः).

(०३)(१) प्रवृत्तरागो; वृत्त० वाक्यो; सुवृत्त; संवृत्त. तन्द्री(for मन्त्री).; (२) योनुरागाभ्यस्; यो नराप्रयोनस्; ) प्रारम्भाया० सशीलवान्); योनुराग्योभ्यस्; योनुवाग्यस्य स्; योगवाच्यभ्यस्; योनुराग्यनस्; यो निराग्यनुस् ); (३) विवि० त्कमानो; विवत्स; विधित्स; विविश.; राजर्षे (for विप्र).; (४) तस्थौ (for स्तब्धो).; च (for स).

(०४) (२) निर्विधित्सो; निर्विवत्सो.; (३) अक्रोधनो मृदुर्; नपरो; परमो.; धीरो; श्रीमान् (for धीमान्).; (४) शान्त (for दान्तं).

(०५)(१/२) तत्र; तस्य )क्य त्वथ).; संवृत्तो; सम्बन्धो (for सम्बुद्धो).; वृत्तैर्न(for वृत्तेन).; लुप्यते; लिप्य०; लिख्य (for क्लिश्य०).; क्लिश्यते लोकवृत्तेन सम्बुद्धस्त्वथ; सात्विकः; (३) बोध्यति०.; बुध्येत (for बुध्यति).; यदा बुध्या विबोद्धव्यं.; (४) जुगुप्सति; ०प्सिते; प्सितं.;

मृदुर्भवत्यहङ्कारः प्रसीदत्यार्जवं च यत्।(०१)
ततोऽस्य सर्वद्वन्द्वानि प्रशाम्यन्ति परस्परम् ॥ ९ ॥(०२)

लक्षालङ्कारः- वैराण्यस्य इत्यत्र अस्य लोकवृत्तस्य वैराण्येव रूपम्, तच्च पूर्वं प्रथममेव प्रवर्तते । अहङ्कारः अहङ्कारवान् ।

न चास्यं संशयो नाम कचिद्भवति कश्चन ॥ १० ॥ (03)

लक्षालङ्कारः- ततोऽस्य सर्वद्वन्द्वानि इत्यत्र सर्वद्वन्द्वानि अस्य निरस्य ।

शूद्रयोनौ हि जातस्य सद्गुणानुपतिष्ठतः ।**
वैश्यत्वं लभते ब्रह्मन्क्षत्रियत्वं तथैव च ॥ ११ ॥(०४)

आर्जवे वर्तमानस्य ब्राह्मण्यमभिजायते।**
गुणास्ते कीर्तिताः सर्वे किं भूयः श्रोतुमिच्छसि।(०५)
एतैर्गुणैर्विहिनस्य विप्रस्यापि न विप्रता ॥ १२ ॥

**ब्राह्मणः**

पार्थिवं धातुमासाद्य शारीरोऽग्निः कथं भवेत्।**
अवकाशविशेषेण कथं वर्तयतेऽनिलः ॥ १३ ॥(०६)

**मार्कण्डेयः**

---

(०१)(१) विरागस्य (for वैराग्य).; च; (अ)नु; तु (for हि).; वै; च (for तु).; (३) (अ)हङ्कारे (for कारः).; (४) (आ)र्जवे (for वं).; यः; तत् (for यत्).

(०२) (१) दुःखानि (for द्वन्द्वानि).; ततो निवृत्तद्वन्द्वश्च.; (२) लोकवृत्तं जुगुप्सते.

(०३)(१) तदास्य; औदास्यं; न चापि (for न चास्य).; संशयो; (अ)प०गमो; (अ)संयमो; (अ)सङ्गमो; (for संयमो).

(०४) (१) भावेपि (for योनौ हि).; (२) तद्गुणान्; षड्गुणान्.; अधिं; अति० (for उप).; (३) लभते (for भवति).; (४) हि (for च).

(०५)(२) अपि (for अभि).; (३) ब्रह्मन् (for सर्वे).; (४) किं भूयः कथयामि तै.

(०६)(१) वायवं (for पार्थिवं).; आश्रिय (for आसाद्य).; (२) शरीरे (for शारीरो).; कथं विभो; प्रकम्पते (for कथं भवेत्).; (३) ०विशोच्ये (for विशेषेण).; (४) (ऽ) नलः (for (ऽ)निलः).

प्रश्नमेतं समुद्दिष्टं ब्राह्मणेन युधिष्ठिर ।**
व्याधस्तु कथयामास ब्राह्मणाय महात्मने ॥ १४ ॥(०१)

**व्याधः**

मूर्धानमाश्रितो वह्निः शरीरं परिपालयन्।
प्राणो मूर्धनि चाग्नौ च वर्तमानो विचेष्टते ॥ १५ ॥(०२)

भूतं भव्यं भविष्यं च सर्वं प्राणे प्रतिष्ठितम्। (03)
श्रेष्ठं तदेव भूतानां ब्रह्म ज्योतिरुपास्महे ॥ १६ ॥

लक्षालङ्कारः- ब्रह्म ज्योतिरुपास्मह इत्यत्र ब्रह्म प्रत्यक्षं ब्रह्म ।

स जन्तुः सर्वभूतात्मा पुरुषः स सनातनः ।**
महान्बुद्धिरहङ्कारो भूतानां विषयश्च सः ॥ १७ ॥(०४)

*अधिकपाठः
शरीरमध्ये नाभिः स्यान्नाभ्यामग्निः प्रतिष्ठितः ।*
०मध्ये नाभ्यां तु जठरेग्निः प्रति.

अव्यक्तं सत्त्वसञ्ज्ञं च जीवः कालः स चैव हि।**
प्रकृतिः पुरुषश्चैव प्राण एव द्विजोत्तम ॥ १८ ॥

जागर्ति स्वप्नकाले च स्वप्ने स्वप्नायते च सः ।**
जाग्रत्सु बलमाधत्ते चेष्टत्सु चेष्टयत्यपि ॥ १९ ॥

तस्मिन्निरुद्धे विप्रेन्द्रे मृत इत्यभिधीयते।

---

(०१) (१) एकं;, एतत्; एवं; (for एवं).; (३) तु (for स).;
(०२)(१) आस्थितो; आहि (for आश्रि).; (२) अनु; प्रति (for परि० ).;
(०३)(१) तु (for च).; (२) विचेष्टिते(तं); (ऽ)वचेष्टते (for विचेष्टते).; (३) भविष्यं च.
(०४)(१) तं(तद्); देवदेवानां; तं सर्वभू तानां.; (२) क-घ-सतां मतः, योनिम् (योनिर्); (for ज्योतिर्).; उपासते (for ०स्महे).; त्मा भूता०(३) भूतानां (for भूतात्मा).; महान् (for मनो).

त्यक्त्वा शरीरं भूतात्मा पुनरन्यत्प्रपद्यते ॥ २० ॥ (०१)

एवं त्विह स सर्वत्र प्राणेन परिपाल्यते ॥ २१ ॥

पृष्ठतस्तु समानेन स्वां स्वां गतिमुपाश्रिः ।(०२)

व(ब)स्तिमूलं गुदं चैव पावकं समुपाश्रिः ।**
वहन्मूत्रं पूरीषं वाप्यपानः परिवर्तते ॥ २३ ॥(०३)

प्रयत्ने कर्मणि बले स एष त्रिषु वर्तते।**
उदानमिति तं प्राहुरध्यात्मविदुषो जनाः ॥ २४ ॥(०४)

सन्धौ सन्धौ सन्निविष्टः सर्वेष्वपि तथानिलः ।**
शरीरेषु मनुष्याणां व्यान इत्युपदिश्यते ॥ २५ ॥(०५)

*अधिकपाठः

त्वद्ध्यांसमेदोमज्जास्थिरसरक्ताश्च धातवः ।*

धातुष्वग्निस्तु विततः स तु वायुसमीरितः ।**
रसान्धातूंश्च दोषांश्च वर्तयन्परिधावति ॥ २६ ॥(०६)

प्राणानां संनिपातात्तु संनिपातः प्रजायते।**

---

(०१)चेष्टयेचू (for चेष्टत्सु).; प्रवर्तते (for प्रपद्यद्धवे).
(०२)(१) सर्वं; एतत् (for एवं); द्विज (for त्विह).; च (for स).; सर्वात्मा (for सर्वत्र).; एष त्वग्निरपानेन.; (२) प्रति (for परि).; (३) च (for तु).; समासीन; सेन (for नेन).; (४) यां यां (for स्वां स्वां).; योनिम् (for गतिम्).; अपा(for उपा).
(०३) (२) पावकं.; समुपस्थितः (३) मूत्रपुरीषं.; वा (for चा).; (४) हि (for (अ)पि).; अपि, प्रति० (for परि).
(०४) (१) यत्ने च (for प्रयत्ने).; (२) स (for य).; एष (for एकस् ).; संज्ञिः (for वर्तते).; (३) उदानम् (for न).; (४) कुशला (for विदुषो).; नराः (for जनाः).
(०५) (१) स (च) निविष्टः; (for संनिविष्टः).; स सन्धौ संनिविष्टः सन्.; (२) गतो; यथा(for तथा).; सन्धीन्सर्वान्सदानिलः; सन्धि० पर्वण्यथानिलः (पि यः). (४) (अ)भिधीयते.; (for (उ)पदिश्यते).; धातु,
(०६) (१) विचितः (for विततः).; च(for तु).; समानोग्निसमीरकः; (३) रस०(for रसान्).; बहून् (for धातून्).; भूतानां (नि); दोषाणां (for दोषांश्च).; (४) वर्धे (for वर्त).

सोष्मा सोग्निरिति ज्ञेयो योऽन्नं पचति देहिनाम् ॥ २७ ॥(०१)

लक्षालङ्कारः- प्रणानां सन्निपातात् इत्यत्र सन्निपातात् सम्यक् निपातात् इतस्ततः सञ्चरणात् सन्निपातः सन्निपाताख्यो व्याधिः । सोष्मा उष्मणा सहितः सः वायुः अग्निरिति ज्ञेयः ।

अपानोदानयोर्मध्ये प्राणापानौ समाहितौ।**
समन्वितस्त्वधिष्ठानं सम्यक् पचति पावकः ॥ २८ ॥(०२)

लक्षालङ्कारः- समन्तित इत्यत्र सं सम्यक् अनु अनुकूलतया इतः प्राप्तः पावकः अधिष्ठानं देहम् ।

तस्यापि वायुर्पयन्तस्तथा स्याद्गुदसञ्ज्ञितः ।**
स्रोतांसि तस्माज्जायन्ते सर्वप्राणेषु देहिनाम् ॥ २९ ॥(०३)

लक्षालङ्कारः- तस्यापि वायुपकर्यन्त इत्यत्र तस्य पावकस्य गुणसञ्ज्ञितः गुण इति सञ्ज्ञितः उष्णस्पर्शः वायुपर्यन्तः यावति वायुः सञ्चरति तावत्पर्यन्तं विद्यमानः स्रोतांसि स्वेदरूपस्रोतांसि ।

अग्निवेगवहः प्राणो गुदान्ते प्रतिहन्यते।**
स ऊर्ध्वमागम्य पुनः समुत्क्षिपति पावकम् ॥ ३० ॥

---

(०१)(१) पातत्वे; ०पाते तु; ०पातस्तु (for ०पातात्त).; (२) संसर्गाद्यः; (for संनि०).; स जायते; प्रमी (for प्रजा).; (३) ऊष्मा ग्निरिति विज्ञेयो; तस्माच्चाग्निरिति ज्ञातो; सोष्मा सोग्निरिति ज्ञेयो.; (४) ह्यन्नं (for योऽन्नं).

(०२) (१) समानो; अपानप्राणयोद्.; (२) प्राणापानौ; व्यानोदानौ; (for प्राणव्यानौ).; समर्थितम्; समिन्धितस् (for समन्वितम्).; (३) त्वधिष्ठाने; स्वाः(स्व) धिष्ठानं; समानेन (for त्वधिष्ठानं).; (४) ह्यन्नं (for सम्यक्).

(०३)(१) अस्यापि; आस्यादि० (for तस्यापि).; वायुः; वायु० (for पायु०).; पर्यते; पर्यते; पर्येति (for ०पर्यन्तस् ).; आस्यादपानं पर्येति.; (२) तस्य (for तथा).; गुण०(for गुद०).; सञ्ज्ञकः; सञ्ज्ञकं (for ०सञ्ज्ञितः).; तथास्य स्वेदसञ्ज्ञि(ज्ञ)तः (३) श्रोतांसि. यस्माज्. स्रोतसो०स्मात्प्रजायते.; (४) स्रोतांसि (for प्राणेषु). देहिनः

(१) अस्ति; अग्निर् (for अग्नि).; ०सहः (for ०वहः).; अपानेन् स हि (तु स; सह)प्राणो.; (३) यद् (for स०).; आगत्य (for आगम्य).; तथा; मनः (for पुनः).; (४) पावकः (for कम्).

पक्वाशयस्त्वधो नाभ्या ऊर्ध्वमामाशयः स्थितः ।**
नाभिमध्ये शरीरस्य प्राणाः सर्वे प्रतिष्ठिताः ।। ३१ ।।(०१)

लक्षालङ्कारः- पक्वाशयस्त्वधो नाभ्याम् इत्यत्र सः अग्निः नाभ्यामधः नाभेरधश्च पक्वस्य अन्नस्य आशयः स्थानम् । ऊर्ध्वं नाभेरूर्ध्वं आत्मानः पीमात्मनः आशयः आश्रयभूतः । ‘ तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः’ इति श्रुतेः ।

योगिनामेष मार्गस्तु येन गच्छन्ति तत्परम् ।। ३२ ।।

प्रवृत्ता हृदयात्सर्वे तिर्यगूर्ध्वमधस्तथा।**
वहन्त्यन्नरसान्नाड्यो दशप्राणप्रचोदिताः ।(०२)
जितक्लमाः समा धीरा मूर्धन्यात्मानमादधुः ।। ३३ ।। (03)

लक्षालङ्कारः- दशप्राणप्रचोदिता इत्यत्र दशप्राणैः व्यानाख्यप्राणस्य दशरूपैः ।

एवं सर्वेषु विततौ प्राणापानौ हि देहिषु।(०४)
तौ तावदग्निसहितौ विद्धि वै प्राणमात्मनि* ।। ३४ ।।(०५)

लक्षालङ्कारः- विद्धि वै प्राणमात्मनि इत्यत्र आत्मनि जीवे प्राणम् ऊर्ध्वाधःश्वासम् ।

एकादशविकारात्मा कलासम्भारसम्भृतः ।**

---

(०१)(१) ततो(for त्वधो).; नाभ्याम्; नाभेर्(for नाभ्या).; (२) धामाशयः चामा (for आमा).; स्मृतः (for स्थितः).; (३) नाति०; नाभी; नाभिर्(for नाभिं).; (४) नाड्यः सर्वाः (for प्राणाः सर्वे).; सुसंस्थिताः (for प्रतिष्ठिताः).

(०२)(१) सर्वे (for सर्वाम्).; (३) मया)क्य रसान्).; (४) प्राणाः)क्य प्राण).; समीरिताः; प्रणोदिताः; प्रयोजिताः

(१) वै (for तु).; (२) तत्पदं; तत्पुरं(for तत्परम्).;

(०३)(३) माशना; मासतो; माः समा; मा० श्रमा; मा नरा; मभ्रमा (for मासना).; ०क्लमासनो धीरो.;

(०४) (४) आदधन्; आद०धत् (for आदधुः).; (५) स्म; तु (for हि).; शरीरिषु; हि देहिनां; हि जतुषु (for हि देहिषु).

(०५) (१)वन्हि(for (अ)ग्नि) तौ तावदग्निसहितौ.

मूर्तिमन्तं हि तं विद्धि नित्यं कर्म जितात्मकम् ।। ३५ ।।(०१)

लक्षालङ्कारः-एकादशविकार इत्यत्र एकादशविकारात्मा यो देहः तं देहं आदाय कर्मजितात्मकं कर्मणा जितः आत्मा चित्तं यस्य जीवं मूर्तिमन्तं विद्धि ।

तस्मिन्यः संस्थितो ह्यग्निर्नित्यं स्थाल्यामिवाहितः ।**
आत्मानं तं विजानीहि नित्यं त्यागजितात्मकम् ।। ३६ ।।(०२)

लक्षालङ्कारः- आत्मानं परमात्मनः सन्निधानस्थानम् । एतदेव विशदयति- देव इति ।

देवो यः संस्थितस्तस्मिन्नब्बिन्दुरिव पुष्करे।**
क्षेत्रज्ञं तं विजानीहि नित्यं योगजितात्मकम् ।। ३७ ।।(०३)

जीवात्मकानि जानीहि रजः सत्त्वं तमस्तथा।**
जीवमात्मगुणं विद्धि तथाऽऽत्मानं परात्मकम् ।। ३८ ।।(०४)

लक्षालङ्कारः- जीवात्मकानि इत्यत्र जीवस्वभावभूतानि जीवमात्मगुणं विद्धि इत्यत्र आत्मनः अन्तर्यामिभगवद्रूपात् गुणः ज्ञानादिगुणो यस्य तम्, आत्मनः गुणम् अप्रधानरूपं वा । तथा आत्मानम् अन्तर्यामिभगवद्रूपं परं सर्वत्र परिपूर्णं यद्ब्रह्म, तदात्मकं विद्धि ।

अचेतनं जीवगुणं वदन्ति स चेष्टते चेष्टयते च सर्वम्।

---

(०१) (२) कर्ता (for कला०).; सम्भृतं; ०संवृतः (for सम्भृतः).;
(३) मूर्ध्नि भूतं (for मूर्तिमन्तं),; स्थितं; स्तुतं; स्म तं (for हि तं).;
(४) नित्य० (for नित्यं).; योग (for कर्म).

(०२) (१) वह्निर्; नित्यं (०त्यो); (ऽ)ग्निस्तु (for ह्यग्निर्).;
(२)क-घ-सक्थितः, वन्हि०(for नित्यं).; इव स्थितः; समाहितः; इवास्थितः (for इवाहितः).;
(३) जीवात्मानं (for आत्मानं तं).; (४) योगे; कर्म०; ज्ञान० (for योग०).

(०३) (१) संश्रि०तस्.; ह्यस्मिन्; यस्मिन्; स्वस्मिन् (for तस्मिन्).; (३) आत्मानं(for क्षेत्रज्ञं).; (४) त्याग; ज्ञान; योग).

(०४)(१) त्मकं वि०(for त्मकानि).; यानीह; च तथा (for जानीहि).; (२) रजः तमः (३) ०समं(for गुणं).; जीवात्मगुणकं विद्धि.; (४) यथा (for नथा).; परार्थकं (for परात्मकम्).

ततः परं क्षेत्रविदो वदन्ति प्राकल्पयद् यो भुवनानि सप्त।। ३९ ।।(०१)

लक्षालङ्कारः- अचेतनम् इत्यत्र अचेतनं देहादिकं जीवगुणं जीवस्य गुणभूतं अप्रधानमित्यर्थः स जीवः स्वयं चेष्टते परमात्मप्रेरणया चेष्टते । सर्वं देहेन्द्रियादिकं चेष्टयते च । क्षेत्रविदः पुरुषाः ततः जीवातपि परं उत्तमं वस्तु अस्तीति ब्रुवन्ति । स इत्यत्र उक्तं - प्राकल्पयद्य इति ।

एवं सर्वेषु भूतेषु भूतात्मा सम्प्रकाशते।**
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया ज्ञानवेदिभिः ।। ४० ।।(०२)

चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम्।**
प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमानन्त्यमश्नुते ।। ४१ ।।(०३)

लक्षणं तु प्रमाणस्य यथा वृत्तः सुखं स्वपेत्।**
सुखदुःखे हि सन्त्यज्य निर्द्वन्द्वो निष्परिग्रहः
निवाते वा यथा दीपो दीप्येत्कुशलदीपितः ।(०४) ।।*४२ ।।(०५)

लक्षालङ्कारः- लक्षणं तु प्रमाणस्य इत्यत्र यथावृत्तः यथावृत्तिमान् उपरतसर्वेन्द्रियः जीवः यस्य प्रसादात्सुखं स्वपेत्, तदेव प्रमाणस्य प्रकृष्टपरिमाणस्य नारायणस्य लक्षणम् । निद्रितस्य बहिर्व्यापारशून्यस्य जीवस्य देहः यस्माज्जीवति, स परमात्मेति स्वातन्त्र्याख्यलत्रणमनेनोक्तं भवति ।

पूर्वरात्रे परे चैव युञ्जानः सततं मनः ।**

---

(०१) (१) अचे(for सचे).; (२) स्पर्श; चेत (for चेष्टयते).; विश्वं (for सर्वम्).; (३) अतः(for ततः).; क्षेत्रमिति ब्रुवन्ति.; (४) प्रावा (नैव).; तं (for प्राकल्प).

(०२) एषु; एष(for एवं).; भूतार्थो (for भूतेषु).; (२) महात्मा (for भूता०).; सं०; तु; नु; यः (for न).; (४) ज्ञानबुद्धिभिः; सूक्ष्मवेदिभिः; सूक्ष्म० दर्शिभिः .

(०३) (१) च; (अ)पि,; तु (for हि).; (३) प्रसन्नात्मनि सो (सु)स्थित्वा; प्रसन्न आत्मनि स्थित्वा.; (४) अत्यन्तम् (for आनन्त्यम्).

(०४)(१) प्रसन्नस्य (for प्रसा).; (२) भवेत् (for स्वपेत्).

(०५)(३) निर्वाते.; च; हि (for वा).; (४) दिपेन्; वसेत्; तिष्टेत्(forदीप्येत्).; कौशल (for कुशल).; दीप्यतेवायुनोदितः .

लघ्वाहारो विशुद्धात्मा पश्यन्नात्मानमात्मनि ॥ ४३ ॥(०१)

प्रदीप्तेनेव दीपेन मनोदीपेन पश्यति।**
दृष्ट्वाऽऽत्मानं निरात्मानं स तदा विप्रमुच्यते ॥ ४४ ॥(०२)

लक्षालङ्कारः- दृष्ट्वाऽऽत्मानं निरात्मानम् इत्यत्र निर्गतः आतम अन्यः परमात्मा यस्मात् तम् ।

सर्वोपायैस्तु लोभस्य क्रोधस्य च विनिग्रहः ।**
एतत्पवित्रं लोकानां तपो वै सङ्क्रमो मतः ॥ ४५ ॥(०३)

नित्यं क्रोधात्तपो रक्षेद्धर्मं रक्षेच्च मत्सरात्।**
विद्यां मानापमानाभ्यामात्मानं तु प्रमादतः ॥ ४६ ॥(०४)

आनृशंस्यं परो धर्मः क्षमा च परमं बलम्।**
आत्मज्ञानं परं ज्ञानं सत्यं व्रतपरं व्रतम् ॥ ४७ ॥

सत्यस्य वचनं श्रेयः सत्यं ज्ञानं हितं भवेत्।**
यद्भूतहितमत्यन्तं तद्वै सत्यं परं मतम् ॥ ४८ ॥(०५)

---

(०१) (१) पूर्वरात्रापरात्रे च; पूर्वरात्रापरात्रे च; (२) युजीयात् (for युञ्जानः).; (३) वाकवा (for लघ्वा).; (४) युजत्यां; पश्यत्या; पश्येता (for पश्यन्ना).

(०२) (१) प्रदीपेन.; (ए)व; (for (इ)व).; दीप्तेन (for दीपेन).; दीप्तेनैव तु दीपेन.; (२) पश्यत्यात्मानमात्मना.; (३) लब्धा; वृथा (for दृष्ट्वा०. ).; तदा (for निरा०).; दृष्ट्वैनमन्तरात्मानं.; (४) स तदा.; स तदा विप्रमुच्यते.

(०३) (३) ज्ञानानां; लोकानां(कस्य); विज्ञानं(for यज्ञानां).; एतत्प्रवृत्तं यज्ज्ञानात्; (४) संयमौ; सत्तमं (for सङ्क्रमो).; मतं (for मतः).

(०४)(२) धर्मं; प्रियं; श्रियो(for श्रियं).; रक्षेत् (for रक्षेत).; अमत्सरा; च मत्स; विमत्स; तु मत्स (for मत्स).; (३) मानाव (for मानाप).; (४) च (for तु). ज्ञानं रक्षेत्प्रमादतः

/*(१) अनृ (for आनृ).; (२) हि; तु(for च).; (३) आत्मानं (त्मा तु) परमं ज्ञानं.; (४) सत्यं व्रतपरिग्रहः; सत्यं व्रतं (ब्रह्म०; व्रत०); परं व्रतं; परं सत्यव्रतस्थितं.

(०५) (१) सेवनं (for वचनं).; श्रेष्ठं (for श्रेयः).; (२) सत्यादपि; सत्यज्ञानं (for सत्यं ज्ञानं).; ज्ञानहितं (for ज्ञानं हितं).; वदेत् (for भवेत्).; (४) तच्च (for तद्वै).; हितं; स्मृतं; व्रतं (for मतम्).; तत्तत्सत्यं हितं परं; तद्वै सत्यसमं मतं.

यस्य सर्वे समारम्भा निराशीर्बन्धनाः सदा।**
त्यागे यस्य हुतं सर्वं स त्यागी स च बुद्धिमान् ॥ ४९ ॥(०१)

यतो न गुरुरप्येन च्यावयेदुपपादयत्।**
तं विद्याद्ब्रह्मणो योगंमयोगं योगसञ्ज्ञितम् ॥ ५० ॥(०२)

लक्षालङ्कारः- योगमयोगं योगसञ्ज्ञितम् इत्यत्र अतयोगं विषययोगरहितं तं योगं योगसञ्ज्ञितं विद्यत् ।

न हिंस्यात्सर्वभूतानि मैत्रायणगतश्चरेत्।**
नेदं जीवितमासाद्य वैरं कुर्वीत केनचित् ॥ ५१ ॥(०३)

आकिञ्चन्यं सुसन्तोषो निराशित्वमचापलम्।**
एतदेव परं ज्ञानं सदात्मज्ञानमुत्तमम् ॥ ५२ ॥(०४)

परिग्रहं परित्यज्य भवेद्बुद्ध्या यतव्रतः ।**
अशोकं स्थानमाश्रित्य निश्चलं प्रेत्य चेह च ॥ ५३ ॥(०५)

*अधिकपाठः

बाह्यस्पर्शेषु सक्तात्मा विन्दत्यात्मनि यत्सुखम् ।

---

(०१)(२) निराशाबन्धनाः; निराबाधाः सदैव तु.; (३) योगे (for त्यागे).; हितं; कृ (for हु).; सत्यं (for सवं).; (४) योगी (for त्यागी).; च स; कृत०; स तु (for स च).

(०२)(१) वा हि (for अपि).; एवं; एतं (for एनं).; यतो गुरुर्न चाप्येनं; यतो न गुरुता ह्येवं (०प्येवं; चैनं); यदा न कुरुतां चैनं.; (२) श्रावयेद्; यापयेद् (for च्यावयेद्).; आपदागमः; उपपादयेत् (for यन्).; (३) ब्राह्मणो; आत्मनो (for ब्रह्मणो).; (४) अयोगं (for वि). योगसञ्ज्ञक.

(०३) (२) मैत्रायणमनश्च्; ०यणमतश्च्; यणगतिश्च्; मैत्रेयगुणतश्च्; मैत्राय सुगतिं; यणगतिं (for यणगतश्च्).; चरन् (३) आद्यं वै (for आसाद्य).; (४) कुर्वति; कुर्वन्तु (for कुर्वीत).

(०४) (१) अकिञ्चनः; अकिञ्चनत्वं सन्तोषो.; निराशत्वम्; शीत्वम्; शीस्त्वम्.;
(३) तदेव परमं ज्ञानं.; (४) तदात्म (for सदात्म).; उत्तमं परिकीर्तितं.

(०५) (२) भवेद्; स चेद् (for भव).; जितेन्द्रियः; (for यत).;
(३) अशोच्यं (for अशोकं).; आतिष्ठ; आश्रिय; आसाद्य; आतिष्ठन् (for आतिष्ठेन्).;
(४) निर्मलं; निष्कलं (for निश्चलं).; चैव हि (for चेह च).

तद्ब्रह्मयोगयुक्ता(त्मा) सुखमक्षय्यमश्नुते ।*

तपोनित्येन दान्तेन मुनिना संयतात्मना।**
अजितं जेतुकामेन भाव्यं सङ्गेष्वसङ्गिना ।। ५४ ।।(०१)

गुणागुणमनासङ्गमेककार्यमनन्तरम्।**
एतत्तद्ब्रह्मणे वृत्तमाहुरेकपदं सुखम् ।। ५५ ।।(०२)

लक्षालङ्कारः- गुणागुणमनासङ्गम् इत्यत्र गुणेषु भगवतः गुणेषु आ समन्तात् गुणः स्नेहाख्यगुणः गुणागुणम् ।

परित्यजति यो दुःखं सुखं चाप्युभयं नरः ।**
ब्रह्म प्राप्नोति सोऽत्यन्तमसङ्गेन च गच्छति ।। ५६।।(०३)

यथाश्रुतमिदं सर्वं समासेन द्विजोत्तम।**
एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि ।। ५७ ।।(०४)

अस्मिन् पर्वणि १७६अध्याये ५७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि
मार्कण्डेयसमास्यापर्वणि ब्राह्मणमाहात्म्ये
षट्सप्तत्यधिकशततमोऽध्यायः ।। १७६ ।।

---

(०१) (२) सञ्जिता; संवृता (for संयता).; (३) जित (for जेतु).

(०२) (१) गुणानां तु (for गुणागुणम्),; अनारम्भम् (for सङ्गम्).; (२) चर्यम् (for कार्यम्).;
(३) एकं (for एतद्).; ब्राह्मण तद्; ब्राह्मणतो (०को); (for ब्राह्मण ते);
एतत्तद् (द्वै) ब्र(ब्रा)ह्मणो वृत्तं; एतम्बाण्डवृत्तान्तैः; एतद्वै कथितं ब्रह्मन्;
(४) एके; एकं; एतत् (एक०).; आहुरेके परं पदं; आहुरेतत्सस्वप्रदं.

(०३) (२) वां (for चा).; (अ)म्बुदयं; (for (अ)प्युभयं).; (३) प्राप्नोति ब्रह्म (शर्म; मोक्षं).; चा० (for सो).; प्राप्नोति ब्राह्मणो नित्यं.; (४) अशक्तेन; असङ्गे स (for असडेन).; आ(अ)सङ्गे च न गच्छति; आधि गच्छत्र गच्छति.

(०४) (१) तथा०(for यथा०).; भूतम् (for ०श्रुतम्).; (३) मया ते सम्यगाख्यातं.

# 03- 07- 177 Adhyaya

# १७७. सप्तासप्तत्यधिकशततमोध्यायः

१७७. धर्मव्याधेन कौशिकाय स्वगृहप्रवेशनपूर्वकं वृद्धयोः स्वापित्रोः प्रदर्शनम् ।।१।।
तथा मातापितृविषये स्वानुसन्धानप्रकारनिवेदनम् ।।२।।

**मार्कण्डेयः**

एवं सङ्कथिते कृत्स्ने मोक्षधर्मे युधिष्ठिर ।
**दृढ प्रीतमना विप्रो धर्मव्याधमुवाच ह** ।। १ ।।[०१]

**कौशिकः**

**न्याययुक्तमिदं सर्वं भवता परिकीर्तितम्।****
**न तेऽस्त्यविदितं किञ्चिद्धर्मेष्विह हि दृश्यते** ।। २ ।।[०२]

**व्याधः**

प्रत्यक्षं मम यो धर्मस्तं च पश्य द्विजोत्तम।**
**येन सिद्धिरियं प्राप्ता मया ब्राह्मणपुङ्ग०** ।। ३ ।।[०३]

उत्तिष्ठ भगवन्क्षिप्रं प्रविश्याभ्यन्तरं गृहम्।**
**द्रष्टुमर्हसि धर्मज्ञ मातरं पितरं च म `** ।। ४ ।।[०४]

**मार्कण्डेयः**

**इत्युक्तः स प्रविश्याथ ददर्श परमार्चितम्।****

---

(०१)(१) च; स; (for सं); (२) तेन धर्मो) क्य मोक्षधर्मे); (३) दृढ०; गूढं (for दृढं);
(०२) (१) ब्राह्मण उ; क-मम धर्ममिमं, ख-घ-धर्म्यमिदं, व्याध युक्तम्; मम; (४) धर्म्यम् (for न्याययुक्तम्); धर्मेभ्य इह दृ; स्वधर्मेष्विह दृ; धर्मेष्वभिसमीक्ष्यते.
(०३) (१) प्रत्यक्षं मम धर्मस्तं (२) तं (त्वं); च पश्य द्विजोत्तम; त्वं पश्य द्विजसत्तम (४) सत्तम (for पुङ्गव);
(०४)(१) (आ)गच्छ च) क्य भगवन्); विप्र (for क्षिप्रं); (२) प्रविशा) क्य प्रविश्या); (अ)नन्तरं (for (आ)भ्यन्तरं); (३) (अ)धर्मज्ञ; मे धर्मं (for धर्मज्ञ); (४) पितरं मातरं मम (for च मे);,

**सौधं हृद्यं चतुःशालमतीव च मनोरमम्** ।। ५ ।।[०१]

देवतागृहसङ्काशं दैवतैश्च सुपूजितम्।**
**शयनासनसम्बाधं गन्धैश्च परमैर्युतम्** ।। ६ ।।[०२]

तत्र शुक्लाम्बरधरौ पितरावस्य पूजितौ।
**कृताहारौ तु सन्तुष्टावुपविष्टौ वरासने** ।। ७ ।।[०३]

तस्य व्याधस्य पितरौ ब्राह्मणः सन्ददर्श ह ।।*
धर्मव्याधस्तु तौ दृष्ट्वा पादेषु शिरसापतत् ।। ८ ।।

This Stanga is Interchenged in TRK after 7

वृद्धावूचतुः

**उत्तिष्ठोत्तिष्ठ धर्मज्ञ धर्मस्त्वामभिरक्षतु।**
**प्रीतौ स्वस्तव शौचेन धीर्घमायुरवाप्नुहि** ।। ९ ।।[०४]

सत्पुत्रेण त्वया पुत्र नित्यं काले सुपूजितौ।

***अधिकपाठः**

**गतिमिष्टां तथा ज्ञानमेवं च परवान्भव ।***[०५]

**सुखमावां वसावोऽत्र देवलोकगताविव ।*** ।। १० ।।[०६]

**न तेऽन्यद्दैवतं किञ्चिद्दैवतेष्वपि वर्तते।****

---

(०१) (१/२) सं (for स); प्रविश्य ददर्श (३) इत्युक्तां हि) क्य सौधं हृद्यं); (४) सु (for च); मनोरमं,
(०२)(१) सम्बाधं; (४) श्च परमार्चितं.
(०३)(१) सूक्ष्मां (for शुक्लां); (३) सुपुष्टौ तौ; सुसम्पुष्टौ; सु (तु); सन्तुष्टौ; सुतुष्टौ च; सुसंहृष्टौ (for सुवृष्टौ तौ); कृतौ सुपुष्टौ हृद्यौ तु
(२) क्षुपं (for उप); (६) पादयोः (for पादेषु);
(०४)(पितरौ) क्य वृद्धौ); ऊचतुः (३) धर्मेण (for शौचेन);.
(०५)(तपो)क्य तथा); मेधां (for एवं); परमं तव; परमस्तु ते; परमां गतः (for परवगभव);)
(५) सुपुत्रेण; (६) दीर्घकालं; नित्यं काले; नित्यं कालं,
(०६)(४) क-कालं सुपूजितम् , ख-नित्यकालं सुपूजितौ, घ-कालं सुपूजितौ,

प्रयतत्वाद्विजातीनां दमेनासि समन्वितः ।। ११ ।।[०१]

लक्षालङ्कारः- प्रयतत्वाद्विजातीनाम् इत्यत्र द्विजातीनां दमेव ब्राह्मणयोग्यदमेन ।

पितुः पितामहा ये च तथैव प्रपितामहाः ।**
प्रीतास्ते सततं पुत्र दमेनावां च पूजया ।। १२ ।।[०२]

मनसा कर्मणा वाचा शुश्रूषा नैव हीयते।**
न चान्या हि तथा बुद्धिर्दृश्यते साम्प्रतं तव ।। १३।।[०३]

जामदग्न्येन रामेण यथा वृद्धौ सुपूजितौ।**
तथा त्वया कृतं सर्वं तद्विशिष्टं च पुत्रक ।। १४ ।।[०४]

**मार्कण्डेयः**

ततस्तं ब्राह्मणं ताभ्यां धर्मव्याधो न्यवेदयत्।**
तौ स्वागतेन तं विप्रमर्चयामासतुस्तदा।[०५]
प्रतिपूज्य च तां पूजां द्विजः पप्रच्छ तावुभौ ।। १५ ।।

**कौशिकः**

सुपुत्राभ्यां सभृत्याभ्यां कच्चिद्वां कुशलं गृहे।**
अनामयं च वां कच्चित्सदैवेह शरीरयोः ।। १६ ।।[०६]

**वृद्धावूचतुः**

कुशलं नौ गृहे विप्र भृत्यवर्गे च सर्वशः ।**

---

(०१) (१) तेन (for तेन्यद्); (२) विद्यते (for वर्तं); (४) धर्मेणापि; दमेनापि; दमेनाभि (for नासि);.

(०२) (४) पूजितौ (for पूजया);.

(०३)(२) ते न)क्य नैव); (३) हि तथा; अपि तथा (for वितथा); (४) वर्तते (for दृश्य);

(०४) (२) तथा वृद्धौ प्रपूजितौ (३) त्वया कृतं,

(०५)(४) अर्हया (for अर्चया); तथा (for तदा);

(०६)(१) पूज्य (for गृह्य); तु; स (for च); (३) सवृ द्धाभ्यां; समातृभ्यां; सुभृत्याभ्यां; सभ्रातृभ्यां; सुपुत्राभ्यां (for सन्तु); (४) वा; त्वं; वः (for वां); (५) कश्चित् (for कच्चित्); (६) सुखं वेह (for सदैवेह); हि (for इव);

कच्चित्त्वमप्यविघ्नेन सम्प्राप्तो भगवन्निति ।। १७ ।।[०१]

**मार्कण्डेयः**

बाढमित्येव तौ विप्रः प्रत्युवाच मुदान्वितः ।**
धर्मव्याधो निरीक्ष्याथ ततस्तं वाक्यमब्रवीत् ।। १८ ।।[०२]

**व्याधः**

पिता माता च भगवन्नेतौ मद्दैवतं परम्।**
यद्दैवतेभ्यः कर्तव्यं तदेताभ्यां करोम्यहम् ।। १९ ।।[०३]

त्रयस्त्रिंशद्यथा देवाः सर्वे शक्रपुरोगमाः ।**
सम्पूज्याः सर्वलोकस्य तथा वृद्धाविमौ मम ।। २० ।।[०४]

उपाहारानाहरन्तो देवतानां यथा द्विजाः ।**
कुर्वन्ति तद्वदेताभ्यां करोम्यहमतन्द्रितः ।। २१ ।।[०५]

एतौ मे परमं ब्रह्मन्पिता माता च दैवतम्।।
एतौ पुष्पैः फलै रत्नैस्तोषयामि सदा द्विज ।। २२ ।। [०६]

एतावेवाग्नयो मह्यं यान्वदन्ति मनीषिणः ।**

---

(०१)(१) नौ (for नो); (२) वर्गेषु)क्य वर्गे च); तथानामयमेव च; (३) असि (for अपि); (४) इति (for इह);

(०२)(१) आह (for र्णव); तं (for तौ); (२) कौत्हलसमन्वितः (३) निरीक्ष्याथ (for तु तं विप्रम्); (४) ततस्तं (for अर्थवद्); अभ्य रूर्वेदं वचोब्रवीत्,

(०३)(१) व्याध उ (व्याधः); माता पिता; (२) उभौ; इदं (for एतौ); मद् (for मे); एनं मे भगवन्परं, यदैव तेभ्यः; यद्देवतेभ्यः (४) तदे वाभ्यां; तदावाभ्यां

(०४) (४) अपि (for मम);

(०५)(१) उपाहारान्; (२) दैवतानां तथा (for यथा); (३) कुर्वति (for कुर्वते); तावद् (for तद्वद्); एवाभ्यां (for एताभ्यां);

(०६) (१) एष (for एतौ); परमौ (for मं); ब्रह्म (३) एतौ हि मे परं ब्रह्म एतैः (for एतौ); पुष्प (रत्न); फलैः अन्यैः; पुष्पैः; अश्वैः; अन्नैः (for रत्नैः); (४) द्विजोत्तम (for सदा द्विज);

**यज्ञा वेदाश्च चत्वारः सर्वमेतौ मम द्विज ।। २३।।**(०१)

एतदर्थं मम प्राणा भार्या पुत्र सुहृज्जनः ।**
**सपुत्रदारः शुश्रूषां नित्यमेव करोम्यहम् ।। २४ ।।**(०२)

स्वयं च स्नापयाम्येतौ तथा पादौ प्रधावये।**
**आहारं च प्रयच्छामि स्वयं च द्विजसत्तम ।। २५ ।।**(०३)

अनुकूलं तथा वच्मि विप्रियं परिवर्जये।**
**अधर्मेणापि संयुक्तं प्रियमाभ्यां करोम्यहम ् ।। २६ ।।**(०४)

धर्ममेव गुरुं ज्ञात्वा करोमि द्विजसत्तम।**
**अतन्द्रितः सदा विप्र शुश्रूषां वै करोम्यहम् ।। २७ ।।**(०५)

पञ्चैव गुरवो ब्रह्मन्पुरुषस्य बुभूषतः ।**
**पिता माताग्निरात्मा च गुरुश्च द्विजसत्तम ।। २८ ।।**(०६)

लक्षालङ्कारः- पिता माताऽग्निरात्मा च इत्यत्र आत्मा परमात्मा ।

एतेषु यस्तु वर्तेत सम्यगेव द्विजोत्तम।
**भवेयुरग्नयस्तस्य परिचीर्णास्तु नित्यशः ।। २९ ।।**(०७)

---

(०१) (१) नित्यं; ब्रह्मन् (for मह्यं); (२) सद्; यद् (for यान्); (३) द्विजोत्तम (मम द्विज);

(०२)(१) र्थौ मम प्राणौ; (२) भार्याः; दाराः) क्य भार्या); पुत्र; पुत्रः सुहृज्जनः; तथैव च; (४) एवं (for एव);

(०३)(१) स्वाप (for स्नाप); (२) तदा; सदा (for तथा); पादान् (for पादौ); च (for प्र); यदा पादौ च तर्पये; (३) च (for सं); (४) स्वयं चैव द्विजोत्तम (द्विजर्षभ);

(०४)(१) कूलां कथां; कूलं तथा ब्रूयां; दद्मि (for वच्मि); अनुरूपकथावादी (२) च विवर्जयन्; परिवर्जये (for येत्); (३) संयुक्तः (for क्तं);

(०५)(१) एवं (for एव); गुरू (for गुरुं); मत्वा (for ज्ञात्वा); (२) साक्षादेतौ द्विजोत्तम; (३) स्वयं विप्र; तु सततं (for सदा विप्र);

(०६) (१) राजन् (for ब्रह्मन्); (४) गुरवश्च द्विजोत्तम;

(०७)(१) एषु यस्य प्रवर्तेत; (२) एतद्; एवं (for एव); (३) तेन (for तस्य); (४) परिपूर्णास्तु सर्वशः (for नित्य);

गार्हस्थ्ये वर्तमानस्य एष धर्मः सनातनः ।। ३० ।।(०१)

***अधिकपाठः**

**कथितस्ते मया विप्र किं भूयः श्रोतुमिच्छसि ।***

**(अस्मिन् पर्वणि १७७अध्याये ३०श्लोकाः सन्ति)**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां**
**वनपर्वणि मार्कण्डेयसमास्यापर्वणि ब्राह्मणमाहात्म्ये**
**सप्तसप्तत्यधिकशततमोऽध्यायः ।। १७७।।**

## 03- 04 - 178Adhyaya

# १७८. अष्टसप्तत्यधिकशततमो अध्यायः

१७८ धर्मव्याधेन कौशिकं प्रति मातापितृशुश्रूषणचोदनपूर्वकं स्वस्य शूद्रयोनौ जननिदानकथनम् ।। १ ।। धर्मन्याधेन नानाधर्मान् बोधितेन कौशिकेन गृहमेत्य स्वापित्रोः शुश्रूषणम् ।। २ ।। मार्कण्डेयेन युधिष्ठिरं प्रति पतिव्रतामाहात्म्यादिकथनोपसंहारः ।। ३ ।। धर्मव्याधस्य कौशिकं प्रति मातापितृशुश्रूषणप्रेरणपूर्वकं स्वस्य शूद्रयोनौ जननकारणकथनम् ।।

**मार्कण्डेयः**

**गुरु निवेद्य विप्राय तौ मातापितरावुभौ।****
पुनरेव स धर्मात्मा व्याधो ब्राह्मणमब्रवीत् ।। १ ।।(०२)

प्रवृत्तचक्षुर्जातोऽस्मि सम्पश्य तपसो बलम्।**
यदर्थमुक्तोऽसि तया गच्छ त्वं मिथिलामिति ।। २ ।।(०३)

---

(०१)(१) गार्हस्थे; (२) एष धर्मः धर्म एव;

(०२)

(०३) (१) प्रवृद्ध (for प्रवृत्त); सि (for स्मि); (२) तत्पश्य; पश्य मे (for सम्पश्य); च तपोबलं (for

पतिशुश्रूषपरया दान्तया सत्यशीलया।**
**मिथिलायां वसेद्व्याधः स ते धर्मान्प्रवक्ष्यति ।। ३ ।।**(०१)

**ब्राह्मणः**

**पतिव्रतायाः सत्यायाः शीलाढ्याया यतव्रत।****
**संस्मृत्य वाक्यं धर्मज्ञ गुणवानसि मे मतः ।। ४ ।।**(०२)

**व्याधः**

यत्तदा त्वं द्विजश्रेष्ठ तयोक्तो मां प्रति प्रभो।**
**दृष्टमेव तया सम्यगेकपत्न्या न संशयः ।। ५ ।।**(०३)

त्वदनुग्रहबुद्ध्या तु विप्रैतद्दर्शितं मया।**
**वाक्यं च शृणु मे तात यत्ते वक्ष्ये हितं द्विज ।। ६ ।।**(०४)

त्वया विनिकृता माता पिता च द्विजसत्तम।
अनिसृष्टोऽसि निष्क्रान्तो गृहात्ताभ्यामनिन्दित।**
**वेदोच्चारणकार्यार्थमयुक्तं तत्त्वया कृतम् ।। ७ ।।**(०५)

तव शोकेन वृद्धौ तावन्धीभूतौ तपस्विनौ।**

---

तपसो बलम्); प्रणष्टं च तमो महत्; साम्प्रतं च तपो महत्; सा (तं); पश्यत तपोबलं; (३) भगव (वा); न् (for सि तया); तथा (तया); (४) गच्छ त्वं) गच्छध्वं); (for स्व); प्रति (for इति); मिथिलां गम्यतामिति,
(०१)(१) गुरू (for पति); तया (for परया); पतिशुमू षणतया; (३) वसेद् (for वसन्); (४) धर्मं)क्य धर्मान्);
(०२)(१) सानार्या सुपुत्रायाः (for सत्यायाः); (२) शीलाद्याया; त्माया जितव्रत; च सुव्रत; (३) स्मृतवा नसि धर्मज्ञ; (४) मतिः (for मतः);
(०३)(१) यदा तु; यत्ता (अव); या (for यत्तदा); (२) तयोक्तं; नि (प्र); युक्तो द्विज (for प्रभो); (३) एव (for एतत्); मया; त्वया (for तया);
(०४)(१) तदनु (for त्वदनु); (३) तु (for च); तावद् (for तात); (४) यत्ते वक्ष्यामि तद् (ते); द्विज; यावद्वक्ष्ये हि ते द्विज.
(०५)(१) विनिहता; अपि निकृता; न पूजिता; (३) अविसृ; अतिसृ; अनुशि (for अनिसृ०); पि ति (for ङ्गऽसि); (४) अतद्रित (for अनिन्दित); (६) तु त्वया; तद्विधा (for तत्त्वया); अर्थयुक्तं त्वया कृतं.

तौ प्रसादयितुं गच्छ मा त्वां धर्मोऽत्यगादयम् ।। ८ ।।[०१]

तपस्वी त्वं महात्मा च धर्मे च निरतः सदा।**

सर्वमेतदपार्थं ते क्षिप्रं तौ सम्प्रसादय।[०२]

*अधिकपाठः

तौ प्रसाद्य द्विजश्रेष्ठ यच्छ्रेयस्तदवाप्स्यसि ।। ९ ।।

श्रद्दधस्व मम ब्रह्मन्नान्यथा कर्तुमर्हसि।**
गम्यतामद्य विप्रर्षे श्रेयस्ते कथयाम्यहम् ।। १० ।।[०३]

ब्राह्मणः

यदेतदुक्तं भवता सर्वं सत्यमसंशयम्।**
प्रीतोऽस्मि तव भद्रं ते धर्माचारगुणान्वित ।। ११ ।।[०४]

व्याधः

दैवतप्रतिमो हि त्वं यस्त्वं धर्ममनुव्रतः ।**
पुराणं शाश्वतं दिव्यं दुष्प्राप्यमकृतात्मभिः ।। १२ ।।[०५]

(व्याधः)

मातापित्रोः सकाशं हि गत्वा त्वं द्विजसत्तम।*

---

(०१)(१) धर्मो तेन; ततः (for तव); तौ वृद्धौ; (२) (अं)धीभूतौ; (अं)धौ स्यातां (for धौ जातौ); (४) स (for मा); ते; त्वां (for त्वा); ति अयं (for महान्);

(०२)(१) ख-तपस्वी त्वं महात्मा च धर्मे च निरतस्सदा ।, (कृतात्मा) क्य महा); (२) धर्मी (for धर्मे); धर्मो वै चरितः सदा (४) सम्प्रदाचः सम्प्रस्थय (for स्वादयः);

(०३) (१) च मे; वचो; तथा (for मम); श्रद्धत्स्व चैव मे ब्रह्मन्; श्रद्धस्व मे वचो ब्रण; (२) नान्यत्त्वं (for था); (३) इति (for अद्य); (४) तु (for ते);

(०४) (२) सत्यमेतद् (for सर्वं सत्यम्); न संशयः (for असंशयम्); (३) भद्रं ते (for धर्मज्ञ); (४) धर्माचार (for साध्वाचारः); गुणान्वितः; गुणान्वितं; समन्वित; समन्वितः .

(०५)(१) देवता (for दैवत); सि (for हि); (२) यत्त्वं; यस्मात् (for यस्त्वं); दुष्प्राप्यम्.

**अतन्द्रितः कुरु क्षिप्रं मातापित्रोर्हि पूजनम्** ।। १३ ।।(०१)

**अतः परमहं धर्मं नान्यं पश्यामि कश्चन** ।। १४ ।। (02)

**कौशिकः**

**ब्राह्मण उवाच इहाहमागतो दिष्ट्या दिष्ट्या मे सङ्गतं त्वया।।**
**ईदृशा दुर्लभा लोके नरा धर्मप्रदर्शकाः** ।। १५ ।। (०३)

एको नरसहस्रेषु धर्मविद्विद्यते न वा।**
**प्रीतोऽस्मि तव सत्येन भद्रं ते पुरुषर्षभ** ।। १६ ।।(०४)

पतमानोऽद्य नरके भवतास्मि समुद्धृतः ।**
**भवितव्यमथैवं च यद्दृष्टोऽसि मयानघ** ।। १७ ।।(०५)

राजा ययातिर्दौहित्रैः पतितस्तारितो यथा।**
**सद्भिः पुरुषशार्दूल तथाहं भवता द्विजः** ।। १८ ।।(०६)

मातापितृभ्यां शुश्रूषां करिष्ये वचनात्तव।**
**नाकृतात्मा वेदयति धर्माधर्मविनिश्चयम्** ।। १९ ।।(०७)

दुर्ज्ञेयः शाश्वतो धर्मः शूद्रयोनौ हि वर्तते।

---

(०१) (१) तु (for हि);

(०२) (१) ततः (for अतः); महद् (for अहं); ब्रह्मन् (for धर्म); (२) नान्यत्; नानु (for नान्यं); वक्ष्यामि (for पश्यामि); किञ्चन (for कं);

(०३)(१) देय्यर्प (for दिष्ट्या); (२) संशयं (for सङ्गमं); च तत् (for स्ववया); मे० समं सङ्गतिस्त्वया; (३) त्वादृशा (for इदृशा);

(०४)(१) नरः (for नर); (२) धर्मवान् (for विद्); वर्तते (for विद्यते); नघ (३) (for न वा); सख्येन (for सत्येन); (४) पुरुषर्षभ (for षोत्तम);

(०५) (१) वर्त (for पत); स्मि; द्य (for द्वि); (२) हि (for अस्मि); (३) अथैतच्च; अथैकं च; ऊतथैव त्वं (for अथैवं च);

(०६)(१) ययातिराजा दौ; (२) तारितः पतितो यथा (४) तारितसू; भविता (for भवता); त्वया द्विजः (for त्विह);

(०७) (१) करोमि)क्य करिष्ये);

**न त्वां शूद्रमहं मन्ये भवितव्यं हि कारणम्** ।। २० ।।[०१]

**येन कर्मविशेषेण प्राप्तेयं शूद्रता त्वया।**[०२]
**एतदिच्छामि विज्ञातुं तत्त्वेन हि महामते।****
**कामया ब्रूहि मे सर्वं सत्येन प्रयतात्मना** ।। २१ ।।[०३]

**व्याधः**

**अनतिक्रमणीया वै ब्राह्मणा मे द्विजोत्तम।****
**शृणु सर्वमिदं वृत्तं पूर्वदेहे ममानघ** ।। २२ ।।[०४]

अहं हि ब्राह्मणः पूर्वमासं द्विजवरात्मजः ।
**वेदाध्यायी सुकुशलो वेदाङ्गानां च पारगः** ।। २३ ।।[०५]

आत्मदोषकृतैर्ब्रह्मन्नवस्थामाप्तवानिमाम् ।। २४ ।।[०६]

कश्चिद्राजा मम सखा धनुर्वेदपरायणः ।**
**संसर्गाद्धनुषि श्रेष्ठस्ततोऽहमभवं द्विज** ।। २५ ।।[०७]

एतस्मिन्नेव काले तु मृगयां निर्गतो नृपः
**सहितो योधमुख्यैश्च मन्त्रिभिश्च सुसंवृतः ।****

---

(०१)(१) हि वर्तते; हि वर्ततां; प्रवर्ततः; (२) त्वा (for त्वां); (३) भविता ब्रूहि कारणं;

(०२)(५) केन (for येन); धर्म; अधर्म (for कर्म); विशेषेण (for विपाकेन); (६) तव (for त्वया); तव धर्मभृतां वर; संवृत्ता तव शूद्रता.

(०३)(१) यत्तद्; एतां (for एतद्); त्विच्छामि इच्छामि विज्ञातु अहं श्रोतुं (for विज्ञातुं); (२) इह (for हि); द्युते (for मते); तत्वेन तव शूद्रतां (३) काम्यया ब्रूहि; कामं प्रब्रूहि सर्वं; सत्यं (for तथ्यं); कामयानस्य मे शंस (ब्रूहि); (४) सत्येन (for सर्वं त्वं); संशयात्मवान्; संनता; प्रयतात्मना; नियतात्मवान.

(०४) (१) ०क्रमशीला वै (for हि); (२) मे (for वै); यथा (for इदं); वाक्यं; सत्यं (for वृत्तं); (४) मया (for मम);

(०५)(१) द्विजवरोत्तम) मः); वरद्विजोत्तमः; द्विज परात्मक; वरात्मजः (२) मुक्तशलो; सकुशलो; कुशलवो (for सुकु);

(०६) (४) वेदवेदाङ्गपारगः (५) दोषैः कृतैर्; ०दोषकृते; ०दोषकृतां; (६) अवस्थामाप्त

(०७) (२) परोभवत् (for परायणः); (४) अहं अभवं.

ततोऽभ्यहन्मृगांस्तत्र सुबहूनाश्रमं प्रति ।। २६ ।।[०१]

अथ क्षिप्तः शरो घोरो मयापि द्विजसत्तम।**
ताडितश्च ऋषिस्तेन शरेणानतपर्वणा ।। २७ ।।[०२]

*अधिकपाठः

ततो मृगान्वराहांश्च महिषांश्च महीपतिः ।
जघान पुरुषव्याघ्रः स राजा ब्राह्मणोत्तम ।
ततोऽहमपि क्रीडार्थं राज्ञः प्रियहिते रतः ।
वरान्निघ्नन्वराहांश्च शरैः संनतपर्वभिः ।
वनदुर्गेषु धर्मज्ञ समं राज्ञा महात्मना ।
व्यचरं धनुरादाय मृगहा लुब्धको यथा ।
तत्राश्रमसमभ्याशे मया धर्मविदां वर ।
मृगस्य वज्रसकाशः शरः क्षिप्तस्तदा द्विज ।।[०३]

भूमौ निपतितो ब्रह्मन्नुवाच प्रतिनादयन्।।

मुनिः

नापराध्याम्यहं किञ्चित्केन पापमिदं कृतम् ।। २८ ।।[०४]

**व्याधः**

मन्वानस्तं मृगं चाहं सम्प्राप्तः सहसा प्रभो।
अपश्यं तमृषिं विद्धं शरेणानतपर्वणा ।। २९ ।।[०५]

---

(०१)(२) मृगयानिर्गतो; (३) नृप; यौध (for योध); (४) चैव सं; चाभिसं (for च सुसं); (५) न्यहन्; ह्यघ्नं; भ्यघन्न् (for भ्यहन्); (६) स (for सु); आश्रमान्प्रति; राजसत्तमः .
(०२) (१) अथाक्षिप्तः; ततः क्षिप्तः अति क्षिप्ताः शरा घोराः .
(०३)(३) तु (for च); ऋषि (for मुनि); (४) नत (for आनत);
(०४) (२) प्रतिवादयन्; अभिनिनाद; (३) नापराधा कश्चित.
(०५)(२) सम्प्राप्तः प्रभो; प्रेण विभो; मुनेः (for मुनिम्); (३) अहं (for ऋषिं); विद्धन् (for विद्धं); (४)

तमुग्रतपसं विप्रं निष्टनन्तं महीतले।(०१)
**अकार्यकरणाच्चापि भृशं मे व्यथितं मनः ।। ३० ।।(०२)**

**अजानता कृतमिदं मयेत्यहमथाब्रुवम् ।। ३१ ।।(०३)**

**क्षन्तुमर्हसि मे सर्वमिति चोक्तो मया मुनिः ।(०४)**

**ततः प्रत्यब्रवीद्वाक्यमृषिर्मां क्रोधमूर्छितः ।****
**मुनिः**
**व्याधस्त्वं भविता क्रूर शूद्रयोनाविति द्विज ।। ३२ ।।**

**व्याधः**

एवं शप्तोऽहमृषिणा तदा द्विजवरोत्तम।**
**अभिप्रसादयमृषिं गिरा त्राहीति मां तदा ।। ३३ ।।(०५)**

**अजानता मयाकार्यमिदमद्य कृतं मुने।****
**क्षन्तुमर्हसि तत्सर्वं प्रसीद भगवन्निति ।। ३४ ।।(०६)**

**ऋषिः**

**नान्यथा भविता शाप एवमेतदसंशयम्।****

---

नत (for आनत); शरेण निशितेन वै;
(०१)(१) वृद्धं; विद्धं; दीप्तं (for विप्रं); (२) विचेष्टन्तं; तिष्ठन्तं (नु); धश्लःसन्तं; निपतन्तं; वेष्टमानं (for निष्ठन्तं);
(०२) (१) कारणाच्चापि; कारिणश्चापि चैव (for चापि); (२) प्र (for मे);
(०३) (१) मयात्यर्थं; उपेत्याहम् (for मयेत्यथ); वमम् (for अथ); अथ (for तम्); अकार्यं च मयाद्य वै;
(०४)(१) विप्र; सर्वम् (for ब्रह्मन्); (२) प्रोक्तो (for चो); महामुनिः
(१) स ततः प्रब्रवीद्वाक्यम्; (२) मुनिं (for ऋषिं); (३) कूरः (४) इति द्विजः;
(०५)(१) अ-अर्धद्वयं नास्ति; ख-घ-अकार्यं तु मयाऽद्य वै;, हि ऋषिणा; महर्षिणा (for०ऽहर्म षिणा). (२) ततो; तथा (forतदा). द्विजवारात्मज. (३) अतिप्रं; अत्यप्रं; अभ्यप्रं अथ प्रं; अहं प्रं (for आभिप्रं). (४) वाचा (for गिरा).रन्द; रन्द (for रन्दमू). गिरा त्राहीति मां तदा.
(०६) (१) कृतमिदम् (for मयाकार्यम्). (२) कृतम् (forइदम्). मया; महा (forकृतं). पुनः (forमुने) अकार्यं तु मयाद्य वै. (३) (अ)तस्तन्मे; मे ब्रह्मन् (forतत्सर्वं). (४) इह(forइति).

**आनृशंस्यात्त्वहं किञ्चित्कर्तानुग्रहमद्य ते** ।। ३५ ।।[०१]

शूद्रयोन्यां वर्तमानो धर्मज्ञो हि भविष्यसि।**
**मातापित्रोश्च शुश्रूषां करिष्यसि न संशयः** ।। ३६ ।।[०२]

तया शुश्रूषया सिद्धिं महत्त्वं समवाप्स्यसि।
**जातिस्मरश्च भविता स्वर्गं चैव गमिष्यसि** ।। ३७ ।।

भूत्वा च धार्मिको व्याधः पितृशुश्रूषणे रतः ।
**शापक्षये तु निर्वृत्ते भवितासि पुनर्द्विजः** ।। ३८ ।।[०३]

***अधिकपाठः**
This Stanga is Interchanged in TRK after 37

**व्याधः**

एवं शप्तः पुरा तेन ऋषिणास्म्युग्रतेजसा।
**प्रसादश्च कृतस्तेन ममैव द्विपदां वर** ।। ३९ ।।[०४]

शरं चोद्धृतवानस्मि तस्य वै द्विजसत्तम।**
**आश्रमं च मया नीतो न च प्राणैर्व्ययुज्यत** ।। ४० ।।[०५]

एतत्ते सर्वमाख्यातं यथा मम पुराभवत्।**
**अभितश्चापि गन्तव्यं मया स्वर्गं द्विजोत्तम** ।। ४१ ।।[०६]

---

(०१) (२) ह्येवम् (for एवम्). न संशयः (forअसंशयम्). (३) त्वहं (forअहं). कश्चित्; ब्रूयात् (for किं०). (४) दाता (forकर्ता), एव (forअद्य).वै (forते).
(०२) (१) ०योन्यां (for०योनौ). (२) भवितासि वै; हि भविष्यसि (भविता ह्यसि). (३) हि(for च).
(०३)(१) तथा; तयोः (for तया). (२) महत्वं (forतीं).त्वमवाप्स्यसि; त्वं गमिष्यसि; त्वं समाप्स्यसि (for समवां). (३) ०क्षयेथ; ०क्षये च; ०क्षये तु (for०क्षयान्ते). (४) भविष्यसि; भविता च (forतासि).
(०४) व्याध उ०. (२) द्विजेन; मुनिना (for ऋषिणा). (अ)भ्युग्र०; (अ)भ्युग्र०; (आ)दित्य० (for(अ)स्म्युग्र०). (४) ममैष; ०व (for०वं) वदतां (forद्विपदां). वर.
(०५)(२) वै (for(ए)व).शरं चैव द्विजोत्तम. (४) मम (forन च).वियुज्यतः; व्यजह्यत; वियुज्यते; व्यमुच्य (० ह्य)त. न प्राणैर्व्यवयुज्यत.
(०६)(२) पुरातनं (forपुराभवत्). (३) अमितं ह्यपि; अहितेनापि; अहितश्चापि. गन्तव्यो. (४) मया (यथा)

**ब्राह्मणः**

**एवमेतानि पुरुषा दुःखानि च सुखानि च ।**
**आप्नुवन्ति महाबुद्धे नोत्कण्ठां कर्तुमर्हसि** ॥ ४२ ॥(०१)

दुष्करं हि कृतं कर्म जानता जातिमात्मनः ॥ ४३ ॥ (02)

***अधिकपाठः**

**लोकवृत्तान्ततत्त्वज्ञ नित्यं धर्मपरायण ।**(०३)

कर्मदोषश्च वै विद्वन्नात्मजातिकृतेन ते।
**कश्चित्कालमुष्यतां वै ततोऽसि भविता द्विजः ****
**साम्प्रतं च मतो मेऽसि ब्राह्मणो नात्र संशयः** ॥ ४४ ॥(०४)

ब्राह्मणः पतनीयेषु वर्तमानो विकर्मसु।**
**दाम्भिको दुष्कृतः प्रायः शूद्रेण सदृशो भवेत्** ॥ ४५ ॥(०५)

यस्तु शूद्रो दमे सत्ये धर्मे च सततोत्थितः ।**
**तं ब्राह्मणमहं मन्ये वृत्तेन हि भवेद्विजः** ॥ ४६ ॥(०६)

**कर्मदोषेण विषमां गतिमाप्नोति दारुणाम्।****
**क्षीणदोषमहं मन्ये चाभितस्त्वां नरोत्तम** ॥ ४७ ॥(०७)

---

स्वर्गो; यथा स्वर्गं. न संशयः(forद्विजों).
(०१)(१) धर्माणि (forदुःस्वानि). (२) आप्नुं (forप्राप्नु).यथाबुद्धेः; महायुद्धे. (३) गतुम् (for कर्तुम्).
(०२) (१) दुष्कृतं; दुष्त्वं (forदुष्करं). कर्म (forतात). (२) गान्ता जानाति यन्मम.
(०३)(०धर्मज्ञ (forतत्त्वज्ञ) ० परायणः)
(०४) (१) कर्म० दोषैश्च; धर्मदोषश्च; कर्मदोषेण; दोंषाच्च तु ब्रह्मन् (forविद्वन्). (२) नाग्त्रा (forआत्म). ०कृतानि च(for कृतेन वै). ते (forवै) . (३) क्वचित्कालं; किश्चित्कालं; कश्चित्कालो. ऋषे तात; उपेतं वै; उष्यतां वै ते; च; हि(for वै). (४) गोत्रो० (forततो०). द्विज.त्वं; न; हि (forच).
(०५) (१) क-घ-सत्त्वन्यदीयेषु, (३) डाम्भिको. दुष्कृतः पापः; तंप्राज्ञः.
(०६)(१/२) सत्ये धर्मे.समवस्थितः (forसततों). (३) अहं ब्राह्मणं (४) वृत्तिर्न; जात्या न (for वृत्तेन); च (for हि). भविता (for हि भवेद्).
(०७)(१)क-घ-धर्म, धर्मं (forकर्मं). (२) प्राप्नोति (forआप्नोति). (४) चादित०; चाहितं; (for भिन्तं).

कर्तुमर्हसि नोत्कण्ठां त्वद्विधा ह्यविषादिनः ।**
लोकवृत्तानुवृत्तज्ञा नित्यं धर्मपरायणाः ।। ४८ ।।[०१]

**व्याधः**

प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः ।**
एतद्विज्ञानसामर्थ्यं न बालैः समतामियात् ।। ४९ ।।[०२]

अनिष्टसम्प्रयोगाच्च विप्रयोगात्प्रियस्य च ।**
मनुष्या मानसैर्दुःखैर्युज्यन्ते चाल्पबुद्धयः ।। ५० ।।[०३]

गुणैर्भूतानि युज्यन्ते वियुज्यन्ते तथैव च ।**
सर्वाणि नैतदेकस्य शोकस्थानं हि विद्यते ।। ५१ ।।[०४]

अनिष्टं चान्वितं पश्यंस्तथा क्षिप्रं विरज्यते।
ततश्च प्रतिकुर्वन्ति यदि पश्यन्त्युपक्रमात् ।। ५२ ।। [०५]

शोचतो न भवेत्किञ्चित्केवलं परितप्यते ।। ५३ ।। (06)

परित्यजन्ति ये दुःखं सुखं वाप्युभयं नराः ।**

---

त्वं(for त्वां).

(०१)(२) चां (ज्ञां).ज्ञान्तिनः (forषान्दिनः). (३) ०वृत्तान्ततस्वज्ञा; ०वृत्तानुवृत्तज्ञा; ०वृत्तान्तवृत्तज्ञो; ०वृन्तान्त० विज्ज्ञानी; (४) नित्य .०परत्वणः.

(०२)(१) चान्यैः; बाल०; वल्लः (forवालै) सततं (forसमतां) इयात् (forव्रजेत्).

(०३)(३) मनुष्या (forमानुषा). मानुषै० (forमानसै०); (४) मुह्यन्ते (forयुज्यन्ते). येल्प; ह्यल्प०; चाल्प०; स्वल्प०; बह० (forअल्पं).

(०४)(१) गुणे; गणैर् (forगुणैर्). (३) सर्वेषां (forसर्वाणि) चैतदे०; सर्वदै० (forनैतदे०). एवास्य (forएकस्य). (४) भविष्यति; न विद्यते (forहि वि०).

(०५) (१) अनिष्टं चान्वितं.पुण्यं; पश्य(for पश्यन्). (२) विराजते; विमृज्यं(विरं). (३) ०कर्षन्ति (for०कुर्वन्ति०). (४) त (य).था कुर्वन्ति (for यदि पश्यन्ति).(उ) पक्रमात् (०न्).(अ)नुक्रमं (उ)वपक्रमम् ब्राह्मण उ०;

(०६)(१) न शोचते; शोचतो न. शोकेन न. (२)ख-शोकस्थानं हि विद्यते, क-घ-सकौख्यं वाऽप्युभयं नराः, प्रतितप्यते; परितप्यसे.

त एव सुखमेधन्ते ज्ञानतृप्ता मनीषिणः ।(०१)
असन्तोषपरा मूढाः सन्तोषं यान्ति पण्डिताः ।। ५४ ।।

असन्तोषस्य नास्त्यन्तस्तुष्टिस्तु परमं सुखम्।**
न शोचन्ति गताध्वानः पश्यन्तः परमां गतिम् ।। ५५ ।।(०२)

लक्षालङ्कारः- न शोचन्ति कगताध्वान इत्यत्र अध्वानं मार्गं गताः गताध्वानः ।।

न विषादे मनः कार्यं विषादो विषमुत्तमम्।**
मारयत्यकृतप्रज्ञं बालं क्रुद्ध इवोरगः ।। ५६ ।।

यं विषादोऽभिभवति विक्रमे समुपस्थिते।**
तेजसा तस्य हीनस्य पुरुषार्थो न विद्यते ।। ५७ ।।(०३)

अवश्यं क्रियमाणस्य कर्मणो दृश्यते फलम्।**
न हि निर्वेदमागम्य किञ्चित्प्राप्नोति शोभनम् ।। ५८ ।।(०४)

लक्षालङ्कारः- न हि निर्वेदमागम्य इत्यत्र निर्वेदं सत्कर्मण्येव वैराग्यम् ।

अथाप्युपायं पश्येत दुःखस्य परिमोक्षणे।**
अशोचं नारभेतैव युक्तश्चाव्यसनी भवेत् ।। ५९ ।।(०५)

लक्षालङ्कारः- अशौचं नारभेत इत्यत्र अशौचं मांसं भक्षयसि चेत्, त्वां न हन्मीति व्याधेनोक्ते सति स्वजीवनाशया तदशौचं मांसभक्षणं नारभेतेत्यर्थः ।

भूतेष्वभावं सञ्चिन्त्य ये तु बुद्धेः परं गताः ।**

---

(०१) (१) मे (for ये). (२) वाप्युभये; चाप्युभयं; वानन्तरं. (३) त एवं दुःखमेधन्ते.

(०२) (३) (अं)तं(for अन्तस्). (४) तुष्टे० (forतुष्टि०).हि; च (for तु). (५) गताध्वानं; ज्ञानवृद्धाः (६) पश्यन्ते; पश्यन्तः; पश्यन्ति.

(०३)(१) यद्(for यं). (ऽ)ति०; हि) ऽभि). (२) विक्रमे; दुःखे तु; क्रमे तु (forविषमे).

(०४) (१) अवशं. (२) विद्यं (for दृश्यं). (३) आपन्नः; आगत्य; आपन्नं(for आगम्य).

(०५)(१) यथा (forअथ). (अ)भ्यु० (for (अ)प्सु०) (२) दुःखेन परिमोष्यते. (३) ०भेत्तं वै०; भेतैवं; ०भेच्चैव(०वं); ० भेतैनं (for०भेतैव) (४) मुक्त० (for युक्त०).

न शोचन्ति कृतप्रज्ञाः पश्यन्तः परमां गतिम् ।। ६० ।।[०१]

लक्षालङ्कारः- भूतेष्वभावम् इत्यत्र अभावं विनाशम् ।

न शोचामि च वै विद्वन्कालाकाङ्क्षी स्थितो ह्यहम्।**
एतैर्निदर्शनैर्ब्रह्मन्नावसीदामि सत्तम ।। ६१ ।।[०२]

**ब्राह्मणः**

**कृतप्रज्ञोऽसि मेधावी बुद्धिर्हि विपुला तव ।**
**नाहं भवन्तं शोचामि ज्ञानतृप्तोऽसि धर्मवित्** ।। ६३ ।।[०३]

**आपृच्छे त्वां स्वस्ति तेऽस्तु धर्मस्त्वां परिरक्षतु।**
**अप्रमादस्तु कर्तव्यो धर्मे धर्मभृतां वर** ।।[०४]

**मार्कण्डेयः**

बाढमित्येव तं व्याधः कृताञ्जलिरुवाच ह ।**
**प्रदक्षिणमथो कृत्वा प्रस्थितो द्विजसत्तमः** ।। ६४ ।।[०५]

स तु गत्वा द्विजः सर्वां शुश्रूषां कृतवांस्तदा।**
**मातापितृभ्यां वृद्धाभ्यां यथान्यायं सुशंसितः** ।। ६५ ।।[०६]

एतत्ते सर्वमाख्यातं निखिलेन युधिष्ठिर**

(०१)(१) भूतेषु भावं)भूते स्वभावं); भूतेष्टभावं.

(०२)(१)व्याध उ० (व्याध). रमे; न मे (for च वै). विप्र (for विद्वन्) न च शोच्याम्यहं (०मि वै) विद्वन्. (२) कालकाङ्क्षी. (अ)स्मि (forहि). न. (३) न सीदामि द्विजोत्तम.

(०३)(१) कृत०प्रज्ञस्य; प्रञ्ज्ञश्च.मेधाविन्. (२) हि (for च). (३) जानामि (forशोचामि). पापान्निवृत्तश्च सदा. (४) ज्ञानतुष्टों; दृंष्टों; वृन्द्धों; अज्ञानाप्तों.धर्मतः (forविन्त्).

(०४) (१) आपृच्छेद्वा.त्वा (forत्वां). (१) त्वां (forत्वा). अभिं (forपरिं). (३) न प्रमादं च (forतु).

(०५) (१) विप्रं (forव्याधः). (१) अभाषत(for उवाच ह). (३) तु तं (forअथो). प्रदक्षिणीकृतस्तेन. (१) प्रस्थितं. द्विजसत्तमं; ०म.

(०६)(१) सर्व०; सवा; तेषां; सर्वं (forसर्वां). गत्वा गृहं द्विजश्रेष्ठः. (२) शुमृषाः सदा; तु सः (forतदा). (३) अन्धाभ्यां; धर्माभ्यां; धर्मात्मा(for वृद्धां). (४) यथान्याय्यं. महामतिः; सुशंसितः; सुसंयतः; स्थितः; श्रिन्तः; हिन्तः; समाहितः. सर्वैरप्यभिनन्दितः.

**पृष्टवानसि यं तात धर्मं धर्मभृतां वर ।। ६६ ।।(०१)**

**पतिव्रताया माहात्म्यं ब्राह्मणस्य च सत्तम।****
**मातापित्रोश्च शुश्रूषा धर्मव्याधेन कीर्तिता ।। ६७ ।।(०२)**

**युधिष्ठिरः**

अत्यद्भुतमिदं ब्रह्मन्धर्माख्यानमनुत्तमम्।**
**सर्वधर्मविदां श्रेष्ठ कथितं मुनिसत्तम ।। ६८ ।।(०३)**

सुखश्रव्यतया विद्वन्मुहूर्त इव मे गतः ।**
न हि तृप्तोऽस्मि भगवन्शृण्वानो धर्ममुत्तमम् ।। ६९ ।।(०४)

**अस्मिन् पर्वणि १७८अध्याये ६९श्लोकाः सन्ति**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि ब्राह्मणव्याधसंवादे अष्टसप्तत्यधिकशततमोऽध्यायः ।। १७८ ।।**

## 03- 04 - 179Adhyaya

# १७९. एकोनाशीत्यधिकशततमो अध्यायः ।

**१७९ मार्कण्डेयेन युधिष्ठिरं प्रत्याङ्गिरसोपास्यानकथनारम्भः ।। १ ।। अङ्गिरसः पुत्रस्य वृहस्पतेर्देवैरङ्गिरसो वचनाद्गुरुत्वेन स्वीकरणम् ।। २ ।। मार्कन्डेयेनाग्नीनामुत्पत्त्यादि कथनम् ।। ३ ।। अग्नेरङ्गिरसः स्वप्रथमपुत्रत्वेनाङ्गीकारः अङ्गिरसो बृहस्पतेरुत्पत्तिश्च**

---

(०१)(३) यत् (forयं). तावद् (forतात). (४) सर्व(for धर्म) वरः (forवर).

(०२)(३) ०पितृभ्यां) क्य०पित्रोश्च) तु (for च). (४) धर्म०व्याधेन (०धस्य). कीर्तिता.

(०३)(२) धर्मज्ञानम् (forधर्माख्यानम्).धर्मव्याधेन भार्गव; धर्ममाख्यानमुत्तमं. (३) ०विदां (for ०भृतां). (४) मुनिसत्तम; ते द्विजोत्तम.

(०४)(१) सुखः (०खं) श्राव्यतया)व्यं त्वया). ब्रह्मन्; विप्र (for विद्वन्). (२) मुहूर्त इव मे गतः.(४) ख-मार्कण्डेयः- (ृणोति य इमं नित्यं संवादं व्याधविप्रयोः । इह कीर्तिं परां प्राप्य गच्छेत् स परमां गतिम् ।।,

**वैशम्पायनः**

श्रुत्वेमां धर्मसंयुक्तां धर्मराजः कथां शुभाम्।**
**पुनः पप्रच्छ तमृषिं मार्कण्डेयमिदं तदा** ।। १ ।।[०१]

**युधिष्ठिरः**

कथमग्निर्वनं यातः कथं चाप्यङ्गिराः पुरा।**
**नष्टेऽग्नौ हव्यमवहदग्निर्भूत्वा महाद्युतिः** ।। २ ।।[०२]

अग्निर्यदा त्वेक एव बहुत्वं चास्य कर्मसु।**
**दृश्यते भगवन्सर्वमेतदिच्छामि वेदितुम्** ।। ३ ।।[०३]

कुमारश्च यथोत्पन्नो यथा चाग्नेः सुतो भवेत्(ऽभवत)।**
**यथा रुद्राच्च सम्भूतो गङ्गायां कृत्तिकासु च** ।। ४ ।।[०४]

एतदिच्छाम्यहं त्वत्तः श्रोतुं भार्गवसत्तम।**
**कौतूहलसमाविष्टो याथातथ्यं महामुने** ।। ५ ।।[०५]

*अधिकपाठः

**वक्तुमर्हसि मे ब्रह्मन्नितिहासमिमं शुभम् ।***

**मार्कण्डेयः**

अत्राप्युदाहरन्तीममितिहासं पुरातनम्।**
**यथा क्रुद्धो हुतवहस्तपस्तप्तुं वनं गतः** ।। ६ ।।

**यथा च भगवानग्निः स्वयमेवाङ्गिराऽभवत्।****

---

(०१) (२) शुभां कथां (१) यशस्विनं; इदं तदा (for तपस्विनम्);,

(०२) (२) च वा)क्य चा); तथा (for पुरा); (४) द्युतिः; मुनिः (for नृषिः);,

(०३)(१) यथा (for यदा); एक; चैक (for त्वेकक); अग्निर्यदा हि चैवैको (३) त्वत्त (for सर्वम्);,

(०४)(२) वा (for चा); (३) तथा (for यथा) (४) कृत्तिकासुतः (for सु च);

(०५) (१/२ त्वत्त श्रोतुं सत्तम (for नन्दन); (३ कौतूहलं सम्प्रविष्टो; (१) या (य) थातथ्यान्; याथा तथ्यं; य(या)थातत्वं.

सन्तापयंश्च प्रभया नाशयंस्तिमिराणि च ।। ७ ।।[०१]

*अधिकपाठः

पुराङ्गिरा महाबाहो चचार तप उत्तमम्।*[०२]

आश्रमस्थो महाभागो हव्यवाहं विशेषयत्(न)।**
तथा स भूत्वा तु तदा जगत्सर्वं व्यकाशयत् ।। ८ ।।[०३]

तपश्चरंस्तु हुतभुक् सन्तप्तस्तस्य तेजसा।**
भृशं ग्लानश्च तेजस्वी न च किञ्चित्प्रजज्ञिवान्।[०४]
अथ सञ्चिन्तयामास भगवान्हव्यवाहनः ।। ९ ।।

अन्योऽग्निरिह लोकानां ब्रह्मणा सम्प्रकल्पितः ।**
अग्नित्वं विप्रणष्टं हि तप्यमानस्य मे तपः ।। १० ।।[०५]

कथमग्निः पुनरहं भवेयमिति चिन्त्य सः ।**
अपश्यदग्निवल्लोकांस्तापयन्तं महामुनिम् ।। ११ ।।[०६]

सोपासर्पच्छनैर्भीतस्तमुवाच तदाङ्गिराः ।। १२ ।।

अङ्गिराः

शीघ्रमेव भवस्वाग्निस्त्वं पुनर्लोकभावनः ।**

---

(०१)(१) तथा च; यथोक्तो; यथा हि)क्य यथा च). (३) च)क्य स्व). (४) तिमिरावलिं (for राणि च).
(०२) (व्रतम् (for नप).)
(०३)(१) आश्रमस्थं; बाहो (for ०भातो); (२) विशेषयत् (for ०यन्); (३) यथा; तदा; यदा (for तथा); भूत्वा तु स; तु भूत्वा स; अग्नि भूत्वा तु (for स भूत्वा तु); तथा भूत्वा तथा चाग्निर्. (४) व्यकाशयत् (यन्); (for प्रका);
(०४)(१) तु; स (for च); तपश्चरन्हुतवहः (२) सप्तार्चिशू (for सतप्तस् ); च सु; चस्व (for तस्य); (३) कृशो (for भृशं); लीनस्तु; सानश्च (for ग्लान); (४) च (for स); न किञ्चित्प्रतिजज्ञिवान्
(०५) (३) कोन्यो (for अन्यो); इव (for इह); (४) ब्राह्मणः सम्प्रकल्पितः; कीर्तितः (५) प्रविनष्टं; विप्रणष्टं. (६) ते (for मे); तेजसा (for मे तपः);
(०६) (२) चितयन् (for चिन्त्य); (३) सोपश्य० (for अपश्य);

**विज्ञातश्चासि लोकेषु त्रिषु संस्थानचारिषु ।। १३ ।।**[०१]

त्वमग्निः प्रथमं सृष्टो ब्रह्मणा तिमिरापहः ।**
**स्वस्थानं प्रतिपद्यस्व शीघ्रमेव तमोनुद् ।। १४ ।।**[०२]

**अग्निः**

**नष्टकीर्तिरिह लोके भवान्जातो हुताशनः ।**
**भवन्तमेव ज्ञास्यन्ति पावकं न तु मां जनाः ।। १५ ।।**

निक्षिपाम्यहमग्नित्वं त्वमग्निः प्रथमो भव।**
**भविष्यामि द्वितीयोऽहं प्राजापत्यक एव च ।। १६ ।।**[०३]

**अङ्गिराः**

कुरु पुण्यं प्रजास्वर्ग्यं भवाग्निस्तिमिरापहः ।**
**मां च देव कुरुष्वाग्ने प्रथमं पुत्रमञ्जसा ।। १७ ।।**[०४]

**मार्कण्डेयः**

तच्छ्रुत्वाङ्गिरसो वाक्यं जातवेदास्तथाकरोत्।**
**राजन्बृहस्पतिर्नाम तस्याप्यङ्गिरसः सुतः ।। १८ ।।**[०५]

ज्ञात्वा प्रथमजं तं तु वह्नेराङ्गिरसं सुतम्।**

---

(०१)(१) सोपसर्पत्; सोपश्यत ततो; तु तं; क्षणे (for शनैद्); (२) ततो (for तदा); (४) भावन; (५) अपि (for असि); (६) स (for सं); स्थानुचारिषु; सस्थाणु; संस्थाणु स्थावर; सस्थास्नु०. त्रिसं स्थानप्रचारिषु; संस्थानचारि,

(०२)(१/२) अग्निः (for अग्ने); प्रथमः ब्रह्मणा प्रथमं (for मः); तिमिरापहः (३) स्वं स्थानं; संस्थानं; (४) तमोनुदः.

(०३) (१) विक्षेप्प्या (for निक्षिपा); (४) पत्याग्निरेव च; ०पत्यस्तथैव च; ०पत्यसू (०पत्ये); तथैकतः.

(०४)(१)अ-प्रजस्वाम्र्य; क-प्रजावत्वम्;, ख-व्रज स्वर्ग्रं, प्रजास्वग्रयं; सर्ग०; स्वर्गं; सु त्वं; व्रजस्थाय्यं.
(२) अग्ने (for अग्निम्); पह (३) देहं; देवं (for देव). (४) ओजसा (for अञ्जसा).

(०५)(२) तदा (for तथा); (४) तया (for तस्या).

उपेत्य देवाः पप्रच्छुः कारणं तत्र भारत ।। १९ ।।[(०१)]

स तु पृष्टस्तदा देवैस्ततः कारणमब्रवीत्।**
प्रत्यगृह्णंस्तु देवाश्च तद्वचोऽङिगरसस्तदा ।। २० ।।[(०२)]

तत्र नानाविधानग्नीन्प्रवक्ष्यामि महाप्रभान्।**
कर्मभिर्बहुभिः ख्यातान्नानार्थान्ब्राह्मणेष्विह ।। २१ ।।[(०३)]

**मार्कण्डेयः**

**ब्रह्मणो यस्तृतीयस्तु पुत्रः कुरुकुलोद्वह ।**
तस्याभवत्सुभा भार्या प्रजास्तस्यां च मे शृणु ।। २२ ।।[(०४)]

लक्षालङ्कारः- तस्यापवसुता भार्या इत्यभ आपवः वसिष्ठः ।

बृहत्कीर्तिर्बृहज्ज्योतिर्बृहद्ब्रह्मा बृहन्मनाः ।**
बृहन्मन्त्रो बृहद्भासस्तथा राजन्बृहस्पतिः ।। २३ ।।[(०५)]

प्रजासु तासु सर्वासु रूपेणाप्रतिमाभवत्।**
देवी भानुसती नाम प्रथमाङ्गिरसः सुता ।। २४ ।।[(०६)]

भूतानामेव सर्वेषां यस्यां रागस्तदाभवत्।**

---

(०१) (१) श्रुत्वा (for ज्ञात्वा); तु प्रथमं(for प्रथमजं).पुत्रं(for तं तु). (२) वह्निम् (for वह्नेद्); अङ्गिरसः(for आङ्गिरसं).

(०२)(१) ततो; तथा (for तदा); (२) तं तं (for ततः); (३) प्रतिगृह्य तु; प्रत्यगृह्णन्त. (४) तद्विधा; तद्वाचा (तद्वचो); गताः; तथा (for तदा); सुतमङ्गिरसं तदा.

(०३)(१) तत्र (for अत्र); (४) नानार्थान् (for नानात्वं); इति; अपि (for इह);

(०४)(१) ब्राह्मणो (for ब्र). (३) तस्त्वभवत् शुभा(सुता) भार्याः तस्यापि च शुभा भार्या; तस्यापि वसुदा (जा; भा; ० धा) भार्या; तस्यैवाथाभवन्भार्याः; तस्याभूद्वसुधा भार्या. सुष्ठु भातीति सुभा । शुभा इति पाठेऽपि सैव ग्राह्या । (४) तस्यां च मे; तस्यामिमे (for तस्यापि मे)

(०५)(१) प्राग्ज्योतिर्वै (for बृहज्ज्योतिद्). ज्जयोतिद् त्कीर्तिद्. (२) बृहत्तेजा; ब्रह्मन्त्रह्मा (for बृहद्ब्रह्मा). (३) ०त्पुत्रो (for न्मन्त्रो). ०द्भानुस्; ०द्भासा (for द्भासस् ).

(०६)(२) प्रतिमो; नुपमो (for प्रतिमा).(३) क-अर्धपछकं नास्ति ; घ-अर्धचतुष्टयं नास्ति,

**रागाद्रागेति यामाहुर्द्वितीयाङ्गिरसः सुता ।। २५ ।।**(०१)

**यां कपर्दिसुतामाहुर्दृश्यादृश्येति देहिनः ।****
**तनुत्वात्सा सिनीवाली तृतीयाङ्गिरसः सुता ।। २६ ।।**(०२)

**लक्षालङ्कारः- यां कपर्दीसुताम् इत्यभरव कपर्दीनाम्नी अङ्गिरसः पत्नी ।**

**यां तु दृष्ट्वा भगवतीं जनः कुहुकुहायते।****
**एकानंशेति तामाहुः कुहूम् अङ्गिरसः सुताम् ।। २७ ।।**(०३)

**पश्यत्यर्चिष्मती भाभिर्हविर्भिश्च हविष्मती।****
**षष्ठीमङ्गिरसः कन्यां पुण्यामाहुः महिष्मतीम् ।। २८ ।।**(०४)

**महामखेष्वाङ्गिरसी दीप्तिमत्सु महामते।****
**महामती इति विख्याता सप्तमी कथ्यते सुता ।। २९ ।।**(०५)

**अधिक फाठः**

This Stanga is Interchanged in TRK after 26

**मार्कण्डेयः**

**बृहस्पतेः चान्द्रमसी भार्याऽऽसीद्या यशस्विनी।****
**अग्नीन्साजनयत्पुण्यान्षडेकां चापि पुत्रिकाम् ।। ३० ।।**(०६)

---

(०१) (१) इह (for एव). (२) यस्या; येषां (for यस्यां). तथाभवत्; प्रवर्तते; सदाभवत. (३) रागो(को) द्रेकेति; रागाद्राकेति. प्राहद् (for आहर्). (४) सुतां (for सुता).

(०२) (१) कामन्दि०; कामर्धि ; कामं हि; कामदाः; कपर्दी; यु यां कर्दमीति वै प्राहुर्, (३) तत्रत्वसौ; तज्जवाचां. शिनीवाली.

(०३) (२) कुहकुहा. (३) एकेनांशेन; एका (० ता) नगे (ते)ति; एकदैवेति; एकायनेति; एकानेकेति (for एकानंशेति). ताम् (for याम्). (४) चतुर्थीमङ्गिरःसुतां; चतुर्थ्यङ्गिरसः सुता.

(०४) (१) पश्यन्ती; चतुर्थी; पश्चसी (for पश्यती). भाति; ताभिर्; नाम्ना (for भाभिर्). भाभिः ० ष्मती. (२) तु (for च). हविष्मद्भिद् (for हविर्भिश्च). हविष्मतीं. दीप्तादीप्तिश्च पश्चमी. (३) चाङ्गि (for अङ्गि). पश्चाङ्गिरसकन्यासु. (४) महि० (for हवि).

(०५) (१) आविरासीद्; अरमत (for आङ्गिरसी). (२) महामते (ते०); महीपते; महाद्युतिः; महायति (for मती). (३) तु (for (इ)ति). विज्ञेया (for विख्याता). (४) तु सा (for सुता).

(०६) (१) ब्रह्मक्षोतेशू; महीपतेशू (for बृहस्पते); चन्द्रमसो (for चान्द्रमसी); (२) या बभूव (for भार्याभूद्या);

आहुतिष्वेव यस्याग्नेर्हविषाद्यं विधीयते।**
**सोऽग्निर्बृहस्पतेः पुत्रः शंयुः नाम महाव्रतः ।। ३१ ।।**(०१)

चातुर्मास्येषु यस्येष्टमश्वमेधेऽग्रजः प्रभुः ।**
**दीप्तो ज्वालैरनेकाभैरग्निरेकोऽथ वीर्यवान् ।। ३२ ।।**(०२)

शंयोरप्रतिमा भार्या सत्या सत्याथ धर्मजा।**
**अग्निस्तस्य सुतो दीप्तस्तिस्रः कन्याश्च सुव्रताः ।। ३३ ।।**(०३)

प्रथमेनाज्यभागेन पूज्यते योऽग्निरध्वरे।**
**अग्निस्तस्य भरद्वाजः प्रथमः पुत्र उच्यते ।। ३४ ।।**(०४)

पौर्णमासेषु सर्वेषु हविषाऽऽज्यं स्रुवोद्यतम्।**
**भरतो नामतः सोऽग्निर्द्वितीयः शंयुतः सुतः ।। ३५ ।।** (०५)

तिस्रः कन्या भवन्त्यन्या यासां स भरतः पतिः ।**
**भरतस्तु सुतस्तस्य भरत्येका च पुत्रिका ।। ३६ ।।**(०६)

---

आसीद्या; याभूद्; भूत्वा; चाभूद् (for अभूद्या); (३) अजन; चाजन (for साजन); पुत्रान् (for पुण्यान्);
(०१)(१) आहुतेषु; सुहुतेषु; अहुतेपु; अतिथिषु यस्याग्रे; (२) हविष्वाज्यं; ०षाद्य; राज्यं; ष्याज्ये (for षाज्यं); (३) अग्निर् (for सोग्निर); (४) शव्युट् (for शंयुट्); प्रभुः; यशाः; व्रतः (for प्रभः);
(०२) (१) इष्टिर्; इष्टम् (for इष्टाम्); (२)क-यस्येष्ट्यौ श्वमेधेषु यः पशुः;, ख-यस्येष्टमश्वमेधाग्रभागभुत्, घ-यस्येष्ट्याअश्वमेधेषु यः पशुः, प्यजः(for ग्रजः); प्रभुः (for पशुः); अश्वमेधेषु यः पशुः; मेध इति श्रुतः; मेधाग्रभागभूत्; (३) दीप्ता) सो); र्चिर्भिद्; दीप्तिरग्निद्; दीप्तिज्वा (जा); तलैर्; दीप्तो ज्ञानैर् दीप्तपवालैद् अनीकाभैट्; अनेकारैद्; अनेकाभिः; अनेकाग्रैद्; अनेकार्हैद्प्र (४) अग्निरीशोथ; ०रषौथ; भेतेषोथ; ०वेवोथ; ०ष्टोमोथ; अग्नीषोमोथ
(०३)(२) सत्या स; सत्याय; सत्याथ; सत्यांश (for सत्याच); धर्मज (३) तस्याः)क्य तस्य); (४) तस्याः (for तिस्रः); सुप्रभाः (for व्रताः);
(०४)(२) सोग्निद् (for योग्निद्); (३) अग्ने (for अग्नि);
(०५)(१) पौर्णमासेषु. (२) हविष्वाज्यं; हविराज्यं. स्रुवोद्यतां; स्रुवोच्यतां; श्रुवच्युतां; श्रुवोद्यतं; श्रुचो०; प्रचोदितं; स्रुचोद्यहं हविष्वाज्येषु चोद्यतं. (३) तो नाम तस्याग्नेर् (ग्निर्). (४) शंयवः; संयुतः; संयतः; शंयुजः.
(०६) (१) अभवः भरन्ति (for भवन्ति) (३) भारतस्तुः भारति)क्य भरत); (४) भवत्येका; भारत्येका कन्यका (for पुत्रिका);

भरतो भरतस्याग्नेः पावकस्तु प्रजापतेः ।**
**महानत्यर्थमहितस्तथा भरतसत्तम ।। ३७ ।।** (०७)

भरद्वाजस्य भार्या तु वीरा वीरस्य पिण्डदा।**
**प्राहुराज्येन तस्येज्यां सोमस्येव द्विजाः शनैः ।। ३८ ।।**(०८)

हविषा यो द्वितीयेन सोमेन सह युज्यते।**
**रथप्रभू रथध्वानः कुम्भरेताः स उच्यते ।। ३९ ।।**(०९)

सरय्वां जनयत्सिद्धिं भानुं भाभिः समावृणोत्।**
**आग्नेयमानयन्नित्यमाह्वाने ह्येष सूयते ।। ४० ।।**(१०)

यस्तु न च्यवते नित्यं यशसा वर्चसा श्रिया।**
**अग्निर्निश्च्यवनो नाम पृथिवीं स्तौति केवलम् ।। ४१ ।।**(११)

विपाप्मा कलुषैर्मुक्तो विशुद्धश्चार्चिषा ज्वलन्।**
**विपापोऽग्निः सुतस्तस्य सत्यः समयधर्मकृत् ।। ४२ ।।** (१२)

**आक्रोशतां हि भूतानां यः करोति हि निष्कृतिम्।****

(०७)(१) अद्भुतो; भारती; भारतो (ति); (for भरतो); भारतस्य अग्निः (for अपि); अग्रे (for अग्नेः); (२) प्रजायत; यते; पते)क्य पतेः); पावकश्चाप्यजायत; पावकस्यापि जायतः; पावकः समजायत. (३) सहितस्; मभितस् (for महितम्); महानक्रश्चमहिषस्

(०८) (१) भारद्वाजस्य भार्यायां. (२) पुत्रा (for वीरा); वीरस्य पिण्डदा. (३) यस्येष्ट्या; त (य) स्याज्यं; यस्येष्द्वा; यस्येज्यां.

(०९)(३) रथप्रोभो; प्रभु (for प्रभू); रथाध्वानः (रयाध्वान); रथभूतरवाध्वानः (४) रुक्मरेताः; कुम्भरफोः. कथ्यते (for उच्यते);

(१०)(१) शरय्वां. जनयन् (२) सोमं (for भानुं); (३) अज्ञेय (for आग्नेयम्); मानसं; आनयेन्; अनयन् (for आनयन्); मिथ्यम्; मध्यम् (for नित्यम्); (४) आह्वानेष्वेव; ने ह्येष; नेष्वेषु; ने ह्येव; ने एष; मिथ्यो नामैष श्रूयते; सूय (for कथ्य);

(११) (२) तेजसा (for वर्चसा); (३) सोग्निद् (for अग्निर्); निच्यावनो; निस्ववनो; विश्वच्यवो; दश्च्यवनो; न च्यवनो; निच्यवनो (४) पृथिव्यां सोभवत्यभिसेवितः.

(१२)(१) पापात्मा; विपापः (for विपाप्मा); कल्मषै (for कलुषै). (३) विवाप्यो०; निवापो; विपाप्यो; निवापा; विपास्म; विपाको (for विपापो); (४) योज्य; योग्यः समयकर्मकृत्; धर्मकृत्; कर्मणि

**अग्निः स निष्कृतिर्नाम शोभयत्यभिसेविते ।। ४३ ।।[०१]**

**अनुकूजन्ति येनेह वेदनार्ताः स्वयं जनाः ।****
**तस्य पुत्रः स्वनो नाम पावकः स रुजस्करः ।। ४४ ।।[०२]**

**यस्तु विश्वस्य जगतो बुद्धिमाक्रम्य तिष्ठति।****
**तं प्राहुरध्यात्मविदो विश्वजिन्नाम पावकम् ।। ४५ ।।[०३]**

**अन्तराग्निः स्मृतो यस्तु भुक्तं पचति देहिनाम्।****
**स जज्ञे विश्वभुग्नाम सर्वलोकेषु भारत ।। ४६ ।।[०४]**

**ब्रह्मचारी यतात्मा च सततं विपुलव्रतः ।****
**ब्राह्मणाः पूजयन्त्येनं पाकयज्ञेषु पावकम ् ।। ४७ ।।[०५]**

**पवित्रा गोमती नाम नदी यस्याभवत्प्रिया।****
**तस्मिन्कर्माणि सर्वाणि क्रियन्ते धर्मकर्तृभिः ।। ४८ ।।[०६]**

---

(०१) (१) अक्रोशता तु भूतानां; नराणां हि. (२) (इ)ह; (इ)ति; न (for हि); (४) शोध० (for शोभ); (अ)ति (for अभि); ०सेव्यतां; ०षेचितः; सेविते; ०सेवितं; षेचिते.

(०२) (२) वेदनार्थाः; नार्थं. (३) सत्यपुत्रः स्वरो; सुरो; सुनो; सुभो (for स्वनो); (४) समजायत; सुरुचिभास्करः (for स रुज);

(०३) (१)क-द्वादशार्धानि न सन्ति, निष्क्रम्य (for विश्वस्य); (३) प्राहुरध्यात्मविदुषो. (४) विश्वजं (for जिन्);

(०४)(१) अतरग्निः स्मृतो (for शो); तु; वै (for हि). (३) स (सं; यं); जज्ञे. भुञ्जानः; ०जिन्नाम (for भुग् नाम); (४) सर्वलोकेश्वरेश्वरः .

(०५)(१) जितात्मा) क्य य); तु (for च); (२) प्रभः (for व्रतः); (३) ०पूजयतो वै; यते यं. (४) यज्ञेन (for यज्ञेषु);

(०६) (१) ख-घ-नदी, प्रथिता; प्रार्थिता; पतितो; पतिता; पवित्रा; पावको (for प्रथितो); गोमती (for गोपतिर्); (२) भार्या (for यस्या); (३) सर्वाणि कर्माणि (४) धर्मकर्मभिः (सर्वकर्मभिः); धर्मकर्तृभिः; कर्मभिः सदा; धर्मसेतवः

(१) वडवास्यः; वाग्निः वाग्नेः (for मुखः); आपो (for अम्भो); (३) ऊर्ध्वभुग्; बाहू (for भाग्); भुद्धः नाम; दृष्टिश्च (for भाग् नाम); (४) कलिः (for कविः); यः (for सः);

वडवाग्निः पिबत्यम्भो योऽसौ परमदारुणः ।**
ऊर्ध्वभागूर्ध्वभाग्नाम कविः प्राणाशिस्तु यः ।। ४९ ।।

उदग्द्वारं हविर्यस्य गृहे नित्यं प्रदीयते।**
ततः स्विष्टं भवेदाज्यं स्विष्टकृत्परमः स्मृतः ।। ५० ।।(०१)

यः प्रशान्तेषु भूतेषु मन्युर्भवति पावकः ।

क्रुद्धस्य तु रसो जज्ञे मन्युतीव्रा च पुत्रिका।**

स्वाहेति दारुणा क्रूरा सर्वभूतेषु तिष्ठति।(०२)

*अधिकपाठः

मन्युमान्नाम भगवानग्निरेव महाबलः ।

*अधिकपाठः

आरण्यानि तथा ग्राम्यान्यो दहन्सम्प्रकाशते ।

स्वयमुत्पतितः श्रीमान्बृद्धिमान्नाम पावकः ।

**क्रोधस्य तु महातेजा विज्ञेयस्सर्वदेहिषु *।। ५१ ।।**

क्रोधस्य तु रथो जज्ञे मन्यती चास्य पुत्रिका ।
हाहेति दारुणा गुद्धा सर्वभुतेषु तिष्ठति ।। ५२ ।।(०३)

त्रिदिवे यस्य सदृशो नास्ति रूपेण कश्चन।**

---

(०१) (१) उदग्धारं अवीद्; भवीद् (for हविर्); (३) स्विष्टो; तुष्टो; त्विष्टो (for स्विष्टं); भवद् (for भवेद्); ग्राह्यं; ब्रह्मा (for आज्यं); (४) तु सः; ततः (for स्मृतः);

(०२) (१) प्रयातेषु (for प्रशान्त); (२) आवि; प्रादु (for मन्यु);

(०३)(३) क्रुद्धस्य (for क्रोध); च (for तु); रथोः रा (रु) जो; रणे (for रसो); (४) मन्युतीव्रा च (for मन्यती चाथ); मन्यन्ती (for मन्येतां); मन्यन्ते (for मन्यती); वाणि; नाम; वापि; चापि; बाष्प; चास्य (for चाथ); मती चापि सुपुत्रिका; मन्यन्ती चाथ पुत्रिका; (५) हाहेति (for स्वा); क्रुद्धा)क्य क्ररा); (६) देहेषु (for भूतेषु); गच्छ (for तिष्ठ);

अतुलत्वात्कृतो देवैर्नाम्ना कामस्तु पावकः ।। ५३ ।।(०१)

संहर्षाद्धारयन्क्रोधं धन्वी स्रग्वी रथे स्थितः ।**
समरे नाशयेच्छत्रूनमोघो नाम पावकः ।। ५४ ।।(०२)

उक्थो नाम महाभाग त्रिभिरुक्थैरभिष्टुतः ।**
महावाचं त्वजनयत्समाश्वासं हि यं विदुः ।। ५५ ।।(०३)

अस्मिन् पर्वणि १७९अध्याये ५५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि ब्राह्मणमाहात्म्ये एकोनाशीत्यधिकशततमोऽध्यायः ।। १७९।।

# १८०. अशीत्यधिकशततमो अध्यायः ।

१८० मार्कण्डेयेन युधिष्ठिरं प्रत्यग्न्युत्पत्तिकथनम् ।। पाञ्चजन्यनाम्नोऽग्नेः प्राकट्यं तद्वंशविस्तारश्च

**मार्कण्डेयः**

**काश्यपो ह्यथ वासिष्ठः प्राणाश्च प्राणपुत्रकः ।****
अग्निराङ्गिरसश्चैव च्यवनः त्रिषु वर्चकः ।। १ ।।(०४)

---

(०१) (३) अतुलत्वात. (४) नाम देवैस्तु; नाम्ना वेदस्तु) क्य नाम्ना कामस्तु);

(०२) (१) सङ्घर्षाद्; सङ्कर्पाद्; सर्वेषां (for संहर्षाद्); वारयन्; वारयेत्; धारयेत् (for धारयन्); क्रोधान्. (२) सुश्री; (for खड्गी); स्रग्वी (for रथस्थितः); (३) समये (for रे); नाशयज्

(०३)(१) उक्तो; उत्थो; उक्थ्यो ; उक्थैद्; ज्येष्ठो (for उक्थो); नामा महाभागस्. (२) उक्तैर्; उत्थैर्; उक्थ्यैर्. परि (for अभि०); (३) भागं; राजन्; वातं; पार्षं; वर्षे; वर्षं (for वाचं); तु जन; च जन (for त्वजन); (४) साकमश्वं; सकामास्त्वं; सकामस्तं; समाश्वासं; सकामत्वं; सकामं तं; समावास हि तं) तद्); हतं) क्य हि यं);

(०४) (१) कश्यपोप्यथ; कः(का)श्यपाख्योथ; कश्यपोज्यो(र्जो)थ; का (क)श्यपो योथ; काश्यपोत्यथ. वाशिष्ठः. काश्यपोथ वसिष्ठश्च. (२) पुत्रजः (for पुत्रकः). (३) अङ्गिरा (for अग्निरा). (४) च सः (सु) वर्चकः;

अचरन्त तपस्तीव्रं पुत्रार्थे बहुवार्षिकम्।**
पुत्रं लभेम धर्मिष्ठं यशसा ब्रह्मणा समम् ॥ २ ॥[०१]

महाव्याहृतिभिर्ध्यातः पञ्चभिस्तैस्तदा त्वथ।**
जज्ञे तेजो महार्चिष्मान्पञ्चवर्णः प्रभावनः ॥ ३ ॥[०२]

समिद्धोऽग्निः शिरस्तस्य बाहू सूर्यनिभौ तथा।**
त्वङ्नेत्रे च सुवर्णाभे कृष्णे जङ्घे च भारत ॥ ४॥[०३]

पञ्चवर्णः स तपसा कृतस्तैः पञ्चभिर्जनैः ।**
पाञ्चजन्यः श्रुतो देवः पञ्चवंशकरस्तु सः ॥ ५ ॥[०४]

दशवर्षसहस्राणि तपस्तप्त्वा महातपाः ।**
जनयत्पावकं घोरं पितणां स प्रजाः सृजन् ॥ ६ ॥[०५]

बृहद्रथन्तरं मूर्ध्नो वक्राद्वा तरसाहरौ।**
शिवं नाभ्यां बलादिन्द्रं वाय्वग्नी प्राणतोऽसृजत् ॥ ७ ॥[०६]

---

स्त्रीसमर्चकः; त्रिषुवर्चसः; त्रिष्ववर्चकः; त्रिसुवर्चकः (०सः); स्त्रीरवर्चकः; त्रिप्रवर्षकः; तीव्रवर्चकः .

(०१) (१) अचरंस्ते; रत्स (for रन्त). क्रूरं (for तीव्रं). (२) पुत्रार्थं. (३) लेभे स; लभेयं; लेभेथ (for लभेम). धर्मज्ञं. (४) तपसा (for यशसा). ब्रह्मसंमितं; ब्रह्मणः समं.

(०२) (१) ध्याते; व्याप्तः; ध्यातैः; ध्यातेः; सार्धं; ध्यानैः (for ध्यातः). (२) ते (for तैस्). तथा; सदा (for तदा). देव० महो; चैव महो० (महा); तेजो महा; तेजोमयाच्छिष्टान्. (४) प्रतापवान; प्रभास्वरः; प्रभाकरः(for वनः).

(०३)(१) समृद्धो (for समिद्धो). (३) तन्; ते (for त्वङ्). (ऽ)थ (for च). कृष्ण; कृच्छ्रे (for कृष्णे). (ऽ)थ (for च).

(०४)(१) क-पकश्चवर्णबलादिन्द्रं प्राणाद्वायुश्च भारत ।, क-अर्धषट्कं नास्ति, वर्षः(for वर्णः). स्व०; सु० (for स). (३) पञ्च (for पाञ्च). कृतो; स्तुतो (for श्रुतो). देवैः; देवः (for वेदे). (४) विंश; वर्ण (for वंश). सुतः (for तु सः). पञ्च० वस्तुकविशकः .

(०५)(२) समातपः; महायशाः; महाव्रतः (तपाः) (३) जनयन्; असृजत. पावकान्घोरान. (४) स पितृणां. च (for स). प्रजासृजं (जत्, जन्). असृ०जत्प्रजाः; प्रजाः सृजत्त.

(०६)(१) रथन्तरौ; ०तरो. मूर्ध्नि; र्ध्ने; र्ध्ना (for र्ध्ना). (२) वा (for च). भ (त)रसाहसौ; तपसा हरिं; तरसा हरिं. (३) दिवं (for शिवं). नाभ्या. (४) स्मतः; ०ष्मजौ (for सृजत्). प्राणाद्वायु च भारत.

बाहुभ्यामनुदात्तौ च विश्वे भूतानि चैव ह।**
एतान्सष्ट्वा ततः पञ्च पितणामसृजत्सुतान् ।। ८ ।।(०१)

बृहद्रथस्य प्रणिधिः काश्यपस्य महत्तरः ।**
भानुः अङ्गिरसो धीरः पुत्रो वर्चस्य सौभरः ।(०२)
प्राणस्य चानुदात्तस्तु व्याख्याताः पञ्चविंशतिः ** ।। ९ ।।(०३)

देवान्यज्ञमुषश्चान्यान्सृजत्पञ्चदशोत्तरान् ।। १० ।।(०४)

सुभीममतिभीमं च भीमं भीमबलाबलम्।**
एतान्यज्ञमुषः पञ्च देवानां ह्यसृजत्तपः ।। ११ ।।(०५)

सुमित्रं मित्रवन्तं च मित्रज्ञं मित्रवर्धनम्।**
मित्रधर्माणमित्येतान्देवानभ्यसृजत्तपः ।। १२ ।।(०६)

सुरप्रवीरं वीरं च सुरेशं च सुवर्चसम्।**
सुराणामपि हन्तारं पञ्चैतानसृजत्तपः ।। १३ ।।(०७)

---

(०१) (१) अनुदातुं च; दात्तश्च; ०दान्तौ च; दान्तस्य; दन्तौ च; दत्तौ च. (२) विश्व००; विघ्ने; विश्वा (for विश्वे). हि (for ह). (३) दृष्ट्वा (for सृष्ट्वा). पुनः (for ततः).

(०२)(१) बृहद्रथस्य; द्रूपस्य; ब्रह्मा०त्मजस्य; बृहत्तरस्य. प्रणिधाः. (२) कश्यप (पो)स्य. बृहत्तनुः; महत्तरः. (३) भानोट्; अनुट् (for भानुट्). अरिरसो. धीरः (for वीरः). (४) वर्ग; वर्ष (for वर्च०). सोभवत्; सौरभः; सौभगः (for सौभर).

(०३)(१) प्राणश्च (for स्य). च. मनुदात्ताश्च; अन्नदातुश्च; चानुद (दा)त्तस्य; चारुदन्तस्तु. तु; स (for च). (२) व्याख्यातः; व्याघाता; व्याहृताः बिंशतिः; विंशजाः (for वंशजाः).

(०४)(१) वेदान्; दैवान् (for देवान्). मुषाश्च; ०भुजश्च; मुखांश्च; ०मुखश्च (for मुषश्च). (अ)पि (for (अ)न्यान्). (२) सृजत् (for सृजन्). असृजत्पञ्च सोत्तरान.

(०५)(१) सुभीमम् (for अभीमम्). अभीमसम (मति) भीमं च; अभीष० मतिभीषं च. (२) पञ्च (for भीमं). भीमं बला; भीममहाबलः; भीमपराक्रमं; भीम०बलाबलौ; भीमबलं बलं. (३) यज्ञमुखः; मुखान्; रसः; स्तुषः; मुखाः (for मुषः). (४) ततः (for तपः); देवानां (०नत्य)सृजत्तपः; देवानामसृजत्ततः .

(०६)(१) सुमित्र०; अमित्रं (for सुमित्रं). सुमित्रमतिमित्रं च. (२) वत्सलं; ०बान्धव (for वर्धनम्). (३) मित्रवर्माणम्; मित्रावरुणम् (for धर्माणम्). (४) एत्य; अत्य; अभ्या० (for अभ्य). तमः; ततः (for तपः).

(०७)(१) सुरं (for सुर०). सुप्रवीरं प्रवीरं च. (२) सुरेशं (for सुकेशं). सुखवर्चसं; सुरव (for च सुव). (३) भर्तारं (for हन्तारं). (४) पञ्च तान. ततः तमः (for तपः).

त्रिविधं संस्थिता ह्येते पञ्च पञ्च पृथक्पृथक्।**
**मुष्णन्त्यत्र स्थिता ह्येते स्वर्गतो यज्ञयाजिनः ।। १४ ।।**[०१]

तेषामिष्टं हरन्त्येते निघ्नन्ति च महद्धविः ।**
**स्पर्धया हव्यवाहानां निघ्नन्त्येते हरन्ति च ।। १५ ।।**[०२]

बहिर्वेद्यां तदादानं कुशलैः सम्प्रवर्तितम्।**
**तदेते नोपसर्पन्ति यत्र चाग्निः स्थितो भवेत् ।। १६ ।।**[०३]

चितोऽग्निरुद्वहन्यज्ञं पक्षाभ्यां तान्प्रबाधते।**
**मन्त्रैः प्रशमिता ह्येते नेष्टं मुष्णन्ति यज्ञियम् ।। १७ ।।**[०४]

बृहदुक्थस्तपस्यैव पुत्रो भूमिमुपाश्रितः ।**
**अग्निहोत्रे हूयमाने पृथिव्यां सद्भिरिज्यते ।। १८ ।।**[०५]

रथन्तरश्च तपसः पुत्रोऽग्निः परिपठ्यते।**
**मित्रविन्दाय वै तस्य हविरध्वर्यवो विदुः ।। १९ ।।**[०६]

---

(०१)(१) त्रिविधाः संश्रि; संसृता, सविधा; , सविता; सहिता; सहितान्, (अ)प्येते (for ह्येते). (३) मुषणत्य (ते)त्र; मुह्य(ष्णं) तोत्र; भुष्णंस्तत्र. (४) स्वर्गतौ; मुष्णन्तो; स्वर्गतान. यज्ञयाजिनौ; ०ना; नं.

(०२)(१) इष्ट्या (for इष्टं). (२) विनि०प्रैति; विश्वेति च. महद्धविः; महान्भुवः; मखं भुवि (for महसुवि). (४) निघ्नन्ते ते; विघ्नत्येते; निघ्नति च (for निघ्नन्त्येते).

(०३)(१) बहिर् (for हविर). तथा; यदा (for तदा). (२) कुचैलैः (for कुशलैः). सम्प्रकीर्तितं. (३) तदन्ये; तत्र ते; तद्रेतो; तत्रैते; अत्रैते (for तदेते). नोपा; नाप (for नोप०). (४) चितो; शृ (for स्थि०). (ऽ)भवत् (for भवेत्).

(०४) (१) चित्ताग्निद्; चिताग्निद्; वित्ताग्निद्; चिताग्नेर्; चितानि; चित्रानेः चितोग्नेद् (for चितोऽग्निद्). आज्यं (for यज्ञं). (२) परोक्षं (for पक्षाभ्यां). तान्प्रबोधते; तात वर्तिते; तअवर्त्ति(र्त)ते. (३) मित्रैः (for मन्त्रैः). सम्प्रमिता; प्रशामिता. त्वेते क्य ह्येते). (४) नेष्टे. मुश्नन्ति; मुष्टति. याज्ञियं.

(०५) (१) बृहदुत्थस्; दुक्थ्यम् (for दुक्थ०). (ह)व (for (ए)व). तपस्थै (स्ये) व बृहदुक्थः (त्थ; कथ्यः). तस्यैव ब्रह्मदुक्थः स. (२) पुत्रौ. अपा; इवा (for उपा०). (४) सोद्भिद्; योद्भिद् (for सद्भिर्). इध्यते; इष्य०; उच्य; ईडय (for इज्य).

(०६) (२) ०पच्य०; दृश्य० (for पट्य). (३) तस्मै; पश्य (for तस्य). मित्रविदादयस्तस्य; विदाय चैतस्य; विदा नथा भार्या. (४) विभुः; ददु (for विदुः).(५) सपुत्रेण (for सह पुत्रैर्). तपा (for यशाः).

एतैः सह महाभाग तपस्तेजस्विभिर्नृपः ।
आरपय मार्कण्डेयसमस्या अग्नेमरस्त्रभ
मुमुदे परमप्रीतः सह पुत्रैर्महायशाः ।। २० ।।

अस्मिन् पर्वणि १८०अध्याये २०श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि
मार्कण्डेयसमास्यापर्वणि आङ्गिरसोपाख्याने अष्टाविंशोऽध्यायः ।। १८० ।।

(मार्कण्डेयसमस्यापर्वणि ......ऽध्यायः)

## 03- 04 - 181Adhyaya

# १८१. एकाशीत्यधिकशखततमोध्यायः ।

१८१ मार्कण्डेयेन युधिष्टिरं प्रति विस्तरेणाग्नीनां वंशकथनम् ।। अग्निस्वरूपस्य तपसो भानोश्च सन्ततीनामनुकीर्तनम्

**मार्कण्डेयः**

गुरुभिर्नियमैर्युक्तो भरतो नाम पावकः ।
अग्निः पुष्टिमतिर्नाम तुष्टः पुष्टि प्रयच्छति** ।। १ ।।

भरत्येष प्रजाः सर्वास्ततो भरत उच्यते।(०१)
सततं भरतश्रेष्ठ पावकोऽयं महाप्रभः ।। २ ।।

अग्निर्यश्च शिवो नाम शक्तिपूजापरश्च सः ।**
दुःखार्तानां च सर्वेषां शिवकृत्ससततं शिवः ।। ३ ।।(०२)

---

(०१)(१) यन्ता जातो;० यज्ञैर् यत्तो (for युक्तो); (२) पार्थिव (for पावकः); (३) पुष्टिपति; तुष्टिमति (for पुष्टिमति० ०); (४) तुष्टिपुष्टि; पुष्टः पुष्टि

(०२)(१) च (for तु); (२) शक्तिपूजायनश्च यः (सः); शक्तिः (क्तः) पूजा च पूजाय; पूजय नित्यशः निश्चयः (३) च (for स); शिवकृत् सततं विदुः (for शिवः);

तपसस्तु फलं दृष्ट्वा सम्प्रवृत्तं तपोमयम्।**
**उद्धर्तुकामो मतिमान्पुत्रो जज्ञे पुरन्दरः** ।। ४ ।।(०१)

**लक्षालङ्कारः- तपसस्तु फलम् इत्यत्र तपसः तपोनामकाग्नेः फलं सन्तानम् ।**

ऊष्मा चैवोष्मणो जज्ञे सोऽग्निधूतस्य लक्ष्यते।**
**अग्निश्चापि मनुर्नाम प्राजापत्यमकारयत्** ।। ५ ।।(०२)

शम्भुमग्निमथ प्राहुर्ब्राह्मणा वेदपारगाः ।**
**आवसथ्यं द्विजाः प्राहुर्दीप्तमग्निं महाप्रभम** ।। ६ ।।(०३)

ऊर्जस्करान्हव्यवाहान्सुवर्णसदृशप्रभान्।**
**ततस्तपो ह्यजनयत्पञ्च यज्ञसुतानिह** ।। ७ ।।(०४)

प्रशान्तेऽग्निर्महाभाग परिश्रान्तो गवां पतिः ।**
**असुरान्जनयन्घोरान्मर्त्यांश्चैव पृथग्विधान्** ।। ८ ।।(०५)

तपसश्च मनुं पुत्रं भानुं चाप्यङ्गिराः सृजत्।**
**बृहद्भानुं तु तं प्राहुर्ब्राह्मणा वेदपारगाः** ।। ९ ।।(०६)

---

(०१) (१) तपसश्च; उपसह्य परं; बलं (for फलं); (२) सम्प्रवृत्तं; प्रवृद्धं च (for सम्प्रवृद्धं); ततो (for तपो); भवत् (for महत्); तपो० मयं (for तपो महत्); (३) तद्धन्तुकामो; उद्धर्तुमानो; तत्कर्तुकामो; तद्धर्तुकामो, बलवान् (for मतिमान्); (४) पुत्रं (for पुत्रो); यज्ञे; याज्ञे (for जज्ञे);

(०२) (१) उष्मा; तस्माच् (for ऊष्मा); चैवोष्मणा; ०ष्मवाज्, (३) हि (for ( अ)पि). मतिर् (for मनुर्). (४) अकल्पयत्; स कामयेत् स,(सु) कारणं (अकारयत्).

(०३)(३) आवसक्थ्य (० कथं); सख्यं; आहुः स्तुत्यं; आवत्स्य त्वं) (for आवसथ्यं);

(०४) (१) ऊर्जस्कारान्; स्वरान्; च्युरान्; ऊर्ध्वङ्करान्; (२) रजत (for ० सदृश); (३) वह्नीन्; ततम्; . वह्निस् (for अग्निस् ); ततो; तप्यो (for तपो); न्यां जनयेत्; व्यजनयत्; प्य०; भ्य० (for ह्य). (४) यज्ञः; जज्ञे (for यज्ञ०). , इव (for इह).

(०५)(१) प्रशान्तो (भान्तो); ततो (for शान्ते). भागः; राज (for भाग); (२) प्रति० (for परि) गतागतिं; गवां गतिः (for गवां पतिः); (३) जनयद्; . असृजद् (for जनयन्); (४) मत्स्यान् (for मर्त्यान्); च स (for चैव);

(०६)(१/२) भानुं पुत्रं; पूर्वं (for पुत्रं); चाप्यङ्गिराः सृजत्; चा सृजद (तां) गिराः (३) ततः; च तं (for तु तं).

**भानोर्भार्या सुप्रजा तु बृहद्भासा तु सूर्यजा।****
**असृजेतां तु षट्पुत्रान्शृणु तासां प्रजाविधिम् ।। १० ।।**[०१]

***अधिकपाठः**

**तदा सा कन्यया सह ।। भानोरङ्गिरसस्याथ**[02]

**दुर्बलानां तु भूतानामसून्यः सम्प्रयच्छति।****
**तमग्निं बलदं प्राहुः प्रथमं भानुतः सुतम् ।। ११ ।।**[०३]

**यः प्रशान्तेषु भूतेषु मन्युर्भवति दारुणः ।****
**अग्निः स मन्युमान्नाम द्वितीयो भानुतः सुतः ।। १२ ।।**[०४]

**दर्शे च पौर्णमासे च यस्येह हविरुच्यते।****
**विष्णुर्नामेह योऽग्निस्तु धृतिमान्नाम सोऽङ्गिराः ।। १३ ।।**[०५]

**इन्द्रेण सहितं यस्य हविराग्रयणं स्मृतम्।****
**अग्निराग्रयणो नाम भानोरेवान्वयस्तु सः ।। १४ ।।**[०६]

---

(०१) (१) सूर्यजा तु; महाराज (for सुप्रजा तु). (२) द्भानुशू; ०द्दोषा (for द्भासा); च (for तु); सूर्यजा; शाम० (for सोम). (३)क-नजनयंस्तान् षट्पुत्रांस्तदा शृणु प्रजाविधिम् । घ-सा षठ् पुत्रान् शृणु तासां प्रजाविधिम् ।, घ-सा षठ्पुत्रानजायन्त हर्पः कपुत्रं तदा शृणु ।, अयाचेतां; असृजत्तान् (०प्सा); अजायेतां; अजायत (for असृजेतां). हि (for तु). ते; तान् (for षट्). षट् पुत्राञ्जनयामास; , सा षट् पुत्रानजायन्त; पट् पुत्रा न्याचत तदा.

(०२) (४) ताभ्यां; तेषां; तस्याः; तस्य; तु तस्यां (for तासां); विधिः (for विधिम्). हर्षपुत्रांस्तदा शृणु

(०३)(२) तनूर्;. असून्; बलं (for तनुं) असृजन्यः प्रयच्छति. (३/४) बलदं प्रथमं। भानुजः; जं (for ०त).

(०४)(१) तु शां (for प्रशा). लोके (for भूते). , भूतेषु यः प्रशातेषु० (३) अग्निः सुमच्छुनामा वै. (४) भानुजः (for तः); स्वयं (for सुतः);

(०५)(१) पौण्त्मास्थे; पूर्णमासे; पौर्णमास्यां. (२) रुष्यते; ०रिष्यते ० (for रुच्यते); हविर्यस्वेह चोच्यते. (३) विष्णुना सह (for विष्णुर्नामेह). (इ)ति ह(for (इ)ह). सोग्नि; वह्नि (for योग्नि०). (४) नामतीङ्गिराः; द्वानामतोचिरात्; नामतो विराट् , धृतिर्नामापि सोङ्गिराः .

(०६)(१) तस्य; यस्तु (for यस्य); (२) आश्रयणं; अग्रयणं; आभ्ययश्रं; अग्रहणं; अव्यहरं; आग्रायणं विदुः (for स्मृतम्); (३) आश्रयणो; अग्रह्मणो; आग्र्ययणो; अग्रहणो; अग्र्यं यशो; अग्रयणो. (४) (आ)त्मज (for (अ)न्वय). तु यः; स्मृतः (for तु सः);

चातुर्मास्येषु नित्यानां हविषां योनिः अग्रहः ।**
चतुर्भिः सहितः पुत्रैर्भानोरेवान्वयः स्मृतः(स्तुभः) ।। १५ ।।[०१]

चातुर्मास्येषु नित्यानां पविषां योनिरस्तु सः ।
निशा त्वजनयत्कन्यामग्नीषोमावुभौ तथा।**
मनोरेवाभवद्भार्या सुषुवे पञ्च पावकान् ।। १६ ।।[०२]

पूज्यते हविषाग्र्येण चातुर्मास्येषु पावकः ।**
पर्जन्यसहितः श्रीमानग्निर्वैश्वानरस्तु सः ।। १७ ।।[०३]

अस्य लोकस्य सर्वस्य यः प्रभुः परिपठ्यते।**
सोऽग्निर्विश्वपतिर्नाम द्वितीयो वै मनोः सुतः ।। १८ ।।[०४]

यस्तु विश्वस्य जगतो बुद्धिमाक्रम्य तिष्ठति।**
तं प्राहुरध्यात्मविदो विश्वकं नाम पावकम् ।। १९।।

अन्तरग्निशिो यो हि भुक्तं पचति देहिनाम्।**
स जज्ञे विश्वभुग्नाम सर्वलोकेश्वरो वरः ।। २०।।

ब्रह्मचारी यतात्मा च सततं विपुलव्रतः ।**
ब्राह्मणाः पूजयन्तो यं पाकयज्ञेषु पावकम् ।। २१ ।।

प्रथितो गोपतिर्नाम नदी भार्याऽभवत्प्रिया।**

---

(०१) (२) निरग्रजः; निरव्रजः; निरुच्यते; ग्निरग्रतः (,जः; हः) पुत्रैर् सहितः (३) सहितैः (for तः). (४) अङ्गिरस (for एवान्वय). स्मृतः (for तु स).

(०२)(१) निशा (for निशां च (for तु); (२) सुतौ; अपि (for तथा); (३) भानोर् (for मनोर्). या चा; एषा (for एवा); (४) वे पावकान्वहून.

(०३)(१)सहितः पूज्यन्ते; युज्यते. हविषाग्रेग; हविषा (षां) योग्रे. (२) चातुर्मास्येन; स्ये ह. (३) पश्चान्यस; पचन्या स; पर्जन्यः स. (३) च सः; वृतः (for तु सः).

(०४) (१) लोक० सर्व. (२) प्रभुः (for पतिः). परिपच्यते; (४) यो (for वै); द्विलीयस्त (स्ता). पस सुतः (५) त्विष्टं; त्विष्टि; सृष्टं; शि (for स्थि). गुह्यं; ग्राह्यं; गृह्यं (for आज्यं). (६) शिष्ट; स्त्विष्ट; मिष्ट(for स्विष्ट०). परमस्तु सः; परसमतः.

**तस्मिन्सर्वाणि कर्माणि क्रियन्ते सर्वसेतवः ।। २२ ।।**

वडवामुखः पिबत्यापो योऽसौ परमदारुणः ।
**ऊर्ध्वभागूर्ध्वभाग्नाम कविः प्राणाशिस्तु सः ।। २३ ।।**

उदग्भागे हविर्यस्य गृहे नित्यं प्रदीयते।।
**ततः स्विष्टं भवेदाज्यं स्विष्टकृत्परमस्तु सः ।। २४ ।।**

कन्या सा रोहिणी नाम हिरण्यकशिपोः सुता।**
**कर्मणासौ बभौ भार्या स वह्निः स प्रजापतिः ।। २५ ।।**(०१)

प्राणानाश्रिय यो देहं प्रवर्तयति देहिनाम्।**
**तस्य संनिहितो नाम शब्दरूपस्य साधनः ।। २६ ।।**(०२)

शुक्लकृष्णगतिर्देवो यो बिभर्ति हुताशनम्।**
**अकल्मषः कल्मषाणां कर्ता क्रोधाशिस्तु सः ।। २७।।**(०३)

कपिलं परमर्षिं च यं प्राहुर्यतयः सदा।**
**अग्निः स कपिलो नाम साङ्ख्ययोगप्रवर्तकः ।। २८ ।।**(०४)

अग्रं यच्छन्ति भूतानां येन भूतानि नित्यदा।**
**कर्मस्विह विचित्रेषु सोऽग्रणीर्वह्निरुच्यते ।। २९ ।।**(०५)

इमानन्यान्समसृजत्पावकान्प्रथितान्भुवि।**

---

(०१)(१) कन्यका; कन्या या (for कन्या सा); हरिणी (for रोहिणी); (२) कश्यपोः सुताः (३) कर्द० मस्य कर्मणोसौ सा; वा (for (अ)सौ) भवद्; वहौ (for बभौ).

(०२)(१) प्राणम्; प्राणान्. (३) यस्य (for तस्य). (४) तस्य (for शब्द०). साधकः (for नः).

(०३)(१) शुक्लं कृष्णं (for शुक्लकृष्ण०). गती; वपुर् (for गतिर्); देहो; देहे (for देवो). (२) विशते यो (for यो बिभर्ति). हुताशनः .

(०४)(१/२) परमर्षि च यं प्राहुः कपिलं यतयः(मुनयः) सदा. (३) तु (for स).

(०५)(१) अग्रे (०खं) यच्छति भूतानां; अग्रं (अयं) यच्छन्ति भूतानां; योतद् यो नियच्छति भूतानि गच्छति; चेष्टति (for भूतानि).

**अग्निहोत्रस्य दुष्टस्य प्रायश्चित्तार्थमुल्बणान्** **।। ३० ।।**[०१]

संस्पृशेयुर्यदान्योन्यं कथञ्चिद्वायुनाग्नयः ।**
**इष्टिरष्टाकपालेन कार्या वै शुचयेऽग्नये** **।। ३१ ।।**[०२]

दक्षिणाग्निर्यदा द्वाभ्यां संसृजेत तदा किल।**
**इष्टिरष्टाकपालेन कार्या वै वीतयेऽग्नये** **।। ३२ ।।**[०३]

यद्यग्नयो हि स्पृश्येयुर्निवेशस्था दवाग्निना।**
**इष्टिरष्टाकपालेन कार्या तु शुचयेऽग्नये** **।। ३३ ।।**[०४]

अग्नि रजस्वला वै स्त्री संस्पृशेदग्निहोत्रिकम्।**
**इष्टिरष्टाकपालेन कार्या वसुमतेऽग्नये** **।। ३४ ।।**[०५]

वैद्युताग्निर्यदा त्वग्नि संस्पृशेदाग्निहौत्रिकम्।
**इष्टिरष्टाकपालेन कार्या ह्याग्निमतेऽग्नये** **।। ३५ ।।**

मृतः श्रूयत यो जीवः परेयुः पशवो यदा।**
**इष्टिरष्टाकपालेन कार्या सुरभिमतेऽग्नये** **।। ३६ ।।**[०६]

---

(०१) (१) अवसृजत्; अप्यसृजत्; असृजत; असृजन्यः; चा (च) सृजत्तान्; च ससृजे; अभ्यसृजत् (for समसृजत्). नव; नृप (for भुवि). पावकान्प्रथितौ० जसः (४) उल्बणं; उद्वहन्; उद्वहेत्; उद्वलान् (for उल्बणान्).

(०२) (४) वै विधये; दस्युमते; वै (वि०) विचये; विविधये; ० सुमतये; ततुमते; (अ)पि प्रचये; (अ) न्नपतये; तु शुचये.

(०३) (२) संसृज्येत; संश्रयेत; संस्पृशेत संस्पृशेदाग्निहोत्रिकं. (४) तु शुचये; विविचये; (अ)न्नपतये; स्याद्वीतये (for वै वीतये). कर्तव्याभिमतेग्नये.

(०४)(१) यद (for यद्य). विमृष्ये (मिश्रे)० युट्; हि स्पृशेयुर् (स्पृशेयुश्च); भि० मर्शेयुर; भिस्पृश्येयुर्. (२) विशेषस्था; निविशस्था; निवेशस्तं दवाग्नये. (३) अष्टाकपाले तु. (४) हि; वै स्यात् (for तु); कार्या पार्थकृतेग्नये.

(०५)(१) अग्नीन् (for अग्नि). या (for च); वै; च (for चेत्). (२) अग्निहोत्रिणं; णा; कान्; . होत्रकं; आग्निहोत्रिकं. (४) कुर्याद् (for कार्या). चाग्निमते; पिट्टि; अप्सु; वसु; तन्तु; त्वस्य चये; तु (त्वा०) शुचये; तुष्टिमते (for दस्यु).

(०६)(१) मृते (for मृतः). सूयेत; नु ननु (for श्रूयेत). जीवः (for जीवन्). (२) परासुः (for परेयुः). अशुचिर् (for पशवो). यदा; यदि (for यथा). सुरभि कार्या; (४) कार्या चाग्निमते; कार्या स्यादुत्तरा कार्या वै

मृते स्पृशेच्च यश्चाग्निम् अशुचिर्वालिशो नरः ।
इष्टिरष्टाकपालेन कार्या स्यादुत्तराग्नये ।। ३७ ।।(०१)

आर्तो न जुहुयादग्निं त्रिरात्रं यस्तु ब्राह्मणः ।**
इष्टिरष्टाकपालेन कार्या पथिकृतेऽग्नये ।। ३८ ।।(०२)

सूतिकाग्निर्यदा चाग्निं संस्पृशेदग्निहोत्रिकम् ।**

दर्शं च पौर्णमासं च यस्य तिष्ठेत्प्रतिष्ठितम् ।**
इष्टिरष्टाकपालेन कार्या चाग्निमतेऽग्नये ।। ३९ ।।(०३)

अस्मिन् पर्वणि १८१अध्याये ३९श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि
मार्कण्डेयसमास्यापर्वणि एकोनत्रिंशोऽध्यायः ।। १८१ ।।

(मार्कण्डेयसमस्यापर्वणि ......ऽध्यायः)

## 03- 04 - 182Adhyaya

# १८२. द्व्यशीत्यधिकशततमो अध्यायः ।

१८२ मार्कण्डेयेन युधिष्ठिरं प्रत्यग्निवंशादिकीर्तनम् ।। सहनाम्नोऽग्नेर्जलप्रवेशः अथर्वणाङ्गिरसा तस्य पुनः प्रकटीकरण च

---

वीतये (शुचये); कार्या सुरभि० मते कार्या ह्यग्नि; कार्या वसु.

(०१)(१) अक-कघ-मृतो ननु न यो जीवन् परासुः पशवोक तथा, कार्या; (२) वै द्विजः (for ब्राह्मणः). संस्पृशेदग्निहोत्रिकं. (४) चाग्निमते; तु शुचये; दस्युमते; ततुमते (for स्यादुत्तरा). कर्तव्याप्सुमतेग्नये.

(०२) (१) दार्श्ये; दर्शे; (for दर्शः). दर्शं ०मास्ये; मासे; ०मास्यं; ०मासच्च; ०मास्यां (for मासं). दशायां पौर्णमास्यां वा. (२) यस्य तिष्ठति ग्रः सु स्थितं; यस्य तिष्ठेत प्रस्थितं; यस्य तिष्ये प्रतिष्ठितः (४) पथि (चाग्नि) मः (ग) तेग्नये; सुमतये (for पथि० कृते). कर्तव्याभिमतेग्नये.

(०३)(१) सूतकाग्निर्. तु (for च). चान्यं; चाग्निः (for चाग्नि)ं. (२) आग्निहोत्रिकं. (४) ह्यप्सु०मते; सुमतये; तन्तुमते (for चाग्निमते).

**मार्कण्डेयः**

**आपस्य मुदिता भार्या सहस्य परमा प्रिया।****
**भूर्पतिर्भुवभर्ता च जनयत्पावकं परम्        ।। १ ।।(०१)**

भूतानां चापि सर्वेषां यं प्राहुः पावकं पतिम्।**
आत्मा भुवनभर्तेति सान्वयेषु द्विजातिषु        ।। २ ।।(०२)

महतां चैव भूतानां सर्वेषामिह यः पतिः ।**
**भगवान्स महातेजा नित्यं चरति पावकः        ।। ३ ।।(०३)**

अग्निर्गृहपतिर्नाम नित्यं यज्ञेषु पूज्यते।**
**हुतं वहति यो हव्यमस्य लोकस्य पावकः        ।। ४ ।।(०४)**

**अपां गर्भो महाभागः सत्त्वभुग्यो महाद्भुतः ।****
**भूर्पतिर्भुवभर्ता च महतः पतिरुच्यते ।(०५)**
**मृता वहन्तो हव्यानि तस्याग्निर्भरतोऽभवन् **        ।। ५ ।।(०६)**

**अग्निष्टोमस्तु  नियतः क्रतुश्रेष्ठो भवत्युत        ।। ६ ।।(०७)**

---

(०१) (१) आपस्य दुहिता; आपद्य दुहिता; आपवस्य सुता (for आपस्य मुदिता). (२) सा चास्य (for सहस्य). परमप्रिया. (३) भूर्पतिं (for भूपतिर्). भव०; भूत० (for भुव०). ०भर्तारं; ०भार्या च; कर्ता च (for भर्ता च). (४) असृजत् (for जनयत्). जनयामास प्रावकं.

(०२) (१) चैव; सापि; अप्रि (for चापि). (२) परं; प्रति (for पतिम्). (३) भर्ता च; कर्तेति; कर्ता च (तु) (for भर्तेति). (४) योन्वयेषु; सोन्वयेषु; सोध्वरेषु. द्विजातिभिः. सान्वये बुद्धिजातिभिः .

(०३)(१/२) अन्येषां (for महतां). चापि (for चैव). भूतानां सर्वेषां. अपि; क्ष चैव; एव; चापि (for इह). च यथा (for इह यः).

(०४)(३) द्रुतं; अयं; आज्यं (for हुतं). हव्यं स (for यो हव्यम्). (४) तस्य; सर्व०(for अस्य).

(०५)(१) अयमेव (for अपां गर्भो). महाभाग; ० गाः. (२) सत्वभुग्यो (for सहपुत्रो). महान्प्र (प्र) भुः. (for महाद्भुतः). (३) भव०; भूत० (for भुव०). ०कर्ता (for ०भर्ता). भुवनार्तश्च (forभुवभर्ता च).

(०६)(१) भूतानि (for मृ). सृ (भू)० ता वहन्तो हव्यानि; मृतिं वह (हं) ति भूतानां. (२) तथा; तत्रा (for तस्या). (अ)ग्नेरग्रजो (for अग्निर्भरतो). भव एव तुल; वहितो; वहना (for भरतोऽभवत्).

(०७)(१) अग्निष्टोमे तु; ०ष्टोमेन; ष्टोमेति; ष्टोहस्तु. नियम (for तः). (२) श्रेष्ठे (for श्रेष्ठो). भवस्य तु; भवत्युत; भविष्यति (for भरस्य तु).

(१०५४) अधिकपाठः

स वह्निः प्रथमो नित्यं देवैरन्विष्यते प्रभुः ।

आयान्तं नियतं दृष्ट्वा प्रविवेशार्णणं भयात्।**
दैवास्तत्रापि गच्छन्ति मार्गमाणा यथादिशम्।(०१)
दृष्ट्वा त्वग्निरथर्वाणं ततो वचनमब्रवीत् ।। ७ ।।

लक्षालङ्कारः- अग्निष्टोमे तु नियत इत्यत्र नियतः नियतनामको..ग्निः । आयान्तं देहदाहकभरतनामकाग्नि. दृष्ट्वा नियतः नियतनामको..ग्निः ।

**अग्निः**

देवानां वह हव्यं त्वमहं वीर सुदुर्बलः ।**
अर्थवन् गच्छ मध्वक्षं प्रियमेतत्कुरुष्व मे ।। ८ ।।(०२)

(वा)अर्थवन् गच्छ मध्वक्ष इत्यत्र हे अथर्वन् अथर्वाग्ने मध्वक्ष मधुवर्णनयन ।

**मार्कण्डेयः**

प्रेष्य चाग्निरथर्वाणमन्यं देशं ततोऽगमत्।**
मत्स्यास्तस्य समाचख्युः क्रुद्धस्तानग्निरब्रवीत् ।। ९ ।।(०३)

**अग्निः**

भक्ष्या वै विविधैर्भावैर्भविष्यथ शरीरिणाम्।**

**मार्कण्डेयः**

---

(०१)(१) आयातं; आयाद्यो (for आयान्तं). (२) देवास्तत्रापि (धि०) गच्छन्ति. (४) दिशः; तथा; तथं (for दिशस्).

(०२)(१) च त्वं; च (for त्वम्). (४) महावीर (for अहं वीर). अहं (महान्) देवेषु दुर्बलः (दुर्लभः). (५) अथ त्वं (तान्) (for अथर्वन्). मध्वा (ध्वा)क्ष; मा सख्यं; मा द्वेषं (for मध्वक्षं). (६) क्षिप्रम् (for प्रियम्). एव (for एतत्).

(०३) (१) प्रेक्ष्य (for प्रेष्य). (२) अन्यदेशं. ततो गतः; अथागमत. (३) तस्य समाचक्षुः; समस्तमाचख्युः.

**अथर्वाणं तथा चापि हव्यवाहोऽब्रवीद्वचः ॥ १० ॥**[०१]

अनुनीयमानो हि भृशं देववाक्याद्धि तेन सः ।**
**नैच्छद्वोढुं हविः सोढुं शरीरं चापि सोऽत्यजत् ॥ ११ ॥**[०२]

स तच्छरीरं सन्त्यज्य प्रविवेश धरां तदा।**
**भूमिं स्पृष्ट्वा..सृजद्धातुं पृथक्पृथगतीव हि ॥ १२ ॥**[०३]

**लक्षालङ्कारः- भूमिं स्पृष्ट्वा..सृजद्धातुम् इत्यत्र स्वदेहस्थास्थिश्लेष्मपित्तादिभ्यः भूमौ नानाविधपदार्थान् ।**

पूयात्स गन्धं तेजश्च अस्थिभ्यो देवदारु च ।**
**श्लेष्मणः स्फाटिकं तस्य पित्तान्मारकतं तथा ॥ १३ ॥**[०४]

यकृत्कृष्णायसं तस्य त्रिभिरेव बभुः प्रजाः ।
**नखास्तस्याभ्रपटलं शिराजालानि विद्रुमम् ** ॥ १४ ॥**

शरीराद्विविधाश्चान्ये धातवोऽस्याभवन्नृप।[०५]
**एवं त्यक्त्वा शरीरं च परमे तपसि स्थितः ** ॥ १५ ॥**

---

(०१) (१) भोगैर् (भावैर्). (२) भविष्यत; ० ष्यन्ति (for ष्यथ). शरीरिणः. (३) तथा प्राह; तथोवाच; तथा चार्चिट् (for तथा चापि). (४) महामतिः; तदा वचः (for ऽब्रवीद्वचः).

(०२) (१)क-ख-घ- आनीयमानो..पि, अनुपीय; अन्वीय (for अनुनीय). हि; (ऽ)ति० (for ऽपि). अनुनीयमानेन भृशं. (२) च्च तेन सः; द् द्विजोत्तम; द् द्विजेन सः; द्विचेतनः; न्वितेन सः (for द्धि तेन सः). (३) पूर्वं; सोढं; शर्वः (for सर्वं). (४) चापि सोत्यजत्; च तथात्य; च परित्यज (जे)त् (for च समत्यजत्).

(०३)तच्छरीरं च; ततः शरीरं (for स तच्छरीरं). संन्यस्य (for त्यज्य). (२) धरां तथा; धरातलं. (३) भूमिष्ठश्चाजहाद्धातून्; भूमि स्पृष्ट्वा ततस्तेन. (पृथग्धातून्; जडीकुर्वन्). (४) धातूनसृजताथ वै.

(०४) (१) प्रायः; पू (प्रि) यात्; पूयं; यूपान्; आयात् (for आस्यात्). सगन्धि; स्वगन्धि; सुगन्धं०; सगधं (for सुगन्धि). (२) अर्चिभ्यो (for अस्थि०). श्लेष्मणं; ष्मणा. स्फाटिकं. चापि (for तस्य). (४) पीतान्; पीतं (for पित्तान्). मारकतं; मरकतस् ) यथा (तथा).

(०५)(१) यत्तु; जगत्; यत्तत्; पादान्; शकृत्; वातात् (for यकृत्). कार्ष्णायसं; कृष्णायससू; कृष्णाभवत. चापि (for तस्य). शकृत्कृष्णाभ्रमभवत. (२) त्रिभिः वभुः एभिर्(एव); एष; एतैर् (for एव). प्रभुः;. बहु०(for बभुः). प्रभा (for प्रजाः). (३) त्वचसू (for नस्वाम्). (४) मुषाजालानि; स्नायुजा; स्नायुजं चापि. विभ्रमं (for विद्रुमम्). (५) शरीरं (for शरीराद्).

भृग्वङ्गिरादिभिर्भूयस्तपसोत्थापितस्तदा।[०१]
भृशं जज्वाल तेजस्वी तपसाऽऽप्यायितः शिखी ।। १६ ।।[०२]
दृष्ट्वा ऋषिभयाच्चापि प्रविवेश महार्णवम् ।। १७ ।। [03]

तस्मिन्नष्टे जगद्भीतमथर्वाणमथाश्रितम्।**
अर्चयामासुरेवैनमथर्वाणं सुरादयः ।। १८ ।।[०४]

(वा)दृष्ट्वा ऋषिभयाच्चापि इत्यत्र ऋषिभयात् ऋषिभूताथर्वाग्निभरवयात् ।

अथर्वा त्वसृजल्लोकानात्मनाऽऽलोक्य पावकम्।**
मिषतां सर्वभूतानामुन्ममाथ महार्णवम् ।। १९ ।।[०५]

एवमग्निर्भगवता नष्टः पूर्वमथर्वणा।**
आहूतः सर्वभूतानां हव्यं वहति सर्वदा ।। २० ।।[०६]

एवं त्वजनयद्धिष्ण्यान् वेदोक्तान्विबुधान्बहून्।**
विचरन्विविधान् देशान् भ्रममाणस्तु तत्र वै ।। २१ ।।[०७]

लक्षालङ्कारः- एष त्वजनयद्धिष्ण्यान् इत्यत्र 'धिष्ण्यमेको निवसनम्' इति वजनात् ऋषीणां निवासभूतानाश्रमान् ।

---

(०१)(१) मुक्त्वा; त्यज्य; कृत्वा (for त्यक्त्वा). तत्; च (for तु). (१) साच्छादितः; ०साप्यायितः (for सोत्थापितः). पुरा; तथा (for तदा).

(०२)(१) तस्वा च (for जज्वाल). (२) तेजसा (for तपसा). (अ)प्यायतः; (अ)प्यजितः (for (आ) र्गुप्यायितः). शिखं.

(०३)(१) ऋषि; मुनिः मुनीन्; (अ)थर्षीन् (for ऋषीन्). दृष्ट्वा च निर्भयश्चापि.

(०४)(२) उपाश्रिं; अपा (for अथा). (३) एनं च (for एवैनम्). (४) अपाश्रिं०; सुरादयः (महर्षयः; उपाश्रिं) (for सुरर्षयः).

(०५)(१) (अ)थ सृ; विसृ; (अ)त्र सृ; न्यसृ; संसृ; (अ)नुसृ; (अ)न्वस्य (for त्वसृ०). लोकम् (for लोकान्). अथर्वाणंशिान् (सृजन्; श्रुताः श्रुतान्) लोकान्. (२) आत्मनि, लोक०; (आ)लोच्य (for (आ) लोक्य). पावनं; पावकः; ०पाशकः (for पावकम्). (३) सर्वलोकानाम्. (४)क-घ-उत्ममाथ महार्णवम्, उन्ममज्ज महार्णवात.

(०६)(२) पुनर् (for पूर्वम्). (३) आहृतः (for हूतः).

(०७) (१)ख-एष त्व, एष (for एवं). तु जनयन्; ते जनयद्; त्वजनयन् (for त्वजन). (२) विविधान् (for विबुधान्). (३) विचिन्वन्; सञ्चरन्; विचरद् (for विचरन्). (४) भ्राम्य (for भ्रम). च (for तु).

सिन्धुनदं पञ्चनदं देविकाथ सरस्वती।**
**गङ्गा च शतकुम्भा च सरयूर्गण्डसाह्वया ।। २२ ।।**[०१]

चर्मण्वती मही चैव मेध्या मेधातिथिस्तदा।**
**ताम्रवती वेत्रवती नद्यस्तिस्रोऽथ कौशिकी ।। २३ ।।**[०२]

तमसा नर्मदा चैव नदी गोदावरी तथा।**
**वेणोपवेणा भीमा च वडवा चैव भारत ।। २४ ।।**[०३]

भारती सुप्रयोगा च कावेरी मुर्मुरा तथा।
तुङ्गवेणी(णा) कृष्णवेणी(णा) कपिला शोण एव च ।**
**एता नद्यस्तु धिष्ण्यानां मातरो याः प्रकीर्तिताः ।। २५ ।।**[०४]

अद्भुतस्य प्रिया भार्या तस्य पुत्रो विडूरथः ।**
**यावन्तः पावकाः प्रोक्ताः सोमास्तावन्त एव च ।। २६ ।।**[०५]

**लक्षालङ्कारः- सोमास्तावन्त एव च इत्यत्र सोमाः सोमलताः ।**

---

(०१)(१) सिन्धुवर्जे; नर्वं; सिधुं (धु) नदं (सञ्ज्ञं०); वयं; ०राद्याः; वर्ज्याः (वर्जा); वत्याः; र्यवा; वर्याः (for वर्जं). ०नय (for नद्यो). (२) देविकां च; देवित्राथ; सरस्वतीं०. (३) गङ्गां च. शतकुम्भां; शातकुम्भा. (४) सरयूर् शरयुर्. कुण्डसा०; गण्डका; गन्धसा (for गण्डसा).

(०२) (२) मेधा स्मृति (for मेधा तिथि). तदा(for तथा). (३) इरा होरा० (for ताम्रा). (४) गौतमं (for कौशिकी).

(०३)(१) विपाशा (for तमसा). (२) आदि (for नदी). (३)क-घ-घण्टा, वेण्योपवेण्यौ; वेणोपवेणा; वेण्वापवेण्वा; वेणावेण्यौ च; घण्ट प्रवेणी; पेण्णा प्र; बण्णा प्र (for वेण्णा प्र). विण्णा च मणिभिन्ना च. (४) मद्रगा; वडवा; मरुता; भद्रथाः मैद्रथा मेन्द्रथा (for मेद्रथा).

(०४)(१) भरता (for भारती). भरतस्याप्रयोगा च, सुप्रयोगा च कावेरी. (२)क-सा नदी दुर्मदसक्तथा; ख-स नन्दी सार्जवा तथा; घ-सा नदी नर्मदा तथा, सखरा; सुस्वरा सुपुरा; सुरसा; ० सुप्रजं (घर्घरा); सुप्रजा; सुरता; मुहुरा (for मुर्मुरा). सा नदी मञ्जुरा (दुर्मदा; चार्जुन) तथा. (३) सुवेणा (पेणा); भूवेण्णा; दुवेणा; त्रिवेणा (for कृष्णा च). ०वेणा; ०वर्णा; पेण्णा; ०बण्णा क्य वेण्णा०). तुङ्गवेणा (ण्वा) कृङ्क वेणा (पवा); तुङ्गबिण्णा कृष्णबिण्णा. (४) कपिशा; कथिता; कटमा; कालिमा; कलमा; काशिका; कयिमा (for कपिला). (५) नित्याः (नद्यः). दिष्ट्यानां; धिष्ट्या; धृष्ण्या (for धिष्ण्या). (६) प्रतिष्ठिताः (प्रकीर्तिताः).

(०५)(१) अथ तस्य; अहुतस्य (for अद्भुतस्य). (२) तस्य; मम (for तस्याः). विभूरिति; विभू(दू)रसिः; विद्वरथः; वधूरथः. (४) ग्रहाम् (for सोमास् ). हि; तु (for च).

अत्रेश्चोप्यन्वये जाता ब्रह्मणो मानसाः प्रजाः ।
**अग्निः पुत्रान्स्रष्टुकामस्तानेवात्मन्यधारयत्** **।। २७ ।।**[(०१)]

लक्षालङ्कारः- अग्निपूत्रान् इत्यत्र स्रष्टुकामः ब्रह्मा एतावतामग्निपुत्राणां सञ्चारे जगद्दाहभिया एतानग्निपुत्रान् आत्मनि स्वदेहे अधारयत् अस्तम्भयत् ।

तस्य तद्ब्रह्मणः कायान्निर्हरन्ति हुताशनाः ।। २८ ।।[(02)]

एवमेते महात्मानः कीर्तितास्तेऽग्नयो यथा।**
लक्षालङ्कारः- निर्हरन्ति हुताशना इत्यभ कार्ये सति निर्हरन्ति निर्गच्छन्ति चेत्यर्थः ।
**अप्रमेया यथोत्पन्नाः श्रीमन्तस्तिमिरापहाः** ।। २९ ।।[(०३)]

अद्भुतस्य तु महात्म्यं यथा वेदेषु कीर्तितम्।**
**तादृशं विद्धि सर्वेषामेको ह्येषु हुताशनः** ।। ३० ।।[(०४)]

एक एवैष भगवान्विज्ञेयः प्रथमोऽङ्गिराः ।**
**बहुधा निःसृतः कायाज्ज्योतिष्टोमः क्रतुर्यथा** ।। ३१ ।।[(०५)]

इत्येष वंशः सुमहानग्नीनां कीर्तितो मया।**
**योऽर्चितो विविधैर्मन्त्रैर्हव्यं वहति देहिनाम्** ।। ३२ ।।[(०६)]

---

(०१) (१) चैव (for चापि). (२) ब्रह्मणा; ब्राह्मणो. मानसी (सीः) (for सा). प्रजा (for प्रजाः). (३) अत्रेः; अग्निः (for अत्रिः). स्रष्ट्वकामान् (०कामाः); द्रष्ट्वकामाः (कामः); सुष्ट्वकामान्; स्नुषुवे तान् (for स्रष्टुकामः).
(०२) (१) (अ)वार; (अ)थार; (अ)कार (for (अ)धार). (२) ततस् (for तस्य). तान्; ते; च (for तद्). कार्यान् (for कायान्). (३) निर्दहन्ति; निर्वहन्ति; निरहति; निर्हरेत्त; निर्हरन्त. हुताशः (शि) नः; प्रइ हुताशनान् (त्).
(०३) (१) महाकायाः; त्मानं (for त्मानः). (२) तु (for ते). महानघ (for ऽग्नयो मया). मताः; यथा; तथा (for मया). (३) ख-इत्येष वंशस्सुमहानग्नीनां कीर्तितो मया ।, मेयबलो(for मेया यथो).
(०४)(१) अत्य० द्भुतस्य (for अद्भुतस्य तु). च (for तु). (२) देवे (for वेदे). (३) तद्देशं (for तादृशं). सर्वं त्वम् (for सर्वेषाम्). (४) ह्येषु; ह्येव; ह्येको (for ह्येष).
(०५) (१) एकम्; एष; एवम् (for एक). (२) परमोंगिराः; परमां; प्रथमा० (for प्रथमोऽङ्गिराः). (३) निर्जितः; विस्तृताः; निसृताः (for निःसृतः). कार्याज्; कार्या (for कायान्). (४) ०ष्टोमे; ष्टोमात् (for ०ष्टोमः). तथा (for यथा).
(०६)(३) याचितो; योर्चितो; एधितो; पावको (for पावितो).

अस्मिन् पर्वणि १८२अध्याये ३२३लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि आङ्गिरसोपाख्यानेऽग्निसमुद्भवे त्रिंशोऽध्यायः ।। १८२ ।।

(मार्कण्डेयसमस्यापर्वणि ......ऽध्यायः)

## 03- 04 - 183Adhyaya

# १८३. त्र्यशीत्यधिकशततमो अध्याय ।

१८३ मार्कण्डेयेन युधिष्ठिरं प्रति कुमारोत्पत्तिप्रकारकथनासम्भः ।। १ ।।

देवसेनार्ना नायकसम्पादनाय चिन्तयता इन्द्रेण मानसशैले कस्याश्चित् कन्याया अनलोकनं तस्याः कुळचिकीर्षितादिप्रश्नश्च ।। २ ।।

कन्यया इन्द्रं प्रति स्वस्या दक्षपुत्रीत्वकथनपूर्वकं भर्तुकामनानिवेदनम् ।। ३ ।। इन्द्रेण कन्याया उचितपर्ति प्रार्थितेन ब्रह्मणा कन्याभर्तुरनतिचिरभावित्वकथनपूर्वकं तस्यैव तत्सेनापतीङनवकथम् ।। ४ ।।

सप्तर्षिमखे तत्पत्रीनामलोकनेन क्षुभितमसा अग्निना तासामलाभेल निर्वेदाद्दनं प्रति गमनम् ।। ५ ।। चिरेणाझकामया स्वहया अत्रानसरे सप्तर्शिपत्रीसमानरूपस्वीकारेणाझि नशीकरणनिध्रारणम् ।। ६ ।। देवराजेन केशिदानवाद्देवसेनायाः उद्धारः

### वैशम्पायनः

श्रुत्वेमा धर्मस युक्ता धर्मराजः कथा शुभाम्।**
पुनः पप्रच्छ तमृषिं मार्कण्डेयं तपस्विनम् ।। १ ।।

### युधिष्ठिरः

कुमारस्तु यथा जातो यथा चाग्नेः सुतोऽभवत्।
यथा रुद्राच्च सम्भूतो गङ्गायां कृत्तिकासु च ।

एतदिच्छाम्यहं श्रोतुं कौतूहलमतीव मे ।।* २ ।।

**मार्कण्डेयः**

अग्नीनां विविधा वंशाः कीर्तितास्ते मयानघ।**
शृणु जन्म तु कौरव्य कार्तिकेयस्य धीमतः ।। ३ ।।(०१)

अद्भुतस्याद्भुतं पुत्रं प्रवक्ष्याम्यमितौजसम्।**
जातं ब्रह्मर्षिभार्याभिर्ब्रह्मण्यं कीर्तिवर्धनम् ।। ४ ।।(०२)

लक्षालङ्कारः- अद्भुतस्याद्भुतम् इत्यत्र अद्भुतस्य अद्भुतनामकाग्ने अद्भुतं पुत्रं षण्मुखं सप्तर्षिभार्यासु सप्तर्षिभार्यासमानरूपस्वाहाकृतिषु । अन्यथा अग्नेः परस्त्रीप्रसङ्गात् उत्तरग्रन्थविरोघाच्च ।

देवासुराः पुरा यत्ता विनिघ्नन्तः परस्परम्।**
तत्राजयन्सदा देवान्दानवा घोररूपिणः ।। ५ ।।(०३)

वध्यमानं बलं दृष्ट्वा बहुशस्तैः पुरन्दरः ।**
स सैन्यनायकार्थाय चिन्तामाप भृशं तदा ।। ६ ।।(०४)

**देवसेनां दानवैर्हि भग्नां दृष्ट्वा महाबलः ।****

**पालयेद्वीर्यमाश्रिय स ज्ञेयः पुरुषो मया।**(०५)

स शैलं मानसं गत्वा ध्यायन्नर्थमिमं भृशम्।**

---

(०१) (१/२) विविधा वंशाः कीर्तितास्ते.; (३) च (for तु).; जन्म त्वं शृणु कौरव्य.

(०२)(१) कर्म; पश्य (for पुत्रं).; (२) (अ )मितौजसः; महौ (०तौ)जसः, (३) ब्रह्मर्षि० (for सप्तर्षि).;भार्यासुः; भार्यायां (for ०भार्याभिर्).

(०३)(१) यत्नाद् (for यत्ता).; (२) विनि०घ्नन्ति; व्यनिघ्रन्त.; (३) यत्रा(for तत्रा).;सर्व; तदा (for सदा).; (४) ०दर्शिनः (for ०रूपिणः).

(०४) (१) लब्ध्वा (for दृष्ट्वा).; (२) बहुभिस्तैः; बहुशस्त्रैः; भीषणास्त्रैः (for बहुशस्तैः).; (३) स (for स्वा).; (४) चिंतां स मनसा ( ससनुसं).;वहत.

(०५) (१) हि; यैर् (for यो).; (२) हतां (for भग्नां).; (४) सञ्ज्ञेयः(for स ज्ञेयः). पुरुषोत्तमः.

शुश्रावार्तस्वरं घोरमथ मुक्तं स्त्रिया तदा ।। ७ ।।(०१)

लक्षालङ्कारः- शुश्रावार्तस्वरम् इत्यत्र दैत्यभयात् आर्तस्वरम् ।

**केशी**

अभिधावतु मां कश्चित्पुरुषस्त्रातु चैव ह ।**

पतिं च मे प्रदिशतु स्वयं वा पतिरस्तु मे ।। ८ ।।(०२)

**मार्कण्डेयः**

पुरन्दरस्तु तामाह मा भैर्नास्ति भयं तव ।। ९ ।।

एवमुक्त्वा ततोऽपश्यत्केशिनं स्थितमग्रतः ।

किरीटिनं गदापाणिं धातुमन्तमिवाचलम्।**

हस्ते गृहीत्वा कन्यां तामथैनं वासवोऽब्रवीत् ।। १० ।।(०३)

लक्षालङ्कारः- केशिनं स्थितमग्रत इत्यत्र केशिनं केशिनामकदैत्यम् ।

*अधिकपाठः

केशिन्ननिच्छतीं कन्यां विजने वरयास्व माम्।

मयि शास्तरि दुषानां वज्रहस्ते मदोदिते।

**इन्द्रः**

अनार्यकर्मन्कस्मात्त्वमिमां कन्यां जिहीर्षसि।**

वज्रिणं मां विजानीहि विरमास्याः प्रबाधनात् ।। ११ ।।(०४)

---

(०१)(१)ख-देवसेनां दानवैर्यो हतां दृष्ट्वा महाबलः ।, पालयेद्वीर्यमाश्रित्य ज्ञेयः पुरुणो मया ।। सशैलमानस; सशैलं काञ्चनं. (२) भृशं; इदं; अमुं (for इमं).; (२) तदा (for भृशम्).; (४) मया सूक्तं; अर्थ०युक्तं; अथो मुक्तं. तदा स्त्रिया; स्त्रिया मुदा.

(०२) (१) अभिधावत; अभिभूयास्तु; मां (for मा).; (२) त्रातु०मेव ह (हि); त्रातुमर्हति.; हि; च(for ह).; (३) प्रदृश्यन्तु; प्रादिशतु. (४) श्रियं (forस्वयं).; ते (for मे).

(०३) (२) नद्धम् (for मन्तम्).; (३) कन्यां तां (४) (for (ए)नां).; (for (ए)नं).

(०४)(१) कंर्म; कंर्मा (for कंर्मन्).;कृत्वा त्वं; अस्माकं (for कस्मात्त्वं).; (३) मा (for मां).; ( अ) भिजा०नीहि.; (४) अस्यां; अस्मात् (for अस्याः). प्रमाथनात्; ०माथिनः (for ०बाधनात्).

**केशी**

**विसृजस्व त्वमेवैनां शक्रैषा प्रार्थिता मया।****
**क्षमं ते जीवतो गन्तुं स्वपुरं पाकशासन ।। १२ ।।(०१)**

**मार्कण्डेयः**

**एवमुक्त्वा गदां केशी चिक्षेपेन्द्रवधाय वै।****
**तामापतन्तीं चिच्छेद मध्ये वज्रेण वासवः ।। १३ ।।(०२)**

**अथास्य शैलशिखरं केशी क्रुद्धो व्यवासृजत् ।। १४ ।।**

**तदा पतन्तं सम्प्रेक्ष्य शैलशृङ्गं शतक्रतुः ।****
**बिभेद राजन्वज्रेण भुवि तन्निपपात ह ।। १५।।(०३)**

***अधिकपाठः**

**महामेघप्रतीकाशं चलत्पावकसङ्कुलम्।(०४)**

**पतता तु तदा केशी तेन शृङ्गेण ताडितः ।****
**हित्वा कन्यां महाभागां प्राद्रवद्भृशपीडितः ।। १६ ।।(०५)**

**अपयातेऽसुरे तस्मिंस्तां कन्यां वासवोऽब्रवीत्।****

**वासवः**

**कासि कस्यासि किञ्चेह कुरुषे त्वं शुभानने ।। १७ ।।(०६)**

**कन्योवाच ।**

---

(०१)(१) कैशिजाशु (for विसृजस्व).; (ए)तां(for (ए)नां). (२) अथैनं वासवोब्रवीत्.; (३) क्षेमं ते; प्रेक्षन्ते (for क्षमं ते).;जीविसुं; जीवता; नों (for तों).; (४) स्वपुरे.

(०२)(२) च (for वै).;चिक्षेपेन्द्राय वै तदा.

(०३)(२) क्रुद्धःकेशी; ह्यवासृजत्;अपासृं.;

(०४)(३) तम् (for तद्).; चिच्छेद; वेगेन; वज्रेण (for सम्प्रेक्ष्य).; (५) वेगेन; (for वज्रेण).; (६) च (for ह).

(०५) (१/२) पपाताशु (for पतता तु).; तेन केशी; (४) भृशताडितः; भयपीडितः.

(०६) (३) किं त्वेह.; (४) वरां (for शुभां).

अहं प्रजापतेः कन्या देवसेना इति विश्रुता।**
भगिनी  मे दैत्यसेना मे सा पूर्वं केशिना हृता    ।। १८ ।।[०१]

लक्षालङ्कारः- अहं प्रजापतेः कन्या इत्यत्र प्रजापतेः दक्षप्रजापतेः ।

सदैवावां भगिन्यौ तु सखीभिः सह मानसम्।**
आगच्छावेह रत्यर्थमनुज्ञाय प्रजापतिम्    ।। १९ ।।[०२]

नित्यं चावां प्रार्थयते हर्तुं केशी महासुरः ।**
इच्छत्येनं दैत्यसेना न चाहं पाकशासन    ।। २० ।।[०३]

सा हृतानेन भगवन्मुक्ताहं त्वद्बलेन तु।**
त्वया देवेन्द्र निर्दिष्टं पतिमिच्छामि दुर्जयम्    ।। २१ ।।[०४]

**इन्द्रः**

मम मातृष्वसेयी त्व माता दाक्षायणी मम।**
आख्यातुं त्वहमिच्छामि स्वयमात्मबलं त्वया    ।। २२ ।।[०५]

लक्षालङ्कारः- आख्यातं त्वहमिच्छामि इत्यत्र इच्छामि श्रोतुमिच्छामि ।

**कन्या**

अबलाहं महाबाहो पतिस्तु बलवान्मम।**
वरदानात्पितुर्भावी सुरासुरनमस्कृतः    ।। २३ ।।[०६]

**इन्द्रः**

---

(०१) (१) अपां (for प्रजां).; (३) मे दैत्यसेना; (४) या (for सा).; हता (for हृता).

(०२)(१) सदैवावां.; (२) सखिभिः; मानद; सें; सं (for सम्).; (३) आगच्छाव (त्येश्छा); विहा राम.

(०३) (१) चैनां; वाचा; त्वावां (for चावां).; (२) देशे देशे; केशी हतुं; गन्तुं केशी; बंलः; सुंर (for सुरः).; (३) ऐच्छदे (तें) नं (for इच्छत्येनं).; (४) चाहं (for त्वहं).

(०४) (१) (अ)नेन (for तेन); (३) पुरा (for त्वया).; (४) दुर्लभं (for दुर्जयम्).

(०५) (१) ० सेव (for ०सेया).; (२) तथा; च मे (for मम).; (३) आख्यातुं.

(०६)(१) अलभ्या० (for अबला०).; भगा(for ०बाहो).

कीदृशं तु बलं देवि पत्युस्तव भविष्यति।**
**एतदिच्छाम्यहं श्रोतुं तव वाक्यमनिन्दिते ।। २४ ।।**[०१]

**कन्या**

**देवदानवयक्षाणां किन्नरोरगरक्षसाम्।****
**जेता यो दुष्टदैत्यानां महावीर्यो महाबलः ।। २५ ।।**[०२]

यस्तु सर्वाणि भूतानि त्वया सह विजेष्यति।**
**स हि मे भविता भर्ता ब्रह्मण्यः कीर्तिवर्धनः ।। २६ ।।**[०३]

**मार्कण्डेयः**

इन्द्रस्तस्या वचः श्रुत्वा दुःखितोऽचिन्तयद्भृशम्।**
**अस्या देव्याः पतिर्नास्ति यादृशं सम्प्रभाषते ।। २७ ।।**[०४]

अथापश्यत्स उदये भास्करं भास्करद्युतिः ।**
**सोमं चैव महाभागं विशमानं दिवाकरम् ।। २८ ।।**[०५]

अमावास्यां प्रवृत्तायां मुहूर्ते रौद्र एव तु।**
**देवासुरं च सङ्ग्रामं सोऽपश्यदुदये गिरौ ।। २९ ।।**[०६]

लोहितैश्च घनैर्युक्तां पूर्वां सन्ध्यां शतक्रतुः ।**
**अपश्यल्लोहितोदं च भगवान्वरुणालयम् ।। ३० ।।**[०७]

---

(०१) (१) तु; च (for वै).; (४) वाक्याद् (for वाक्यम्).
(०२) (२) गन्धर्वो (for किंनरो); (३)क-ख-घ-दुष्टानां, यो (for स).;देवो दुष्टानां; दुष्टदैत्यानां (दृप्तानां; दैत्यानां); (for दृष्टो दुष्टानां).;जेता सदैव दुष्टानां.
(०३) (१) यःस; स तु (for यस्तु); य सर्वभूतभूतानि; यः सर्वाणि च भूतानि. (२) सार्धं (for सह).; विजेष्यते
(०४)(२) ततः (for भृशम्).; (४) सा प्रभां समभा० (for सम्प्रभा०).; यादृशेमं प्रभा०; यादृशः; सम्भविष्यति.
(०५)(१) मतये (for उदये).; (३) महाभाग; महात्मानं.; (४) प्रविशन्तं (for विश०).
(०६) (१) अमावस्यां. च सवृत्तां (०त्त०); प्रवृत्तायां (for सम्प्रवृत्तं).; (२) ते रौद्र एव तु (च).; (३) तु (for च).; सङ्गामे.
(०७)(१) लोहितां च.; गुणै०; परै० (for घनै०); (२) पूर्वसन्ध्यां.; (४) मघ० (for भग०).; वरुणोदयं;

भृगुभिश्चाङ्गिरोभ्यश्च हुतं मन्त्रैः पृथग्विधैः ।**
**हव्यं गृहीत्वा वह्निं च प्रविशन्तं दिवाकरम् ।। ३१ ।।**[०१]

पर्व चैव चतुर्विंशत्तदा सूर्यमुपस्थितम्।**
**तथा सूर्यं वह्निगतं सोमं सूर्यगतं च तम् ।। ३२ ।।**[०२]

लक्षालङ्कारः- अमावास्याख्याद्वादशपर्वाणि, चन्द्रस्य प्रियाणि पौर्णमास्याख्याद्वादशपर्वाणि, एवं चतुर्विंशत्, चतुर्विंशदात्मकं पर्वेत्यर्थः ।

समालोक्यैकतामेव शशिनो भास्करस्य च ।**
**समवायं तु तं रौद्रं दृष्ट्वा शक्रोऽन्वचिन्तयत् ।। ३३ ।।**[०३]

*अधिकपाठः

सूर्याचन्द्रमसोर्घोरं दृश्यते परिवेषणम्।
एतस्मिन्नेव रात्र्यन्ते महद्युद्धं तु शंसति।
सरित्सिन्धुरपीयं तु प्रत्यसृग्वाहिनी भृशम्।
शृगालिन्यग्निवक्त्रा च प्रत्यादित्यं विराविणी।

एष रौद्रश्च सङ्घातो महान्युक्तश्च तेजसा।
**सोमस्य वह्निसूर्याभ्यामद्भुतोऽयं समागमः ** ।। ३४ ।।** [०४]

जनयेद्यं सुतं सोमः सोऽस्या देव्याः पतिर्भवेत्।[०५]

---

०णालयात.

(०१)(३) हविर् (for हव्यं); गृहाय हव्यं (for हव्यं गृह्णीत्वा).; हव्यं (for वह्निं). (४) प्रविशन्ति; प्रविशश्च (शन्तं).

(०२) (१) सर्व चैव; सर्वदैवं; सर्वदैव; पर्वतैव; पर्व चैवं.; चतुर्विंशत. (३) ततो; तदा ) क्य तथा).; धर्मफलं रौद्रं (रात्रौ);धर्मबलं रौद्रं; सूर्य वह्निगतं (धर्मं गतं रौद्रं). (४) सोम(for सोमं).;तत्; सः; यत् (for तम्).

(०३) (१) एवं; एकं (for एव).; (३) तं रात्रौ; रौद्रं तद् (for तं रौद्रं).; (४) (अ)न्ध (वि) चिन्तं; (अ) प्य०चितं (for व्यचिन्त).

(०४) (२)उक्तं; मुक्तं (for युक्तं).; (३) सोम० सूर्य०; वह्नि० सूर्य (४) अद्भुतोपि; तस्तु (for तोऽयं); यः; स्वं (for यं).

(०५)(१) (ऽ)सौ (for ऽस्या).

अग्निश्चैतैर्गुणैर्युक्तः सर्वैरग्निश्च देवता ॥ ३५ ॥

एष चेज्जनयेद्गर्भं सोऽस्या देव्याः पतिर्भवेत् ॥ ३६ ॥[०१]

एवं सञ्चिन्त्य भगवान्ब्रह्मलोकं तदा गतः
गृहीत्वा देवसेनां तामवदत्स पितामहम्।**
उवाच चास्या देव्यास्त्वं साधुशूरं पतिं दिश ॥ ३७ ॥[०२]

**ब्रह्मा**

मयैतच्चिन्तितं कार्यं त्वया दानवसूदन।**
तथा च भविता गर्भो बलवानुरुविक्रमः ॥ ३८ ॥[०३]

स भविष्यति सेनानीस्त्वया सह शतक्रतो।**
अस्या देव्याः पतिश्चैव स भविष्यति वीर्यवान् ॥ ३९ ॥[०४]

**मार्कण्डेयः**

एतच्छ्रुत्वा नमस्तस्मै कृत्वासौ सह कन्यया।
तत्राभ्यगच्छद्देवेन्द्रो यत्र देवर्षयोऽभवन्।** ॥ ४० ॥

वसिष्ठप्रमुखा मुख्या विप्रेन्द्रा सुमहाबलाः ।[०५]
भागार्थं तपसो धातुं तेषां सोमं तथाध्वरे ॥ ४१ ॥ [०६]

---

(०१) (१)अग्निश्च तैर्; अग्निश्चैभि्; अथानेरकैर्. गुणैः; सर्वैः; गुणैरग्निः; गुणानग्निः (for गुणैर्युक्तः).; (२) सर्वैरेताश्च देवताः; अ (ह्य) ग्निः; सर्वाश्च ( च सर्व).; देवताः० (३) वै; यं (for चेज्).

(०२) (१) मघं (forभगं).; (२) गतः प्रभुः; गतस्तदा (for तदा गतः); (४) अवदत्स (तं); अविन्दत्स; अवन्दत; ववन्दे स (च).; (५) त्वं साधु; देव त्वं (for देव्यास्त्वं).; (६) देव्याः (for साधु).

(०३)(१) मयैं; यदैं (for यथैं).;सम्भं (for स भं).; भर्ता (for गर्भो).; (४) इन्द्र; गुरु०; उग्र० (for उरु०).

(०४)(१) भविष्यति च (for स भवि०); (३) चार्हः (for चैव).; (४) भविष्यति स; सम्भविष्यति.

(०५) (२) स (अ)सौ).; सहकन्यकः; (४) ब्रह्मं; सप्तं (for देवं).; (५) वशिष्ठं. सर्वे; विप्रा (for मुख्या).; (६) तु; स(for सु).;महाबलाः (महौजसः);प्रम्भाः (for व्रन्ताः).

(०६)(१) भगार्थं; भों (भां).;तपसोपार्थं; ०पातुं; तपसोधातुं (०धान्तं) (for ०पात्तं).; (२) सोमसू तदां (for तथा०).; (अ)परे (for (अ)ध्वरे).;

पिपासवो ययुर्देवाः शतक्रतुपुरोगमाः ।। ४२ ।।[०१]

इष्टिं कृत्वा यथान्यायं सुसमिद्धे हुताशने।**
जुहुवुस्ते महात्मानो हव्यं सर्वदिवौकसाम् ।। ४३ ।।[०२]

समाहूतो हुतवहः सोऽद्भुतः सूर्यमण्डलात् ।
विनिःसृत्य ययौ वह्निर्वाग्यतो विधिवत्प्रभुः ** ।। ४४ ।।

आगम्याहवनीयं वै तैर्द्विजैर्मन्त्रतो हुतम्।[०३]
स तत्र विविधं हव्यं प्रतिगृह्य हुताशनः ।। ४५ ।।[०४]

ऋषिभ्यो भरतश्रेष्ठ प्रायच्छत दिवौकसाम्।[०५]
निष्क्रामंश्चाप्यपश्यत्स पत्नीस्तेषां महात्मनाम् ।। ४६ ।।

लक्षालङ्कारः- ऋषिभ्यो भरतश्रेष्ठ इत्यत्र ऋषिभ्यः सप्तर्षिभ्यः हव्यं प्रतिगृह्य दिवौकसां प्रायच्छतेति योजना ।

स्वेष्वासनेषूपविष्टाः स्वपन्तीश्च तथा सुखम् ।[०६]

दृष्ट्वा.. श्रमेषूपविष्टास् स्नायन्तीश्च पतिव्रताः ।
रुक्मवेदिनिभास्तास्तु चन्द्रलेखा इवामलाः ।। ४७ ।।

---

(०१)(१) पिपासया.(अ)भ्य (० प्य) युर्; (for ययुर्).

(०२)(१) इष्टं (for इष्टिं),; न्याय्यं (for न्यायं); (२) सुसमृद्धे; मिन्द्ध. (४) सर्वे; सर्वं (for सर्व).; दिवौकसः.

(०३)(१) सोपाहूतो; समाहृतो (हून्तो); हिन्तो. (२) सोद्भूतः (for सोऽद्भुतः). (३) ययौ (for (आ) ययौ).;स्मृत्य विवि (४) संशिो; पार्श्र्वं; पश्यं; सूर्यं; शाश्वं (for वाग्यं).; (५) अगम्य(for आगम्य). (आ)हवनीये स्वे. द्विजैर्मत्रहुतो हुतं; तै समस्तं हुतं हविः.

(०४) (१) स तत्र विवि सततं; स तु तं (for स तत्र).;विहितं; विधिवत् (for विविधं).;द्रव्यं (for हव्यं).;

(०५)(१) मुनिं (for ऋषि०).; (२) प्रायात्स्थानाद्; प्रादित्सत; प्रयच्छति (for०प्रायच्छत).

(०६)(१) (अ)भ्यगष्ठछत्स; (अ)भ्यगच्छन्त; (अ)भ्यपश्यत्स; तास्तु गच्छन्तीः (for (अ)प्यपश्यत्स).; (२) द्विजां (for महां).;स्वेष्वासनेषु;श्रेष्ठाश्रमें; श्रेष्ठासनें; दृष्ट्वाश्रमें वसतीः (for (उ)पविष्यः). स्वस्वाश्रमोपविष्टास्ताः. (४) पतिभिश्च; स्नाताश्चैव; स्वपा (पं)तीश्च; स्नातीश्चैव;सुखासुखं; तथा सुखं; सुखावहं; पतिव्रताः.

हुताशनार्चिप्रतिमाः सर्वास्तारा इवाद्भुताः ।[०१]

स तत्र तेन मनसा बभूव क्षुभितेन्द्रियः ।**
**पत्नीर्दृष्ट्वा द्विजेन्द्राणां वह्निः कामवशं ययौ ॥ ४८ ॥**[०२]

भूयः सञ्चिन्तयामास न न्याय्यं क्षुभितो ह्यहम्।**
**साध्व्यः पत्न्यो द्विजेन्द्राणामकामाः कामयाम्यहम् ॥ ४९ ॥**[०३]

नैताः शक्या मया द्रष्टुं स्प्रष्टुं वाप्यनिमित्ततः ।**
**गार्हपत्यं समाविश्य तस्मात्पश्याम्यभीक्ष्णशः ॥ ५० ॥**[०४]

**मार्कण्डेयः**

**स स्पृशन्निव सर्वास्ताः शिखाभिः काञ्चनप्रभाः ।****
**पश्यमानश्च मुमुदे गार्हपत्यं समाश्रिः ॥ ५१ ॥**[०५]

निरुष्य तत्र सुचिरमेवं वह्निर्वशं गतः ।**
**मनस्तासु विनिक्षिप्य कामयानो वराङ्गनाः ॥ ५२ ॥**[०६]

कामसन्तप्तहृदयो देहत्यागविनिश्चितः ।**
**अलाभे ब्राह्मणस्त्रीणामग्निर्वनमुपागमत्।**[०७]

---

(०१) (१) कुश (for ख्यम).; वेन्दिं (for वेन्दिं); तत्र (for तास्तु).; (२) रेखा(for ०लेस्वा).; (३) चिंप्रतिमाः (४) (उ)द्गताः(for (अ)द्गताः).

(०२)(१)ख-हुताशनार्चिःप्रतिमाः समांस्तारा इवाद्भुताः, सततोद्गतेन मं; स तत्र तेन मं.; (३) शक्या मना द्रष्टुं स्प्रष्टुं ; (४) वंशं गतः; वंशातुरः.

(०३)(१) भूयःसं (स)चिन्तं. (२) ०तो ह्यहं; ० तस्य मे (for० तोऽस्मि यत्). (३) साध्व्यः (सत्यः).पत्नयो. (४) अकाम्याः (for ०माः).

(०४) (१) न ताः (for नैताः). (२) चा० (for वा०). निमि० (for (अ)निमि०); (३) ०सृत्य; ० श्यि (for ०विश्य).

(०५) मार्कण्डेय उ०. (२) ०प्रभः (for ०प्रभाः).; (३) स (for च).

(०६)(२) ततो (for एवं).; वनं (for वशं).; (३) विनिःक्षिप्य; विनिष्क्रम्य.

(०७) (२) त्याग०; न्यासे; न्यास (for त्यागे);) विनिश्चितः; सुनिश्चलः (४) गमत्; ० शिः (for ०गतः).

स्वाहा तं दक्षदुहिता प्रथमं कामयत्तदा ।। ५३ ।।(०१)

सा तस्य चिद्रमन्वैच्छच्चिरात्प्रभृति भामिनी।**
अप्रमत्तस्य देवस्य न च पश्यत्यनिन्दिता ।। ५४ ।।(०२)

लक्षालङ्कारः- सा तस्य च्छिद्रम् इत्यत्र च्छिद्रम् अवकाशम् ।

सा तं ज्ञात्वा यथावत्तु वह्निं वनमुपागतम्।**
तत्त्वतः कामसन्तप्तं चिन्तयामास भाविनी ।। ५५ ।।(०३)

अहं सप्तर्षिपत्नीनां कृत्वा रूपाणि पावकम्
कामयिष्यामि कामार्ता तासां रूपेण मोहितम् ।। ५६ ।।

एवं कृते प्रीतिरस्य कामावाप्तिश्च मे भवेत् ।। ५७ ।।(०४)

अस्मिन् पर्वणि १८३अध्याये ५७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि
मार्कण्डेयसमास्यापर्वणि आङ्गिरसोपाख्याने स्कन्दोत्पत्तौ एकत्रिंशोऽध्यायः ।। १८३ ।।

(मार्कण्डेयसमस्यापर्वणि ......ऽध्यायः)

## 03- 04 - 184Adhyaya

# १८४. चतुरशीत्यधिकशततमोऽध्यायः

---

(०१)(२) प्रथमा; भार्या सा (for प्रथमं).;कामयत्यलं; ०यत्फलं; ०येत्फलं० (for यत्तदा).

(०२) (१) तत्र (for तस्य).;अन्वि० (for अन्वै० ).; (२) भाविनी;भारत (for भामिनी).; (३) न च (चा); पश्यत्य०; न च पश्यद०

(०३)(१) यथा वक्तुं; तथा सुभ्रूर्; यथावृत्तं (for ०वत्तु). (३) यत्नतः; सा तत (for तत्त्व०); (४) भाविनी (for ०मि०).

(०४) (३) रम० (for काम०).; कामार्ता. (५) कामस्याप्ति० (for कामावाप्ति०).

**स्वहया अरुन्धतीवर्ज सप्तर्षिपत्रीसारूप्येणाग्निना सतह रमणम् ।। १ ।। ततो गारुड-रूपस्वीकारेणाग्निरेतसां श्वेतपर्नतस्थकाञ्चनकुण्डे प्रक्षेपणम् ।। २ ।। स्कन्नात्तद्रेतसः षण्मुखस्य संभवः ।। ३ ।। ततस्तेन बाणैः क्रौञ्चगिरिविदारणपूर्वकं शक्तया श्वेतगिरिशिखरविभेदनम् ।। ४ ।। महर्षिपत्नीनां मध्ये षण्णां रूपाणि धृत्वा स्वाहाया अग्निना सह समागमः स्कन्दस्योत्पत्तिस्तत्कर्तृकं क्रौञ्चपर्वतविदारणं च**

**मार्कण्डेयः**

**शिवा भार्या त्वङ्गिरसः शीलरूपगुणान्विता।**
**तस्याः सा प्रथमं रूपं कृत्वा देवी जनाधिप ****
**जगाम पावकाभ्याशं तं चोवाच वराङ्गना ।। १ ।।**[०१]

**शिवः**

**ममाग्रे कामसन्तप्तां त्वं कामयितुमर्हसि।** ।। २ ।।**

**करिष्यसि न चेदेवं मृतां मामुपधारय ।**[०२]
**तवाप्यधर्मः सुमहान्भविता वै हुताशन ।। ३ ।।**

**अहमङ्गिरसो भार्या शिवा नाम हुताशन।**
**शिष्टाभिः प्रहिता प्राप्ता मन्त्रयित्वा विनिश्चयम् ।। ४ ।।**[०३]

**अग्निः**

**कथं मां त्वं विजानीषे कामार्तमितराः कथम्।****
**यास्त्वया कीर्तिताः सर्वाः सप्तर्षीणां प्रियाः स्त्रियः ।। ५ ।।**[०४]

---

(०१) (२) लोल; शिव (for शील ); समन्विता (for गुणान्विता ); (३) तत् (for सा ); (अ)प्रतिमं; प्रतिमं (for प्रथमं ); रूपं कृत्वा (४), (५) भ्यासं (for भ्याशं ); (६) तं प्रोवाच; उवाच च (for तं चोवाच ),

(०२) (१) कामसम्पन्नां (३) न करिष्यसि; करिष्यामि न; न करिष्यामि, न चेत्करिष्यसे देव; (४) मां मृताम्,

(०३)(३) श्लिष्टाभिः; सर्वां; ज्ञातिं; शिष्टा (for सखीं ); प्रहिता (for स ),

(०४)(१) त्वं मां; विजानासि (for नीषे ); (४) वशाः (for प्रियाः ),

**शिवा**

अस्माकं त्वं प्रियो नित्यं बिभीमस्तु वयं तव ।**
त्वच्चित्तमिङ्गितैर्ज्ञात्वा प्रेषितास्मि तवान्तिकम्   ।। ६ ।।(०१)

मैथुनायेह सम्प्राप्ता कामं प्राप्तं द्रुतं च।

*अधिकपाठः

जामयो मां प्रतीक्षन्ते गमिष्यामि हुताशन।
उपयन्तुं महावीर्य पूर्वमेव त्वमर्हसि   ।। ७ ।।(०२)

**मार्कण्डेयः**

ततोऽग्निरुपयेमे तां शिवां प्रीतिमुदायुतः ।**
प्रीत्या देवी समायुक्ता शुक्रं जग्राह पाणिना   ।। ८ ।।(०३)

अचिन्तयन्ममेदं ये रूपं द्रक्ष्यन्ति कानने।**
ते ब्राह्मणीनामनृतं दोषं वक्ष्यन्ति पावकम्   ।। ९ ।।(०४)

तस्मादेतद्रक्ष्यमाणा गरुडी सम्भवाम्यहम्।**
वनान्निर्गमनं चैव सुखं मम भविष्यति   ।। १० ।।(०५)

**मार्कण्डेयः**

**सुपर्णी सा तदा भूत्वा निर्जगाम महावनात्।**

---

(०१)(२) बिभेम; बिभ्यामम् ; (for बिभीमस् ); (३) त्विगितै )(for इङ्गितै ),
(०२)(१) (ए)व; (for (इ)ह); ( सु ); प्राप्तां; तुष्टा; तप्ता, (२) कामात् (for कामं ); वर (for चर ), कामाच्चैव द्रुतं ( च्चोपद्रुतां ); च मां ( त्विमां ), (३) यातरि; जामयो; यात्स्वन्या; (for मातरो),
(०३) (२) प्रति; प्रीतो; प्रीतां (for प्रीति ); मुदान्वितः शिवां प्रीत उ; ( प्रीतिमु ); दावहत् ( हरत् ); (३) क-ख-घ-देवी च, समायुक्ता (for च सं ); प्रीत्या ( ता ); च देवी संयुक्ता (४) युक्तं शुक् (for शुक्रं );
(०४) (१) चिचरन्त्या; व्यचिन्तयन्; साचित (for अचिन्त ); मामकं; मदीयं(for ममेदं ); वै (for ये ); (२) पश्यन्ति (for द्रक्ष्यन्ति), केचन (for कानने ); (३) अहिता; अहितं; प्रकृतं (for अनृतं ); (४) दक्ष्यन्ति (for व ); पावकं ( कः क ); कात्
(०५)(१) त्वेतद् (for एतद् ); रक्षणाय; रक्षमाणा, (४) चैव (for मम ),

**अपश्यत्पर्वतं श्वेतं शरस्तम्बैः सुसंवृतम्** ।। ११ ।।[०१]

**दृष्टीविषैः सप्तशीर्षैर्गुप्तं भोगिभिरद्भुतैः ।**
**रक्षोभिश्च पिशाचैश्च रौद्रैर्भूतगणैस्तथा**** ।। १२ ।।

**राक्षसीभिश्च सम्पूर्णमनेकैश्च मृगद्विजैः ।**[०२]
**नदीप्रस्रवणोपेतं नानातरुसमाचितम्।*** ।। १३ ।।

सा तत्र सहसा गत्वा शैलपृष्ठं सुदुर्गमम्।**
**प्राक्षिपत्काञ्चने कुण्डे शुक्रं सा त्वरिता शुभा** ।। १४ ।।[०३]

**सप्तानामपि सा देवी सप्तर्षीणां महात्मनाम्।**
**पत्नीसरूपतां कृत्वा कामयामास पावकम्** ।। १५ ।।[०४]

दिव्यरूपमरुन्धत्याः कर्तुं न शकितं तया।**
**तस्यास्तपः प्रभावेण भर्तृशुश्रूषणेन च** ।। १६ ।।[०५]

षट्कृत्वस्तत्तु निक्षिप्तमग्ने रेतः कुरूत्तम।**
**तस्मिन्कुण्डे प्रतिपदि कामिन्या स्वाहया तदा** ।। १७ ।।[०६]

**तत्स्कन्नं तेजसा तत्र संवृतं जनयत्सुतम्।****

---

(०१) (१) ततो) (for तदा ); (२) ततो) (for महा ); निर्गत्य ( म्य ); महतो वनात् -वनतो महत् )
(३) सर्वतः (for पर्वतं ),

(०२) (१) दंष्ट्राविषैः, सप्तशीर्षैर्दृष्टिविषैर् (२) अद्भुतं; उद्धतैः (for अद्भुतैः );
(४) गुप्तं दुष्टैद् (for रौद्रैद् ), (५) सङ्कीर्णम् (for सम्पूर्णम् ),

(०३) (२) शृङ्ग (for पृष्ठं ); (३) कुजे; भाण्डे (for कुण्डे ), (४) शुक्लं (for शुक्रं ); सत्वरिता; सन्त्व; सुत्व, शुभा (for सती ),

(०४) (१) सप्ता (for शिष्टा ); देवीनां (for सा देवी ); (३) पत्नीनां रूपकं कृत्वा, (४) रम (for काम ),

(०५)(१) दिव्यं (for दिव्य ); (२) शक्यते; शकितुं (for शकितं ), (३)अस्या (for तस्या ), प्रभा वेन, (४) भर्तुः (for भर्तृ ),

(०६)(१) तत्र (for तत्तु ); निक्षिप्तम्; (२) अग्नि (for अग्ने ); द्वह (for त्तम ); (३) प्रक्षिपन्त्या; (for प्रतिपदि ); (४) कृतं; तथा; तया; सह (for तदा ),

**ऋषिभिः पूजितं स्कन्नमनयत्स्कन्दतां ततः** ॥ १८ ॥[०१]

षट्शिरा द्विगुण श्रोत्रो द्वादशाक्षिभुजक्रमः ।**
**एकग्रीवैकजठरः कुमारः समपद्यत** ॥ १९ ॥[०२]

द्वितीयायामभिव्यक्तस्तृतीयायां शिशुर्बभौ।**
**अङ्गप्रत्यङ्गसम्भूतश्चतुर्थ्यामभवद्गुहः** ॥ २० ॥[०३]

लोहिताभ्रेण महता संवृतः सह विद्युता।**
**लोहिताभ्रे सुमहति भाति सूर्य इवोदितः** ॥ २१ ॥[०४]

गृहीतं तु धनुस्तेन विपुलं लोमहर्षणम्।**
**न्यस्तं यत्त्रिपुरघ्नेन सुरारि विनिकृन्तनम्** ॥ २२ ॥[०५]

तद्गृहीत्वा धनुः श्रेष्ठं ननाद बलवांस्तदा।**
**सम्मोहयन्निवेमान्स त्रींल्लोकान्सचराचरान्** ॥ २३ ॥[०६]

तस्य तं निनदं श्रुत्वा महामेघौघनिःस्वनम्।
**उत्पेततुर्महानागौ चित्रश्चैरावतश्च ह** ॥ २४ ॥ (07)

---

(०१)(१) रेतसां; तेजसां (for तेजसा ); तस्य (for तत्र ); (२) संवृतं; भूतं (for भृतं ); त्वसृजत् ; (for जनयत् ); (३) स्कन्दम् (for स्कन्नम्); (४) जनयत् अगमत्; मनसा (for अनयत् ); तु ( नु ) तत्; गतं; सुतं; नु यत् (for ततः),
(०२) (३) च (for तु ); एकग्रीवैकजठरः,
(०३)(१) अपि व्यक्तम्; अभिव्यक्तिसू , (३) अथ (for अङ्ग ); सम्पूर्णः (for सम्भूतः ); (४) गुरुः (for गुहः ),
(०४) (२) स सवि द्युता; स विदियुते (for सह वि ); विश्रुता सह संवृतः, (३) लोहिताभ्रैः, भ्रेषु महति; भ्रेण सुमहान्,
(०५)(२)बहुलं (for विपुलं ); रोमं (for लोम ); (४) पुरारि (for सुरारिं ); सु ( पु ); रारातिनिकृ; सुरारिविनिवर्तनं; तत्सुरात्रनिकृ०,
(०६)(२)ननन्द; ननर्द (for ननाद ); बलवत्तरं; भगवांस्तदा; बलवत्तदा, (३) स मोह इमान्सर्वान्; इमालोकान् (for इवेमान्स ); (४) लोकांस्त्रीन्; गुहस्वीन्,
(०७)(१)तस्य सं; स तस्य (for तस्य तं ); (२) महामेघोदधिप्रभं ( स्वनं ),

तावापतन्तौ सम्प्रेक्ष्य स बलोऽर्कसमद्युतिः
**द्वाभ्यां गृहीत्वा पाणिभ्यां शक्तिं चान्येन पाणिना**** ।। २५ ।।

अपरेणाग्निदायादस्ताम्रचूडं भुजेन सः ।[०१]
**महाकायमुपश्लिष्टं कुक्कुटं बलिनां वरम्।।**
**गृहीत्वा व्यनदद्भीमं चिक्रीड च महाभुजः** ।। २६ ।।[०२]

द्वाभ्यां भुजाभ्यां बलवान्गृहीत्वा शङ्खमुत्तमम्।**
**प्राध्मापयत भूतानां त्रासनं बलिनामपि** ।। २७ ।।[०३]

द्वाभ्यां भुजाभ्यामाकाशं बहुशो निजघान ह ।। २८ ।।[०४]

क्रीडन्भाति महासेनस्त्रीँल्लोकान्वदनैः पिबन्।**
**पर्वताग्रेऽप्रमेयात्मा रश्मिमानुदये यथा** ।। २९ ।।[०५]

स तस्य पर्वतस्याग्रे निषण्णोऽद्भुतविक्रमः
**व्यलोकयदमेयात्मा मुखैर्नानाविधैर्दिशः** ।**
**स पश्यन्विविधान्भावांश्चकार निनदं पुनः** ।। ३० ।।[०६]

तस्य तं निनदं श्रुत्वा न्यपतन्बहुधा जनाः ।**
**भीताश्चोद्विग्नमनसस्तमेव शरणं ययुः** ।। ३१ ।।[०७]

---

(०१)(१)ती चापतन्तौ; (२) बालोर्कसम; बालार्कसदृश, (३) सर्पो (for द्वाभ्यां); (५) अपरं च (for रेण ); दायादं; दायाद्यं, (६) महाभयं (for भुजेन सः),

(०२)(१)उपाश्लष्ट; उपक्लिष्ट; उपादिष्ट, (२) वरः (for वरम् ); (३) विनदं; व्यानदन् (for व्यनदद् ); भीमश् भुजः; सुरः (for बलः ),

(०३)(१)बलवद् (for वान् ); (२) बलम् (for शङ्खम् ); (३) प्रध्मापयत, (४) वरं; (for अपि ),

(०४)(२)भिजघान; (ऽ)पि ज; (ऽ)प्याज; व्याज; (ऽ)भ्य ( भ्या ); हनच्च (for निजघान ); ह (for सः );

(०५)(१) कारान्; करान् (for लोकान् ); रश्मिवान्

(०६)(१)श्वेतस्य (for स तस्य ); (२) दर्शनः (for विक्रमः ); (४) दिशै (for विधै ); (५) अपश्यद् (for स पश्यन् ); पापान् (for भावान् ); (६) निनदत्स्वनः (for निनदं पुनः ),

(०७)(१)सं (for तं ); (३) हि (for च ); (४) गताः (for ययुः ),

ये तु तं संश्रिता देवं नानावर्णास्तदा जनाः ।**
तानप्याहुः पारिषदान्ब्राह्मणाः सुमहाबलान् ।। ३२ ।।(०१)

स तूत्थाय महाबाहुरुपसान्त्व्य च तान्जनान्।**
धनुर्विकृष्य व्यसृजद्बाणान्श्वेते महागिरौ ।। ३३ ।।(०२)

बिभेद स शरैः शैलं क्रौञ्चं हिमवतः सुतम्।**
तेन हंसाश्च गृधाश्च मेरुं गच्छन्ति पर्वतम् ।। ३४ ।।(०३)

स विशीर्णोऽपतच्छैलो भृशमार्तस्वरान्रुवन् ।। ३५ ।।(०४)

तस्मिन्निपतिते त्वन्ये नेदुः शैला भृशं तदा।**
घोरमार्तस्वरं चक्रुर्दृष्ट्वा क्रौञ्चं विदारितम् ।। ३६ ।। (05)

स तं नादं भृशार्तानां श्रुत्वापि बलिनां वरः ।**
न प्राच्यवदमेयात्मा शक्तिमुद्यम्य चानदत् ।। ३७ ।।(०६)

सा तदा विमला शक्तिः क्षिप्ता तेन महात्मना।**
बिभेद शिखरं घोरं श्वेतस्य तरसा गिरेः ।। ३८ ।।(०७)

---

(०१)(१)यत्ते (for ये तु ); संश्रित; संसृता (for संश्रिता ); देवा (२) अस्य; तस्य; अथ; अभि (for अपि ); पार्षदान्वै; पार्षदान्; परिषदान् तांस्तदा तुष्टु; सर्वे, (४) ब्राह्मणान्; ब्रह्मण्यात् (for ब्राह्मणाः ); ब्राह्मणानांमहाबलान्; ब्राह्मणाः सुमहाबलाः.

(०२)(१)सतूर्याय; सन्तूर्णाय; सन्तूस्याय (for स तूत्थाय ); (२) उपशान्त्या च; उपसात्वत; अवसात्व्य च (for उपसान्तय च ); उपसन्ध्यं गताञ्ज नान् (३) व्यकृष्य; (अ)भ्यसृजद्; (अ)वसृ) (for व्यस्य ); (४) बाणं (for बाणाञ् ), श्वेत (for श्वेते ),

(०३)(१)च (for स ); शरः (for शरैः ); (२) परं (for सुतम् ),

(०४) (१)विन्दुइ ( शी ); र्णो; स वि ( च ); कीर्णो; स तु शीर्णो, (२) स्वनाः स्वरं; स्वरो (for स्वरान् ); बुवन्; नदन्; रवन् (for रुवन् );

(०५)(१) तु (for नि ); शैले (for त्वन्ये ); (२) तदा; बलात् (for भयात् ),

(०६) (१)भयार्तानां (for भृशा ); (२) जयिनां (for बलि ); (३) प्राच्यव; (अ)प्रहृष्य (for प्राव्यथ ); (४) नानदत्; संनदन्; नादयन् (for चानदत् ),

(०७)(१)नदता; न तदा (for सा तदा ); विमला (for विपुला ); (२) (अ)मितात्मना (for महा ); क्रोधात्; रोषात् (for घोरं ); (४)क्रौच (for श्वेत ); शक्तिः श्वेतस्य सा गिरेः .

स तेनाभिहतो दीर्णो गिरिः श्वेतोऽचलैः सह ।**
उत्पपात महीं त्यक्त्वा भीतस्तस्मान्महात्मनः ॥ ३९ ॥[०१]

ततः प्रव्यथिता भूमिर्व्यशीर्यत समन्ततः ।**
आर्ता स्कन्दं समासाद्य पुनर्बलवती बभौ ॥ ४० ॥[०२]

पर्वताश्च नमस्कृत्य तमेव पृथिवीं गताः ।**
अथैनमभजल्लोकः स्कन्दं शुक्लस्य पञ्चमीम् ॥ ४१ ॥[०३]

**अस्मिन् पर्वणि १८४अध्याये ४१श्लोकाः सन्ति**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि आङ्गिरसे कुमारोत्पत्तौ चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥**

(मार्कण्डेयसमस्यापर्वणि ......ऽध्यायः)

## 03- 04 - 185 Adhyaya

# १८५. पञ्चाशीत्यधिकद्विशततमोऽध्यायः

**षड्टषिभिर्लोकापनादभयात् स्वपत्नीनां परित्तयागः ॥ १ ॥ विश्वमित्रेण कुमारस्य जातकर्मादिना संस्करणम् ॥ २ ॥ स्कन्दपराक्रमासहिष्णुना शक्रेण स्कन्देन सहा**

---

(०१)(१)पपाता (for स तेना ); दीर्णो ( वीरो ); (for दीनो ); (२) श्वेतो पलैः (for श्वेतोऽचलैः ); (३)पलायत; अपलायन् (for उत्पपात ); जहीत्युत्त्वा (for महीं त्यक्त्वा ); पालयन्प्रजह्रीत्युत्त्वा, (४) तस्य; च स; स सु(for तस्मान् ),

(०२) (१)प्रचलिता (for प्रव्य ); (२) विशी (for व्यशी ); समा स्कन्दं (३) अपाश्रित्य; उपश्रित्य; समाश्रित्य; नमस्कृत्य (for समासाद्य ),

(०३) (१) स्कन्दं; नदीश्चैव; नदीस्तत्र; नमस्तुभ्यं (for नमस्फुत्य ); (२) तामेव (for तमेव ); (३) (ए)नम् ताम् (for (अ)यम् ); अभवल्लोके (for अभजल्लोकः), (४) शुक्रं (for शुक्ल० ), पञ्चमी; सप्तमी,

आयोधनम् ।। ३ ।। इन्द्रवज्राभिहतात् स्कन्दस्य दक्षिणपार्श्वाद्विशास्वस्य तथा कुमाराणां कन्यानां च समुद्भवः ।। ४ ।। स्कन्दाद्भीतेनेन्द्रेण तेल सह संधानम् ।। ५ ।। विश्वामित्रकृतः स्कन्दस्य त्रयोदशसंस्कारविधिर्विश्वामित्रेण प्रबोधितानामपि महर्षीणां स्वपत्नीनामङ्गीकरणमग्निदेवकर्तृकं बालस्य स्कन्दस्य संरक्षणम् ।।

**मार्कण्डेयः**

**इत्येतद्विविधाकारं वृत्तं शुक्लस्य पञ्चमीम् ।**
**तत्तद्युद्धं महाघोरं षष्ठ्यां वृत्तं जनाधिप ।। १ ।।**

**ऋषयश्च महाघोरान्दृष्ट्वोत्पातान्समन्ततः ।**
**अकुर्वञ्छान्तिमुद्विग्ना लोकानां लोकभावनाः ।। २ ।।**

***अधिकपाठः**

**तस्मिञ्जाते महासत्त्वे महासेने महाबले।**
**समुत्तस्थुर्महोत्पाता घोररूपाः पृथग्विधाः ।**
**स्त्रीपुंसोर्विपरीतं च तथा द्वन्द्वानि यानि च ।**
**ग्रहा दीप्ता दिशः खं च ररास च मही भृशम्। (०१)**

**इत्येतद्विविधाकारं वृत्तं शुक्लस्य पञ्चमीम्।**
**तत्तद्युद्धं महाघोरं षष्ठ्यां वृत्तं जनाधिप।(०२)**

**निवसन्ति वने ये तु तस्मिंश्चैत्ररथे जनाः ।**
**तेऽब्रुवन्नेष नोऽनर्थः पावकेनाहितो महान्।****
**सङ्गम्य षड्भिः पत्नीभिः सप्तर्षीणामिति स्म ह ।। ३ ।।(०३)**

---

(०१) महात्मनि )(for सेने), ननाम (for ररास),

(०२)(१)सु०; च; तान् (for तु), भागा (for घोरान्), (२) समन्ततः )(for पृथग्विधान्); (३) शान्तिं (for लोक),

(०३)(१)निवासस्तु वने येषां; बुवन्नैष; नो अर्थः; नौ लब्धः (for नो०ऽनर्थः), (४) कृतो; हतो; (आ)हितो (हितो) (for (आ)हृतो), (५) षड्भिः पत्नीभिः सङ्गम्य

अपरे गरुडीमाहुस्त्वयानर्थोऽयमाहृतः
यैर्दृष्टा सा तदा देवी तस्या रूपेण गच्छती ** ।। ४ ।।(०१)

न तु तत्स्वाहया कर्म कृतं जानाति वै जनः ।। ५ ।। (02)

सुपर्णी तु वचः श्रुत्वा ममायं तनयस्त्विति।**
उपगम्य शनैः स्कन्दमाहाहं जननी तव ।। ६ ।।(०३)

अथ सप्तर्षयः श्रुत्वा जातं पुत्रं महौजसम्।**
तत्यजुः षट्तदा पत्नीर्विना देवीमरुन्धतीम्।(०४)
षड्भिरेव तदा जातमाहुस्तद्वनवासिनः ।। ७ ।।

सप्तर्षीनाह च स्वाहा मम पुत्रोऽयमित्युत।**
अहं जाने नैतदेवमिति राजन्पुनः पुनः ।। ८ ।।(०५)

विश्वामित्रः तु कृत्वेष्टिं सप्तर्षीणां महामुनिः
पावकं कामसन्तप्तमदृष्टः पृष्ठतोऽन्वगात् ** ।। ९ ।।(०६)

तत्तेन निखिलं सर्वमवबुद्धं यथातथम्। (07)
विश्वामित्रस्तु प्रथमं कुमारं शरणं गतः ।। १० ।।

स्तवं दिव्यं सम्प्रचक्रे महासेनस्य चापि सः ।(०८)

---

(०१)(२)तया; तथा (for ) त्वया), (४)गच्छति (for ती),
(०२)(१) कोयं (for कृतं), वै जनाः; तत्वतः; वै द्विजाः (for वै जनः),
(०३)(१)तद् (for तु), ततः (for वचः), (२) (इ)ह (for (इ)ति); अहोहं (for आहा),
(०४) (१)ज्ञात्वा (for श्रुत्वा); (२)भूतं (for जातं); (३)स्वास्तदा; स्वस्वकाः (for षट् तदा); (४) चैकाम् (for देवीम्),
(०५) (१)एवं;ततो) (for तदा); (३) महर्षीन्; महर्षिम् (for सप्तर्षीन्); वै (for च); (५) हेतुर् (for जाने); (६) (अ)जल्पपत् (for राजन्),
(०६)(१)स) (for तु); (२)मतिः) (for मुनिः); (३) संमत्तम्(for सन्तप्तम्);
(०७)(४)आद्रष्टुं (for अदृष्टः); अनुगात्) (for अन्व); तत्वेन) (for तत्तेन); तेन कर्माखिलं सर्व; (६) अवबुध्य, यथा तथा; यथायथं,
(०८)(१/२)प्रथमं शरणं प्रथमः; धर्मात्मा (for प्रथमं); (३)नित्यं; दैवं(for दिव्यं); स प्रचक्रे; प्रचक्रेथ,

मङ्गलानि च सर्वाणि कौमाराणि त्रयोदश ।। ११ ।।(०१)

जातकर्मादिकास्तस्य क्रियाश्चक्रे महामुनिः ।। १२ ।।(०२)

षड्वक्रस्य तु माहात्म्यं कुक्कुटस्य तु साधनम्।**
शक्त्या देवाः साधनं च तथा पारिषदामपि।(०३)

विश्वामित्रश्चकारैतत्कर्म लोकहिताय वै ** ।। १३ ।।

तस्मादृषिः कुमारस्य विश्वामित्रोऽभवत्प्रियः ।(०४)
अजानात् तच्च स्वाहाया रूपान्यत्वं महामुनिः ।। १४ ।।(०५)

अब्रवीच्च मुनीन् सर्वान्नापराध्यन्ति वै स्त्रियः ।

श्रुत्वा तु तत्वासतस्तस्मात्ते पत्निः सर्वतोत्यजन् ।

लक्षालङ्कारः- अजानात्तच्च स्वाहाया रूपान्यत्वम् इत्यत्र रूपान्यत्वं रूपान्तरत्वम् ।

अथाब्रवीत्तान्सप्तर्षीन्युष्मत्पत्नीष्वयं शिशुः ।
षट्सु जातो हुतवहात्ते चाग्नेस्त्वग्रतो त्यजन् ।। १५ ।।(०६)

अब्रवीच्च मुनीन्सर्वान्नापराध्यन्ति वै स्त्रियः ।

श्रुत्वा तु तत्त्वतस्तस्मात्ते पत्नीः सर्वतोऽत्यजन् । (०७)

---

(४)देवस्य) (for सेनस्य); चाशिषः; चाह सः ( चापि सः),
(०१)(१)मण्डलानि च; आगमोक्तानि, वि ( च) चित्राणि (for च सर्वाणि);
(०२)(३) दिकान् (for दिकाः), तत्र; चापि; चैव (for तस्य); (४) तस्य (for क्रियाश्),
(०३)(१)षण्मु० खस्य च; षण्स्मर्स्तस्य; ) (for षड्वक्रस्य तु); च (for तु); (२)कुमुद (for कुक्कुट); तु (for च); (३) भक्त्या (for शक्त्या); शक्त्यादिसाधनं चै; (४) व तदा (for तथा); परिषदाम्; वै पर्षदाम्; पार्षतानां तथैव च,
(०४)(२)सवं; सर्व (for कर्म), (४);)दृढं) (for ऽभवत्),
(०५) (१)अजानस्तत्; अज्ञानात्तत्; अजानात्तत् (for अन्वज्ञानात्); च तस्त्वाहा; ऽ तदा स्वाहा (for च स्वाहाया); स्वाहातत्त्वमजानन्स;
(०६)(२)क-तेजो..ग्नेरुतद्धजो..त्यजत् । घ-तेजो..ग्नेस्त्वग्रतो त्यजन् । रूपाणि त्वं; रूपाणि तु; रूपादुत्थं (for रूपा न्यत्वं);
(०७)(१) अथा (स चा) ब्रवित्तान्सप्तर्षीन् ; (२) युष्मत्पत्नीष्वयं शिशु (३/४) (अ)पि ) (for तु); तत्वं तस्मात्ते; तद्धचस्तस्मात् ) (for तत्त्वतस्तस्मात्); षट्सु जातो हुतवहात् ते चाग्नेः (तेन ता०; तेजोग्ने०;

स्कन्दं श्रुत्वा तदा देवा वासवं सहिताऽब्रुवन्।

देवः

अविषह्यबलं स्कन्दं जहि शक्राशु माचिरम् । (01)

यदि वा न निहंस्येनं देवेन्द्रोऽयं भविष्यति।**
त्रैलोक्यं संनिगृह्यास्मांस्त्वां च शक्र महाबल ।। १७ ।।(०२)

**मार्कण्डेयः**

स तानुवाच व्यथितो बालोऽयं सुमहाबलः ।**
स्रष्टारमपि लोकानां युधि विक्रम्य नाशयेत् ।। १८ ।।(०३)

*अधिकपाठः

न बालमुत्सहे हन्तुमिति शक्रः प्रभाषते।

तेऽब्रुवन्नास्ति ते वीर्यं यत एवं प्रभाषसे।

सर्वास्त्वद्याभिगच्छन्तु स्कन्दं लोकस्य मातरः ।**
कामवीर्या घ्नन्तु चैनं तथेत्युक्त्वा च ता ययुः ।। १९ ।।(०४)

लक्षालङ्कारः- स्कन्दं लोकस्य मातर इत्यत्र लोकस्य मातरः ब्राह्मीमाहेश्वर्यादि-
सप्तमातरः ।

तमप्रतिबलं दृष्ट्वा विषण्णवदनास्तु ताः ।**

---

तास्तेग्रे०; ताश्चाग्रे); स्त्वग्रतोत्यजन्,

(०१)(१) मार्कण्डेय उ (मार्कण्डेयः); स्तुत्वा (for श्रुत्वा); तदा(for ततो); (२) सहसा; सर्वतो; ते सहा (for सहिता); सहिताः शक्रहब्रुवन्; (४) जहि शकाशुभं चिरात्,

(०२) (१)विहिंस्ये; मा निहि ) (for निहं); महेन्द्रो; देवेद्धो; अन्येद्रो (for अथेन्द्रो); न; वै (for ऽयं), भविष्यसि; (३) त्रैलोक्ये (for क्यं,); च) (for सं); त्रैलोक्यस्य निवय्ह्यास्मान्; (४) बल (for बलः),

(०३)(३)भूतानां; लोकस्य (for लोकानां);

(०४)(१) (अ)पि नि०; (आ)शु; (अ)प (for (अ)भि); (२) सर्व० (for स्कन्दं); स्कन्दस्य लोकमातरः, (३)० वीर्याद्; वीर्यं ) (for वीर्या); घ्नत; यान्तु घ्नन्तु शरैसू (for चैनं); (४) तु) (for च); यथा ययुः; यथातथं (for च ता ययुः),

**अशक्योऽयं विचिन्त्यैवं तमेव शरणं ययुः ।। २० ।।**(०१)

ऊचुश्चैनं त्वमस्माकं पुत्रो भव महाबल।**
**अभिनन्द्य ततः सर्वाः प्रस्नुताः स्नेहविक्लवाः ।। २१ ।।**(०२)

***अधिकपाठः**

**तासां तद्वचनं श्रुत्वा पातुकामः स्तनान्प्रभुः ।**

**लक्षालङ्कारः- प्रस्नुताः स्नेहविक्लवा इत्यत्र प्रस्नुताः स्नुतस्तनक्षीराः ।**

ताः सम्पूज्य महासेनः कामांश्चासां प्रदाय सः ।**
**अपश्यदग्निमायान्तं पितरं बलिनां बली ।। २२ ।।**(०३)

स तु सम्पूजितस्तेन सह मातृगणेन ह ।**
**परिवार्य महासेनं रक्षमाणः स्थितः शिवः ।। २३ ।।**(०४)

सर्वासां या तु मातणां नारी क्रोधसमुद्भवा।**
**धात्री स्वपुत्रवत्स्कन्दं शूलहस्ताभ्यरक्षत ।। २४ ।।**(०५)

लोहितस्योदधेः कन्या क्रूरा लोहितभोजना।**
**परिष्वज्य महासेनं पुत्रवत्पर्यरक्षत ।। २५ ।।**(०६)

---

(०१)(२)तदा; ततः (for तु ताः); (३) (ए)व; (इ)दं; (ए)तत्; (ए)नं (for (ए)वं); गताः (for ययुः),

(०२) (१)चैनं (for चापि); अस्माभिः (for अस्माकं); (२) वीरः; भव (for ऽस्माभिर्); कृतो बली; महाबलः; कृतां० ( तौ)जलिः (for धृतं जगत्); (३)क-ख-अभिनन्द्य ततः घ-अभ्यनन्दस्तु ताः, नन्दत (for नन्दस्व), अभिनन्द्य ततः (नन्दत ताः; नन्द्य तु ताः); सर्वाः, (४) प्रस्नुताः; प्रजासु;; स तु ताः; ० प्रस्तुताः० स्नेहविक्लबाः .

(०३) (२)कामः (for कामान्); वै; च (for सः); (४) बलिनं (for नां०); वरं (for बली); पुरतः पितरं बली,

(०४) (२)तु; च; तं (for ह); (३)क-ख-रक्षमाणः स्थितस्तदा । ष्वज्य (for वार्य०); त्मानं (for सेनं); (४) ततः; तथा; स्थिरः (for स्थितः); चिरं; स्थिरः; शिवः; (अ)भितः (for स्थिरम्), रक्षमाणास्तु तत् (णास्ततः); स्थिताः; पुत्रवत्पर्य०रक्षत; रक्षमाणा व्यतस्थिरे,

(०५) (१)तत्तु; चैव (for या तु);(३) स्व०(for सा); (४) (अ)भिरक्षतः; ह्यरक्षत (for (अ)भ्यरक्षत),

(०६) (२)सह मातृगणेन तु; (ह); (३) त्मानं (for सेनं); (४) परि०रक्षत; समभाषत (for पर्य०),

अग्निर्भूत्वा नैगमेयश्छागवक्त्रो बहुप्रजः ।
रमयामास शैलस्थं बालं क्रीडनकैरिव ।(०१)

ग्रहाः सोपग्रहाश्चैव ऋषयो मातरस्तथा।**
हुताशनमुखाश्चैव दृप्ताः पारिषदां गणाः ।। २६ ।।(०२)

एते चान्ये च बहवो घोरास्त्रिदिववासिनः ।**
परिवार्य महासेनं स्थिता मातृगणैः सह ।। २७ ।।(०३)

सन्दिग्धं विजयं दृष्ट्वा विजयेप्सुः सुरेश्वरः ।
आरुह्यऐरावतस्कन्धं प्रययौ दैवतैः सह ।**
विजिघांसुर्महासेनमिन्द्रस्तूर्णतरं ययौ ।। २८ ।।(04)

आदाय वज्रं बलवान्सर्वैर्देवगणैर्वृतः ।।(०५)

उग्रं तं च महानादं देवानीकं महाप्रभम्।
विचित्रध्वजसंनाहं नानावाहनकार्मुकम्।** ।। २९ ।।

प्रवराम्बरसंवीतं श्रिया जुष्टमलङ्कृतम्।(०६)
विजिघांसुं तमायान्तं कुमारः शक्रमन्वयात् ।। ३० ।।(०७)

विनदन्पार्थ देवेशो द्रुतं याति महाबलः ।**

---

(०१)(१)नैगमेशः (षः; षुः); ततश्चैनं (for नैगमेयः); (२) महाप्रजः; बहुस्रजः; बहुव्रजः (for प्रजः); (३) शैलस्तं; स्य (for स्थं); (४) बाल० (for बालं),

(०२)(१)चोप;सोम (for सोप ); (२) मातरश्चर्षयस्तथा (३) चैव; (for चापि ); दृप्ताः पारिषदा; गणैः दीप्ताक्षाः ( ख्या ); पार्षदां गणाः; दीप्ताः सर्वे सपार्षदाः,

(०३) (२)नादिनः (for वासिनः ); (४) भूत (for मातृ ),

(०४)(१)विषयं (for विजयं ); (२)वेजयेच्छ पुरन्दरः (for सुरे ); (५) (ए)रावण

(०५) (६) तदा ( तथा ); (for ययौ ),

(०६) (१)तं च; तस्य (for तच्च ); नादं देवं (for वेगं ); (२) भुज (for प्रभम् ),

(०७)(१)ख-इन्द्रो..पि देवसेनां तां हर्णयन्नाजगाम ह ।, विजयेप्सुं; तमाश्वोतं (२) अन्व यात्; अन्वियात् (for अम्ब );

संहर्षयन्देवसेनां जिघांसुः पावकात्मजम् ।। ३१ ।।(०१)

सम्पूज्यमानस्त्रिदशैस्तथैव परमर्षिभिः ।**
समीपमथ सम्प्राप्तः कार्तिकेयस्य वासवः ।। ३२ ।।(०२)

सिंहनादं ततश्चक्रे देवेशः सहितः सुरैः ।**
गुहोऽपि शब्दं तं श्रुत्वा व्यनदत्सागरो यथा ।। ३३ ।।(०३)

तस्य शब्देन महता समुद्धूतोदधिप्रभम्।**
बभ्राम तत्र तत्रैव देवसैन्यमचेतनम् ।। ३४ ।।(०४)

जिघांसूनुपसम्प्राप्तान्देवान्दृष्ट्वा स पावकिः ।
विससर्ज मुखात्क्रुद्धः प्रवृद्धाः पावकार्चिषः ।। ३५ ।। (०५)

अदहद्देवसैन्यानि वेपमानानि भूतले ।। ३६ ।। (06)

ते प्रदीप्तशिरोदेहाः प्रदीप्तायुधवाहनाः ।**
प्रच्युताः सहसा भान्ति व्यस्तास्तारागणा इव ।। ३७ ।।(०७)

दह्यमानाः प्रपन्नास्ते शरणं पावकात्मजम्।**
देवा वज्रधरं त्यक्त्वा ततः शान्तिमुपागताः ।। ३८ ।।(०८)

---

(०१) (३) विनर्दन्, पार्थ; परि (for पथि ); देवेशो (for शक्रस्तु ); स वियत्यथि शक्रस्तुः वियत्पतिः स शक्रस्तु, (४) हन्तुं; रौद्रं; श्रुतं (for द्रुतं ); आयान् (for याति ); बलं (for बलः ); (५)स हर्षयन्, ग्म्यान्द्र (for सेनां ),
(०२)(३)अथ;अभि; अपि (for उप ); सम्प्राप्य, (४) वह्नि ( ०ह्नेः ); पुत्रस्य वां,
(०३)(२)सहितैः; त्रिदशैः (for सहितः ); (३) तत् (for तं ); (४) व्यानदत्; स नदत्,
(०४)(१)अस्य (for तस्य ); (२) द्धूतो (for द्धूतो ); (३) प्रभूतं (for बभ्राम); (४) समन्ततः (for अचेतनम् ),
(०५)(१)अथ; अनु; इह (for उप ); (२) दृष्ट्वा देवान्; (४)सहसा (for प्रवृद्धाः);
(०६)(५)तदैव; तदैव (for ता देव ); ( अ )दहद्; ( अ )पतन् (for अदहन् ); अदहद्देवसैन्यानि; सा देवसेना न्यपतत् ;वेप; चेष्टं (for वेष्ट ); वेष्टमाना महीतले,
(०७) (१)प्रदीप्तशिरसो देहाः, (३) यान्ति; भ्रान्ताः (for भान्ति ); (४) दिव; व्यस्तां (for चित्रां ),
(०८) (१)ययुस्तं; प्रदीप्ताम् (for प्रपन्नासू ); (३)देवं (for दैव ),

त्यक्तो देवैस्ततः स्कन्दे वज्रं शक्रो न्यपातयत्
**तद्विसृष्टं जघानाशु पार्श्र्वं स्कन्दस्य दक्षिणम् ** ।। ३९ ।।**

**विभेद च महाराज पार्श्र्वं तस्य महात्मनः ।**(०१)

वज्रप्रहारात्स्कन्दस्य सञ्जातः पुरुषोऽपरः ।
**युवा काञ्चनसंनाहः शक्तिधृग्दिव्यकुण्डलः ****
**यद्वज्रविशनाज्जातो विशाखस्तेन सोऽभवत् ।। ४० ।।**(०२)

लक्षालङ्कारः- यद्वज्रविशनात् इत्यत्र विशनात् विशसनात् ।

सञ्जातमपरं दृष्ट्वा कालानलसमद्युतिम्।**
**भयादिन्द्रस्तु तं स्कन्दं प्राञ्जलिः शरणं गतः ।। ४१ ।।**(०३)

तस्याभयं ददौ स्कन्दः सह सैन्यस्य सत्तमः ।**
**ततः प्रहृष्टास्त्रिदशा वादित्राण्यभ्यवादयन् ।। ४२ ।।**(०४)

स्कन्दपारिषदान्घोराञ्शृणुष्वाद्भुतदर्शनान् ।। ४३ ।।

वज्रप्रहारात्स्कन्दस्य जज्ञुस्तत्र कुमारकाः ।**
**ये हरन्ति शिशूञ्जातान्गर्भस्थांश्चैव दारुणाः ।**(०५)
**वज्रप्रहारात्कन्याश्च जज्ञिरेऽस्य महाबलाः ।** ।। ४४ ।।**(०६)

---

(०१)(१)तदा (for तत;); शक्रो (for स्कन्दे, ); (२) स्कन्दे; तस्मै (for शक्रो ); न्यपातयत्; (ऽ) भ्यपातयत्; त्ववासृ; ह्यवासृ०; व्यवासृ (for ( अ )भ्यवासृ ),
(०२) (१) ख-बिभेद महाराज पार्श्वं तस्य महात्मनः ।, (२)जज्ञेथ; स० जातः (for सं ); परः (for (अ) परः); (४) भूद्; धृद् (for धृग् ); वज्र (for दिव्यं ); (५) ख-यद्वज्रविशनाज्जातो; भ-यस्य, ०व्यसना०; विशिखा (for ०विशना ); यः स्वबन्धु ( सवज्र ); विनाशात्त,
(०३) (१)सं (for तं ); परमं; पुरुषं (for अपरं ); (२)विशाखं च (for कालानल ); महाप्रभं; महाद्युतिं (for समद्युतिम् ); (३ तु तं (for ततः)
(०४)(२)सत्तमः,ससैन्यस्य समन्त; (४) ( अ )भिवादयन्,
(०५)(१)स्कदपारिषदान् (for स्य पार्षदाज्); देवाज् (for घोराञ्); (२) दृष्ट्वा च (for शृणुष्व); विक्र०मान् (for दर्शनान्); (३) देवस्य (for स्कन्द); (४) जज्ञुस्तस्य; जातास्तत्र; जज्ञि० रेस्य (for जज्ञुस्तत्र); (५) हरन्त; हरन्ते;शिशू०ञ्जातान्ये हरन्ति; (६) अपि (for चैव); दारुणान्,
(०६)(१)अन्या (ज्या)श्च (for कन्याश्च); (२) जक्षुः कन्या (for जज्ञिरेऽस्य);

कुमारास्तु विशाखं च पुत्रत्वे समकल्पयत् ।। ४५ ।। (01)

स भूत्वा भगवान्सङ्ख्ये रक्षंश्छागमुखस्तदा।**
वृतः कन्यागणैः सर्वैरात्मीयैः सह पुत्रकैः ।। ४६ ।।(०२)

लक्षालङ्कारः- कहुमारस्तु विशाखं च पुत्रत्वे समकल्पयत् इत्यत्र 'ततो..भवच्चतुर्मूर्ति क्षणेन भगवान् प्रभुः । तस्य शाखो विशाखश्च नैजमेषश्च पृष्ठत' इति गदापर्वणि वक्ष्यमाणत्वात् स्कन्दः अग्रयायी, शाखविशाखनैजमेषास्तु तस्यैव पृष्ठगामीनि रुपान्तराणि । अतो..त्रापि विशाखपदमुपलक्षणमिति ज्ञेयम् । छागमुखः छागवन्मुखं यस्य सः भगवान् विशाखाख्यः स्कन्तस्य अंशः सङ्ख्ये..पि रत्रन्नासीदिति योजना ।

मातृणां प्रेषितानां भद्रशाखस्तु कौसलैः ।**
ततः कुमारपितरं स्कन्दमाहुर्जना भुवि ।। ४७ ।।(०३)

लक्षालङ्कारः- भद्रशाखस्तु कोमलैः इत्यत्र कोमलैर्भृत्यगणैः सह भद्रशाखो..पि कङ्चित् स्कन्तस्य भृत्यः । 'कैशल' इति पाठे ' अर्श आदिभ्यो..च्' इति वचनात् कौशलवानित्यर्थः ।

रुद्रमग्निमुमां स्वाहां प्रदेशेषु महाबला।**
यजन्ति पुत्रकामाश्च पुत्रिणश्च सदा जनाः ।। ४८ ।।(०४)

लक्षालङ्कारः- कुमरपितरं विशाखाख्यकुमारपितरं स्कन्दम् । पूर्वं रुद्रस्य वीर्यं स्वयोनौ धर्तुमसहमाना गौरी अग्नावाक्षिपत् । अग्निरपि तदुष्णमसहमानः गङ्गायां तद्रेतः प्राक्षिपत् । गङ्गा च स्वतीरस्थे शरस्तम्बे पूरितवती । तदेव बहूत्वाच्छिवो गिरिरासीत् । तस्मिन् गिरौ

---

(०१) (१) कुमारास्ते; रस्य; रः स, विशाखश्च (for खं तं); ते; च; तु (for तं); (२) पुत्रत्वे (for पितृ);पर्य; समकल्पयत; तं पितृत्वेभ्यकल्प; पितृ (पुत्र)त्वेनाभ्यकल्पयन् (यत्),

(०२)(१)तं(तत्); श्रुत्वा (for स भूत्वा); साङ्ख्ये; शाखो; सङ्के (for सङ्ख्ये); (२) मुखाः; मुखं; मुखान् (for मुखः); तथा (for तदा); (४) आत्म० वीर्यैश्च०; आत्मीयै सह (चैव; च स०); आत्मकीयैः स०; आत्मनीयैश्च; कीयैश्च,

(०३)(१)प्रेक्षमाणानां; प्रेषितानां च; प्रेक्षतां चैव (for ०तीनां च); (२) रूद्र (for भद्र); तु; स्म (for च); कौ०(को)शले; कोमलैः; कोमलः (for कौशलः); (३) कुमारं; कुमारी० (for कुमार०); सञ्जातं (for ०पितरं),

(०४)(१)अग्निमुखा; सुखां (for अग्निमुमां); स्कन्दं (for स्वाहां); (२) बलात्; बलं; बलान्; ०बल; बलाः; बलः, (३) यजते(for यजन्ति); (४) महाबलाः; महाजनाः; तदा जनाः; सभाजनाः (for सदा जनाः),

गरूडीरूपया स्वाहया अग्निवीर्यस्यापि योगे कृते श्वेतगिरिरूपं तद्रुद्रवीर्यमेव स्कन्दात्मना समजनि किल । अतश्चतुर्णामपि कुमीरमातापितृत्वात् रुद्रमग्निमुमां स्वाहाम् इत्याद्युक्तम् ।

यास्तास्त्ववजनयत्कन्यास्तपो नाम हुताशनः ।**
किं करोमीति ताः स्कन्दं सम्प्राप्ताः समभाषयन् ॥ ४९ ॥[०१]

**कुमार्यः**

भवेम सर्वलोकस्य मातरो वयमुत्तमाः ।
प्रसादात्तव पूज्याश्च प्रियमेतत्कुरुष्व नः ।[०२]
सोऽब्रवीद्बाढमित्येवं भविष्यध्वं पृथग्विधाः ॥ ५० ॥
अशिवाश्च शिवाश्चैव पुनः पुनरुदारधीः [०३]

ऊचुश्चापि त्वमस्माकं पुत्रोऽस्माभिर्धृतं जगत्।**
अभिनन्दस्व नस्सर्वाः पुस्नुतास्स्नेहविक्लवाः ॥ ५१ ॥[०४]

तास्सम्पूज्य महासेनः कामांश्चासां प्रदाय सः ।**
अपश्यदग्निमायान्तं पितरं बलिनां बली ॥ ५२ ॥

स हि स्म पूजितस्तेन सहमातृगणेन तम्।**
परिवार्य महासेनं रक्षमाणास्तु तस्थिरे ॥ ५३ ॥

सर्वासां या तु नारीणां नारी क्रोधसमुद्भवा।**

---

(०१) (१)एतासू; यस्ताम्; यास्त्वां (for यास्तासु); (२)तमो (for तपो); (३) कुर्मेति च (for करोमीति); स्कन्दः(for स्कन्दं); किं कुर्मेति द्विजाः स्कन्दं; किङ्कराः स्मेति ताः स्कदं, (४) ताः(for सं०); संवभाषिरे; (अ)र्थमभाषत (for समभाषत); समभाषयन्,

(०२) कुमार्यः (for मातरः); (२) मातरो वयमुत्तमाः .

(०३)(१) मार्कण्डेय उ, (ए)व (for (ए)वं); (२) भविष्यथ (ध्वं); (३) चेति (for चैव); शिवाश्चैवाशिवाश्चैव, मार्कण्डेयः,

(०४)(१) ख-अशिवाश्च शिवाश्चैव पुनः पुसरुवाच ह ।.

**धात्री स्वपुत्रवत्स्कन्दं शूलहस्ताभ्यरक्षत ।। ५४ ।।**

**लक्षालङ्कारः- सर्वासां तत्र नारीणाम् इत्यत्र क्रोधसमुद्भवा नारी चामुण्डा ।**

लोहितस्योदधेः कन्या क्रूरा लोहितभोजना।**
**परिष्वज्य महासेनं पुत्रवत्पर्यरक्षत ।। ५५ ।।**

**लक्षालङ्कारः- लोहितस्योदधेः इत्यत्र स्न्ध्यारगसमये लोहितस्य ।**

अग्निर्भूत्वा नैजमेशश्छागवक्त्रो बहुप्रजः ।
**रमयामास शैलस्थं बालः क्रीडनकैरिव ।। ५६ ।।**

**लक्षालङ्कारः- नैजमेषश्छागवक्त्र इत्यत्र नैजमेषः सर्वाङ्गस्वभावतो मेषः, वक्त्रमात्रं छागवत् अजवत् यस्य स च्छागवक्त्रः ।**

**अस्मिन् पर्वणि १८५अध्याये ५६श्लोकाः सन्ति**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि आङ्गिरसे कुमारोत्पत्तौ पञ्चाशीत्यधिकशततमोऽध्यायः ।। १८५ ।।**

**(मार्कण्डेयसमस्यापर्वणि ......ऽध्यायः)**

## 03- 04 - 186Adhyaya

# १८६. षडशीत्यधिकशततमोध्यायः

१८६.मार्कण्डेयेन युधिष्टिरं प्रति स्कन्दचरिक्षप्रतिपादनम् ।। १ ।। इन्द्रेण स्कन्दस्य देवसैनापत्ये अभिषेचनम् ।। २ ।। स्कन्देनेन्द्रप्रार्थमया देवसेनाया उद्रहनम् ।। ३ ।।

शिवाश्चैवाशिवाश्चैव पुनः पुनरुदारधीः ।

ततः प्रकल्प्य पुत्रत्वे स्कन्दं मातृगणोऽगमत्
**काकी च हलिमा चैव माता चाथ हली तथा।****

आर्या बालाच धात्री च सप्तैताः शिशुमातरः ।। १ ।।(०१)

लक्षालङ्कारः- सप्तैताः शिशुमातर इत्यत्र शिशुनामकस्कन्दप्रसादजपुत्रमातरः ।

एतासां वीर्यसम्पन्नः शिशुर्नामातिदारुणः ।**
स्कन्दप्रसादजः पुत्रो लोहिताक्षो भयङ्करः ।। २ ।।(०२)

एष वीरो..ष्टकः प्रोक्तः स्कन्दो मातृगणोद्भवः ।**
छागवक्रेण सहितो नवमः परिकीर्त्यते ।। ३ ।।(०३)

लक्षालङ्कारः- एष वीरो..ष्टक इत्यत्र वीरः शूरः एषः शिशुः स्कन्तस्य मातृगणान् सप्तमातृः उद्वहतीति स तथोक्तः । अत एवाष्टकः तासामष्टमः छागवक्त्रेण विशाखेन । षड्भिः आननैः येन शीर्ष्णा ।

षष्ठं छागमयं वक्त्रं स्कन्दस्यैवेति विद्धि तत् ** ।। ४ ।।(०४)

षट्शिरोऽभ्यन्तरं राजन्नित्यं मातृगणार्चितम्। (05)
षण्णां तु प्रवरं तस्य शीर्षाणामिह शब्यते ** ।। ५ ।।(०६)
शक्ति येनासृजद्दिव्यां भद्रशाख इति स्म ह ।(०७)

---

(०१)(१)मातः (for ततः); सङ्कल्प०; प्रकल्प्य (for सं); (२) ०गणागमन् (for ०गणो०ऽगमत्); तदा (for (अ)गमत्); (३) काची (for काकी); हिमिला; मिहिला; मिहला; हिलिमा; हलिना; (४) भद्रा च ((अ)थ); रुद्रा च; मालिनी; रुचाथ(for रुद्राथ); पृथला; वृषला; प्रखला; पृषता; बृंहिना (ता; मा; ला) (for बृहली); माता चैव (चाथ); हली तथा; (५) आर्या पलोला; आर्याबला वा (या) वै धात्री (त्र्या); आर्याबला तथा धात्री; आर्या बाला च धात्री च, (६) शिव (for शिशु),

(०२)(२)क-ख-शिशुर्ना, (३) ख-वीरो..ष्टमः पुत्रः, स्कन्दः प्रसा०दजः, (४) महाप्रभः (for भयं),

(०३)(१)एकवीरो (for एष वीरा०), वीर्यो०(रो)ष्टमः; वीराष्टके, (२) स्कदो (for स्कन्द); गणोसुतः; गणोद्वहः(for गणोद्भवः); (३) एक (for छागं); (४) नवमः क्य ०कः); ०कीर्तितः (for कीर्त्यते); महासेनःप्रकीर्त्यते,

(०४)(१)इष्टं; षष्ठ्यां (for षष्ठं); च गमयद्; जगाम यं (for छागमयं); (२) (इ)व (for (ए)व); विद्धि तं; वर्धितं,

(०५) (१) शिरोभ्यन्तरा; ०शिराभ्यन्तरं; षण्णाम० भ्यन्तरं (रा); षड्भिसभ्यन्तरं; यत्तन् (त्तं); यत्तु, ० न्वितं; श्रितं (for चितम्),

(०६)(२)शिरसाम् (for शीर्षाणाम्); दृश्यते; शस्यं (for शब्द);

(०७)(४) शीर्ष; शाखाम् (for शाख),

इत्येतद्द्विविधाकारं वृत्तं शुक्लस्य पञ्चमीम् * ॥ ६ ॥(०१)

तत्र युद्धं महाघोरं वृत्तं षष्ठ्यां जनाधिप। (02)
उपविष्टं तु तं स्कन्दं हिरण्यकवचस्रजम् ॥ ७ ॥(०३)

हिरण्यचूडमुकुटं हिरण्याक्षं महाप्रभम्।(०४)
लोहिताम्बरसंवीतं तीक्ष्णदंष्ट्रं मनोरमम् ** ॥ ८ ॥(०५)

सर्वलक्षणसम्पन्नं त्रैलोक्यस्यापि सुप्रियम्।(०६)
ततस्तं वरदं शूरं युवानं मृष्टकुण्डलम् ॥ ९ ॥

अभजत्पद्मरूपा श्रीः स्वयमेव शरीरिणी।(०७)
श्रिया जुष्टः पृथुयशाः स कुमारवरस्तदा ॥ १० ॥(०८)

निषण्णो दृश्यते भूतैः पौर्णमास्यां यथा शशी। (09)
अपूजयन्महात्मानो ब्राह्मणास्तं महाबलम्।**
इदमाहुस्तदा चैव स्कन्दं तत्र महर्षयः ॥ ११ ॥(१०)

**ऋषयः**

हिरण्यगर्भ भद्रं ते लोकानां शङ्करो भव ।**

---

(०१) (१)इत्येते; इत्येवं; इत्येतं, (२) पञ्चमी (for ०मीम्);
(०२) (३) तत्तु (for तत्र); घोरं महद्यु (महायु)द्धं; (४) ततः; वृद्धं (for वृत्तं); नरां (for जना),
(०३) (१)तु तं (for ततः); (२)सुवर्ण; आमुक्त (for हिरण्य ); कव चावृतं (for कवचस्रजम् );
(०४)(१) चूडा (for चूड ); वलयं; मकुटं (for मुकुटं ); (२) हिरण्याख्यं; लोहिताक्षं महाबलं; द्युतिं
(०५)(२)हरं (for रमम् );
(०६)(३) सम्पूर्णं (४) सुप्रभं; (for प्रियम् ),
(०७) (३)पद्महस्ता श्रीः; निलया,
(०८)(१)पृथुवक्षाः; पृथ्वाजुष्टः; श्रिया स्पृष्टः (for श्रिया जुष्टः ); (२) सु (for स ); तरसू; वपुस् (for वरस्); तथा (for तदा ); कुमारो वरदस्तदा,
(०९) (३) ददृश (for दृश्यते ), (४)पूर्ण (for पौर्ण ); शशी यथा ; इवोडुराट्,
(१०) (१)त्मानं (for त्मानो ); (४) चैव (for तत्र ),

**त्वया षड्रात्रजातेन सर्वे लोका वशीकृताः ।। १२ ।।**[०१]

**अभयं च पुनर्दत्तं त्वयैवैषां सुरोत्तम।****
**तस्मादिन्द्रो भवानस्तु त्रैलोक्यस्याभयङ्करः ।। १३ ।।**[०२]

**स्कन्दः**

**किमिन्द्रः सर्वलोकानां करोतीह तपोधनाः ।****
**कथं देवगणांश्चैव पाति नित्यं सुरेश्वरः ।। १४ ।।**[०३]

**ऋषयः**

**इन्द्रो दधाति भूतानां बलं तेजः प्रजाः सुखम्।****
**तुष्टः प्रयच्छति तथा सर्वान्कामान्सुरेश्वरः ।। १५ ।।**[०४]

**दुर्वृत्तानां संहरति व्रतस्थानां प्रयच्छति।****
**अनुशास्ति च भूतानि कार्येषु बलसूदनः ।। १६ ।।**[०५]

**असूर्ये च भवेत्सूर्यस्तथाचन्द्रे च चन्द्रमाः ।****
**भवत्यग्निश्च वायुश्च पृथिव्यापश्च कारणैः ।। १७ ।।**[०६]

**एतदिन्द्रेण कर्तव्यमिन्द्रे हि विपुलं बलम्।**

---

(०१)(१) ऋषय ऊचुः ( ऋषयः ); गर्भ; रूप (for वर्ण ); (३)यत्तात (for षड्रात्र ); (४) सर्व (for सर्वे ); सर्वलोको कृतः; सर्वं लोकं कृतं,

(०२)(१)वे; तु (for च ); पुरा (for पुनर् ); दत्वा (for दन्त); (२) त्वया चैषां; एतैरेषां; त्वमेवैषां (for त्वयैं ); सुरेश्वर (for सुरो ); (३) तत (for तस्माद् ); हिताय वै (for ( अ )भयङ्करः ),

(०३) (१)भूतानां (for लोकानां ); (४)सर्वान् (for नित्यं),

(०४) (१)दधाति (for दिश ); (२) प्रजा; प्रजां; प्रियं (for प्रजाः ); (३) प्रज्ञां; इष्टं (for तुष्टः ); था; तदा; सदा (for तथा ); तुष्टः प्रज्ञां धृतिश्चैव, (४) सर्वा मायाः; सर्वान्कामान्; सर्वदा च; सर्वथायं; सर्वदायान्; सर्वान्देवान्; सर्वान्देयान् सुरेश्वर; सुरोत्तम,

(०५) (२)वृत्तं; वृत्ति (for वृत्त); (३) हि (for च ); भूतात्मा (for नि ); (४) कालेषु

(०६)(१) ( अ )भवत् (for भवेत् ); सूर्ये च स भवन्तुर्यः, (२) चन्द्रेण; चन्द्रेषु (for चन्द्रे च ); (४) च कारणे; च खं तथा; चकार वै,

**त्वं च वीर बली श्रेष्ठस्तस्मादिन्द्रो भवस्व नः ।। १८ ।।** [०१]

**शक्रः**

भवस्वेन्द्रो महाबाहो सर्वेषां नः सुखावहः ।**
**अभिषिच्यस्व चैवाद्य प्राप्तरूपोऽसि सत्तम ।। १९ ।।**[०२]

**स्कन्दः**

शाधि त्वमेव त्रैलोक्यमव्यग्रो विजये रतः ।**
**अहं ते किङ्करः शक्र न ममेन्द्रत्वमीप्सितम् ।। २० ।।**[०३]

**शक्रः**

बलं तवाद्भुतं वीर त्वं देवानामरीन्जहि।**
**अवज्ञास्यन्ति मां लोका वीर्येण तव विस्मिताः ।। २१ ।।**[०४]

इन्द्रत्वे तु स्थितं वीर बलहीनं पराजितम्। (05)
**वत्तेजसाऽवमंस्यन्ति लोका मां सुरसत्तम ।। २२ ।।**

आवयोश्च मिथो भेदे प्रयतिष्यन्त्यतन्द्रिताः । (06)
**भेदिते च त्वयि विभो लोको द्वैधमुपेष्यति ।। २३ ।।**

द्विधाभूतेषु लोकेषु निश्चितेष्वावयोस्तथा।**

---

(०१) (१)इद्रो हि (for इन्द्रेण ); वर्तव्यं (for कं ); (२) इन्द्रो (for इन्द्रे ); च (for हि);परमं (for विपुलं ); (३) वीर्य (for वीर ); बली (for बल ),

(०२)(१) इद्रः (for शक्रः ); भव इन्द्रो; (३) अभिषिश्चस्व; अभ्यषिच्यस्त्वम्, वै चाद्य; वै राज्ये; चा ( अ );द्यैव, (४) प्राप्तरूपेपि सत्तमः

(०३)(४)न मे शक्रत्वम्; न मे इन्द्रत्वम्; न ममैद्रत्वम्, ईक्षितं (for ईप्सितम् ),

(०४)(१) हून्द्रः (for शक्रः ); ( अ )तुलं (for द्भुतं ); (२) देवतानाम्; तद्देवानाम् (for त्वं देवानाम् ); अरिं, अवज्ञास्यसि मा (for मां );(३) ख-जहि शत्रून्महाबाहो लोगास्सन्तु निरामया : ।, (४) तव वीर्येण संवृताः,

(०५) (१)तु; (ऽ)व; हि (for ऽपि ),

(०६) (२) भेदैः (for भेदे ),

विग्रहः सम्प्रवर्तेत भूतभेदान्महाबल ।। २४ ।।[०१]

तत्र त्वं मां रणे तात यथाश्रद्धं विजेष्यसि।**
तस्मादिन्द्रो भवानेव भविता मा विचारय ।। २५ ।।[०२]

**स्कन्दः**

त्वमेव राजा भद्रं ते त्रैलोक्यस्य ममैव च ।**
करोमि किं च ते शक्र शासनं तद्ब्रवीहि मे ।। २६ ।।[०३]

**इन्द्रः**

अहमिन्द्रो भविष्यामि तव वाक्यान्महाबल।**
यदि सत्यमिदं वाक्यं निश्चयाद्भाषितं त्वया ।। २७ ।।[०४]

अभिषिच्यस्व देवानां से(सै)नापत्ये महाबल ।
अहमिन्द्रो भविष्यामि तव वाक्यान्महाबल ।। २८ ।।[०५]

स्कन्द उवाच

दानवानां विनाशाय देवानामर्थसिद्धये।।
गोब्राह्मणहितार्थाय से(सै)नापत्येऽभिषिश्च माम् ।। २९ ।।[०६]

---

(०१)(१)तथा (for विभो ); (२) मुपैष्यति; ०त्वमेष्यति; को द्वेधा (वै स ); मपनेष्यति (३) द्वैक (for द्विधा ); दैवे (for लोके ); (४) तदा; यथा (for तथा ); सम्प्रपद्येत (for वर्तेत ); विग्रहाः वर्तन्ते बलः, बलाः,

(०२) (१)अत्र त्वं मा; मां त्वं तत्र (for तात ); (२) विजे ष्यति; ते०, (३) त्वमेव (for भवान् ); एव (for अद्य ); भवतां; विधाता (for भविता ); भव मा च वि,

(०३)(२)(अ)पि; ( इ )ति (for (ए)व ), (३)किं करोमि, किं च तं; किं च मे; किङ्करः; तदहं; किमहं, तात (for शक्र); (४) शासनात्, च (for तद् ); मां (for मे ); शासनं ब्रूहि तन्मम,

(०४) (१) यदि वा शासनं स्कन्द कर्तुमिच्छसि मे शृणु। इद्रः (for शक्रः ); शक्यम् (for सत्यम् ); (२) निश्चितं; निश्चयं (for निश्चयाद् ); काङ्क्षितं (for भाषितं ); (४) अर्हसि (for इच्छसि ); प्रियः ( कुरु ); (for शृणु ),

(०५)(१)अभिषिश्चस्व; (२) सैना; बलः, (४) महायशाः; प्रभो; प्रभ (for बल ),

(०६) (३)गोब्राह्मणानां, त्राणार्थे; चार्थाय; (for रक्षार्थं ); गो ब्राह्मणहितार्थाय, (४) सैना (ऽ)भिषिच्यतां,

**मार्कण्डेयः**

सोऽभिषिक्तो मघवता सर्वैर्देवगणैः सह ।**
अतीव शुशुभे तत्र पूज्यमानो महर्षिभिः ॥ ३० ॥

*अधिकपाठः

तस्य तद्वचनं श्रुत्वा स्कन्दस्य बलवृत्रहा ।
ऋषिभिस्तं महासेनं हृष्टो देवगणैः सह ।
सौवर्णे रत्नखचिते तरुणारुणभास्वरे ।
दिव्यासने समास्थाप्य विमलैः पुण्यवारिभिः ।
महासेनं तदा शक्रः सेनापत्येऽभिषिक्तवान्॥ (०१)

तत्र तत्काञ्चनं छत्रं ध्रियमाणं व्यरोचत।**
यथैव सुसमिद्धस्य पावकस्यात्ममण्डलम् ॥ ३१ ॥(०२)

विश्वकर्मकृता चास्य दिव्या माला हिरण्मयी।**
आबद्धा त्रिपुरघ्नेन स्वयमेव यशस्विना ॥ ३२ ॥(०३)

आगम्य मनुजव्याघ्र सह देव्या परन्तपः ।**
अर्चयामास सुप्रीतो भगवान्गोवृषध्वजः ॥ ३३ ॥(०४)

रुद्रमग्निं द्विजाः प्राहु रुद्रसूनुस्ततस्तु सः ।

---

(०१) (२)सर्व (for सर्वैर् ); (३) तेन; स्कन्दः (for तत्र ),
(०२)(१)तत्र (for तस्य ); (२) व्यराजत; विराजते (for व्यरो ),
(०३)(१)रम्या; चैव; दिव्या, (for चास्य ); (२) दिव्य; रम्या (for दिव्या ); (४) रुद्रेण च (for स्वयमेव ),
(०४)(१)श्रेष्ठ (for व्याघ्र ); (२) मात्रा ( पलयो ); (for देव्या ); (३) लालयामास, (४) वृषभं (for गोवृषं ),

**कीर्त्यते सुमहातेजाः कुमारोऽद्भुतदर्शनः ॥ ३४ ॥**(०१)

**लक्षालङ्कारः- रूद्रमग्निं प्रजाः प्राहुः इत्यत्र रूद्रमपि अग्निमित्याहुः कालाग्निरुद्रत्वात् । अतः रूद्रपुत्रत्वे..पि अग्निपुत्रत्वं सम्भवतीति भावः ।**

**रुद्रेण शुक्रमुत्सृष्टं तच्छ्वेतः पर्वतोऽभवत्।****
**पावकस्येन्द्रियं श्वेते कृत्तिकाभिः कृतं नगे ॥ ३५ ॥**(०२)

***अधिकपाठः**

**तच्छक्रं भक्षयामास वह्निस्तस्माद्गुहोऽभवत् ।**

**पूज्यमानं तु रुद्रेण दृष्ट्वा सर्वे दिवौकसः ।****
**रुद्रसूनुं ततः प्राहुर्गुहं गुणवतां वरम् ॥ ३६ ॥**(०३)

**अनुप्रविश्य रुद्रेण वह्निं जातो ह्ययं शिशुः ।****
**तत्र जातस्ततः स्कन्दो रुद्रसूनुस्ततोऽभवत् ॥ ३७ ॥**(०४)

**रुद्रस्य वह्नेः स्वाहायाः षण्णां स्त्रीणां च भारत।****
**जातः स्कन्दः सुरश्रेष्ठो रुद्रसूनुस्ततोऽभवत् ॥ ३८ ॥**(०५)

**अरजे वाससी रक्ते वसानः पावकात्मजः ।****
**भाति दीप्तवपुः श्रीमान्रक्ताभ्राभ्यामिवांशुमान् ॥ ३९ ॥**(०६)

---

(०१)(३) शुक्लम् (for शुक्रम् ); (४) तेन ( येन ); श्वेतो भवद्गिरिः .

(०२) (२)सूर्यस्तनुम् (for सूनुस्ततस् ); च (for तु); (५) प्रियं ) (for द्विन्द्रियं ); (३) ख- तच्छुक्लं धारयामास वह्निर्गङ्गाजले..त्यजत् । गङ्गाशरवणे चापि तत्र स्कन्दो व्याजायत ॥, (६)कृते; धृतं (for कृतं ); युगे (for नगे ),

(०३)(३)गुहं ) (for ततः ); स रुद्रसूनुस्तत्प्राहुः (४) ततो ) (for गुहं ),

(०४)(२)वह्निः; रुद्र; वहेर् (for वह्निं ); यतः; (ऽ)प्ययं (for ह्ययं ); शुचिः (for शिशुः); (३) ततो (for तत्र ); यतः) (for ततः),

(०५) (१)स्वाहायां; (२) तु ) (for च ); भारत (for तेजसा ); (३) ततः) (for जातः ),

(०६)(१)अजरे; विरजे (for अरजे ); (३)क-ख-घ-बभौ, अति; अहो; बभौ (for भाति ); धीमान् (for श्रीमान् ); अतीव शुशुभे श्रीमान् (४) मध्याह्न इव भास्करः; भ्राजमान इवांशुमान्; अनुरक्तो यथांशु०; मुक्तोभ्रेषु यथांशु; रक्ताभ्रैरिव चांशु,

कुक्कुटश्चाग्निना दत्तस्तस्य केतुरलङ्कृतः ।
**रथे समुच्छ्रितो भाति कालाग्निरिव लोह ।। ४० ।।**(०१)

***अधिकपाठः**

**या चेष्टा सर्वभूतानां प्रभा शान्तिर्बलं तथा।**

**अग्रतस्तस्य सा शक्तिर्देवानां जयवर्धिनी।**(०२)

विवेश कवचं चास्य शरीरे सहजं तथा।**
**युध्यमानस्य देवस्य प्रादुर्भवति तत्सदा ।। ४१ ।।**(०३)

शक्तिर्धर्मो बलं तेजः कान्तत्वं सत्यमुन्नतिः ।**
**ब्रह्मण्यत्वमसम्मोहो भक्तानां परिरक्षणम् ।। ४२ ।।**(०४)

निकृन्तनं च शत्रूणां लोकानां चाभिरक्षणम्।
**स्कन्देन सह जातानि सर्वाण्येव जनाधिप ।। ४३ ।।**

एवं देवगणैः सर्वैः सोऽभिषिक्तः स्वलङ्कृतः ।**
**बभौ प्रतीतः सुमनाः परिपूर्णेन्दुमण्डलः ।। ४४ ।।**(०५)

इष्टैः स्वाध्यायघोषैश्च देवतूर्यवरैरपि।
**देवगन्धर्वगीतैश्च सर्वैरप्सरसां गणैः ।। ४५ ।।**(०६)

---

(०१)(१/२)दत्तः तस्य,
(०२) ( लोकानां (for भूतानां); शक्तिर् (for शान्तिर् ); भय नाशिनी; प्रीतिवर्धिनी (for जयं ); )
(०३) (२)शरीरे (for रं ); तथा; तदा (for ततः); (३) तस्यैव (for देवस्य ); (४) सर्वदा०; नान्यदा (for तत्सदा ),
(०४)(१)धर्मो; मेधा; वर्ष्म; वीर्यं (for वर्म ); (२) कान्तित्वं; क्षान्ति ( त ) त्वं, आकृतिः; अश्वतिः; उन्नतिः) (for अक्षति ;),
(०५)(२)महाबलः (for स्थलं ), (३); अतीव; चातीव; प्रदीप्तः) (for प्रतीतः ); सुमहान् (४) प्रति (for परि); संनिभः ( लक्षणः ); मण्डलः (for दर्शनः ),
(०६) (१) रवैः शुभैः (for इष्टैः ); (२) वेणु (for देव ); ०वरैर (for रवैद् ); तथा (for अपि); (४) नृत्तैः (for सर्वैः ); चाप्सरसां (for अप्सरसां ),

एतैश्चान्यैश्च बहुभिस्तुष्टैर्हृष्टैः स्वलङ्कृतैः ।**
क्रीडन्भाति तदा देवैरभिषिक्तश्च पावकिः ।। ४६ ।।[०१]

(१०७४) अधिकपाठः

सुसंवृतः पिशाचानां गणैर्देवगणैस्तथा।[०२]

अभिषिक्तं महासेनमपश्यन्त दिवौकसः ।**
विनिकृ(ह)त्य तमः सूर्यं यथेहाभ्युदितं तथा ।। ४७ ।।[०३]

अथैनमभ्ययुः सर्वा देवसेनाः सहस्रशः ।**
अस्माकं त्वं पतिरिति ब्रुवाणाः सर्वतो दिशः ।। ४८ ।।[०४]

ताः समासाद्य भगवान्सर्वभूतगणैर्वृतः ।**
अर्चितस्तु स्तुतश्चैव सान्त्वयामास ता अपि ।। ४९ ।।[०५]

शतक्रतुश्चाभिषिच्य स्कन्दं सेनापतिं तदा।**
सस्मार तां देवसेनां या सा तेन विमोक्षिता ।। ५० ।।[०६]

इन्द्रः

अयं तस्याः पतिर्नूनं विहितो ब्रह्मणा स्वयम् ** ।। ५१ ।।

विचिन्त्येत्यानयामास देवसेनां ह्यलङ्कृताम्।[०७]

---

(०१)(१) बहुभिर् (for विविधैर् ); (२)हृत्स्वष्टैः; तुर्बुद्धैः तुष्टैरिष्टैः; मृष्टैस्तुष्टैः (for हृष्टतुष्टः ); स्वलङ्कृतैः; अलङ्कृत; (for अलङ्कृतै; );

(०२)(३) भाति (for इव ); (४) च; तु (for स ),

(०३)(१)देवम् (for सेनम् ); (३) विनिहन्य; हृत्य, (४) यथैव (for यथेह );(अ) भ्युदये (for दितं ); तदा ; यथा (for तथा );

(०४)(१)तथैनम्; तदैनम्) (for अथैनम् ); सेना (for सर्वा ); (४) ब्रुवन्त्यः (for ब्रुवाणाः); सर्वतो दिशः; सर्वदेवताः .

(०५)(२)सर्वैर् (for सर्व ); देव (for भूतं ); विभुः (for वृतः ); (३) तु (for च ); तत (for स्तुत ); चापि (for चैव ); (४) तास्त्वयि; तानपि; तास्तदा (for ता अपि);

(०६) (२)तथा (for तदा ); (३) देवसेनां तां, (४) पूर्वं; (अ)नेन (for तेन ); विमोचिता (for क्षिता),

(०७) (१)अस्याः (for तस्याः ); दत्तो (for नूनं ); (२) पुरा (for स्वयम् ); (३)विर्चित्यन्त्या ( त्यैवा

स्कन्दं प्रोवाच बलभिदियं कन्या सुरोत्तम।
अजाते त्वयि निर्दिष्टा तव पत्नी स्वयम्भुवा।[०१]

तस्मात्त्वमस्या विधिवत्पाणिं मन्त्रपुरस्कृतम्।**
गृहाण दक्षिणं देव्याः पाणिना पद्मवर्चसा ।। ५२ ।।[०२]

*अधिकपाठः

एवमुक्तो भगवता महासेनो महाबलः ।
दृष्ट्वा कमलपत्राक्षीं तनुमध्यां यशस्विनीम् ।
अतीव रूपसम्पन्नां सर्वाभरणभूषिताम् ।
सर्वलक्षणसम्पन्नां देवसेनां शुचिस्मिताम् ।

एवमुक्तः स जग्राह तस्याः पाणिं यथाविधि।**
बृहस्पतिर्मन्त्रविद्धि जजाप च जुहाव च ।। ५३ ।।[०३]

*अधिकपाठः

जग्राह भरतश्रेष्ठ देवसेनापतिस्ततः ।[०४]

एवं स्कन्दस्य महिषीं देवसेनां विदुर्जनाः ।
षष्ठीं यां ब्राह्मणाः प्राहुर्लक्ष्मीमाशां सुखप्रदाम्।** ।। ५४ ।।

सिनीवालीं कुहूं चैव सद्वृत्तिमपराजिताम्।[०५]

---

) नयामास; ( ह्वया मासुर ); इति तामानयामासुर्; सञ्चिन्त्य चा; ( त्वा; त्येत्या ) नयामास, (४) ह्यलं०; अलं ) (for स्वलं ),

(०१)(१)प्रोवाच (for चो ); नृपते; वल (for बल ); स्कदायोवाच वलभिद् , (४) भार्या (for पत्नी ),

(०२)(१)तस्याम् (for तस्मात् );त्वमस्या विधि वत्पाणि; (२) होम (for पाणि ); (४) पद्मवर्चसा; पाणिना वर्चसा श्रियाः

(०३)(१)प्रीत्या परमया युक्तम्; (२) पाणिं तस्या,

(०४) मन्त्रविद्धि (for मन्त्रविधिं ), (३)मन्त्रविद्धि (for मन्त्रविधि),

(०५) (२)जना (for बुधाः ); (३) षष्ठी, (४) आसां (for आशां ); प्रभां (for प्रदाम् ); (६)सुवृत्तिम्

इत्येवमादिभिर्देवी नामभिः परिकीर्त्यते ।। ५५ ।।

यदा स्कन्दः पतिर्लब्धः शाश्वतो देवसेनया।**
तदा तमाश्रयल्लक्ष्मीः स्वयं देवी शरीरिणी ।। ५६ ।।(०१)

श्रीजुष्टः पञ्चमीं स्कन्दस्तस्माच्छ्रीपञ्चमी स्मृता।**
षष्ठ्यां कृतार्थोऽभूद्यस्मात्तस्मात्षष्ठी महातिथिः ।। ५७ ।।(०२)

अस्मिन् पर्वणि १८६अध्याये ५७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि आङ्गिरसे स्कन्दोपाख्याने ।। १८६ ।।

(मार्कण्डेयसमस्यापर्वणि ......ऽध्यायः)

# 03- 04 - 187Adhyaya

# १८७. सप्तशीत्यधिकशततमोऽध्यायः

मार्कण्डेयेन युधिष्ठिरं प्रति स्कन्दचरित्रकीर्तनम् ।। कृत्तिकानां नक्षत्रमण्डले स्थानोपलब्धिः कष्टप्रदानं विविधग्रहाणं वर्णनं च

### मार्कण्डेयः

श्रिया जुष्टं महासेनं देवसेनापतिं कृतम्।**
सप्तर्षिपत्न्यः षड्देव्यस्तत्सकाशमथागमन् ।। १ ।।(०३)

---

(for सद्वृत्तिम् ),

(०१)(१)यथा (for यदा ); प्रतिलब्धः; प्रीति लब्धः, (३) समाश्रयल् ( श्रया ); ( ए )नमाश्रयल्; तमाश्रया, (४) एव (for देवी ),

(०२) (१) ख-श्रीजुष्टः पञ्चमीस्कन्दः; क-घ-श्रिया, तुष्टः (for जुष्टः ); श्रिया जुष्टः स पञ्चम्यां, (२) तदा (for तस्मात् ); श्रीः पञ्चमी, (३) यच्च; यश्च (for यस्मात् ),

(०३)(२)० पती, (for ०पतिं); प्रभुं (for कृतम्); (४) तत्समीपम् (for तत्सकाशम्), उपां (for अथा०),

ऋषिभिः सम्परित्यक्ता धर्मयुक्ता महाव्रताः ।**
द्रुतमागम्य चोचुस्ता देवसेनापतिं प्रभुम्                    ।। २ ।।(०१)

**देव्यः**

वयं पुत्र परित्यक्ता भर्तृभिर्देवसम्मितैः ।**
अकारणाद्रुषा तैस्तु पुण्यस्थानात्परिच्युताः            ।। ३ ।।

धर्मयुक्ता महाव्रताः ।।भवदीयैकशरणाः (02)

अस्माभिः किलजातस्त्वमिति केनाप्युदाहृतम्।**
तत्सत्यमेतत्संश्रुत्य तस्मान्नस्त्रातुमर्हसि                    ।। ४ ।।(०३)

अक्षयश्च भवेत्स्वर्गस्त्वत्प्रसादाद्धि नः प्रभो।**
त्वां पुत्रं चाप्यभीप्सामः कृत्वैतदनृणो भव            ।। ५ ।।(०४)

**स्कन्दः**

मातरो हि भवत्यो मे सुतो वोऽहमनिन्दिताः ।**
यद्वापीच्छत तत्सर्वं सम्भविष्यति वस्तथा            ।। ६ ।।(०५)

**मार्कण्डेयः**

विवक्षन्तं ततः शक्रं किं कार्यमिति सोऽब्रवीत्।**
उक्तः स्कन्देन ब्रूहीति सोऽब्रवीत्वासवस्ततः            ।। ७ ।।(०६)

---

(०१) (१)०ताः परित्यक्ता; परिसत्यक्ता, (२) पति० (for महा०); (३)आगत्य (for आगम्य); ते; तं (for ता),

(०२)(२)०संमतैः; ० संनिभैः (for ०संमितैः); (३) अकारणरुषा; रंणं रुषा; दूष्य (for रुषा); तैश्च; तेस्तु (for तात); (४) पुण्यात् (for पुण्य ०),

(०३)(२)अथ (for इति); (उ)पा (for (उ)दा); (३) तत्सत्यम्; अपत्यम् (for असत्यम्); संस्मृत्य ) (for संश्रुत्य),

(०४)(१)तु (for च); पुत्रं च त्वामभीप्सामः (मवाप्स्याम),

(०५)(१)भवन्त्यो (for त्यो), (३) यद्वा (श्वा) पीच्छत (थ); यदवाप्स्यथ) (for यच्चाभीप्सथ); (४) सदा; तदा (for तथा); भविष्यति वरस्तथा; भविष्यति च सर्वदा,

(०६)(१)एवमुक्त्वा; विवक्षा (क्षि)तं; एवमुक्तम्, शक्रः (for शक्रं); विवक्षितं ते शक्रश्च, (२) चा (for सो);

अभिजित्स्पर्धमाना तु रोहिण्या कन्यासी स्वसा।**
इच्छन्ती ज्येष्ठतां देवी तपस्तप्तुं वनं गता ।। ८ ।।[०१]

(वा)ऋषिपत्नीरूपषण्मातृभिः स्वासां प्राचीनमाद्दणां स्थानं दातव्यमित्यशया समागतम् । तच्चायोग्यरूपत्वात् असम्भावितं त्वया..पि न देयमिति सूचयितुं काञ्चित्कथामाह अभिजित् स्पर्धमाना इत्यादिना । कन्यसी कनीयसी ।

तत्र मूढोऽस्मि भद्रं ते नक्षत्रं गगनाच्चुतम्।**
कालं त्विमं परं स्कन्द ब्रह्मणा सह चिन्तय।[०२]

लक्षालङ्कारः- तत्र अभिजिद्देवताया अभीष्टं भवति न वा इत्यत्र मूढो..सि । अभिजिद्देवतायाः स्वायोग्यरोहिणीज्यैष्ठ्यप्राप्त्यर्थं तपःकरणदोषात् नक्षत्रं कृत्तिकानक्षत्रम् उत्पातरूपेण च्युतम् । पूर्वं रोहिणी आदिः श्रेष्ठा यस्य स तथोक्तः । ब्रह्मणः आज्ञानन्तरं धनीष्ठादित्वं च । एवं द्वयीमतिरेकः अभिजितः रोहिणीतः श्रैष्ठ्यं न भवत्येविति भावः ।

धनिष्ठादिस्तदा कालो ब्रह्मणा परिकल्पितः ।**
रोहिणीह्यभवत्पूर्वमेवं सङ्ख्या समाभवत् ।। ९ ।।[०३]

**मार्कण्डेयः**

एवमुक्ते तु शक्रेण त्रिविदं कृत्तिकागता(ताः)।**
नक्षत्र शकटाकारं भाति तद्वह्निदैवतम् ।। १० ।।[०४]

लक्षालङ्कारः- एवमुक्ते तु शक्रेण इत्यत्र एवं शक्रेण धर्मे उक्ते सति कृत्तिका पुनस्त्रिदिवं

---

(३) उक्तं; ततः; उक्ते (for उक्तः); देहीति (ब्रू); स्कन्देनोक्तः प्रब्रवीहि, (४) तदा (for ततः),
(०१)(१)सर्वनामा; स्पर्धमानं; च (for तु); (२) अनुज्ञा, चानुजा; ह्यनुजा (for कन्यसी); रोहिण्या कनकाह्वया; रोहिण्यास्तु (ण्या तु) कनीयसी; (३) इच्छती; श्रेष्ठतां, (४) वने) (for वनं), (अनुजा स्वसा)
(०२)(१)अत्र) (for तत्र); (३) त्वमपरं) (for त्विमं परं); प्रति) (for परं); स्कन्दं क्य स्कन्द); (४) स हि चिन्तय; पर्यचितयत् (यं); सह चिन्तया; सह चितयन्;)त्),
(०३)(१)तथा (for तदा); (२) परिकीर्तितः; कल्पितः, (३) ख-रोहिण्यादिस्तथा कालो ब्रह्मणा परिनिर्मितः ।, रोहिण्या योभवत्; रोहिणी ह्यभवत्; रोहिण्याद्यभवत्; रोहिण्या०श्चाभवत्; धाता प्रजापतिः, (४) एषो; एषां (for एवं); सदा; समो० (for समा); भवेत्,
(०४)(१)उक्ते च; उक्तेन (for उक्ते तु); (२) गता (for गताः), (३) सर्पशीर्षाभं; सप्तशीर्षाभं (for शकटा); (४) नित्याग्नि; तध्यग्नि (for तद्वह्नि),

गता । अतस्त्वया..पि एतासां ऋषिपत्नीनां षण्मातृणां अयोग्यं वक्ष्यमाणदेवमातृकास्थानं न देयामिति भावः ।

विनता चाब्रवीत्स्कन्दं मम त्वं पिण्डदः सुतः ।**
इच्छामि नित्यमेवाहं त्वया पुत्र सहासितुम् ।। ११ ।।(०१)

**स्कन्दः**

**एवमस्तु नमस्तेऽस्तु पुत्रस्नेहात्प्रशाधि माम्।****
स्नुषया पूज्यमाना वै देवि वत्स्यसि नित्यदा ।। १२ ।।(०२)

**मार्कण्डेयः**

अथ मातृगणः सर्वः स्कन्दं वचनमब्रवीत् ।। १३ ।।

मातरः
वयं सर्वस्य लोकस्य मातरः कविभिः स्तुताः ।
इच्छामो मातरस्तुभ्यं भवितुं पूजयस्व नः । (०३)
तासां तु वचनं श्रुत्वा स्कन्दो वचनमब्रवीत् ।। १४ ।।(०४)

लक्षालङ्कारः- अथ मातृगण इत्यत्र मातृगणः ऋषिपत्नीरूपमातृगणः ।

**स्कन्दः**

मातरो हि भवत्यो मे भवतीनामहं सुतः ।**
उच्यतां यन्मया कार्यं भवतीनामथेप्सितम् ।। १५ ।।(०५)

**मातरः**

---

(०१) (२)दयितः (for पिण्डदः); सदा (for सुतः); (३) नित्यं सहिता; नित्यं भवता (for नित्यमेवाहं),
(०२)(२)पुत्रं (for पुत्र०);(४) दिवि; देवी (for देवि); वै सदा (for नित्यदा),
(०३) (१) गणं सर्वं; गणाः सर्वे; गणाः सर्वाः, (२) स्कन्दो (for स्कन्दं); अब्रुवन् (for अब्रवीत्); (३) एवं (for वयं); (४) स्मृताः (for स्तुताः); (५) इच्छाम (for मो),
(०४) तासां तु (for स तासां); भाषितं (for वचनं),
(०५) (१) हि (for तु), (३) तन् (for यन्), (४) यथे०; इहे; अभीः (for अथे),

यास्तु ता मातरः पूर्वं लोकस्यास्य प्रकल्पिताः ।**
अस्माकं तु भवेत्स्थानं तासां चैव न तद्भवेत् ।। १६ ।।[०१]

भवेम पूज्या लोकस्य न ताः पूज्याः सुरर्षभ।**
अस्मत्प्रजा हृतास्ताभिस्त्वत्कृते ताः प्रयच्छ नः ।। १७।।[०२]

**स्कन्दः**

वृत्ताः प्रजा न ताः शक्या भवतीभिर्निषेवितुम्।**
अन्यां वः कां प्रयच्छामि प्रजां यां मनसेच्छथ ।। १८ ।।[०३]

लक्षालङ्कारः- अन्यां वः कां प्रयच्छामि इत्यत्र कां कश्चित् । विनतादित्यदित्यादि नामानः स्कन्दपरिवाराः भूतग्रहा एव, न तु देवमातरः । साक्षाद्देवमातरस्तु सर्वलोकसुखप्रदा एव, न तु मारिका इति ज्ञेयम् ।

**मातरः**

इच्छाम तासां मातणां प्रजा भोक्तुं प्रयच्छ नः ।**
त्वया सह पृथग्भूता ये च तासामथेश्वराः ।। १९ ।।[०४]

**स्कन्दः**

प्रजा वो दद्मि कष्टं तु भवतीभिरुदाहृतम्।**

---

(०१) (१)यथा सु०(for यास्तु ता); (२) प्रवर्तिताः; प्रकीर्तिताः; प्रकाशिताः; प्रवर्तकाः (३) आस्मासु (for कं); तु; च (for तद्); स्थानात् (for स्थानं),

(०२)(१)सर्व० (for पूज्या); (२) नित्यं (त्य०); (for न ताः); र्षिभिः (for र्षभ); (३) हिताः; हताः (for हृताः); (अ)स्माभिस् (for ताभिस्); (४) तां; तत् (for ताः),

(०३) (२)वृत्ताः हृताः; न ताः (for दत्ताः); दत्ता प्रजा न सा शक्या; दत्ता न ताः प्रजाः शक्या; (२) निषेधितुं; निषीदितुं, (३) ख-घ-अन्यं कामंप्रयच्छामि पूजया मलसेच्छथ ।, अन्या वः काः; अन्यां कां वः; कन्यां कामं; अन्यं कामं (for अन्यां वः कां), (४) प्रजा या; प्रजा यां; पूजां यां, मम मातरः (for मनसेच्छथ),

(०४)(१) घ-दत्ताः प्रजा न ताश्साक्या भवतिभिर्निषेवितः ।, इच्छामि; ब्रह्मा तु (for इच्छाम); भोक्तं (for तासां); परिरक्षाम भोक्तं त्वं, (२) प्रजां (for प्रजा); स्कन्द (for भोक्तुं); ह (for नः); (४) महे (for अथे०),

**परिरक्षत भद्रं वः प्रजाः साधु नमस्कृताः ।। २० ।।[०१]**

**मातरः**

परिरक्षाम भद्रं ते प्रजाः स्कन्द यथेच्छसि।**
**त्वया नो रोचते स्कन्द सहवासश्चिरं प्रभो ।। २१ ।।[०२]**

**स्कन्दः**

यावत्षोडश वर्षाणि भवन्ति तरुणाः प्रजाः ।**
**प्रबाधत मनुष्याणां तावद्रूपैः पृथग्विधैः ।। २२ ।।[०३]**

अहं च वः प्रदास्यामि रौद्रमात्मानमव्ययम्।**
**परमं तेन सहिताः सुखं वत्स्यथ पूजिताः ।। २३ ।।[०४]**

**मार्कण्डेय उवच**

ततः शरीरात्स्कन्दस्य पुरुषः पावकप्रभः ।**
**भोक्तुं प्रजाः स मर्त्यानां निष्पपात महाप्रभः ।। २४ ।।[०५]**

अपतत्सहसा भूमौ विसञ्ज्ञोऽथ क्षुधार्दितः ।
**स्कन्देन सोऽभ्यनुज्ञातो रौद्ररूपोऽभवद्ग्रहः ** ।। २५ ।।[०६]**

---

(०१) (१)पूजां (for प्रजा); च (for तु); (३) परिरक्षन्तु;; रक्षतु; रक्षथ,

(०२)(२)साधु; देहि (for स्कन्द); प्रयच्छ ह (for यथे००); (३)ख-प्रजादातुं हिकष्टं ता भवतीभिरुदाहृतम् । परिपक्षतभद्रं वः प्रजाः साधुनमस्कृताः ।। मातरः- परिपक्षाम भद्रं तेप्रजाःस्कन्दप्रयच्छ ह ।,त्वया न रोचते स्कन्द सहवासश्चिरं प्रभो ।।, न (for नो); (४) विभो (for प्रभो),

(०३) (२)भवेद्धि; भवित्री (for भवन्ति); तरुणी (णी), प्रजा, (३) प्रधावत; धावति; ०बाधनं; बाधध्वं; बाध त्वं, (४) तावद्भूतै; ताहग्रूपै; तावद्रूपैः

(०४) (१)चेमं (for च वः); (२) वरम् (for रौद्रम्); (३) परमेतेन (for परमं तेन); (४) नित्यदा (for पूजिताः),

(०५)(१)ततः स्कन्दस्य पुरुषः, (२) शरीरात् (for पुरुषः); शाश्वतः प्रभुः; (भः); पावकप्रभः; (for काञ्चन); (३) स्म; तु (for स); (४) निपपात; महाग्रहः; प्रभः.

(०६)(१)सहसा; स ततो (for स तदा); (२) संविग्नो (for विसञ्ज्ञो); दिन्तः (for ०न्वितः),

स्कन्दापस्मारमित्याहुर्ग्रहं तं द्विजसत्तमाः । (01)
विनता तु महारौद्रा कथ्यते शकुनिग्रहः ** ।। २६ ।।(०२)

पूतनां राक्षसीं प्राहुस्तं विद्यात्पूतनाग्रहम्। (03)
कष्टा दारुणरूपेण घोररूपा निशाचरी ।। २७ ।।(०४)

पिशाची दारुणाकारा कथ्यते शीतपूतना।**
गर्भान्सा मानुषीणां तु हरते घोरदर्शना ।। २८ ।।(०५)

अदितिं रेवतीं प्राहुर्ग्रहस्तस्यास्तु रैवतः ।**
सोऽपि बालान्महाघोरो बाधते वै महाग्रहः ।। २९ ।।(०६)

दैत्यानां या दितिर्माता तामाहुर्मुखमण्डिता(का)म्।**
अत्यर्थं शिशुमांसेन सम्प्रहृष्टा दुरासदा ।। ३०।।(०७)

लक्षालङ्कारः- तामाहुर्मुखमण्डिकाम् इत्यत्र तां तन्नाम्नीम् ।

कुमाराश्च कुमार्यश्च ये प्रोक्ताः स्कन्दसम्भवाः ।**
तेऽपि गर्भभुजः सर्वे कौरव्य सुमहाग्रहाः ।। ३१ ।।(०८)

तासामेव तु पत्नीनां पतयस्ते प्रकीर्तिताः ।**
आजायमानान्गृह्णन्ति बालकान्रौद्रकर्मिणः ।। ३२ ।।(०९)

---

(०१) (१) पस्मार (for पस्मारम्); (२) तु; तद् (for तं),
(०२)(१)रौद्रः (for रौद्रा); (२) शत्रुनिग्रहः; शकु निर्ग्रहः,
(०३) (३) मातृणां; पितृणां (for पूतनां); रक्षसां (for राक्षसीं); आहुस्; त्वाहुस् (for प्राहुस्); तां (for तं),
(०४)(१)नष्टा (for कष्टा); चनक, दारकं (for दारुण);
(०५)(३) दारुणाचारा; (४) सा तु पूतना; शीघ्रसूदना (for शीत),
(०६)(१)आहुद् (for प्राहुर्); (३) बालः (for बालान्); शिशुर्भूत्वा; महाघोरो (for शिशून्धोरो); घोरान् (for घोरो); (४) हि; स (for वै),
(०७) (२)मुखमडितां; (४) सम्प्रतुष्टा, सा प्रहृष्टा; सम्प्रदुष्टा; ० पुष्टा; दृष्टा (for हृष्टा), सम्प्रहृष्टां सदाः .
(०८)(१)कुमार्यश्च कुमा०राश्च; (२) याः (for ये),
(०९) (१) च ( तु ); नारीणां; तु पत्नीनां (for कुमा); तानेव चैव नारीणां,

गवां माता तु या प्राज्ञैः कथ्यते सुरभिर्नृप।**
शकुनिस्तामथारुह्य सह भुङ्क्ते शिशून् भुवि ।। ३३ ।।(०१)

लक्षालङ्कारः- शकुनिस्ताम् इत्यत्र तां तन्नाम्नी पिशाचीम् । सा..पि तन्नाम्नी पिशाची ।

सरमा नाम या माता शुनां देवी जनाधिप।**
सापि गर्भान्समादत्ते मानुषीणां सदैव हि ।। ३४ ।।(०२)

पादपानां च या माता करञ्जनिलया हि सा।
वरदा सा हि सौम्या च नित्यं भूतानुकम्पिनी ।। ३५ ।।

लक्षालङ्कारः- करञ्जनिलया हि सा इत्यत्र 'नक्तमालः करञ्जः स्यात्' इत्यभिधानात् करञ्जः वृत्रविशेषः । सा दनुसनाम्नी ।

करञ्जे तां नमस्यन्ति तस्मात्पुत्रार्थिनो नराः **। (03)

*अधिकपाठः (०४)

इमे त्वष्टादशान्ये वै ग्रहा मांसमधुप्रियाः ** ।। ३६ ।।(०५)

लक्षालङ्कारः- इमे त्वष्टादशान्ये वै इत्यत्र षण्मातृकाः, शकुन्याख्यः पुङ्गहः एकः, ऐरावताख्यः पुङ्गहः एकः, एवमष्ट । अन्ये स्कन्तस्य कुमारीकुमाराणां पञ्च गणाः, कद्वद्याः पञ्च चेति दश,एवमष्टादश ।

---

(३) आजायमानान् ( माना ); आज्ञायमाना; अज्ञायमानान्; ग्राहति (for गृह्णन्ति );
(४) दारका (for बालका); कर्मणः (for कर्मिणः ),
(०१) (१)च (for तु ); (२) नव (for नृप ); (३) शकुनिं तु समारुह्य
(४) शिशुं, प्रति (for भुवि ),
(०२) (१/२)माता; देवी; या देवी; माता या; या तात; गुणान्; शुनो (for शुनां ); तेषां (for देवी );
(३) तु; हि (for (अ)पि ); गर्भं (for गर्भान् ); समाधत्ते
(४) मानुषाणां; मनुष्याणां; हिताय (for सदैव ); ह; वै; तु (for हि ),
(०३) (१)हिः तु (for च ); (२) या शुभा; याभिधा (for या हि सा );
(०४)( दन्तुरा (for वरदा ); ) (३) करजैस; तान् (for तां ); कराश्चैतान्प्रयच्छति (४) जनाः; पराः (for नराः),
(०५)(१)दश ह्येवं; दश ह्येते (for दशा न्ये वै); च (for वै );

द्विपश्चरात्रं तिष्ठन्ति सततं सूतिकाग्रहे ।। ३७ ।। (01)

कद्रूः सूक्ष्मवपुर्भूत्वा गर्भिणीं प्रविशत्यथ ।**
भुङ्क्ते सा तत्र तं गर्भं सा तु नागं प्रसूयते ।। ३८ ।।(०२)

गन्धर्वाणां तु या माता सा गर्भं गृह्य गच्छति।
ततो विलीनगर्भा सा मानुषी भुवि दृश्यतेस ।(०३)

या जनित्री त्वप्सरसां गर्भमास्ते प्रगृह्य सा।**
उपनष्टं ततो गर्भं कथयन्ति मनीषिणः ।। ३९ ।।(०४)

लोहितस्योदधेः कन्या धात्री स्कन्दस्य सा स्मृता।**
लोहितायनिरित्येवं कदम्बे सा हि पूज्यते ।। ४० ।।(०५)

पुरुषेषु यथा रुद्रस्तथाऽऽर्या प्रमदास्वपि।**
आर्या माता कुमारस्य पृथक्कामार्थमिज्यते ।। ४१ ।।(०६)

एवमेते कुमाराणां मया प्रोक्ता महाग्रहाः ।**
यावत्षोडश वर्षाणि शिशूनां ह्यशिवास्ततः ।। ४२ ।।(०७)

---

(०१)(३) दिवं च रात्रिं; दिवारात्रं च ( तु ); (for द्विपश्चरात्रं); (४) सतता,
(०२)(१)रुद्रः (for कद्रः ); सूक्ष्मं ( क्ष्म ); वपुः कृत्वा; (२) गर्भान्सं (for गर्भिणीं); प्रविशति (for शेद्); मुदा; ( उ )तः ( अ ) पि; ( अ )थ; यदि; ( अ )यं (for यदा ); (३) सा भुङ्क्ते स (for सा); तद्गतं; तत्र तद् (for तत्र तं); (४) कथयन्ति मनीषिणः
(०३)(१)च (for तु); सुजाता हरिणी या तु; (२) गृश्च तिष्ठति; पिबति प्रभो (for गृह्य गच्छति); (३) तु (for सा),
(०४) (१)ख-सुजाताहरिणी य तुसा गर्भं पिबति प्रभो । ततो विलीनगर्भा सा मासुशी भुवि दृश्यते ।।, जनयित्री (for या जनित्री ); (२) प्रसह्य (for प्रग् ); च (for सा); (३) नष्टं (for विष्टं ); (४) सा ( स; या ); तु नागं प्रसूयते
(०५)(२)या; सं; च (for सा); (३) लोहितायिति; यति; ता धात्रि; येति (for यनिर् ); (ए) व; (for (ए) व ); (४) कदम्भे; तु; ( अ )भि; प्र (for हि ); गृह्य (for पूज्य ),
(०६)(१)यदा (for यथा ); रुद्रास्; रौद्रम् (for रुद्रम् ); (२) प्रमदा अपि (for स्वपि ); (४) कार्यार्थम्; मासार्थम् (for कामार्थम्); इष्यते; ईक्ष्यते (for इज्यते),
(०७) (१)कुमारीणां; (२) तु वै; परि (for महा); ह्यशिवा (for अशिवा ); शिवास्तथा; शिवास्तुतः; तथा

ये च मातृगणाः प्रोक्ताः पुरुषाश्चैव ये ग्रहाः ।**
**सर्वे स्कन्दग्रहा नाम ज्ञेया नित्यं शरीरिभिः ।। ४३ ।।**(०१)

तेषां प्रशमनं कार्यं स्नानं धूपमथाञ्जनम्।**
**बलिकर्मोपहाराश्च स्कन्दस्येज्याविशेषतः ।। ४४ ।।**(०२)

एवमभ्यर्चिताः सर्वे प्रयच्छन्ति शुभं नृणाम्।**
**आयुर्वीर्यं च राजेन्द्र सम्यक्पूजानमस्कृताः ।। ४५ ।।**(०३)

ऊर्ध्वं तु षोडशाद्वर्षाद्ये भवन्ति ग्रहा नृणाम्।**
**तानहं सम्प्रवक्ष्यामि नमस्कृत्य महेश्वरम् ।। ४६ ।।**(०४)

यः पश्यति नरो देवान्जाग्रद्वा शयितोऽपि वा।**
**उन्मादयति स तु क्षिप्रं तं तु देवग्रहं विदुः ।। ४७ ।।**(०५)

आसीनश्च शयानश्च यः पश्यति नरः पितन्।**
**उन्मादयति स तु क्षिप्रं स ज्ञेयस्तु पितृग्रहः ।। ४८ ।।**(०६)

अवमन्यति यः सिद्धान्क्रुद्धाश्चापि शपन्ति यम्।**

---

शिवाः; शिवा ग्रहाः; शिवाः स्मृताः शिशूनां ह्यशिवास्ततः,
(०१)(१)एवं (for ये च ); गणः प्रोक्तः (२) वै ग्रहाः; विग्रहाः (for चे ग्रहा); (३) राजन्द्र (for नाम );,
(४) मनीषिभिः (for शरी ),
(०२)(१)कुर्यात् (for कार्य); (२) स्थानं (for सानं ); धूपस् (for धूपं ); तथा (for अथ ); (अ) र्चनं; जपं (for (अ)अनम् ); स्नानधूपाञ्ज ( पास );ना दिभिः (३) बल्युद्वर्तनमभ्यगः; बलिकर्मोपहाराश्च; ०हारैश्च; हारं च; (४) (दृ)ष्टाः (इ) ज्यां; (for (इ) ज्या ),
(०३) (१)अभ्यर्चिताः; एवा (for एते ); सम्यक् (for सर्वे ); (२) शुभां; भान् (for भं ); दीर्घं; दिव्यं (for वीर्यं ); राज्यं च (for राजेन्द्र ); (४) कुर्यात् (for सम्यक् ); पूज्य (for पूजा ); नमस्कृतैः (for नमस्कृताः ),
(०४)(१)षोडशकाद् (for तु षोडशाद् ); (२) न (for ये); ग्रहन्ति (for भवन्ति ); (३) अनर्हं (for तानहं ); (४) महेश्वरीं; गीः (for रम् ),
(०५)(१)देवं (for दैवान् ); (२) जा ग्रन्वा; (३) उन्माद्य तु (for उन्मादयति ; उन्मादि तु क्षिप्रमेव (४) दैव (for देवं ),
(०६)(२)यः नरः (३) च (for तु); (४) विज्ञेयः (for स ज्ञेयः); च; हि (for तु ),

उन्माद्यति स तु क्षिप्रं ज्ञेयः सिद्धग्रहस्तु सः ।। ४९ ।।[०१]

यस्य दोषैः प्रकुपितं चित्तं मुह्यति देहिनः ।

उपघ्राति च यो गन्धान्रसांश्चापि पृथग्विधान्।**
उन्माद्यति स तु क्षिप्रं स ज्ञेयो राक्षसो ग्रहः ।। ५० ।।[०२]

गन्धर्वाश्चापि यं दिव्याः संविशन्ति नरं भुवि।**
उन्माद्यति स तु क्षिप्रं ग्रहो गान्धर्व एव सः ।। ५१ ।।[०३]

अधिरोहन्ति यं नित्यं पिशाचाः पुरुषं प्रति।**
उन्माद्यति स तु क्षिप्रं ग्रहः पैशाच एव सः ।। ५२ ।।[०४]

आविशन्ति च यं यक्षाः पुरुषं कालपर्यये।

उन्माद्यति स तु क्षिप्रं ज्ञेयो यक्षग्रहस्तु सः ।[०५]

यस्य दोषैः प्रकुपितं चित्तं मुह्यति देहिनः ।**
उन्माद्यति स तु क्षिप्रं साधनं तस्य शाश्वतः ।। ५३ ।।[०६]

वैक्लव्याच्च भयाच्चैव घोराणां चापि दर्शनात्।**

---

(०१) (१)अवमन्यन्ति; मन्येत; अवेक्ष्यते हि; यं; वः (for यः); क्रुद्धाः; सिद्धाः; क्रुद्धान्; सिद्धः (for सिद्धान्); (२) क्रूराशू; क्रुद्धम् (for क्रुद्धाशू); चाभि (for चापि ); विशति यं; शपत्यपि (for शपन्ति यम् ); च (for यम् ); सिद्धाश्च शमयन्ति यं; क्लिद्धान्पश्यत्युपेत्य च, (४) गण (for ग्रहं ),

(०२)(१) उपप्राति तु ( च ); उपा (प) घ्रयति; उपज्घ्रिति तु (for च ); यं गत्वा (for यो गन्धान् ); (२) तासां; नृणां (for रसान् ); चापि (for चैव); विशेषतः; पृथग्विधं; (४) वि (for स ); राक्षसग्रहः .

(०३)(१)या; ये; यद् (for यं); (२) संविशन्ति (for स्पृशन्ति ); वनं; नरा (for नरं); (४) गधर्व; उच्यते (for एव सः),

(०४)(१) ( अ )पि (for च); तं; यां; कं (for यं); यक्षः; वृक्षः; कामाः; कामात् (for यक्षाः); (२) पुरुषः; पौरुषं; पुरुषान् ; (४) ग्रहो गन्धर्व एव सः साधनं तत्र संस्तुतः; पैशाचं तं ग्रहं विदु,

(०५) (२) अभि० (for अधि); ये (for यं); क्षिप्रं (for नित्यं ); (२) प्रति (for क्वचित् ); (४) ग्रहः पैशाच एव सः; ज्ञेयः सिद्ध ग्रहस्तु सः .

(०६)(१)पर; सर्व; तस्य (for यस्य); प्रकुपितैश; (२) मुह्यति; माद्यति (for मुह्यति ); (३) ततः (for स तु); (४) विधानं (for साधनं );

उन्मादयति स तु क्षिप्रं सान्त्वं तस्य तु साधनम् ॥ ५४ ॥(०१)

लक्षालङ्कारः- सत्वं तस्य तु साधनम् इत्यत्र सत्वं दुष्टः पिशाचादिप्राणी ।

कश्चित्क्रीडितुकामो वै भोक्तुकामस्तथापरः ।**
अभिकामस्तथैवान्य इत्येष त्रिविधो ग्रहः ॥ ५५ ॥(०२)

यावत्सप्ततिवर्षाणि भवन्त्येते ग्रहा नृणाम्।**
अतः परं देहिनां तु ग्रहतुल्यो भवेज्ज्वरः ॥ ५६ ॥(०३)

अप्रकीर्णेन्द्रियं दान्तं शुचिं नित्यमतन्द्रितम्।**
आस्तिकं श्रद्दधानं च वर्जयन्ति सदा ग्रहाः ॥ ५७॥(०४)

इत्येष ते ग्रहोद्देशो मानुषाणां प्रकीर्तितः ।**
न स्पृशन्ति ग्रहा भक्तान्नरान्देवं महेश्वरम् ॥ ५८ ॥(०५)

**अस्मिन् पर्वणि १८७अध्याये ५८श्लोकाः सन्ति**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि**
**मार्कण्डेयसमास्यापर्वणि आङ्गिरसे स्कन्दोपाख्याने पकश्चत्रिंशो.. अध्यायः ॥ १८७ ॥**

**(मार्कण्डेयसमस्यापर्वणि ......ऽध्यायः)**

---

(०१) (१)चापि (for चैव ); (२) चैव (for चापि); (४) सान्त्वं ( शास्त्रं ); (for सत्त्वं ); प्र; हि (for तु); साधयेत् (for साधनम्); सत्वं साधनशास्त्रतः.

(०२)(१)क्वचित्; किश्चित्; कच्चित् (for कश्चित् ); क्रीडति कामो; क्रीडतुकामो; क्रीडन्सकामो; क्रीडनकामो; वा; हि (for वै); (२) हातु (for भोक्तुं); (अ)परे; ( अ )पि वा; ग्रहः; ( अ )ग्रतः (for ( अ )परः); (३) अतिकामंस्; रतिकामस् (for अभिकामस्); (४) (ए)वं (for (ए) व); त्रिविधा ग्रहाः .

(०३)(१)यावत्त सप्त वर्षाणि; (२) तावन्त्येते (for भवन्त्येते); भृशं (for नृणाम्); (३) तु मत्यानां (for देहिनां तु ); (४) तुल्या (for तुल्यो ); ज्वरो भवेत् नरः; जरा (for ज्वरः ),

(०४)(१)यग्रामं (for यं दान्तं); (३) शुद्धाचारं च; दैवतपरं (for श्रद्दधानं च ),

(०५)(२)मनुष्याणां; (३) नरान्; सदा (for ग्रहा); (४) ग्रहो; ग्रहा; देव (for नरान् ); देवो महेश्वरः देवे महेश्वरे,

## 03- 04 - 188Adhyaya

# १८८. अष्टाशीत्यधिकशततमोऽध्यायः

स्कन्देन स्वाहादेव्या अभीष्टदानम् ।। १ ।। ब्रह्मणा स्कन्दं प्रति सोपपत्तिकं तस्य रुद्रपुत्रत्वादिकथनम् ।। २ ।। स्कन्दस्य देवसैनापत्ये अभिषेकानन्तरं महादेवस्य पार्वत्या सह भद्रवटं प्रति प्रस्थानम् ।। ३ ।। तदेन्द्रादिभिर्दिक्पालैः ससैन्यैस्तमन् प्रस्थानम् ।। ४ ।। तदा रुद्रेण स्कन्दस्य देवसैनापत्येनियेजलम् ।। ५ ।। ततो देवसुराणां महायुद्धम् । सत्र स्कन्देन महिषासुरसंहारः ।। ६ ।। स्कन्दकृतः स्वाहादेव्याः सत्कारः रुद्रेण सह देवगणसहितस्य स्कन्दस्य भद्रवटयात्रा ।।

**मार्कण्डेयः**

**यदा स्कन्देन मातणामेवमेतत्प्रिय कृतम्।****
**अथैनमब्रवीत्स्वाहा मम पुत्रस्त्वमौरसः ।। १ ।।(०१)**

इच्छाम्यहं त्वया दत्तां प्रीतिं परमदुर्लभाम्।**
**तामब्रवीत्ततः स्कन्दः प्रीतिमिच्छसि कीदृशीम् ।। २ ।।(०२)**

**स्वाहा**

**दक्षस्याहं प्रिया कन्या स्वाहा नाम महाभुज ।****
**बाल्यात्प्रभृति नित्यं च जातकामा हुताशने ।। ३ ।।(०३)**

न स मां कामिनीं पुत्र सम्यक्जानाति पावकः ।**
**इच्छामि शाश्वतं वासं वस्तुं पुत्र सहाग्निना ।। ४ ।।(०४)**

---

(०१) (२)तत्तत् (for एतत्); कृतं प्रियं; प्रकीर्तितं,

(०२) (२) तदा (for ततः),

(०३)(३) ज्ञानात् (for बाल्यात्),

(०४) (४) स (for च); (२) पुत्रक (for पावक; (३) वस्तुं (for वासं); (४) बाढं; वासं (for वस्तुं),

**स्कन्दः**

**हव्यं कव्यं च यत्किञ्चिद्द्विजाना मन्त्रस स्तुतम्।****
**होष्यन्त्यग्नौ सदा देवि स्वाहेत्युक्त्वा समुद्धृतम् ॥ ५ ॥**[०१]

अद्यप्रभृति दास्यन्ति सुवृत्ताः सत्पथे स्थिताः ।**
एवमग्निस्त्वया सार्धं सदा वत्स्यति शोभने ॥ ६ ॥[०२]

**मार्कण्डेयः**

**एवमुक्ता ततः स्वाहा तुष्टा स्कन्देन पूजिता।****
**पावकेन समायुक्ता भर्त्रा स्कन्दमपूजयत् ।**[०३]
**ततो ब्रह्मा महासेनं प्रजापतिरथाब्रवीत् ॥ ७ ॥**[०४]

**ब्रह्म**

**अभिगच्छ महादेवं पितरं त्रिपुरार्दनम्।** (05)
**रुद्रेणाग्नि समाविश्य स्वाहामाविश्य चोमया ॥ ८ ॥**

हितार्थं सर्वलोकानां जातस्त्वमपराजितः ॥ ९ ॥[०६]

**उमायोन्यां च रुद्रेण शुक्रं सिक्तं महात्मना।****
**अस्मिन्गिरौ निपतितं मिञ्जिकामिञ्जिकं यतः ॥ १० ॥**[०७]

---

(०१)(५) पवित्रं हि (for च यत्किञ्चिद्); (२) द्विज० (for द्विजा); द्विजानां मन्त्रसंस्तु०(स्कृ)तं; (३) होमस्त्वग्नौ (होष्यन्त्यग्नौ); तदा (for सदा); (४) सर्वे (for देवि); सम०द्युति; सदा हुतं; समुद्धृतं,
(०२) (६) होष्यति (for दास्यन्ति); (२) संवृताः; सुव्रताः सत्पथि; थ० (for ये),
(०३)(७) एवमुक्त्वा; तदा (for ततः); (२) स्कन्देन तु सुपूजिता; (४) भक्ता; तत्र; ततः (for भर्त्रा),
(०४)(१) अतो (for ततो);
(०५) (१) अभाषत (for अथाब्रवीत्); (२) त्रिपुरान्तकं; ते महेश्वरं,
(०६)(९) पुत्रेण (for रुद्रेण); (४) अपराजित,
(०७)(१०) अधिकपाठः ० तु (for च); सिक्तं शुक्र; (२) शुक्लं (for शुक्रं); (३) अस्ते; अस्मिन् (for आस्ते); (४) मिञ्जिका (कां); मिञ्जिको (के); मज्जिकामज्जिकं; मिञ्जिकामिञ्जितं; मिजिकामिजिकं; मुञ्जको मुञ्ज (जि)काः; मिजिरो मिञ्जिका; मञ्जि (मुष्टि) को मुष्टिका; मुञ्जिको मुजिका; ततः; च यत्; तथा (for यतः),

मिथुनं चै महाभाग तत्र तद्रुद्रसम्भवम्।
**सम्भूतं लोहितोदे तु शुक्रशेषमवापतत्** ।। ११ ।।

सूर्यरश्मिषु चाप्यन्यदन्यच्चैवापतद्भुवि।**
**आसक्तमन्यद्वृक्षेषु तदेवं पञ्चधापतत्** ।। १२ ।।(०१)

तत्र ते विविधाकारा गणा ज्ञेया मनीषिभिः ।**
**तव पारिषदा घोरा य एते पिशिताशिनः** ।। १३ ।।(०२)

**मार्कण्डेयः**

**एवमस्त्विति चाप्युक्त्वा महासेनो महेश्वरम्।****
**अपूजयदमेयात्मा पितरं पितृवत्सलः** ।। १४ ।।

**मार्कण्डेयः**

**अर्कपुष्पैस्तु ते पञ्च गणाः पूज्या धनार्थिभिः ।****
**व्याधिप्रशमनार्थं च तेषां पूजां समाचरेत्** ।। १५ ।।(०३)

मिञ्जिकामिञ्जिकं चैव मिथुनं रुद्रसम्भवम्।**
**नमस्कार्यं सदैवेह बालानां हितमिच्छता** ।। १६ ।।(०४)

---

(०१)(१) सम्भृतं, लोहितोदेति; ताहे तु; तं हेतु; ते देशे; तोद्धेशे (for तोदे तु); द्रुतं लोकहितो०द्देशे; (२) शुक्रं; शुद्धं; शुक्ल०; शुक्लं (for शुक्र०); इवापतत्; अवाप्त० वान्; समापतत्; अपातयत् (for अवापतत्); शुक्राशयमवाप्य तत्; (३) (अ)ग्राव् (for (अ)न्यद्); (४) चापि (for चैव); (६) एतत् (for एवं); (अ) भवत् (for (अ)०पतत्),
(०२) तदेते; तत्र ते; (एते हि); एतेषु; एते तु (for त एते); (२) गुह (for गणा); मनीषिणा; महर्षिभिः, (३) एवं (for तव); त एव (भवन्ति; भवते; ततस्ते; ; तव ये; तवैव; न चैते; तवैते); पार्षदा घोरा; (४) एतेपि (for य एते); पिशिताशिनः,
(०३)(१) मार्कण्डेय उ(मार्कण्डेयः); अर्ध (for अर्क); च (for तु); मे (for ते), (२) (३) व्याधेः(for व्याधि०); र्थाय (for र्य च); तु (for च); (४) पूजा, समन्ततः; अथारभेत्; यथा०श्वेतः (for समा),
(०४)(१)क-मञ्जिको मञ्जिका चैव; ख-मुञ्जको मुष्टिका चैव , घ-मिञ्जिको मिञ्जिका चैव, मिञ्जिकामिजिकश् (का); मिजितं; मज्जिकामज्जिकं; मञ्जिकामञ्जिकं; मुञ्जको मुञ्जका; मञ्जको मञ्जका; मुञ्जि(मुष्टि०; मुञ्ज)को मुष्टिः (मुजि) का, (४) लोकानां (for बाला); शमम् (for हितम्),

स्त्रियो मानुषमांसादा वृद्धिका नाम नामतः ।**
**वृक्षेषु जातास्ता देव्यो नमस्कार्याः प्रजार्थिभिः ।। १७ ।।**(०१)

एवमेते पिशाचानामसङ्ख्येया गणाः स्मृताः ।**
**घण्टायाः सपताकायाः शृणु मे सम्भवं नृप ।। १८ ।।**(०२)

ऐरावतस्य घण्टे द्वे वैजयन्त्याविति श्रुते।**
**गुहस्य ते स्वयं दत्ते क्रमेणानाय्य धीमता ।। १९ ।।**(०३)

एका तत्र विशाखस्य घण्टा स्कन्दस्य चापरा।**
**पताका कार्त्तिकेयस्य विशाखस्य च लोहिता ।। २० ।।**(०४)

यानि क्रीडनकान्यस्य देवैर्दत्तानि वै तदा।**
**तैरेव रमते देवो महासेनो महाबलः ।। २१ ।।**(०५)

स संवृतः पिशाचानां गणैर्देवगणैस्तथा।**
**शुशुभे काञ्चने शैले दीप्यमानः श्रिया वृतः ।। २२ ।।**(०६)

तेन वीरेण शुशुभे स शैलः शुभकाननः ।**
**आदित्येनेवांशुमता मन्दरश्चारुकन्दरः ।। २३ ।।**(०७)

सन्तानकवनैः फुल्लैः करवीरवनैरपि।**

---

(०१) विद्धिका; वृक्षा (क्षि) का (for वृद्धिका); (३) नार्यो (for देव्यो),
(०२)एवमेव; ए (ते)षामेव (for एवमेते); (२) असङ्ख्येय०, गुणाः (for गणाः),
(०३) ऐरावणस्य; एतावतस्य; (२) स्मृते (for श्रुते); वैजयन्त्या विनिःसृते; वैजयन्त्या विभू; षिते०; गुहाय (for गुहस्य); द्वयं (for स्वयं);(३)ख-गुहायते स्यं यत्ते शक्रेणानाय्य,क- स्वयं तेजश्शक्रेणा;, घ-शुभं दत्ते शक्रेणा, (४) क्रमेणा (for शक्रेणा); (अ)प्यति०; (ए)वास्य; (अ)प्यथः (आ)नम्य (for (आ)नाय्य),
(०४)(१) तस्य (for तत्र); (२) शक्रं (for स्कन्द); श्वेता तु (for पताका); (३) तु (for च),
(०५) वै सदा; वै पुरा; तानि वै (for वै तदा); (३) सार्धं (for देवो),
(०६) (१) सुसंवृतः; स संवृत्तः; सुसंवृत्तः; स सम्भृतः, (२) भृत्य (for देव); सह; तदा (for तथा); (४) मानश्रि (स्त्रि) या वृतः .
(०७) कालः; गिरिः (for शेलः); (३) आदित्यम् (for त्येन); (ए) व (for (इ)व),

पारिजातवनैश्चैव जपाशोकवनैस्तथा ।। २४ ।।(०१)

कदम्बतरुषण्डैश्च दिव्यैर्मृगगणैरपि।**

दिव्यैः पक्षिगणैश्चैव शुशुभे श्वेतपर्वतः ।(०२)

तत्र देवगणाः सर्वे सर्वे देवर्षयस्तथा।

मेघतूर्यरवाश्चैव क्षुब्धोदधिसमस्वनाः ।(०३)

तत्र दिव्याश्च गन्धर्वा नृत्यन्तेऽप्सरसस्तथा।**
हृष्टानां तत्र भूतानां श्रूयते निनदो महान् ।। २५ ।।(०४)

एवं सेन्द्रं जगत्सर्वं श्वेतपर्वतसंस्थितम्।**
प्रहृष्टं प्रेक्षते स्कन्दं न च ग्लायति दर्शनात् ।। २६ ।।(०५)

**मार्कण्डेयः**

**यदाभिषिक्तो भगवान्सैनापत्येन पावकिः ।**
तदा सम्प्रस्थितः श्रीमान्हृष्टो भद्रवटं हरः ।। २७ ।। (०६)

रथेनादित्यवर्णेन पार्वत्या सहितः प्रभुः ।(०७)
अनुयातः सुरैः सर्वैः सहस्राक्षपुरोगमैः ।* ।। २८ ।।(०८)

---

(०१)चापि (for चैव); (४) जवा (for जपा); जराशोकबलैस्तथा,

(०२)खण्डै (for षण्डे); (२) तथा (for अपि); (३) पितृ (for पक्षि); चापि (for चैव); दिव्य० पुष्पफलैश्चैव,

(०३)चापि (for सर्वे); (२) ख-तत्र देवघणास्सर्वे चैव महर्षयः ।, मेघतूर्यरवाश्चापि क्षुब्धौदधिसमस्वनाः ।।, सर्वे देवर्षयस्तथा; (३) रवै०; निभै (for रवा), चापि (for चैव); (४) निभस्वनैः; समस्वनः,

(०४) देवाः(for दिव्याः); स०; स्म (for च); (२) नृत्यन्ते; नृत्यत (for नृत्यन्ति); (अ)प्स०रसां गणाः; (अ)प्सरसस्तदाः, (३) सर्व०(for तत्र); (४) शुश्रुवे (for श्रूयते),

(०५) संश्रितं; मस्त्वितं; (३) प्रेक्ष्य च; प्रेक्ष्य तं; वीक्षते (for प्रे०); (४) न च (चा) ग्लायत दर्शनात्, आरण्यः अंगिरसः कुमारोत्पत्तिः; कुमारचरित्रं.

(०६)(१) यथा (for यदा); बल (for भग); (२) सैनापत्येन; सेनापत्ये तु; (३) स (for सं);(४) क-ख-घ-वनं,

(०७) (४) ततो (for हृष्टो); रुद्र; तत्र (for भद्र); नरः तव) (for हरः), (६) पार्वती०

(०८)(१) तत्र ) (for तस्य); (२) युक्ते) (for युक्तं); ततो दिव्यः; रथो दिव्यं; रथो दिव्यः; रथः शुभ्रं (for

सहस्रं तस्य सिंहानां तस्मिन्युक्तं रथोत्तमे।**
**उत्पपात दिवं शुभ्रं कालेनाभिप्रचोदितम्** ।। २९ ।।(०१)

ते पिबन्त इवाकाशं त्रासयन्तश्चराचरान्।**
**सिंहा नभस्यगच्छन्त नदन्तश्चारुकेसराः** ।। ३० ।।(०२)

तस्मिन्रथे पशुपतिः स्थितो भात्युमया सह ।**
**विद्युता सहितः सूर्यः सेन्द्रचापे घने यथा** ।। ३१ ।।(०३)

अग्रतस्तस्य भगवान्धनेशो गुह्यकैः सह ।**
**आस्थाय रुचिरं याति पुष्पकं नरवाहनः** ।। ३२ ।।(०४)

ऐरावतं समास्थाय शक्रश्चापि सुरैः सह ।**
**पृष्ठतोऽनुययौ यान्तं वरदं वृषभध्वजम्** ।। ३३ ।।(०५)

जृम्भकैर्यक्षरक्षोभिः स्रग्विभिः समलङ्कृतः ।**
**यात्यमोघो महायक्षो दक्षिणं पक्षमास्थितः** ।। ३४ ।।(०६)

तस्य दक्षिणतो देवा बहवश्चित्रयोधिनः ।**
**गच्छन्ति वसुभिः सार्धं रुद्रैश्च सह सङ्गताः** ।। ३५ ।।(०७)

---

दिवं शुभ्रं);
(०१)(४) सूतेन; जवेन; कशया ) (for कालेन); (अ)ति (for (अ)भि); प्रचोदितं; ०प्रणोदितं,
(०२)(२) ०श्चराचरं; (३) सिंहा रथं वहन्तश्च; (४) नर्दन्त) (for नदन्त); च सु (for चार् ); केशरा,
(०३) (२) गण ) (for पशु); (२) यात्सु (for भात्यु); (३) मण्डिते; मण्डितः) (for सहितः); सूर्ये; (४) चापघने; चाप घनो ) (for चापे घने); तथा (for यथा), सेद्रचापयुतो यथा,
(०४)(२) विमानं; वनेसौ (for धनेशो); (३) तु चिरं (for रु); यानं; भाति) (for याति); (४) नाम (for नर),
(०५) (१) ऐरावणं, रुह्य) (for स्थाय); (२) स्वामिसुरैः; देवगणैः) (for चापि सुरैः); सुरेश्वरः (for सुरैः सह),
(०६)(१) जबुकै०; जम्भकै; भास्करै (for जम्भकै); (२) कृतैः; कृतं (for कृतः), (३) (अ)मेयो (for (अ)मोधो); पार्श्र्वम्; (for पक्षम्); आश्रितः.
(०७)(२) बहव (for मरुत); (३) बहु (for वसु); (४) सिद्धैः) रुद्रैः); साध्यैश्च) (for रुद्रैश्च सह); संवृताः (for गताः),

**यमश्च मृत्युना सार्धं सर्वतः परिवारितः ।****
**घोरैर्व्याधिशतैर्याति घोररूपवपुस्तथा ।। ३६ ।।**(०१)

**यमस्य पृष्ठतश्चैव घोरस्त्रिशिखरः शितः ।****
**विजयो नाम रुद्रस्य याति शूलः स्वलङ्कृतः ।। ३७ ।।**(०२)

**तमुग्रपाशो वरुणो भगवान्सलिलेश्वरः ।****
**परिवार्य शनैर्याति यादोभिर्विविधैर्वृतः ।। ३८ ।।**(०३)

**पृष्ठतो विजयस्यापि याति रुद्रस्य पट्ट(ट्टि)सः ।****
**गदामुसलशक्त्याद्यैर्वृतः प्रहरणोत्तमैः ।। ३९ ।।**(०४)

**लक्षालङ्कारः- पृष्टतो विजयस्यापि इत्यत्र विजयस्य विजयनामकत्रिशूलस्य ।**

**पट्टिशं त्वन्वगाद्राजञ्छत्रं रौद्रं महाप्रभम्।****
**कमण्डलुश्चाप्यनु तं महर्षिगणसेवितः ।। ४०।।**(०५)

**तस्य दक्षिणतो भाति दण्डो गच्छञ्श्रिया वृतः ।****
**भृग्वङ्गिरोभिः सहितो दैवतैश्चानुपूजितः ।। ४१ ।।**(०६)

**एषां तु पृष्ठतो रुद्रो विमले स्यन्दने स्थितः ।****

---

(०१) (१) तु (for च); (२) बहुभिः) (for सर्वत); (३) चापि; युक्तो (for याति); (४) तदा) (for तथा),

(०२)(१) चापि; याति (for चैव); (२) ०शिरसः (for ०शिखरः); सितः; तत (for शित); घोरस्त्रिशिरसंस्थितः; सुघोरस्त्रि शिराः; स्थि )शि) तः; सुखोसित्रयिराततः (४) शरो याति; यस्त्रिशूल (for याति शूल),

(०३)(१/२) उग्रपाशोथ) (for तमुग्रपाशो); वरुणः; भगवान्; (३) शतै ) (for शनै), (४) बहुभि (for विविधै),

(०४)(१) (अ)थ (for (अ)पि); (२) पट्टसः (for पट्टिशः); (३) मुसुल; मुशल (४) णैरपि; ०णैर्वरैः; णैर्वर(for ०णोत्तमैः); वृतः सह रथोत्तमैः .

(०५) (१) पट्टसं) (for पट्टिशं); च (for तु); (अ)गमद् ) (for (अ)न्वगाद्); (२) शस्त्रं; वज्रं (for छत्रं); रौक्मं; घोरं) (for रौद्रं); (३) चाप्यनुगतो; चानुययौ (for चाप्यनु तं); सेवितः; सेवितं) (for संवृतः),

(०६) (२) याति (for भाति); (२) (ऽ)प्यत्र (for गच्छञ्); (४) च, संवृतः (for पूजितः); दैवतैश्चानु (भि) पूजितः,

**याति संहर्षयन्सर्वांस्तेजसा त्रिदिवौकसः ।। ४२ ।।(०१)**

ऋषयश्चापि देवाश्च गन्धर्वा भुजगास्तथा।**
**नद्यो ह्रदाः समुद्राश्च तथैवाप्सरसां गणाः ।। ४३ ।।(०२)**

नक्षत्राणि ग्रहाश्चैव देवानां शिशवश्च ये
**स्त्रियश्च विविधाकारा यान्ति रुद्रस्य पृष्ठतः ।। ४४ ।।**

सृजन्त्यः पुष्पवर्षाणि चारुरूपा वराङ्गनाः ।(०३)

**पर्जन्यश्चाप्यनुययौ नमस्कृत्य पिनाकिनम् ।। ४५।।(०४)**

छत्रं च पाण्डुरं सोमस्तस्य मूर्धन्यधारयत्।**
**चामरे चापि वायुश्च गृहीत्वाग्निश्च धिष्ठितौ ।। ४६ ।। (05)**

शक्रश्च पृष्ठतस्तस्य याति राजञ्छ्रिया वृतः ।**
**सह राजर्षिभिः सर्वैः स्तुवानो वृषकेतनम् ।। ४७ ।।(०६)**

गौरी विद्याथ गान्धारी केशिनी मित्रसाह्वया।**
**सावित्र्या सह सर्वास्ताः पार्वत्या यान्ति पृष्ठतः ।। ४८ ।।(०७)**

---

(०१)(१) तेषां (for एषां); मध्य (for पृष्ठं); (३) देवान्; देवः ) (for सर्वान्); सर्वे महर्षयो यान्ति०, (४) च; हि ) (for त्रि० ),
(०२)(१) च हि;० चापि (for चैव); (२) गधर्वानुगतास्तदा ०(३) द्रुमाः; ह्रदाः (for नदाः); च नागाश्च; नगाश्चैव; समुद्राश्च ) (for द्रुमाश्चैव),
(०३)(१) नक्षत्राणां गणाश्चैव; (२) तथा) (for च ये); (३) श्र सर्वा (र्वा); देवानां (५) सृजन्तः; सृजन्ति० (६) दिव्य (for चारु); वेगा (for ०रूपा),
(०४)(२) पितामहं; महेश्वरं) (for पिना); (३) च (for तु);
(०५) (१) (अ)पात (for (अ)धार); (२) समवर्तत (for (अ)ग्निश्र विष्ठितौ); धिष्ठितौ; विष्टते (for विष्ठितौ)
(०६)(१/२) शक्रस्य; शक्रस्तु; शुक्रश्च) (for शक्रश्च); चैव; चास्य) (for तस्य); तस्य याति; (४) संस्तुवन्; स्तुन्वानो; अस्तुवन्; ) (for स्तुवानो); ०वाहनं (for केतनम्),
(०७) (१) विशाखा; विधा च (for थ); चित्रसा; तिवसा; मिश्रसा (for मित्रसा),सावित्र्या; (त्री); सहिता सर्वा,

तत्र विद्यागणाः सर्वे ये केचित्कविभिः कृताः ।**
**तस्य कुर्वन्ति वचनं सेन्द्रा देवाश्चमूमुखे ।। ४९ ।।**(०१)

**स्वेन स्वेनानुयोगेन सर्वे तेटेनुययुर्हरम् ।**(०२)

गृहीत्वा तु पताकां वै यात्यग्रे राक्षसो ग्रहः
**व्यापृतस्तु श्मशाने यो नित्यं रुद्रस्य वै सखा ।। ५० ।।**
**पिङ्गलो नाम यक्षेन्द्रो लोकस्यानन्ददायकः ।**(०३)
**एभिश्च सहितो देवस्तत्र याति यथासुखम् ।। ५१ ।।**(०४)

अग्रतः पृष्ठतश्चैव न हि तस्य गतिर्ध्रुवा।
**रुद्रं सत्कर्मभिर्मर्त्याः पूजयन्तीह दैवतम् ।। ५२ ।।**

लक्षालङ्कारः- न हि तस्य गतिर्धुवा इत्यत्र तस्य रूद्रपरिवारस्य कदाचिदग्रतो गच्छति कदाचित्पृष्ठतः पार्श्वतश्वेति भावः ।

शिवमित्येव यं प्राहुरीशं रुद्रं पितामहम् ।। ५३ ।। (०५)

एवं सर्वे सुरगणास्तदा वै प्रीतमानसाः ।*
**भावैस्तु विविधाकारैः पूजयन्ति महेश्वरम् ।। ५४ ।।**(०६)

देवसेनापतिस्त्वेवं देवसेनाभिरावृतः ।**
**अनुगच्छति देवेशं ब्रह्मण्यः कृत्तिकासुतः ।। ५५ ।।**(०७)

---

(०१)(१) वृता; स्मृ; स्तु (for कृ),
(०२) (३) तस्य (for यस्य); देव्य (for देवा); च संमुखे (for यश्चचम्),
(०३)(१) गृहीत्वा तु (च); (for स गृहीत्वा); पताकायां) (for कां तु); वै (for तु); (२) यात्यम्भो (for यात्यग्रे); यात्यसौ राक्षसोग्रतः० (३) व्याहृतश्; आमृतश्; आवृत्तश् व्यावृतस् ; क्रीडितस् ) (for व्या०पृतम्); च (for तु); (५) रक्षेन्द्रो (for य),
(०४)(१) स एभिः च; तु) (for स); देवः) (for तत्र); (२) याति देवो; तत्र याति) (for ययौ देवो),
(०५)(१) नित्यं ) (for रुद्रं); रुद्रं स्वां (सत्) कर्मभिर्विप्राः, (२) सनातनं (for (इ)ह दैवतम्); (३) शिव ) (for शिवम्); अस्त्विति (for इत्येव);
(०६) (४) अत्र रुद्रं; रुद्रं चैव; अग्निरूपं (for ईशं रुद्रं); पितामहं) (for पिना),
(०७)(१) चैव; त्वेव) (for त्वेवं); (२) रक्षितः (for आवृत), (४) ब्राह्मणाः) ब्रह्मण्यं) कृकासुत,

अथाब्रवीन्महासेनं महादेवो बृहद्वचः ।**
सप्तमं मारुतस्कन्धं रक्ष नित्यमतन्द्रितः ।। ५६ ।।(०१)

लक्षालङ्कारः- सप्तमं मारुतस्कन्धम् इत्यत्र मरुतां देवानां सप्तमं स्कन्धं स्वस्कन्धव्यतिरिक्तसप्तदिक्पालानां सप्तसङ्ख्याकं सेनास्कन्धं सेनासमुदायम् ।

**स्कन्दः**

सप्तमं मारुतस्कन्धं पालयिष्याम्यहं प्रभो।**
यदन्यदपि मे कार्यं देव तद्वद माचिरम् ।। ५७ ।।(०२)

**रुद्रः**

कार्येष्वहं त्वया पुत्र सन्द्रष्टव्यः सदैव हि।**
दर्शनान्मम भक्त्या च श्रेयः परमवाप्स्यसि ।। ५८ ।।(०३)

**मार्कण्डेयः**

इत्युक्त्वा विससर्जैनं परिष्वज्य महेश्वरः ।**
स्कन्दं सहोमया प्रीतो ज्वलन्तमिव तेजसा * ।। ५९ ।।

विसर्जिते ततः स्कन्दे बभूवौत्पातिकं महत्।
सहसैव महाराज देवान्सर्वान्प्रमोहयत् ।। ६० ।।(०४)

जज्वाल खं सनक्षत्रं प्रमूढं भुवनं भृशम्।**
चचाल व्यनदच्चोर्वी तमोभूतं जगद्बभौ ।। ६१ ।।(०५)

---

(०१) (१/२) सेनं देवो; (अ)ब्रवीद्वचः; बृहद्धनुः; वृतो गणै; महद्वचः (for बृहद्वचः), महातेजा वृषध्वजः; (३) मरुतं; मारुतं; मरुतः; मरुत (for मारुत); (४) रक्षन्नित्यम्; अरिन्दम; अतन्द्रितं,

(०२)(१) मरुतं; मारुतं; मरुत (for मारुत);स्कन्दं; विभो (for प्रभो),

(०३) महेश्वरः; महादेवः; देवः (for रुद्रः); (१) कार्ये त्वहं; (२) सम्प्रष्टव्यः; सम्प्रहृष्टः; सदिष्टव्यः, (३) मद्भक्त्या) (for भक्त्या च),

(०४)(१) तदा (for ततः); (२) बभूवोत्पा;, बहु चोत्पा) (for बभूवौत्पा० ); (४) देवान्सेन्द्रान्; देवाः सेन्द्राः; सर्वान्देवान्; सेद्रान्देवान्; अमोहं; विमोह; व्यमोह (for प्रमोहं),

(०५) (२) संमूढं (for प्र); (३) चान; विन (for व्यन); (४) बभौ (for प्रभो),

ततस्तद्दारुणं दृष्ट्वा क्षुभितः शङ्करस्तदा।**
**उमा चैव महाभागा देवाश्च समहर्षयः ।। ६२ ।।**[०१]

ततस्तेषु प्रमूढेषु पर्वताम्बुदसंनिभम्।**
**नानाप्रहरणं घोरमदृश्यत महद्बलम् ।। ६३ ।।**[०२]

तद्धै घोरमसङ्ख्येयं गर्जच्च विविधा गिरः ।**
**अभ्यद्रवद्रणे देवान्भगवन्तं च शङ्करम् ।। ६४ ।।**[०३]

तैर्विसृष्टान्यनीकेषु बाणजालान्यनेकशः ।**
**पर्वताश्च शतघ्न्यश्च प्रासासिपरिघा गदाः ।। ६५ ।।**[०४]

निपतद्भिश्च तैर्घोरैर्देवानीकं महायुधैः ।**
**क्षणेन व्यद्रवत्सर्वं विमुखं चाप्यदृश्यत ।। ६६ ।।**[०५]

निकृत्तयोधनागाश्वं कृत्तायुधमहारथम्।**
**दानवैरर्दितं सैन्यं देवानां विमुखं बभौ ।। ६७ ।।**[०६]

असुरैर्वध्यमानं तत्पावकैरिव काननम्।**

---

(०१)(१) तं; च (for तद्); स्कन्दाननं (for तद्दारुणं); (३) चापि; चाथ (for चैव); भाग (for भागा); चैव (for च स); देवाश्चर्षिगणेः सह,

(०२) (३) रौद्रम् (for घोरम्); (४) बृह (for मह),

(०३) (१) वै (for हि); घोरतरं सङ्ख्ये (for मसङ्ख्येयं); (२) जगर्ज; गजन्तं (for गर्जच्च); (३) परे (for रणे); (४) महेश्वर (for च शं),

(०४) (१) ते; तद् (for तैर्); (अ)ने०कानि; (३) शतघ्नीश्च; (४) पाशाः (for प्रासाः); स०; (अ) सि (for च); तथा (for गदाः),

(०५) (१) विनदद्भिः; निपतन्ति (for निपतद्भिः); महा०; सदा; तथाः तदा; स्म तैर्; ततो; तु तैर् (for च तैद्); (२) महां; देव्या; सहा (for देवा); अथा; महामृधे; तथायुधै, (३) अ-भववत् सर्वं विमुखश्चैव दृश्यते, ख-व्यद्रवत् सर्वं विमुखे च व्यदृश्यत ।, क्षीणेन; तद्बलं; (आ)भ्यद्रवत्; व्यधमत् (for व्यद्रवत्); वि (for (अ)पि); खं चैव दृश्यते,

(०६) (१) निर्ययौ; निवृत्त०; विकृत्त (for निकृत्त); नागाश्च; नागं च (for नागाश्व); (२) कृतवर्मायुधं महत्; अर्पितं (३) (for अर्दितं); (४) ययौ (for बभौ); देवानां च बभौ रणे,

**अपतद्दग्धभूयिष्ठं महाद्रुमवनं यथा ॥ ६८ ॥(०१)**

**ते विभिन्नशिरोदेहाः प्राद्रवन्तो दिवौकसः ।****
**न नाथमधिगच्छन्ति वध्यमाना महारणे ॥ ६९ ॥(०२)**

**अथ तद्विद्रुतं सैन्यं दृष्ट्वा देवः पुरन्दरः ।****
**आश्वासयन्नुवाचेदं बलभिद्दानवार्दितम् ॥ ७० ॥(०३)**

**पुरन्दरः**

**भयं त्यजत भद्रं वः शूराः शस्त्राणि गृह्णत।****
**कुरुध्वं विक्रमे बुद्धिं मा वः काचिद्व्यथा भवेत् ॥ ७१ ॥(०४)**

**जयतैनान्सुदर्वृत्तान्दानवान्घोरदर्शनान्।****
**अभिद्रवत भद्रं वो मया सह महासुरान् ॥ ७२ ॥(०५)**

**मार्कण्डेयः**

**शक्रस्य वचनं श्रुत्वा समाश्वस्ता दिवौकसः ।**
**दानवान्प्रत्ययुध्यन्त शक्रं कृत्वा व्यपाश्रयम् ॥ ७३ ॥(०६)**

**ततस्ते त्रिदशाः सर्वे मरुतश्च महाबलाः ।****
**प्रत्युद्ययुर्महाभागाः साध्याश्च वसुभिः सह ॥ ७४ ॥(०७)**

---

(०१) (१) बाध्य; भक्ष्यमाणं; विध्य; धक्ष्यमाणं (for वध्य);, तु (for तत्); अभत्र (for अपत),

(०२) (१) तेन भिन्न; तेस्थिभिन्न०; ० ते भिन्नास्थि; ते छिन्नास्थि (for ते विभिन्न); (२) प्रच्यवन्ति; प्राद्रवन्त; ० प्राद्रवन्तो; प्रच्यवन्तो; (३)अ-नानाविधमगच्छन्ति वध्यमानां ; ख-इदमर्धं नास्ति; घ-मगच्छन्त, अधिगच्छन्ति; अभ्यगच्छत; (४) बलैः (for रणे),

(०३) (१/२) अनयद्; असकृद्; अथ तं (for अथ तद्); सैन्यं दृष्ट्वा; (ए)व च(for देवः); (४) बल भिद्; बलं तद् (for बलवद्),

(०४) (२) शरान्; सुराः; स्थिराः (for शूराः); बिभ्रत (for गृह्णत); (४) मा० च; नात्र (for मा वः); व्यथास्तु वः; व्यथां कुरु (for व्यथा भवेत्),

(०५) (१) (ए)तान् (for (ए) नान्); सुदुर्वृत्तान् मया सह; दुराधर्षान् (for सुदुर्वृत्तान्),

(०६) मार्कण्डेयः (३) ०विध्यन्त (for युध्यन्त); प्रत्ययुध्यत देवा वै,

(०७) (१) ते ततस्; तु; तान्; तत् (for ते); (२) रथा; (for बलाः); (३) भागाः; सेनाः (for वेगाः),

तैर्विसृष्टान्यनीकेषु क्रुद्धैः शस्त्राणि संयुगे।**
शराश्च दैत्यकायेषु पिबन्ति रुधिरं बहु ।। ७५ ।।[०१]

तेषां देहान्विनिर्भिद्य शरास्ते निशितास्तदा।**
निपतन्तोऽभ्यदृश्यन्त नगेभ्य इव पन्नगाः ।। ७६ ।।[०२]

तानि दैत्यशरीराणि निर्भिन्नानि स्म सायकैः ।**
अपतन्भूतलो राजंश्छिन्नाभ्राणीव सर्वशः ।। ७७ ।।[०३]

ततस्तद्दानवं सैन्यं सर्वैर्देवगणैर्युधि।**
आ(त्रा)सितं विविधैर्बाणैः कृतं चैव पराङ्मुखम् ।। ७८ ।।[०४]

अथो क्रुष्टं तदा हृष्टैः सर्वैर्देवैरुदायुधैः ।**
संहितानि च तूर्याणि प्रावाद्यन्त ह्यनेकशः ।। ७९ ।।[०५]

लक्षालङ्कारः- अथो क्रुष्टम् इत्यत्र क्रुष्टम् आक्रोशं कुर्वत् ।

एवमन्योन्यसंयुक्तं युद्धमासीत्सुदारुणम्।**

---

(०१) (१) (अ)नेकानि; (for (अ)नीकेषु); (२) क्रुद्धाः शस्त्रेण सं; गजा (for शरां) कायेभ्यः (for कायेषु); दैत्याश्च नागकायेम्यः; तदा दैतेयकायेषु; दैतेयगजकायेषु; (४) स्रवन्ति (for पिबन्ति); रुधिरं बहु (for स्यास्तुल्बणम्); पिबन्तस्त्वसृगु,

(०२) (१) देहाद्; देहं (for देहान्); तु (for वि); (२) विविक्षु (for निशिता); (३) निप (for निष्प०); ह्यदृ०; (ऽ)भ्यदृ; व्यदृ; (ऽ)प्यह (for अदृ०); निष्प (निप) तन्तः; प्रदृ;० (४) नागेभ्य; नगेद्र (for नगेभ्य),

(०३) (२) विभिन्नानि (for निर्भि); विनिर्भि० स्यानि सायकैः (३) न्यप० (for अप), (४) भिन्नां (for छिन्नां); सर्वतः (for शः),

(०४) (१) तु (for तद्); (२) भुवि (for युधि),

(०५) (१) तथा; तत्र (for अथ); (आ)कुष्टं; (उ)ध्दुष्टं (for (उ)त्कुष्टं); तथा (for तदा); कुष्टै; कुष्टै; देवैः (for हृष्टैः); अथोत्क्रुष्टतमा हृष्टाः, (२) हृष्टैः; सर्वैर् (for सर्वै देवैर्); मुदा युतैः (for उदायुधैः); सर्वे देवा मुदा युताः; सर्वदेवगणैर्युधि; (३) संहितानि; सम्भृ; सहस्राणि (for संहतानि); सर्वा (for तूर्या); (४) (अ) शेषतः (for (अ)नेकशः), तदा (for ततम्); सूर्याः (सर्वा) ण्यवादयन्; ० प्रावाद्यन्त ह्यनेकशः

(१) संसक्तं; सक्तं तद् (for संयुक्तं); (४) कर्दमी; कर्दमैः; दूषितं,(यत्र; पुनर् (for पुत्र) लोपेन; लोभेन (for लाभेन ) (२) (अ)भि० (for (अ)पि ) नन्दति (for विन्दति ) राज्य०लाभेन विन्दति; राज्येनापि च विं (३)प्रियं (for प्रीतिं ) (४)अमित्राय; त्राच; त्रस्य;०त्राधि (for त्राध).

देवानां दानवानां च मांसशोणितकर्दमम् ॥ ८० ॥

अभयो देवलोकस्य सहसैवाभ्यदृश्यत।**
तथाहि दानवा घोरा विनिघ्नंति दिवौकसः ॥ ८१ ॥[०१]

ततस्तूर्यप्रणादाश्च भेरीणां च महास्वनः ।**
बभूवुर्दानवेन्द्राणां सिंहनादाश्च दारुणाः ॥ ८२ ॥[०२]

अथ दैत्यबलाद्धोरान्निष्पपात महाबलः ।**
दानवो महिषो नाम प्रगृह्य विपुलं गिरिम् ॥ ८३ ॥[०३]

ते तं घनैरिवादित्यं दृष्ट्वा सम्परिवारितम्।**
तमुद्यतगिरिं राजन्व्यद्रवन्त दिवौकसः ॥ ८४ ॥[०४]

अथाभिद्रुत्य महिषो देवांश्चिक्षेप तं गिरिम्।
महाकायं महाराजं स तोयमिव तोयदम् ॥ ८५ ॥[०५]

अथ तैर्दानवैः सार्धं महिषस्त्रासयन्सुरान्।
पतता तेन गिरिणा देवसैन्यस्य पार्थिव ।**
भीमरूपेण निहतमयुतं प्रापतद्भुवि ॥ ८६ ॥[०६]

---

(०१) (१) सर्वस्य; अनयोर् अजयो; अजेयो; अग्नयो (for अनयो); (२) (अ)भ्यद् (for व्यद्);
(३) तथैव; तदापि; तदा हि; ततोथ (for तथा हि); दानवान्घोरान् ; (४) वि (व्य) निघ्नंस्त्रिदिवौकसः.

(०२) (१) तत्र; तथा (for ततम्); (२) वीराणां (for भेरीणां०); स्वनः (for स्वनाः);
(४) नादश्च दारुणः .

(०३) (२) निपपात,

(०४) (१) वृतं; तं ते; ततो; गणै (for धनै); (२) वर्तितं (for वारितम्); (३) समुद्धतं; समु० द्यम्य गिरीन्; तमुद्यतगिरि; (४) प्राद्रवन्त; धेद्रवन्ति; दिशो दश (for दिवौ),

(०५) (१) तदा (for अथा);

(०६)(१) पपाता; पतिता (for पतता); गिरिणा तेन; (२) देवसैन्यानि; सैन्यं च भारत (for पार्थिव);
(४) क-कघ-द् युधि, अ-रथतो, पातयद् (for प्रापतद्); युधि) (for भुवि),

अथ तैर्दानवैस्सार्धं महिषस्त्रासयन् सुरान् ।
**अभ्यद्रवद्रणे तूर्णं सिंहः क्षुद्रमृगानिव ।। ८७ ।।**

This Stange is Interchenged in TRK After 84.

तमापतन्तं महिषं दृष्ट्वा सेन्द्रा दिवौकसः ।**
**व्यद्रवन्त रणे भीता विकीर्णायुधकेतनाः ।। ८८ ।।**(०१)

ततः स महिषः क्रुद्धस्तूर्णं रुद्ररथं ययौ।**
**अभिद्रुत्य च जग्राह रुद्रस्य रथकूबरम् ।। ८९ ।।**(०२)

यदा रुद्ररथं क्रुद्धो महिषः सहसा गतः ।**
**रेसतू रोदसी गाढं मुमुहुश्च महर्षयः ।। ९० ।।**(०३)

अनदंश्च महाकाया दैत्या जलधरोपमाः ।**
**आसीच्च निश्चितं तेषां जितमस्माभिरित्युत ।। ९१ ।।**(०४)

तथाभूते तु भगवान्नावधीन्महिषं रणे।**
**सस्मार च तदा स्कन्दं मृत्युं तस्य दुरात्मनः ।। ९२ ।।**(०५)

*अधिकपाठः

**दौरात्म्यं पश्य पुत्र त्वं दानवस्य दुरात्मनः ।**
**जहि शीघ्रं दुराचारं द्रष्टुमिच्छामि ते बलम्।**
**क्यव्यनदंश्च महाकाया दैत्या जलधरोपमाः ।**
**आसीच्च निश्चितं तेषां जितमस्माभिरित्युत।**

---

(०१)(१) सहसा (for महिषं); विकीर्णा
(०२)(१)क्षुद्रम् (for कुशम्); (२) भद्र (रुद्र); (३) सृत्य ) (for द्रुत्य); स (for च); (४) स रुद्र (for रुद्रस्य),
(०३)(१) क्षुद्रो (for क्रुद्धो); (२) स तथा; स तदा; तरसा (for सहसा); (३) त्रेसतू; रेजतू; ररास०; रसेते; रसतो; त्रसतो (for रेसतू); तूर्णं (for गाढं), (४) तदर्षयः; (ऋ)षयस्तदा (०था) (for मह),
(०४)(१) विनदश्च; ० अन; व्यनदच्च; (३) निश्चयं; निश्चयसू (for निश्चितं), (४) जयमस्माकमित्युत,
(०५)(१) त (य); थाभूत च; तथाभूतेषु; तेपि; तेन०; ते च; तेथ (for ते तु);

तथाभूते तु भगवानागतं महिषं रणे।

इत्युक्त्वा भगवान्स्कन्दं परिपूज्य महेश्वरः ।

अयोजयन्निग्रहार्थं महिषस्य गतायुषः ।[०१]

महिषोऽपि रथं दृष्ट्वा रौद्रो रुद्रस्य चानदत्।**
देवान्सन्त्रासयंश्चापि दैत्यांश्चापि प्रहर्षयन् ।। ९३ ।।[०२]

ततस्तस्मिन्भये घोरे देवानां समुपस्थिते।**
आजगाम महासेनः क्रोधात्सूर्य इव ज्वलन् ।। ९४ ।।[०३]

लोहिताम्बरसंवीतो लोहितस्रग्विभूषणः ।**
लोहिताश्वो महाबाहुर्हिरण्यकवचः प्रभुः ।। ९५ ।।[०४]

रथमादित्यसङ्काशमास्थितः कनकप्रभम्।**
तं दृष्ट्वा दैत्यसेना सा व्यद्रवत्सहसा रणे ।। ९६ ।।

स चापि तां प्रज्वलितां महिषस्य विदारिणीम्।**
मुमोच शक्तिं राजेन्द्र महासेनो महाबलः ।। ९७ ।।[०५]

सा मुक्ताभ्यहरत्तस्य महिषस्य शिरो महत्।**

---

(०१)अहनन्; आगतं; आहतं (for नावधीन्); (३) स (for च); रणे (for तदा); (४) दानवस्य (for मृत्युं तस्य); सदं (for त्मनः),

(०२)(१) (ऽ) भि०; वि०; हि (for पि); सृष्ट्वा; रुद्र (for दृ); (२) रौद्रो (for रौद्रं); चानदत् (for ना); रौद्रं सोप्यन्वनादयत्; रौद्रं रुद्रमचोदयत्० (३) च त्रास; सन्ताप (for सन्त्रास); (४) (अ)ति (for (अ)पि); दैत्यांश्च प्रत्य ) ति) हर्षयन्; दानवांश्च ग्रहः.

(०३)(१) तस्मिंस्तदा (for ततस्तस्मिन्); रथे; क्षये (for भये); (३) तेजा (for सेनः); (४) क्रुः) (for क्रोधात्); इवोज्वलन् (for इव ज्वलन्),

(०४)(१) सम्भूतो (for ०संवीतो); (२) लोहिताक्षो; श्वो (for स्थो); (३) कवच० स्रजः; ०कवचावृतः; कवचोज्वलः; कवचायुधः

(२) प्रभः (for प्रभम्); (३) देव० (for दैत्य); (४) सहसा व्यद्रवद्

(०५)(१) चामितां; चान्विता) (for चापि तां); (२) विदारणीं; विदारणे,

**पपात भिन्ने शिरसि महिषस्त्यक्तजीवितः ।। ९८ ।।**[०१]

***अधिकपाठः**

**पतता शिरसा तेन द्वारं षोडशयोजनम्।**

**पर्वताभेन पिहितं तदागम्यं ततोऽभवत्।**

**उत्तराः कुरवस्तेन गच्छन्त्यद्य यथासुखम्।**[०२]

**क्षिप्ताक्षिप्ता तु सा शक्तिर्हत्वा शत्रून्सहस्रशः ।****
**स्कन्दहस्तमनुप्राप्ता दृश्यते देवदानवैः ।। ९९ ।।**[०३]

**प्रायः शरैर्विनिहता महासेनेन धीमता**
**दानवेषु महाराज तस्मिन्देवासुरे युधि ।। १०० ।।**[०४]

**शेषा दैत्यगणा घोरा भीतास्त्रस्ता दुरासदैः ।****
**स्कन्दपारिषदैर्हत्वा भक्षिताश्च सहस्रशः ।। १०१ ।।**

This Stange is Interchenged in TRK After 99.[05]

**दानवान्भक्षयन्तस्ते प्रपिबन्तश्च शोणितम्।****
**क्षणान्निर्दानवं सर्वमकार्षुर्भृशहर्षिताः ।। १०२ ।।**[०६]

**तमांसीव यथा सूर्यो वृक्षानग्निर्घनान् खगः ।****

---

(०१)(१) (आ)भिहनत्; व्यहरत्; (अ)भ्य०द्रवत्; चाभिहनत्; (अ)र्गुभ्यहरत्; ह्यहनत्; ह्यछिनत्; ह्यभिनत्; ह्यहरत् (for (अ)भ्य०हनत्); तस्य) (for शक्तिर्), (२) (ऽ)हरत् (for महत्); (३) भिन्नः (for भिन्ने), (०२) पपात (for पतता); तद्दश (for षोडश); पतता तेन (for पर्वताभेन); महत् (for भवत्); (इ) ति ) (for (अ)द्य) ,

(०३) (१) क्षिप्तातेन (for क्षिप्ताक्षिप्ता); च (for तु),

(०४)(१) शरैद् हतैद् (for हता); प्रायो हतेषु शूरेषु ०.

(०५)(३) तेषां ) येन्ये); ) (for शेषा); (४) जिताम् ) (for भीतास्); तत्र (for त्रस्ता); सदाः (for सदैः); (५) स्कन्दपारिषदैर्, घोरैर् (for हत्वा); (६) च सहस्रशः (for शत),

(०६) (२) पिबन्तश्चैव; पिबतश्चापि; प्रपिबति स्म (for प्रपिबन्तश्च); (३) सैंन्यम् (for सर्वम्); ०र्दानवान्सर्वान्;० दुःखिताः (for हर्षिताः),

तथा स्कन्दोऽजयच्छत्रून्स्वेन वीर्येण कीर्तिमान् ॥ १०३ ॥[०१]

लक्षालङ्कारः- धनान् खग इत्यत्र खे गच्छतीति खगो वायुः ।

सम्पूज्यमानस्त्रिदशैरभिवाद्य महेश्वरम्।**
शुशुभे कृत्तिकापुत्रः प्रकीर्णांशुरिवांशुमान् ॥ १०४ ॥[०२]

नष्टशत्रुर्यदा स्कन्दः प्रयातस्तु महेश्वरम्।**
तदाब्रवीन्महासेनं परिष्वज्य पुरन्दरः ॥ १०५ ॥[०३]

पुरन्दरः

ब्रह्मदत्तवरः स्कन्द त्वयायं महिषो हतः ।
अजेयो युधि देवानां दानवस्सुमहाबलः ॥ १०६ ॥

देवास्तृणसमा यस्य बभूवुर्जयतां वर ।**
सोऽयं त्वया महाबाहो शमितो देवकण्टकः ॥ १०७ ॥[०४]

*अधिकपाठः

This Stange is Interchenged in TRK After105.[05]

शतं महिषतुल्यानां दानवानां महा(त्वया)रणे।**
निहतं देवशत्रूणां यैर्वयं पूर्वतापिताः ॥ १०८ ॥[०६]

तावकैर्भक्षिताश्चान्ये दानवाः शतसङ्घशः ।**
अजेयस्त्वं रणेऽरीणामुमापतिरिव प्रभुः ।[०७]

---

(०१)(२) गणान्; घनं (for धनान्); वृक्षसङ्घान्हुताशनः, (३) सैन्यं) (for शत्रून्); (४) तेन (for स्वेन); सैन्येन (for वीर्येण); वीर्यवान्; शक्तिमान् ) (for कीर्ति); स्वेनानीकेन वीर्यवान्,

(०२) (२) अभिपूज्य (for वाद्य); च शङ्करं (for महे),

(०३) (२) तु ) (for च); श्वरः (for ०श्वरम्); (३) तदा० (for अथा); (४) पूज्य (for ष्वज्य),

(०४)(१) वर ) (for वरः);

(०५) (३) समा (for मया); (४) बिभीयुद् (for बभू वुर्); वरः (for वर), (६) समितौ (for शमितो),

(०६) (२) महा (for त्वया); (४) कम्पिता;) (for तापिताः),

(०७) (१) चान्यैर् (for चान्ये),

भवतोऽनुचरैर्वीर गणैः परमभीषणैः ॥ १०९ ॥ (01)

एतत्ते प्रथमं देव ख्यातं कर्म भविष्यति
त्रिषु लोकेषु कीर्तिश्च तवाक्षय्या भविष्यति ** ॥ ११० ॥(०२)

वशगाश्च भविष्यन्ति सुरास्तव महाभुज ॥ १११ ॥(०३)

**मार्कण्डेयः**

एवमुक्त्वा महासेनं निवृत्तः सह दैवतैः ।**
अनुज्ञातो भगवता त्र्यम्बकेण शचीपतिः ॥ ११२ ॥(०४)

गतो भद्रवटं रुद्रो निवृत्ताश्च दिवौकसः ।**
उक्ताश्च देवा रुद्रेण स्कन्दं पश्यत मामिव ॥ ११३ ॥(०५)

स हत्वा दानवगणान्पूज्यमानो महर्षिभिः ।**
एकाह्नैवाजयत्सर्वं त्रैलोक्यं वह्निनन्दनः ॥ ११४ ॥(०६)

स्कन्दस्य य इदं विप्रः पठेज्जन्म समाहितः ।**
शृणुयाद्ब्राह्मणेभ्यो यः श्रावयेद्वा विचेतनम् ।
धनमायुर्यशो दीप्तिं पुत्रान्शत्रुजयं तथा ।**
स पुष्टिमिह सम्प्राप्य स्कन्दसालोक्यमाप्नुयात् ॥ ११५ ॥(०७)

---

(०१) (३)क-ख-घ- अजय्य (for अजेय),
(०२)(१) परमं (for प्रथमं); कर्म (for देव); (२) देव ख्यातं (for ख्यातं कर्म), देव ख्यातिं गमिष्यति; महाभुज) (for सुरा); सुराश्च तव सत्तम
(०३)(१) सेनं त्वेवम्; ०सेनमेवम् (for सेनेत्येवम्); एवमुक्त्वा महासेनं; सुरात्मजं त्वेवमुक्त्वा;
(०४)(२) सर्वदैवतैः
(०५)(१) गते; ततो (for गतो); रुद्रवटं; भद्रवटाद्; रुद्रे (for रुद्रो); (२) विनिवृत्ता (for निवृत्ताश्च); (३) उक्तं च,
(०६)(२) महाबलः ) (for महर्षिभिः); (३) एकाहेन ) (for एकाह्नैव); (अ)भजत् (for (अ)जयत्),
(०७)(१)ख-श्वणुयाहिब्राह्मणेभ्ये व श्रावयेद्वा..पि यो नरः ।, धनमायुर्यशोद्दीप्तिं पुत्राञ् शत्रुजयं तथा ।।, इमं; यो जनो (for य इदं); विप्रः (for जन्म); (२) पठेद्वै (for पठते); पठेज्जन्म समाहितः; (४) माप्नयात् (for तामियात्),

अस्मिन्  पर्वणि १८८ अध्याये ११५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मार्कण्डेयसमास्यापर्वणि आङ्गिरसे स्कन्दोत्पत्तौ महिषासुरवधे अष्टाशीत्यधिकशततमोऽध्यायः ।। १८८ ।।